Calcutta Sanskrit College Research Series No. XLVIII.

Published under the auspices of the
Government of West Bengal

LEXICON NO. 2

अमरसिंहविरचिते नामलिङ्गानुशासने

(अमरकोषे)

रायमुकुटकृता

पदचन्द्रिका

SANSKRIT COLLEGE
CALCUTTA
1966

Calcutta Sanskrit College Research Series

PADACANDRIKĀ

A commentary on the Nāmaliṅgānuśāsanam of Amara

(AMARAKOṢA)

by

RĀYAMUKUṬA

(Text & the Commentary)

Volume One

Edited By

KALI KUMAR DUTTA, SASTRI,

M.A., D.Phil., Kāvya-Sāṅkhyatīrtha,
Professor of Sanskrit Language & Literature,
Department of Post-Graduate Training & Research,
Sanskrit College, Calcutta.

SANSKRIT COLLEGE
CALCUTTA
1966

Published by
The Principal, Sanskrit College,
1, Bankim Chatterjee Street, Calcutta-12

Price: Rs. 25.00

Printed by
S. N. Guha Ray at the Sree Saraswaty Press Limited
32, Acharya Prafulla Chandra Road, Calcutta-9

कलिकातासंस्कृतमहाविद्यालयगवेषणाग्रन्थमाला—ग्रन्थाङ्कः ४८

अमरसिंहविरचिते नामलिङ्गानुशासने

रायमुकुटकृता

पदचन्द्रिका

(मूलसहिता)

अमरकोषः

प्रथमः काण्डः

कलिकातासंस्कृतमहाविद्यालयस्थगवेषणाविभागीय-
संस्कृतभाषासाहित्याध्यापकेन
एम्. ए., डि. फिल्., शास्त्रि-काव्य-सांख्यतीर्थोपाधिमता
श्रीकालीकुमारदत्तेन
सम्पादिता

१८८८ शकसंवत्सरे कलिकातानगर्यां प्रकाशिता

CONTENTS

FOREWORD

For a long time some Indian scholars are reported to have evinced their interest in bringing out an edition of Rāyamukuṭa's commentary on Amarakoṣa. But uptil now we have not come across any portion of the work in print excepting two fascicules published quite a long time ago by Anundorum Borooah. As we all know it is very difficult to secure a really dependable manuscript for the preparation of a critical edition of this commentary. Our much esteemed chairman of the Board of Editors, Dr Radha Govinda Basak informed us of a manuscript which he found in the collections of Varendra Research Society now in East Pakistan. Unfortunately it has not been possible for us to get any access to it.

As the work is a voluminous one it has been decided to publish it in parts. This has one advantage. Scholars working in the field will now find an opportunity of knowing the character, value and importance of this commentary and will no longer have to wait for years when the work will be completed. It is indeed very gratifying that the present editor has spared no pains in making the work as much critical and useful to scholars as possible.

Sanskrit College,
Calcutta,
August, 1966

GAURI NATH SASTRI

PREFACE

The commentary *Padacandrikā* on the lexicon of *Amara* by *Rāyamukuṭa* alias *Bṛhaspati Miśra* stands unique in the field of Sanskrit lexicography. In this commentary the scholiast does not put up any claim for originality in his work but at the same time he makes an attempt to emphasise the fact that he spared no pains in the matter of "culling the essence" from the works of his predecessors, sixteen in number, whose texts were available to him. In fact, however, this commentary has been held in high esteem not only for the reason that it contains valuable matters gleaned from a number of ancient texts, but also for the fact that the erudite commentator collated matters from his predecessors with much care and skill, examined them critically and very often recorded his own opinion when he thought it fit to differ from his forerunners. His commentary appears to occupy the position of a '*vulgate text*' freely drawn upon by almost all his successors in the field and it is very interesting to note that some of the stalwarts amongst later scholiasts in spite of their indebtedness to *Mukuṭa* made him the target of their attack and took him to task for some of his faults which in a majority of cases do not appear to be warranted. The importance of this work can easily be gauged from these facts.

It is a matter of much regret that this commentary has never been in print excepting the two very small fascicules published through the efforts of Late Anundorum Borooah nearly eighty years ago. Needless to say that the publication of this commentary is really a desideratum.

Sometime back the present editor in course of his work in the Library of Sanskrit College, Calcutta, hit upon two manuscripts, one—a not very old collection of extracts from the commentary of *Rāyamukuṭa* in a good condition and the other—the whole text of *Rāyamukuṭa's* commentary in a deplorable condition. Later on he procured a few manuscripts from different sources and finally could have access only

to a number of microfilm copies through the goodness of the authorities of the India Office Library, London. Though these materials are not sufficient for a text-critical edition of the commentary yet he ventures to publish the text because of the fact that from a comparison of the readings of the manuscripts with the citations by different authors belonging to different times and regions, it occurred to him that with the materials at hand it will not be impossible for him to present to the academic world at least an understandable form of the commentary when none is available to them. He also expects that this edition will facilitate in future the publication of a text-critical edition of the same with more manuscript materials sufficient for such an edition.

The present editor expects to complete the work in a series of **three volumes** each containing a complete section (*kāṇḍa*) of the text which goes by the name *Trikāṇḍa*. In this edition the text of *Amara's Nāmaliṅgānuśāsanam* has been given with the readings accepted by *Rāyamukuṭa* while other variants are noted in their proper places. The commentary has been printed with the words of the *Amara's* text (*pratīkas*) in bold letters for the facility of readers. For the sake of convenience, all words noted in the commentary are displayed in the margins. As some of the words of the text are omitted in the commentary, they are indicated in the margins with the mark of an asterisk (*). Additional words noted in the commentary are given in the margins within brackets for distinguishing them from the words of the original text. With a view to making this edition useful to lovers of Sanskrit, a word-index with a pentaglot vocabulary consisting of *Bengali*, *English*, *French*, *German* and *Hindi* equivalents of Sanskrit words is appended at the end of the book. References to some of the citations are given in the body of the book but in order to avoid clumsiness the rest of them are reserved for the *Notes* Section in which the editor intends to incorporate some important matters including criticism of the commentary available in other sister productions, both printed and not yet printed. It is also contemplated that an *Introduction* consisting

of the studies by the present editor on the original text, the commentary, the authors and the works cited and similar other matters will be appended to the last volume of the present edition.

I could not make this venture if I did not receive material help and encouragement from my preceptor Dr Gaurinath Sastri, Principal, Sanskrit College, Calcutta. My language is too poor to express my gratitude to him. My thanks are due to the authorities of the India Office Library, London, who were kind enough to give me the microfilm copies of a number of manuscripts preserved in their library. I am much indebted to Pandit Jagadishchandra Tarkatirtha of the Department of Manuscripts, Sanskrit College, Calcutta, but for whose help I could not have discovered the manuscript of the commentary. I am also thankful to Sri Bijayanath Mukherjee and Sri Sachindranath De, Librarians of the Sanskrit College Library who made it possible for me to look into some of the rare volumes from different quarters. My thanks are due also to Dr Samarendranath Biswas and Dr Brahmananda Gupta, my colleagues in the Department and to Dr Muniswar Jha, Head of the Department of Linguistics, Sanskrit College, Calcutta, for rendering me help in various ways in the preparation of this work.

I express my thanks to Pandit Sri Nanigopal Tarkatirtha, Editor, Publication Department of the same College and also to the authorities of the Sree Saraswaty Press Limited, Calcutta, for expediting the publication of this volume.

Sanskrit College,
Calcutta
August, 1966

KALI KUMAR DUTTA

ABBREVIATIONS

A.—Sanskrit College Manuscript
B.—India Office Library Manuscript, Eggeling, No. 954.
B ,, Nos. 558, 515
B . Poona Manuscript, Ref. A. Borooah's ed.
C. Sanskrit College Manuscript containing extracts from Rāyamukuṭa
Colebrooke—H.T. Colebrooke:
(1) Ed. Amarakoṣa, Calcutta, 1883
(2) Miscellaneous Essays.
K.A.—Kāvyādarśa of Daṇḍin.
Kirāt—Kirātārjunīyam of Bhāravi.
MS.—Manuscript.
MSS.—Manuscripts.
Megha.—Meghadūta of Kālidāsa
Ragh.—Raghuvaṃśam of Kālidāsa
Śiśu.—Śiśupālavadham of Māgha
RM.—Rāyamukuṭa
RNC.—Rāmanātha Vidyāvācaspati, author of the Trikāṇḍaviveka.

त्रि०—त्रिलिङ्गम्
त्रिकाण्डवि०—त्रिकाण्डविवेकः
द०पा०—दशपादी
दिक्—दिग्वर्गः
द्वि०—द्विवचनम्
नाना०—नानार्थवर्गः
नयना०—नयनानन्दः (अमरटीकाकारः)
परि०—परिभाषा
पा०—पाणिनिः
पा० धा०—पाणिनीयधातुपाठः
पु०—पुंलिङ्गम्
बहु०—बहुवचनम्
भट्टो०—भट्टोजिदीक्षितः
भानु०—भानुजिदीक्षितः
मथुरेश—सारसुन्दरीकारो मथुरेशः
मल्लि०—मल्लिनाथः
मुकुट—रायमुकुटः
रघु०—रघुवंशम्
रघुनाथ—त्रिकाण्डचिन्तामणिकारो रघुनाथचक्रवर्ती
रामनाथ—त्रिकाण्डविवेककारो रामनाथविद्यावाचस्पतिः

अव्यय—अव्ययम्, अव्ययवर्गः
उ०—उणादिः, उणादिसूत्रम्
उज्ज्वल—उज्ज्वलदत्तः
का०—काशिका
काल०—कालवर्गः
कुमार—कुमारसम्भवम्
क्ली०—क्लीबलिंगम्
क्षीर०—क्षीरस्वामी
ग०—गणसूत्रम्

राय०—रायमुकुटः
वा०—वार्त्तिकम्
शिवदत्त०—शिवदत्तशर्मा (व्याख्यासुधायाः पादटीकाकारः)
श्लो०—श्लोकः
सर्वा०—वन्द्यघटीयः सर्वानन्दः (टीकासर्वस्वकारः)
सि० कौ०—सिद्धान्तकौमुदी
स्त्री०—स्त्रीलिङ्गम्
स्व०—स्वर्गवर्गः

अमरसिंहविरचितं

नामलिङ्गानुशासनम्

मङ्गलाचरणम् ।

यस्य ज्ञानदयासिन्धोरगाधस्यानघा गुणाः ।
सेव्यतामक्षयो धीराः स श्रिये चामृताय च ।।१।।

रायमुकुटरचिता पदचन्द्रिका

श्रीगणेशाय नमः ।

अध्यास्ते यः सर्वं[1] ध्रुव ईदृश इत्यगोचरो वचसः ।
अहमिति संविद्विषयः पुरुषः स परं पुरातनो जयति ।।१।।
हेतुर्महतः सूक्ष्मा सत्यपि जगदुपरि गौरवं यस्याः ।
श्रुतिपथनवप्रतिभा(न-)[2] शक्तिः सा किल करोतु मे कुशलम् ।।२।।[3]
श्रीवत्सलाञ्छनपदद्वयपद्मभृङ्गाद् गङ्गापयोऽन्वहविगाहनहीनपङ्कात् ।
मायाप्रतिग्रहनिवर्तनसत्प्रतिज्ञाद् गोविन्दनामजनकाद् जनकानुकारात् ।।३।।
भर्तृव्रतागणशिरोमणितां गतायाः सीमन्तिनीगणशतैरपि नन्दितायाः ।
दानव्रतौघविधिसाधितकीर्तिसीम्नो मातुश्च शीलधृतनीलसुखायिदेव्याः ।।४।।
योऽभूद् यस्य च योषिदद्भुतगुणा भूयो रमानिर्वृता
धत्ते यः कविचक्रवर्तिपदमप्याचार्यवर्यश्च यः ।
राढायामपि गाढनिर्मलकुलच्छत्रं कुलीनाग्रणी-
र्यः प्रापत् प्रणतः परं हरिपदद्वन्द्वारविन्दे च यः ।।५।।
ज्योतिष्मन्मणिपुञ्जरञ्जनरुचिं हारं ज्वलत्कुण्डले
रत्नौघच्छुरिता दशाङ्गुलिजुषः शोचिष्मतीरूर्मिकाः ।

---

1 सर्वा—B_1.
2 प्रतिमा—B., प्रतिमा—B_1. But the metre in these cases seems to be wanting a syllable. Hence प्रतिभान seems to be the original reading.
3 Stanzas 2-10 omitted in A.

यः प्रापद्[4] द्विरदोपविष्टकनकस्नानैरविन्दत् परं[5]
छत्रैस्तुरगैश्च **रायमुकुटा**भिख्यामभिख्यावतीम् ।।६।।
यत्पुत्रा नृपमन्त्रिमूलमणयो विश्वासरामादयः[6]
ख्याता दिग्जयिनामपीह जयिनो लोके कवीन्द्राश्च ये।
ब्रह्माण्डामरपादपादिसहितं येऽदुस्तुलापूरुषं
तत्तद्ग्रन्थविशेषनिर्मितकृतः कृत्स्नेषु शास्त्रेषु ते ।।७।।
पुण्यां पण्डितसार्वभौमपदवीं गौडावनीवासवाद्
यः प्राप्तः प्रथितो **बृहस्पतिरिति** क्ष्मालोकवाचस्पतिः।
कोषस्यामरनिर्मितस्य विविधव्याख्यानदीक्षागुरुः
सानन्दं **पदचन्द्रिकां** स कुरुते टीकामिमां कीर्तये ।।८।।
इयं षोडशटीकार्थसारमादाय निर्मिता।
अतोऽभिलिखितोऽर्थोऽस्यां न[7] हेयः सहसा बुधैः ।।९।।
अदसीयार्थहरणाद् यो मन्नामापनेष्यति।
तमेतत्कृतिनो दुःखशिखी धक्ष्यति सान्वयम् ।।१०।।

अभीष्टदेवतानमस्काराद्युपनीतमदृष्टं हि विघ्नापरनामकसाध्यप्रतिबन्धकाधर्मतिरोधानद्वारा प्रारिप्सितं परिसमापयतीति प्रामाणिकमतो निष्प्रत्यूहप्रारिप्सितपरिसमाप्तिहेतुस्वेष्टदेवतासंकीर्तनाद् विशिष्टादृष्टमुत्पिपादयिषुर्ग्रन्थकारः प्रथमपद्यं निबबन्ध––**यस्येति**। हे 'धीराः'! 'स' भगवान् 'सेव्यताम्' आराध्यताम्। धैर्यशालिन एव सेवितुं शक्नुवन्तीति तान् एव संबोधयति प्रकृतत्वात्[8]। 'युष्माभि'र्हितेच्छुभिः। स कः? 'यस्य गुणा' मैत्रीक्षमादयोऽणिमादयो वा। 'अनघा' निष्पापा रागाद्यसंवलिता इति यावत्। यद्वा–– 'अनघा' हृद्याः। तथाच धरणिः–– अनघोऽपापहृद्ययोरिति। गुण्यन्ते अभ्यस्यन्ते इति गुणाः। गुण[9] आमन्त्रणे। कर्मणि घञ्। यस्य[10] किंभूतस्य? 'ज्ञानदयासिन्धोः'। 'ज्ञानं' समस्तविषयावबोधः। दृष्टं स्वार्थमनपेक्ष्य परदुःखप्रहाणेच्छा 'दया'। तयोरम्बुतुल्ययोः सिन्धुरिव सिन्धुरितिरूपकम्[11]।

4 प्राप्य—B_1.
5 सकलस्नानैरविन्दन्नृपाच्—Colebrooke ; सकलकनक—B_1 रविन्दत् परा––B.
6 विश्रामरामादयः—B.
7 अस्मान्न—B_1.
8 प्रकृत्वताद्—mss.
9 गुणत्क—B_3
10 Omitted in B_1.
11 B_1 adds प्रापकम्।

ताभ्यां सिन्धुरिव सिन्धुरिति वा। प्रकृत्यादित्वाद् वा तृतीया। "तृतीये" ति (पा० २।१।३०) योगविभागात् समास इति सर्वधरादयः। सिन्धुशब्दोऽत्र विपुलाधारत्वादुपचरितः। सिन्धुसाम्यम् आह––'अगाधस्य' अनवच्छिन्नमहिम्नो अन्यैरनवगतज्ञानपारत्वादपरिच्छेद्यगाम्भीर्यस्य वा[12]। स किंभूतः? 'अक्षयः' परहितापादानेषु नास्ति क्षयो विरामो यस्य इति अक्षयः, मरणराहित्याद् वा। फलं विना कथं प्रेक्षावत्-प्रवृत्तिरत आह[13]––'श्रिये च' इत्यादि। श्रीरत्र त्रिवर्गसम्पत्तिः। तां प्राप्तुम्। "क्रियार्थोपपदस्य च" (पा० २।३।१४) इत्यादिना चतुर्थी। तथाच व्याडिः––"लक्ष्मीसरस्वती[14]त्रिवर्गसम्पत्ति[15]भूतिशोभासूपकरणवेशरचनाविधासु च श्रीरिति प्रथिता।।" इति। 'अमृताय' च मोक्षाय च। चकारद्वयमुभयप्राधान्यद्योतनार्थम्। भोगेच्छुभिः श्रिये, मुमुक्षुभिर्मोक्षाय इत्यर्थः। एतेन हिताहितज्ञो हितैषी ईशिता च, अतः सेवार्ह–– इति विशेषणानामभिप्रायः।

समुद्रपक्षे––'स सिन्धुः' समुद्रः सेव्यताम्। स कः? 'यस्य' अगाधस्य अतलस्पर्शस्य, 'अक्षयस्य' सदा परिपूर्णस्य, 'अस्य' विष्णोः 'क्षयस्य' निवासस्य वा[16]। 'गुणा' नैर्मल्यादयः। 'अनघा' हृद्याः, रत्नाकरत्वादतिशयस्फुटीभूताः। 'ज्ञानं' ज्ञप्तिः। 'दा' दानम्। तयो 'ईः' लक्ष्मीः। 'ज्ञानदे' गङ्गा। तया उपलक्षितस्य।[17]

'श्रिये' लक्ष्म्यै, 'अमृताय' पीयूषाय च। सिन्धुरपि सुरासुरैर्लक्ष्म्यै सुधायै च सेवितः। सेवतिरत्र पक्षे अनुशीलनार्थः। यथा––"स्त्रियं सेवत" इति।

12 अन्यैरनवगतत्वाद् वा ज्ञानपारत्वादनवच्छिन्नगाम्भीर्यस्य––A.
13 फलाधीनैव प्रेक्षावत्प्रवृत्तिरत आह—A. ; B_2 reads both the sentences together.
14 A adds here श्री।
15 सम्पद्विभूति––B_1.
भानुजि reads—लक्ष्मीसरस्वतीधात्रिवर्गसम्पद्विभूतिशोभासु।
उपकरणवेशरचनाविधानेषु च श्रीरिति प्रथिता ।।
16 This interpretation is omitted in B_1.
17 The text is extremely corrupt here. A reads––गुणा अनघा रत्नादिमत्त्वान्नैर्मल्यादयः and omits "अनघा हृद्याः. . . नैर्मल्यादयः" found in B_1.

B_1 reads after this दयासङ्गितया उपलक्षितस्य। स कीदृशः? 'अक्षयः' सदा पूर्णः। अस्य विष्णोः सदा क्षयो निवासो यत्र वा। 'गुणा अनघा' रत्नादिमयत्वान्मैर्मल्यादयः। भानुजि seems to follow a text which partially agrees with both A and B_1 : अक्षयस्य सदा परिपूर्णस्य अस्य विष्णोः क्षयस्य निवासस्य वा गुणा अनघा रत्नादिमत्वान्नैर्मल्यादयः।

अत्राऽनुक्तोऽपि वाक्ये लक्षणार्थो ज्ञानदयादिभिः स्फुटं प्रतीयते। न च नेयता-दोषः, प्रत्युत प्रसादो नाम अर्थगुण एवायम्। तदुक्तं सरस्वतीकण्ठाभरणे-- "यत्तु प्राकट्यमर्थस्य प्रसादः सोऽभिधीयते" (१।७३) इति। यथा--"अयमुदयति मुद्राभञ्जनः पद्मिनीनामुदयगिरिवनाली" इत्यादौ अनुक्तोऽपि सूर्य उदयतिना पद्ममुद्राभञ्जनादिना च लक्ष्यते[18]। यद्यपि काव्यप्रदीपे मुख्यार्थहति-नाम्नो दोषस्य "अयमुदयति मुद्राभञ्जन" इत्याद्युदाहरणम् उपन्यस्तम्, तथापि निरनुरोधमुख्यपदार्थाभावे मुख्यार्थहतिर्दोष इत्यवधेयम्। इह तु बुद्धादिपदोल्लेखे कृते दक्षिणपथपथिकसार्थानाम् अनुपादेयता स्यात्; कृष्णादि-पदोद्देशे तु तत्कालकवलितमदोद्धुराणां बौद्धानाम्--इत्युभयसाधारण्येन उपादेयतार्थं मुख्यार्थानुद्देशो न दोषाय।[19] अन्ये त्वाहुः--"क्वचिद् विशेषणम् अपि विशेष्यप्रतिपत्तिकरम्। यथा--"निधानगर्भामिव सागराम्वराम्" इति। इहापि ज्ञानदयासिन्ध्वादिविशेषणं विशेष्यप्रतिपत्तिकरम् इत्यदोषः।" श्लिष्ट-रूपकाख्योऽयमलंकारः ॥१॥

अभिधेयप्रयोजनानभिधाने प्रेक्षावदप्रवृत्तेः सम्प्रति स्वप्रवृत्तिप्रयोजनं शास्त्रप्रयोजनं च साभिधेयमाह--**समाहृत्ये** त्यादि--

उपोद्घातः

समाहृत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः।
सम्पूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम् ॥२॥

मया "**नामलिङ्गानुशासनं**" 'शास्त्रमुच्यते।' "णम प्रह्वत्वे शब्दे च" इत्यनुसारात्* नम्यते अभिधीयते अर्थोऽनेनेति 'नाम'। यद्वा म्नायते अभ्यस्यते इदम् इति 'नाम' स्वर्गादिशब्दः। म्ना अभ्यासे। "सर्वधातुभ्यो मनिन्" (उ० ४।१४४)। पृषोदरादित्वात् (पा० ६।३।१०९) प्रकृतिमलोपः। लिङ्गचते ङीप्टाबादिभि-र्व्यज्यते इदमिति 'लिङ्गं' स्त्रीपुंनपुंसकादि। नामलिङ्गे अनुशिष्येते व्युत्पाद्येते अनेनात्र इति वा 'नामलिङ्गानुशासन'मिदं शास्त्रम्। "करणाधिकरणयोश्चे"ति (पा० ३।३।११७) ल्युट्। किं कृत्वा।? अन्येषां **व्याडिवररुचिकात्यायनादीनां** नामानुशासनानि लिङ्गानुशासनानि च 'तन्त्राणि' समाहृत्य' एकीकृत्य।

18 अनुक्तोऽपि . . . भञ्जनादिना च—omitted in A.
19 B and B_1 add here—अभिधेयप्रयोजनानभिधाने प्रेक्षावदप्रवृत्तौ न दोषाय।
They read here—उभयसाधारण्ये च नोपादेयतार्थं मुख्यानुद्देशोऽयमलंकारः।
* अनुशासनात्?

एतेन स्वकपोलकल्पितत्वनिरासः। बहुवचनेन तन्त्राणां भूयस्त्वमभिप्रेतम्। अतएव सर्वोत्कर्षात् 'संपूर्ण'मिदं गुणैः संपूर्णमिति यावत्। यथा--"संपूर्णतेयं[20] काव्यस्य" इति। यतस्त्रिकाण्डोत्पलिन्यादीनि नाममात्रतन्त्राणि। **व्याडि-वररुच्यादिप्रणी**तानि तु लिङ्गमात्रतन्त्राणि। यद्वा--'वर्गैः' संपूर्णम्। पूर्व-व्याख्याने तु वर्गैरित्युपलक्षणे (पा० २।३।२१) तृतीया। वर्गैर्लक्षितमित्यर्थः। 'वर्गः' प्रकरणम्। प्रकरणवच्च सुखग्राह्यं भवति। ननु तर्हि कात्यायनादय एव सन्तु किमनेनेति वर्गविशेषणमाह--**संक्षिप्तैः प्रतिसंस्कृतै**रिति। स्तोकेन भूयसोऽभिधानं 'संक्षेपः'। सूक्तिरचना 'प्रतिसंस्कारः'। यद्वा--हरिप्रियादिवत् 'प्रतिसंस्कारः'। अयमर्थः--हरिरिति विष्णोर्नाम नोक्तम्। लक्ष्मीपर्याये तु हरिप्रियेत्युक्तम्। तेन हरिरप्यस्य नाम--इत्युक्तं भवति। **पूर्वटीकाकृतस्तु**-- 'संक्षेपो'ऽसारत्यागः। 'प्रतिसंस्कारः' सतो गुणान्तराधानम् इत्याहुः। **क्षीर-स्वामी** तु 'संक्षिप्तै'र्लघूकृतैः, 'प्रतिसंस्कृतैः' प्रत्येकं परिपाटीस्थापनादिना कृतोत्कर्षै[21]रित्याह। एतदभिधायकं शास्त्रं 'नामलिङ्गे' त्वभिधेये। ताभ्यां सहास्य शास्त्रस्य वाच्यवाचकलक्षणः सम्बन्धः। प्रयोजनं तु नामलिङ्गानुशासनपदो-पात्तं[22] सदसद्विवेकनैपुण्यम् ॥२॥

प्रतिनामलिङ्गाभिधाने ग्रन्थगौरवमपाकुर्वन् लिङ्गज्ञानोपायम् आह-- **प्रायेति**--

प्रायशो रूपभेदेन साहचर्याच् च कुत्रचित्।
स्त्रीपुंनपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित् ॥३॥

'प्रायशो' बाहुल्येन। 'रूपभेदो' यथाक्रमं स्त्रीपुंनपुंसकानां ङ्याप्-विसर्ग-विन्दुकृतस्तेन स्त्रीपुंनपुंसकं ज्ञेयम्। यथा--"कौमोदकी गदा" "खड्गो नन्दकः", "सलिलं कमलं जलम्"। यथा वा--"लक्ष्मीः पद्मालया पद्मा" "पिणाकोऽजगवं धनुः"। स चायं क्वचिद् विशेषणपद-सर्वनामपदस्थोऽपि निर्णायकः। आद्यो यथा--"कपोलौ तत्परो हनु" रिति। अत्र 'तत्पर' इति विशेषणाद्धनोः पुंस्त्वं प्रतीयते। द्वितीयो यथा--"कुतूः कृत्तेः स्नेहपात्रं सैवाल्पा कुतुपः पुमान्" इत्यत्र 'सा' इत्यस्योक्तेः कुत्वाः स्त्रीत्वम्[23]। 'प्रायश'

20 सम्पूर्णेयं—B., B_1.
21 कृतकार्यैः—B_1. but क्षीर's readings do not support this variant.
22 . . . पदोपेतं—B, B_1.
23 सा इत्यस्योक्तेः—omitted in A.

इति किम्? सुधर्मा। रूपभेदात् स्त्रीपुंलिङ्गो मा भूत्, स्त्रीलिङ्ग एव यथा स्यात्। निश्चितलिङ्गेनाविप्रकर्षः 'साहचर्यम्'। यत्र रूपभेदो नास्ति तत्रानेनापि तत् कुत्रचिज् ज्ञेयम्। यथा--"अश्वयुगश्विनी," "भानुः करो", "वियद्विष्णुपदम्।" अत्राश्वयुग्भानुवियन्ति साहचर्यात् स्त्रीपुंनपुंसकानि। अन्यथा काकुधेनुप्रभृतीनां[24] स्त्रीत्वदर्शनात् स्त्रीत्वमपि भानोः शङ्क्येत। 'प्रायश' इति साहचर्येणापि संबध्यते, मध्ये चकारात्। तेन "अवटुर्घाटा कृकाटिका" इत्यत्र अवटोः स्त्रीत्वं न स्यात्। 'तद्विशेषविधेः' तस्य स्त्रीपुंनपुंसकस्य विशेषोपादानादपि क्वचित् तज्ज्ञानं यत्र रूपभेदसाहचर्ये न स्तः। यथा--"द्योदिवौ द्वे स्त्रियौ", "नेमिः स्त्री स्यात् प्रधिः पुमान्", "रोचिः शोचिरुभे क्लीबे" इति। 'प्रायश' इति[25] "बह्वल्पार्था" दित्यादिना (पा० ५।४।४२) शस्।।३।।

द्वन्द्वैकशेषयो रूपभेदकृतलिङ्गनिर्णयाभावाल्लिङ्गज्ञानोपायं संकरदोषपरिहारं चाह—**भेदेति**।

भेदाख्यानाय न द्वन्द्वो नैकशेषो न सङ्करः।
कृतोऽत्र भिन्नलिङ्गानाम् अनुक्तानां क्रमादृते ।।४।।

'अत्र' अमरकोषे 'भिन्नलिङ्गानां' लिङ्गाभेदेनाख्यातुं[क] 'द्वन्द्व' 'एकशेषश्च' 'न कृतः'। द्वन्द्वो यथा--देवतादैवतामरा[ख]--इति न कृतः। एकशेषो यथा--खं नभः श्रावणो नभा--इत्यत्र खश्रावणौ[26] नभसी इति न कृतः[27]। एकलिङ्गानां तु कृतावेव। यथा--"स्वर्गनाकत्रिदिवत्रिदशालयाः", "अजा विष्णुहरच्छागा" इति। ननु भिन्नलिङ्गानामपि तौ कृतौ। यथा--"अप्सरोयक्षरक्षोगन्धर्वकिन्नरा" इति, "मातापितरौ पितरौ", इत्यत आह--'**अनुक्तानाम्**' इति। स्थानान्तरेऽनिर्दिष्टानां न कृतौ, निर्दिष्टानां तु कृतावेव[28]। इह तु स्थानान्तरनिर्देशो यथा--"स्त्रियां बहुष्वप्सरसः", "नैर्ऋतो यातुरक्षसी," "जनयित्री प्रसूर्माता तातस्तु जनकः पिता" इति। ननु **रत्नकोषा**दिवत् स्त्रीपुंनपुंसककाण्डविधानेन कथनमुचितम्। तथा सति रूपभेदसाहचर्यादि-प्रतिपत्तिगौरवमपि न स्यात्। तत् किमिति लिङ्गसंकरः[29] क्रियत? इत्यत आह--

24 काकु—omitted in B, B_1.
25 Omitted in B_1.
26 B_1 inserts तु।
27 कृतम्—B_1.
28 स्थानाचरे अनिर्दिष्टानां तु कृताभावेव—B_1. is evidently corrupt.
29 किमिति संकरः क्रियते—B, B_1.
क—भेदमाख्यातु°—शिवदत्तधृतः पाठः
ख—दैवतादेवतामराः—शिवदत्तधृतः पाठः।

'**क्रमादृत**' इति। क्रमं विना संकरो न कृतः, क्रमानुरोधात् तु कृत इति तात्पर्यम्। संकरस्तु भिन्नलिङ्गानां मिश्रत्वरूपः[क]। 'क्रमः' प्रक्रमः प्रस्ताव इति यावत्। यथा--स्वर्गप्रक्रमे द्योदिवौ भिन्नलिङ्गे अप्यवश्यवाच्यत्वात् कथिते[30], विष्णुप्रस्तावे च लक्ष्मीनामेति।[31] यद्वा "क्रमं विना भिन्नलिङ्गानां संकरो व्यामिश्रभावो न कृतः, क्रमेण तु कृत एव। यथा "सुरलोक" इत्यन्तेन पुंलिङ्गशब्दान्निरूप्य "द्योदिवा"विति स्त्रीलिङ्ग-शब्दावुक्तौ[ख], क्लीबे "त्रिविष्टप"मुक्तम्[ग]। एवं "जनुर्जननजन्मानी"ति क्लीबलिङ्गान्निरूप्य "जनिरुत्पत्ति" रिति स्त्रीलिङ्गावुक्त्वा[घ] "उद्भव"-शब्दः पुंलिङ्ग उक्तः[32]। इह तु **क्षीरस्वामि**कृतव्याख्याविशेषो ग्रन्थगौरवभयान्न लिखितः।।४।।

विशेषविधावपि लाघवार्थं परिभाषामाह--**त्रिलिङ्ग्याम्** इत्यादि--

त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने च[33] द्वयोरिति।
निषिद्धलिङ्गं शेषार्थं त्वन्ताथादि न पूर्वभाक् ।।५।।

त्रयाणां लिङ्गानां समाहार'स्त्रिलिङ्गी।' तत्र 'त्रिष्विति' पदं ज्ञेयम् इति परिभाष्यते। यथा "विम्बोऽस्त्री मण्डलं त्रिषु"। "स्त्रीपुंसौ मिथुनं द्वन्द्वम्"। तत्र 'द्वयो'रिति पदं ज्ञेयम्। यथा--"वह्नेर्द्वयोर्ज्वालकीलौ"। द्वयोरिति द्विशब्दप्रयोगोपलक्षणम्[34]। तेन "द्विहीनं प्रसवे सर्वं", "द्वयहीने कुकुन्दरे" इत्याद्युपपद्यते। तथा निषिद्धं लिङ्गं यस्य त'न्निषिद्धलिङ्गं' पदम्। अर्थ्यते गम्यते ज्ञायते शब्दोऽनेनेत्यर्थः[35]। प्रकृतेर्लिङ्गं त'च्छेषार्थं' शेषलिङ्गकं ज्ञेयमित्यर्थः। विशेषनिषेधे शेषाभ्यनुज्ञानात्। यथा "ह्लादिनी वज्रमस्त्री"ति स्त्रीलिङ्गनिषेधे विद्यमानस्य पुंनपुंसकस्य विधिः। तथा 'तु' शब्दोऽन्ते यस्य तत् 'त्वन्तम्'। अथशब्द आदिर्यस्य तद् 'अथादि'। त्वन्तञ्चाथादि च तयोः समाहारः 'त्वन्ताथादि'।

30 कथ्येते—B_1.
31 इह तु क्षीरस्वामिकृतव्याखानविशेषो ग्रन्थगौरवभयान्न लिखितः—B reads.
32 यद्वा क्रमं विना. . .पुंलिङ्ग उक्तः—omitted in B, B_1.
33 तु—B_2.
34 द्विशब्दोपलक्षणम्—B_1.
35 शब्देनेत्यर्थः—B_1.
क—मिश्रस्वरुपः—शिवदत्तः
ख—उक्ता—शिवदत्तः
ग—त्रिपिष्टपम् seems to be the form of the word accepted by रायमुकुट
घ—वुक्तौ—A, B_1.

त्वन्ताथादि नामपदं लिङ्गपदं च पूर्वं न भजते, परेण सह तत्-[36]सम्बन्ध इत्यर्थः। तत्र नामपदं यथा—"पुलोमजा शचीन्द्राणी नगरी त्वमरावती", "जवोऽथ शीघ्रं त्वरित" मिति च। लिङ्गपदं यथा—"अन्तर्धा व्यवधा पुंसि त्वन्तर्धिरपवारणम्", "शस्तञ्चाथ त्रिषु द्रव्ये" इति। 'अथ'-शब्दोऽत्र उपलक्षणम्। तेन 'अथा'-शब्दोऽपि ग्राह्यः। यथा—"अनुक्रोशोऽप्यथो हसः"। न्यायसिद्धं चैतत्। 'तु'ना पूर्वस्माद्विशेषद्योतनात्, अथशब्देन चार्थान्तरारम्भात्। ननु कथं तर्हि "पुंस्येवान्धुः प्रहिः कूप उदपानं तु पुंसि वा" इति? उच्यते—अत्र तुशब्देन नियमितपुंस्त्वमेव व्यवच्छिद्यते न तु नाम। यतः कूपः पुंलिङ्ग एव, उदपानं तु उभयलिङ्गमेवान्यत्र च दर्शनादित्यदोषः ॥५॥

36 तत्—omitted in B_1.

अमरसिंहविरचितं

नामलिङ्गानुशासनम्

प्रथमे काण्डे

१। स्वर्गवर्गः

पदचन्द्रिका। इह त्रैलोक्येऽभिधेये विशिष्टतया सृष्टिप्राथम्येन च आदौ स्वर्गवर्गोऽभिधीयते।

स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः।
सुरलोको द्योदिवौ द्वे स्त्रियौ* क्लीबे त्रिपिष्टपम्[37] ॥१॥

स्वरिति। **"अवश्यमेव संज्ञाशब्दानां सदसदर्थेन यथाकथञ्चिद् व्युत्पत्तिः कार्या तैलपायिकादिवद्"** इति भाष्यम्। स्वः
एवमन्यत्राप्युन्नेयम्। स्वृ शब्दोपतापयोः। स्वरति शब्दायते।" "अन्येभ्योऽपि दृश्यत" (पा० ३।२।७५) इति इति विच् गुणो रपरत्वं च। स्वरादित्वादव्ययत्वम् (पा० १।१।३७)। "अव्ययादाप्सुप" (पा० २।४।८२) इति सुलोपः। 'स्वः'-शब्दस्य रेफान्तत्वादुत्वं न भवति, "अतो रोरप्लुतादप्लुत" (पा० ६।१।११३) इत्यत्र रुसंबन्धिरेफस्य उत्वविधानात्। "स्वर्गे परे च लोके स्व" रित्यनेकार्थवर्गोपदिष्टस्यापि[38] यदत्र पर्यायेण कथनं तत् प्रचुर-[39]प्रयोगार्थम् मङ्गलार्थञ्च[40]। तथा चायमेव वक्ष्यति—"भूरिप्रयोगा ये येषु पर्यायेष्वपि तेषु ते" (नानार्थ०) इति। अतएवाव्ययवर्गकथितस्यापि स्वः-

37 RM. admits त्रिविष्टपम् also.
38 अव्ययवर्गपठितस्य—B.
39 भूरिप्रयोजनार्थम्—B.
40 Omitted in A, B_1, B_2.
* स्त्रियां—भानुजि

शब्दस्यात्र कथनम्। आदावुपादानं तु स्वःशब्दस्य मङ्गलार्थ-महाव्याहृतिशब्दार्थप्रविष्टत्वात्। तस्य चाव्ययमित्यव्यक्त-लिङ्ग(त्व)म्। तदुक्तम् —

"सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥" इति

कथं तर्हि रम्यं स्वरिति तद्विशेषणस्य क्लीबत्वम्? तथाच **सनातनः**—"स्वरपि मे न मनोहरमुत्त्रसत् पृषत-लोचनया रहितं त्वया" इति।* उच्यते—अत्र लोकाश्रय-त्वाल्लिङ्गस्य इति। तथाच **वामनः**—"द्विगुरपि पात्राद्यन्तः क्रियाव्ययविशेषणञ्चैक" इति। **कौमुदीकार**[41]स्त्वाह—"इह नामलिङ्गानुशासनेऽलिङ्गस्याप्यादौ कथनं मङ्गलार्थम्। लिङ्गा-दिकृतविकाराभावम् एतद्विशेषणस्य च नपुंसकत्वं सूचयितुं वक्ष्यति हि—'क्लीबे क्रियाव्ययानां भेदकानि'" इति। यद्यपि—

"यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्।
अभिलाषोपनीतं[42] च तत् सुखं स्वःपदास्पदम् ॥" इति

श्रुतेः ब्रह्मज्ञानानन्दपरत्वादत्रास्य गौणत्वं,[43] तथापि लाक्षणिका अपि मुख्यतुल्यकक्षाः प्रचुरप्रयोगिणः प्राचीना-चार्यैर्निबध्यन्ते। यदाह शब्दार्णवकारः—"वक्तॄणामस्वतन्त्र-त्वात्, काव्यादिषु च दर्शनात्, मुख्यवच्च प्रसिद्धत्वात् प्रथमालक्षणाश्रितेति।" अथवा अनेकार्थ एवायमत्रापि[44] शिष्टैरिष्टत्वात् ॥

स्वर्गः ऋज्यते स्थीयते अस्मिन्निति 'अर्गः' स्थानम्। ऋज गतिस्थानार्जनेषु।[45] "हलश्चे"ति (पा० ३।३।१२१)

* This is from सर्वानन्द। B_1. reads it—सनातनं स्वरपि येन मनोहरं हसत्पृषल्लोचनया रहितं तया। A reads—सनातनं स्वरपि प्रेममनो त्वसत् (त्रसत्?) पृषल्लोचनया रहितं तया।

41 कौमोदकीकार—B.

42 नेयं—B_2.

43 अत्राप्यगौरवम्—A.

44 एवायमपि—B_2.

45 ऋज गतिस्थानार्जनोपार्जनेषु—पाणिनीयधातुपाठः

घञ्। "चजोः कु घिण्ण्यतो"रिति (पा० ७।३।५२)कुत्वम्।[46] शोभनोऽर्गः 'स्वर्ग' इति प्रादिसमासः ॥

नाकः कं सुखम्। न कम् अकं दुःखम्। तन्नास्त्यत्र इति 'नाकः'। "नञोऽस्त्यर्थानां बहुव्रीहिर्वा चोत्तरपदलोपश्च" (वा०) इति समासोत्तरपदलोपौ। "नभ्राण्नपाद्" (पा० ६।३।७५) इति प्रकृतिभावः। विद्यमानविरिञ्चिर्वा ॥

त्रिदिवः "प्रधानेन व्यपदेशा भवन्ती"[47]ति त्रयो ब्रह्म-विष्णुरुद्रा दीव्यन्त्यत्र, त्रिदशा दीव्यन्त्यत्र इति वा 'त्रिदिवः'। दिवेः "घञर्थे कविधानम्" (वा०) इति कः। यद्यपि घञर्थे कविधाने "स्थास्नापाव्यधिहनियुध्यर्थम्" इति परि-गणनं वृत्तौ कृतं, तथापि सम्भवोदाहरणमेव तत्। "पृषो-दरादित्वाद् (पा० ६।३।१०९) दशशब्दलोप" इति **सर्वानन्दादयः**[48]। वयं तु "मूलविभुजादित्वात्" (वा०) कप्रत्ययमेव युक्तं मन्यामहे। तथाच तत्रैव सूत्रे **भाषावृत्तौ** 'त्रिदिव' इत्युदाहृतम्। **क्षीरस्वामी** तु "तृतीया द्यौर्लोक-स्त्रिदिवः। वृत्तिविषये दिवौकस इतिवत्। दिवशब्दोऽदन्तः, पूरणार्थाधिक्यं च त्रिशब्दस्य वृत्तौ त्रिभागवत्" इत्याह ॥ "त्रिदशा दीव्यन्ति क्रीड़न्ति शोभन्ते वा इति इगुपधत्वात् (पा० ३।१।१३५) के त्रिदिव"—इति तु **राजदेवः**।[49]

त्रिदशालयः त्रिदशानामालयो गृहं 'त्रिदशालयः' षष्ठीसमासः ॥

सुरलोकः सुराणां लोको भुवनं 'सुरलोकः'। षष्ठीसमासः। त्रिदशा-लयादयः सुरसदनाद्युपलक्षकाः। एवं यौगिकेषु सर्वत्रोन्नेयम् ॥

द्यो दीव्यन्त्यत्र इति 'द्यौः'। "दिवेर्ड्यो" रिति ड्योप्रत्ययः[50]। टिलोपे गोशब्दवद् रूपम्। **सुभूतिस्तु**—"द्यु अभिगमने। कर्मण्यौणादिको डोप्रत्यय" इत्याह ॥

दिव् दीव्यन्त्यस्यामिति 'द्यौः'। बाहुलकाद् दिवेर्डिविः।[51]

46 गत्वम्—B_1.

47 प्राधान्येन व्यपदेशो भवतीति—B_1.

48 सर्वधरादयः—B_2. Actually it is from सर्वानन्द।

49 Omitted in A.

50 See notes.

51 This is not found in सि° कौ°। तत्त्वबोधिनी refers to it as न्यासोहितसूत्र। बालमनोरमा refers to it but omits it in उणादि।

क्विपि तु "छ्वो"रित्यूठ् (पा० ६।४।१९) स्यात्। पदान्ते "दिव उदि" त्युत्वे (पा० ६।१।१३१) द्युभ्यां द्युभिरित्यादि- भवति। 'द्वे स्त्रिया' विति द्विवचनेनैव द्व्यर्थलाभे 'द्वे' इति पुनरुक्तिरवधारणफला––एते स्त्रीलिङ्गे एवेति। "नरञ्च[52] नारायणमेव चादौ स्वतः सुतौ द्वौ जनयाम्बभूव" इत्यादिवदुक्तार्थस्यापि[53] द्विशब्दस्य प्रयोग इति वा। अन्यत्र तु विशेषविध्यादिकमनियतमेवेति भावः। तेन "अङ्कुशोऽस्त्री सृणिः स्त्रियाम्"[54] इति सृणिप्रभृतीनां पुंस्त्वादिकमप्युपद्यते। अतएव "आरक्षमग्नमवमत्य सृणिं शिताग्रमिति" (Śiśu, ५।५) **माघः**। एवं 'क्लीबे त्रिविष्टपम्' इति रूपभेदान्नियमार्थं स्वर्गपर्यायः पुंसीति (लिङ्गादि०) वक्ष्यति। तत्र "विशेषैर्यद्यबाधित" इति वर्तते तदर्थमिदमिति वा। एवमन्यत्रापि तत्र तत्रोह्यम् ॥

त्रिपिष्टपम्

त्रिदशानां पिष्टपं 'त्रिपिष्टपम्' इति पृषोदरादित्वाद् (पा० ६।३।१०९) दशशब्दलोपः। त्रयाणां पिष्टपमिति वा, "भूर्भुवः स्व" रिति **श्रुतेः**। तृतीयं पिष्टपं 'त्रिपिष्टपम्'। "पूरणप्रत्ययस्तु वृत्तौ गतार्थत्वान्न प्रयुज्यते" इति तु **मधुमाधवी**। इह छान्दसा "विष्टान् पातीति विष्टप" मिति

(त्रिविष्टपम्)

निरुक्तत्वाद् व्युत्पाद्य 'त्रिविष्टपम्' इति तृतीयं विष्टपं। 'त्रिपिष्टपम्' इति पकारपाठः प्राचीनानां प्रामादिकः" इत्याहुः। "तद् युक्तं। नभो विष्टपं वृषो गौर्नापृश्निश्चापि सुरालय इति **रत्नमालादावपि** दर्शनाद्" इति **कौमुदी**। "विटपपिष्टपविशिपोलपा"* (उ० ३।१४५) इत्युणादौ कपनि विशतेरादेः पत्वं प्रत्ययस्य तुट् षत्वादिकार्यम्। "पिष्टपं भुवनम्। त्रिपिष्टपं स्वर्ग" इति दर्शनात् 'त्रिपिष्टपं' 'त्रिविष्टप'ञ्चेति तु वयम्। तथाच––"पिष्टपो विष्टपोऽप्यस्त्री भुवनं च नपुंसकम्" इत्य**मरमालोक्तेः**। "मर्त्यपातालाद्यपेक्षया तृतीयं पिष्टपं भुवनं त्रिपिष्टपम्"

52 रामञ्च . . . सूतः—B.
53 उक्तस्यापि—B, B_1.
54 A reads शृणि।
* विटपविष्टप—another reading. See notes.

इति **राजदेवः**। एवं शक्रभवनफलोदयावरोहोर्ध्वलोकादयोऽप्यूह्याः। **स्वरादि नव नामानि स्वर्गस्य ॥१॥**

अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः।
सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥२॥

अमराः

अमरा इत्यादि। मरणं मरः। मृङ प्राणत्यागे। बहुलवचनाद् भावे "ऋदोरप्" (पा० ३।३।५७)। स एषां नास्तीत्यमराः'। एतच्च "नञो जरमरमित्रमृता (पा० ६।२।११६) इत्यत्र वृत्तौ व्याख्यातम्। नाकवत् समासोत्तरपदलोपौ। न म्रियन्ते वा 'अमराः'। पचाद्यच् (पा० ३।१।१३४) ॥

निर्जराः

सदा युवत्वान्निरस्ता जरा यैस्ते निर्जराः। "प्रादिभ्यो धातुजस्येति बहुव्रीहिर्वा चोत्तरपदलोपश्चे"ति (वा०)।[55] निष्क्रान्ता जराया इति वा। अजादौ एकदेशविकृतानन्यत्वाद् वा जरसादेशः। निर्जरौ निर्जरसावित्यादि। ते हि सर्वदा पञ्चविंशतिवर्षदेशीयाः तथाच **रामायणे**––

"श्रियं विन्दति सौमित्रे पञ्चविंशतिवर्षवद्" इति ॥

देवाः

दीव्यन्तीति 'देवाः'। "क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशते" इति मेषवत् पचाद्यच् (पा० ३।१।१३४) ॥

त्रिदशाः

जन्मसत्ताविनाशाख्यास्त्रिस्रो दशा एषामिति 'त्रिदशाः'। न तु मनुष्याणामिव बाल्ययौवनवार्धकाख्यास्त्रिस्रो दशाः। निर्जरत्वात्। यद्वा––तृतीया यौवनाख्या दशा सदैवेषामिति 'त्रिदशाः'। त्रिपिष्टपवत् त्रिशब्दस्य तृतीयार्थत्वात्। "त्रीन् तापान्[56] दशन्ति। पचाद्यचि (पा० ३।१।१३४) पृषोदरादित्वान्नलोपे (पा० ६।३।१०९) त्रिदशा" इति **राजदेवः** ॥

विबुधाः

विबुध्यन्ते न स्वपन्तीति 'विबुधाः', विशिष्टं बुध्यन्त इति वा। "इगुपधत्वात्" कः (पा० ३।१।१३५) ॥

सुराः

सुरन्ति[57] 'सुराः'। सुर* प्रसवैश्वर्ययोः। पूर्ववत् कः। ऐश्वर्ययुक्ता इत्यर्थः। क्षीरोदोत्था सुरा एषामस्तीति 'सुरा'

55 समासोत्तरपदलोपौ—adds B.
56 पाताण्—B_1.
57 सुवन्ति—A.
*सूर—B, B_1. सुर ऐश्वर्यदीप्त्योः–पाणिनीयधातुपाठः।

इत्यागमः। "अर्श आद्यच्" (पा० ५।२।१२७)। सुरापरिग्रहाद् वा 'सुराः'। तथाच **रामायणे**--

"सुरापरिग्रहाद् देवाः सुराख्या इति विश्रुताः।
अपरिग्रहणात् तस्या दैतेयाश्चासुरास्तथा[58] ।।"

सुपर्वाणः शोभनममावस्यादिपर्वामीषां, शोभनं चरितमेषां, शोभनानि पर्वाणि अङ्गुल्यादिग्रन्थयो येषाम् इति वा 'सुपर्वाणः'। अविरतत्वाच्छोभनं पर्व उत्सव एषामिति वा ।।

सुमनसः शोभनं मन एषां, सुष्ठु मन्यन्ते वा[59] इति असुनि[60] (उ०४।१८८) 'सुमनसः' ।।

त्रिदिवेशाः त्रिदिवे स्वर्गे ईशते "त्रिदिवेशाः"। "इगुपधत्वात्

दिवौकसः (दिवोकसः) कः" (पा० ३।१।१३५)। दिवि ओको निवास एषां 'दिवोकसः'। दिवशब्दोऽदन्तोऽप्यस्ति। तेन 'दिवौकस' इति। तथाच **त्रिकाण्डशेषः**--"मन्दरः सैरिभः शक्रभवनं खं दिवं नभ" इति। तथाच **बुद्धचरिते**--"न शोभते तेन हि नो विना[61] पुरं मरुत्वता वृत्रवधे यथा दिवम्" (८।१३) इति। "हलन्तस्यैव पृषोदरादित्वात् (पा० ६।३।१०९) उत्वाभावे 'दिवोकसः' इति हेमचन्द्रः।[62] "दिव उद्" (पा० ६।१।१३१) इत्यत्र तु शब्दपरविप्रतिषेधादुकारस्य यणादेशे 'दिवोकस'[63] इति तु **मैत्रेयः**।" "अचः परस्मिन्" (पा० १।१।५७) इति स्थानिवत्त्वेनापि नेकारस्य यणादेशः "सकृत्कृतपरिभाषया निरासाद्" इति। **गोवर्द्धनस्त्वाह**--अहलन्तस्योत्वाभावः, संज्ञाविषयत्वादिति। "स्याद्दिवोका दिवौकाश्च देवे वापीह पक्षिणि" इति **रन्तिदेवः**।[64] केऽपि उभयम् इति। "कनिन् युवृषी" (उ० १।१५६) त्यत्र बहुलवचनात् केवलादपि दिवः कनिनि वृद्धौ 'दिवौकस' इति तु "दिव ओदि"त्यत्र (पा० ७।१।८४) **भागवृत्तिः** ।।२।।

58 दैतेयाश्चासुराः स्मृताः—RNC. दैतेया असुरास्तथा—सर्वानन्दः
59 मन्यन्ते वा असुरान्—B, B_1.
60 omitted by all excepting A.
61 तेन विना हि नः पुरं—B_1.
62 चान्द्राः—B, B_1; हट्टचन्द्रः—B_2.
63 दिवौकस—B, B_1.
64 RNC ascribes it to विश्व।

आदितेया दिविषदो लेखा अदितिनन्दनाः।
आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः ।।३।।
बर्हिर्मुखाः क्रतुभुजो गीर्वाणा दानवारयः।
वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम् ।।४।।

आदितेयाः "नञो दाञो ङिति" रिति **शाकटायनः**। तेन अदितिः। "कृदिकारादि"ति [गण० under (पा० ४।१।४५)] ङीषन्ताददितीशब्दात् "स्त्रीभ्यो ढक्" (पा० ४।१।१२०)। 'आदितेयाः'। अङीषन्ताद् "दित्यदित्यादित्य" इति (पा० ४।१।८५) ण्यः स्यात्।

दिविषदः दिवि सीदन्ति वर्तन्त इति "सत्सूद्विष" (पा० ३।२।६१) इत्यादिना क्विप्। "हृद्द्युभ्यां ङेरलुग् वक्तव्य- (वा०) इत्यलुक्। "सुषामादिषु च" (पा० ८।३।९८) इति षत्वम्। 'दिविषदो' दान्ताः। "तत्पुरूषे कृति बहुलम्" (पा० ६।३।१४) इति बहुलवचनात्[65] लुगपि। तेन "मनःसु येन द्युषदां न्यधीयत" (Śiśu, 1. 43) इति **माघः**।

लेखाः लिख्यन्ते गण्यन्ते ध्यानार्थं चित्रादौ लिख्यन्ते वा[66] वा 'लेखाः।' "अकर्तरि च" (पा० ३।३।१९) इत्यादिना कर्मणि घञ्। ग्रीवाहस्तपादेषु तिस्रो लेखा एषां सन्तीति वा। प्रशंसायाम् "अर्श आद्यच्" (पा० ५।२।१२७)।

अदितिनन्दनाः **'नन्दना'** इति। "नन्दादित्वाल्ल्युः" (पा० ३।१।१३४)। अदितेर्नन्दना 'अदितिनन्दनाः'। "कृद्योगा च षष्ठी समस्यत इति वक्तव्यम्" (वा०) इति समासः ।।

आदित्याः अदितेरपत्यानि। "दित्यदित्ये" (पा० ४।१।८५) त्यादिना ण्ये 'आदित्याः' ।।

ऋभवः (ऋभुवः) ऋनामा स्वर्गोऽदितिर्वा[67]। स्वरादिः। तत्र ततो वा भवन्तीति ऋपूर्वाद्भवते "मितद्र्वादिभ्य उपसंख्यानम्" (वा०)

65 भावे बहुलवचनात्—B. लुकि—A, B, B_1.
66 ध्यानार्थं चित्रादौ लिख्यन्ते वा—omitted in A.
67 नामा—omitted in B_1. स्वर्गो माता अदितिर्वा—B_1.

इति डुः। उपपदसमासः। क्विपि तु[68] 'ऋभुव' इत्यन्ये ॥

अस्वप्नाः अविद्यमानः स्वप्नो निद्रा एषामिति 'अस्वप्नाः' ॥

अमर्त्याः 'अमर्त्या' इति नञ् समासः। न म्रियन्ते इति 'अमर्त्या' इति वा। "हसिमृग्रिण्वाऽमिदमिलूपूधुर्विभ्यस्तन्"[69] (उ० ३।८६) इति तन्। मर्तः। ततो "नवसूरमर्तयविष्ठेभ्यः (स्वार्थे) यत्" [वा० under ५।४।३६] ॥

अमृतान्धसः अमृतम् अन्धो अन्नमेषामिति 'अमृतान्धसः'। सान्ताः ॥३॥

बर्हिर्मुखाः बर्हिरग्निर्मुखमेषां 'बर्हिर्मुखाः'। तथाच **मनुः**—"अग्नौ प्रास्ताहुतिः[70] सम्यगादित्यमुपतिष्ठत" इति ॥

क्रतुभुजः क्रतुषु भुञ्जते "अन्येभ्योऽपि दृश्यत" (पा० ३।२।१७८) इति क्विप्। क्रतुभुजः' ॥

गीर्वाणाः गीरेव निग्रहानुग्रहसमर्थो वाणोऽस्त्रं येषां, गिरं वनन्ते याचन्ते स्तुतिप्रियत्वादिति वा 'गीर्वाणाः' ॥

दानवारयः दानवा अरय एषामिति, दानवानामरयो वा 'दानवारयः'॥

वृन्दारकाः प्रशस्तं वृन्दं रूपमेषामिति। "शृङ्गवृन्दाभ्यामारकन्" (वा०) 'वृन्दारकाः' ॥

दैवतानि देवताशब्दात् स्वार्थे प्रज्ञाद्यणि (पा० ५।४।३८) दैवतानि। विशेषविधेः पुंस्त्वम्। रूपभेदात् क्लीबत्वम्। तच्च प्रचुरतरप्रयोगम् ॥

देवताः देवशब्दात् स्वार्थे तल्। "तलि स्त्रीलिङ्गवचनं कर्तव्यम्" (वा०) इति स्त्रीत्वम्। रूपभेदादेव स्त्रीत्वे लब्धे 'स्त्रियाम्' इति बहुवचनान्तपुंलिङ्गशङ्कानिराशार्थम्। "पुंसि सर्वत्र जातौ कामचार" इति बहुवचनम्। एवम् अन्यत्रापि ॥४॥

षड्विंशतिर्नामानि सामान्येन देवतायाः[71] ॥३-४॥

आदित्या विश्ववसवस्तुषिताऽभास्वरानिलाः।
महाराजिकसाध्याश्च रुद्राश्च गणदेवताः ॥५॥

68 B_1. adds—ऋभुशब्दात्।
69 B_2 reads—हसिमृग्रिण्वाऽमिगृजिवावमितमिदमिलूपूर्धूविभ्यस्तन्।
70 प्रस्ताहुतिः—B, B_1 प्राप्ताहुति—B_2.
71 सामान्यदेवतायाः—A, B.

आदित्येत्यादि। आदित्यविश्वादयः प्रत्येकं 'गणदेवताः' सङ्घचारिणो[72] देवताः।

"आदित्या द्वादश प्रोक्ता विश्वेदेवा दश स्मृताः।
वसवश्चाष्टसंख्याताः षट्त्रिंशत्तुषिता मताः[73] ॥
आभास्वराश्चतुःषष्टिर्वाताः पञ्चाशदूनकाः।
महाराजिकनामानो द्वे शते विंशतिस्तथा ॥
साध्या द्वादश विख्याता रुद्राश्चैकादश स्मृताः[74] ॥

अमीषामेकत्वमपि "समुदायेषु हि प्रवृत्ताः शब्दा अवयवेष्वपि वर्तन्त" इति **न्यायात्।** **आदित्यः** अदितेरपत्यार्थे "दित्यदित्यादित्ये" (पा० ४।१।८५) त्यादिना ण्यः। 'आदित्यः' ॥

विश्वेदेवाः विश प्रवेशने। "अशूप्रुषिलटिकणिखटिविशिभ्यः क्वनि" (उ० १।१५१) 'विश्व'शब्दः सर्वेषां विश्वे(षां) देवानां नामेति कृत्वा सर्वनामसंज्ञः। यथा पूर्वजवृत्तिः पूर्वशब्दः। अतएव विश्वेदेवा इत्यादिप्रयोगः। देवसन्निहितस्य चास्य प्रायः प्रयोगो जगत्पर्यायशङ्कानिरासार्थः। ननु विश्वेदेवा[75] इति मिलितमेव दृश्यते। तत् कथमिहा'दित्यविश्ववसव' इति ? नैवम्। अन्यत्राप्येवं दर्शनात्। तथाच—

"आदित्याः पितरो विश्वे साध्याश्च वसवोऽपि च।
भृगवोऽङ्गिरसश्चेति स्वर्लोकस्य परिच्छदाः ॥"

इति **शब्दार्णवः।** यत्तु **विद्याशीलो**ऽसिविधौ "दिविभुजिभ्यां विश्वे" (उ० ४।२३७) इति पठित्वा विश्वे इति सप्तम्यलुकि दीव्यतेरसि[76] विश्वेदेवा इति सान्तमुदाजहार, स तस्य विपर्यस्तदृशो दोषेण हर्षामर्षम्। तत्रैव पारायणपरायणैर्गोवर्धनदामोदरपुरुषोत्तमादिभि "र्विदिभुजिभ्यां विश्वे" (उ० ४।२३७) इति[77] वृत्तिं पठित्वा "विश्वं वेत्ति विश्वेवेदा,

72 संपत्य—B_2.
73 षड्विंशत्—A, B.
74 RNC adds—"इत्येते संहिता देवास्तथादित्याः स्वनामतः ॥"
75 विश्वदेवा—B.
76 दीव्यतेऽसि—B.
77 The accepted reading of the rule is विदिभुजिभ्यां and not दिविभूजिभ्यां।

विश्वेभोजा" इति[78] "अशूप्रुषी" (उ० १।१५१) ति क्वन्विधौ[79] "विश्वं जगत्, विश्वेदेवा इत्युदाहृतत्वात्" इति ॥

वसवः वस निवासे। "शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्चे' (उ० १।११) ति उः। 'वसुः' ॥

तुषिताः तुष तुष्टौ। "रुचिवचिकुचिकुटिभ्यः कितज्" (उ० (४।१८५) इति[80] बाहुलकात् कितच्। तोषणं तुट्। "तारकादित्वाद्वा (पा० ५।२।३६) इतच् ॥

आभास्वराः आ समन्ताद् भासनशीला आभास्वराः। भास दीप्तौ। "स्थेशभासपिसकसो वरजि" (पा० ३।२।१७५) ति वरच् ॥

अनिलाः अन्यते प्राण्यतेऽनेन इति अनिलः'। अन प्राणने अस्माद्धातोः[81] "सलिकल्यनिमहिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच्" (उ० १।५५) इति इलच् ॥

महाराजिक एषामेव बहुतरत्वान्महती राजिः पंक्तिः, महाराजशब्दो वा वाचकत्वेनास्त्येषाम्। "अत इनिठना" (पा० ५।२।११५) विति ठन्। महती राजिरेषामिति "संज्ञायां कन्" (पा० ४।३।१४७)––इत्यपरे। "बहुव्रीहौ कप्" (पा० ५।४।१५३) इत्यन्ये। "सास्य देवते" (पा० ४।२।२४)[82] त्यर्थे वा "महाराजप्रोष्ठपदाट्ठञ्" (पा० ४।२।३५) "संज्ञापूर्वकत्वान्न वृद्धिरि" त्यपरे। **(माहाराजिक)** केचित्तु 'माहाराजिक' इत्येवं पेठुः। तन्मते पूर्वेण ठञि वृद्धिरेव ॥

साध्याः साध्यं सिद्धिरेषामस्ति 'साध्याः'। अर्श आद्यच् (पा० ३।१।१३४) ॥

रुद्राः रोदयन्तीति 'रुद्राः'। रुदेर्ण्यन्ता"द्रोदेर्णिलुक् चे"ति (उ० २।२२) रक्, णिलोपश्च। तत्र च––

78 "यत्तु "तत्पुरुषे कृति" (६।३।१४) इति सप्तम्या अलूक्। विश्वेवेदाः अग्निः, विश्वेभोजाः इन्द्र इत्युज्ज्वलदत्तेन उक्तं तन्न। तथा सति स्मिन्नादेशस्य दुर्वारतापत्तेः।"—तत्त्वबोधिनी।

79 क्विन्विधौ—B_1.

80 रुचिकुसिरुषिभ्यः—B_1. रुटि—B_2. रुचिकटिरुषिभ्यः—B.

81 अनच अस्माद्धातोः—A, B_1.

82 सामान्य देवता—B.

"द्वादशादित्याश्चैत्रादिषु तपन्ति ये।
विष्णुयमविवस्वन्तोंऽशुमान् पर्जन्य[83] इत्यपि ॥
वरुणेन्द्रधातृमित्राः पूषास्त्वष्टा भगः परः।
क्रतुर्दक्षो वसुः सत्यः कालः कामो धृतिः कुरुः[84]।
पुरुरवा माद्रवाश्च[85] विश्वेदेवा दश स्मृताः ॥
ध्रुवो धवश्च[86] सोमश्च विष्णुश्चैवानिलोऽनलः[87]।
प्रत्यूषश्च प्रभासश्च[88] अष्टैते वसवः स्मृताः ॥
प्राणापानावुदानश्च समानो व्यान इत्यपि।
चक्षुः श्रोत्रं रसो घ्राणः स्पर्शो वुद्धिर्मनस्तथा ॥
द्वादशैते हि तुषिता देवाः स्वारोचिषेऽन्तरे" ॥
"आत्मा ज्ञाता दमो दान्तः[89] शान्तिर्ज्ञानं शमस्तपः[90]।
कामः क्रोधो मदो मोहो द्वादशाऽभास्वरा इमे" ॥
"वायुस्कन्धाः सप्त तेषामेकैकः सप्त सप्तभिः[91]।
आमेघादेवावहादि[92]रुपर्युपरिसंस्थिताः[93] ॥
द्वौ शुक्ल[94]द्योतिरादित्यौ नन्दो हरिस्तपास्तथा।
चित्रज्योतिः सत्यज्योति[95]र्ज्योतिष्मान् स्कन्द[96]आवहः ॥
ऋतजित् सत्यजित् सेनाजिद[97]मित्रावमित्रजित्।
भूरिमित्रसुषेणौ चेत्याभानोः प्रवहो गणः ॥
ऋतः सत्यो ध्रुवो धर्ता विधर्ता च विधारणः[98]।
वरुणश्च तृतीयोऽयमाचन्द्रादुद्वहो गणः ॥
धास्वान्तो[99]नय उग्रश्च भीमः क्षेम(प)श्च[100]साह्वयः।
अभियुग्मोऽथ चाभेद्यश्चतुर्थः संवहो[101] गणः ॥

83 पर्यण्य––B_0.
84 धूरिलोचनौ––B_2.
85 मार्द्रवश्च––B_2
86 धरश्च—B_2
87 आपश्चैवानिलोऽनलः—B_2.
88 प्रवासश्च; —B_2. प्रभावश्च––त्रिकाण्डविवेकः
89 आत्मा क्षानं मनो दान्तः––B, B_1; दान्ति—B_2
90 शान्तिर्दानं––त्रिकान्तविवेकः; समस्तपः—B_1
91 सप्तसप्ततिः—B.
92 देवतर्हादि––B_2.
93 अमोघा देववर्यादिरूपर्यूपरिसंस्थितेः—B.
94 शुक्र––B_1.
95 समुज्ज्योति––B_1
96 स्कन्ध––A.
97 सेनजित्—B_2 ध्रूवान्तो––B_2 धरान्तो––A
98 विधारय—B_1.
99 धास्यान्तो––B.
100 भीमाक्षपश्च—B.
101 समूहो—B.

स्युस्तादृगीदृगन्यादृक्प्रतिदृङमितसंमिता:[102]
सम्भवश्चेत्याग्रहेभ्यः पञ्चमो विवहो गणः ।।
ईदृक्षः पुरुषोऽन्यादृग् यमिता समदृक् तथा ।
क्षामश्च प्रतिदृक्षश्चेत्यासप्तर्षेः परावहः ।।
मरुदिन्द्रः सरभसः सामज्ञो मानुषो विशः[103] ।
देवीविशोऽन्धधर्मा[104] च स्कन्धः सप्तम आध्रुवात् ।।"

महाराजिकास्तु सत्यसुधन्वसवनादयः[105] विंशत्यधिकशतद्वयसंख्याता ग्रन्थगौरवभयान्न दर्शिताः । साध्या अपि द्वादशैव ।

मनो मन्त्रश्च प्राणश्च नयो (?)पानो हरस्तथा ।
नारायणो नरश्चैवं हंसश्चित्तिस्तथा विभुः ।।
प्रभुश्च द्वादशैवैते साध्या रुद्राः पुनस्त्विमे ।
वहनो नैर्ऋतिः सर्पो[106] मृगव्याधकपालिनौ ।।
अजैकपादहिर्बुध्नः[107] सेनानीरपराजितः ।
महातेजाः पिणाकी च क्वचिदङ्गारकादयः[108] ।।
रुद्रा धृतिकुरुस्थाने क्वचित्तुधुरिलोचनौ[109] ।
तथादित्यप्रभृतयः[110] क्वचिदन्यादृशास्त्विमे ।।
प्रयोजनवशात्तर्पणादौ पुराणभेदतः ।।

"इह अज एकपादहिर्बुध्नः विश्वेदेवा इत्यादौ द्वे द्वे "नामनी विभक्त्यन्ते एव वाचके" इति निरुक्तम् । अतएव— "अहये बुध्नाय[111] स्वाहा" इत्येवं प्रयोक्तव्यमित्युगडः[112] । अत्रापरा अपि गणदेवता भूयस्यः सन्ति । ता अत्यन्ताप्रसिद्धत्वान्न निबद्धाः । पितरस्तु सुप्रसिद्धत्वाद् ग्रन्थकारेण न निबद्धाः, नत्वभावात् ।[113] तथाच शब्दार्णवे—-

102 संमताः—A, B_2
104 देवीविशोऽर्धं—B_1, देवीविश्वोऽर्धं—B_2.
106 सर्वो—B_2.
108 क्वचित्त्वङ्गारकादयः—B.
110 तथादित्यप्रकशश्च—B_2.
112 उशनाः—B_1.
103 सत्यसुधन्वसवनादयः—B.
105 मरणादयः—B_2.
107 ब्रंध्नः—B_2. बुंध्न्यः—Tāntric text.
109 केचिद् विधुविलोचनौ——B_2.
111 ब्रध्नाय—B_1.
113 न निरवज्ञानत्वाभावात्–A, B.

"सत्यजयाश्च[114] पितरौ वैकुण्ठो हरयोऽजिताः ।
मरीचयः सुशर्माणः स्वरूपा अमितौजसः ।।
सुशाखाः रोहिताः पाराः सुतारा हारिका अपि[115] ।।"

इत्यादयोऽन्ये बहवो लिखिताः । इह बहुत्वभिया न लिख्यन्ते, तत्रैवानुसन्धेयाः ।।५।।

विद्याधरोऽप्सरोयक्षरक्षोगन्धर्वकिन्नराः ।
पिशाचो गुह्यकः सिद्धो भतोऽमी देवयोनयः ।।६।।

विद्याधर इत्यादि । देवा योनिरुत्पत्तिस्थानं येषां ते 'देवयोनयः' देवांशका इत्यर्थः । स्वामी तु—-"देववददृष्टसहितेभ्यः परमाणुभ्यः सद्यो जायन्ते । नागाश्चैवम् । एते च देवयोनिनामान इति भावः । तथाच भागुरिः—-सिद्धगुह्यकभूताहिपिशाचा देवयोनय इति" इत्याह ।

विद्यां गुडिकाञ्जनादिकां धरतीति पचाद्यच् (पा० **विद्याधरः**
३।१।१३४) । 'विद्याधरो' जीमूतवाहनपुष्पदन्तादिः कामरूपी खेचरः ।।

समुद्रप्रभवत्वादद्भ्यः सृता इति 'अप्सरसः' । ऋसृ **अप्सरः**
गतौ । सर्तेरसुन् (उ० ४।१८८) । अपसारयन्ति स्खलयन्तीति वा । औणादिकोऽसिः । (उ० ४।२३६) पृषोदरादित्वा- (पा० ६।३।१०९) दुपधाह्रस्वत्वमपशब्दस्यान्त्याकारलोपश्च । अप्सरसो देववारयोषित उर्वश्याद्याः ।।

यक्ष्यन्ते पूज्यन्ते इति कर्मणि घञ् । 'यक्षाः' कुबेरादयः । **यक्षः**
इः कामस्तस्येवाक्षिणी अस्येति 'यक्ष' इत्यन्ये ।।

रक्षन्ति एतेभ्यः । रक्ष पालनेऽसुन् (उ० ४।१८८)। **रक्षस्**
रक्षांसि' विभीषणादीनि ।।

गन्धं सौरभमर्वति । अर्बपर्बमर्ब गतौ * । "कर्मण्यण्" **गन्धर्वः**
(पा० ३।२।१) । शकन्ध्वादित्वात् (वा०) पररूपत्वम् । गानं धर्म एषामिति पृषोदरादित्वाद्वा (पा० ६।३।१०९) । 'गन्धर्वा' हाहाहूहूप्रभृतयः ।।

114 सत्याजयश्च—-B, सत्यानयाश्च—-B.
115 स्वभावा—B_2, हारिता—B_1. * The root seems to be अर्वशर्वषर्व हिंसायाम् ।

किन्नराः अश्वमुखत्वात् कुत्सिता नराः। "किं क्षेप" (पा० २।१।६४) इति समासः। 'किन्नराः' नरशरीरतुरगाननादयः॥

पिशाचः पिशितमश्नाति। पचाद्यचि, कर्मण्यणि वा। पृषोदरादित्वात् शितशब्दलोपः, अशशब्दस्य शाचादेशः। 'पिशाचो' मध्यतालव्यः सत्त्वविशेषः॥

गुह्यकः गुह्यं कुत्सितं कायति। कैगैरै शब्दे। "आतोऽनुपसर्ग" (पा० ३।२।३) इति कः। 'गुह्यको' सालिभद्रादिः[116]। एते च निधिरक्षका यक्षभेदाः। तथाच––

"निधिं रक्षन्ति ये यक्षास्ते स्युर्गुह्यकसंज्ञका" इति व्याडिः॥

सिद्धः (षि) सिधुहिंसासंराद्धयोः। "गत्यर्थाकर्मके"त्यादिना (पा० ३।४।७२) कर्तरि क्तः (पा० ३।४।७२)। 'सिद्धो'ऽणिमादिगुणोपेतो विश्वावसुप्रभृतिः॥

भूतः इष्टं प्राप्नोति। भू प्राप्तौ। पूर्व्ववत् कर्तरि क्तः। 'भूतो'ऽधोमुखोर्ध्वमुखादिः पिशाचभेदः। भूतियोगाद्। "अर्श आद्यच्" (पा० ३।१।१३४)। 'भूतो' रुद्रानुचरो बालग्रहः॥

एते विद्याधरादयो दश देवानामिव योनिरुत्पत्तिकारणम् अविभाव्यमेषामिति **देवयोनिविशेषाः प्रत्येकं पृथक् पृथक् वर्तन्ते** ।।६।।

असुरा दैत्य-दैतेय-दनुजेन्द्रारिदानवाः।
शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः ।।७।।

असुराः (आसुराः) **असुरा इत्यादि**। अस्यन्ति देवान् 'असुराः'। "असेरुरन्" (उ० १।४३) इत्युरन्प्रत्ययः। अविद्यमाना सुरा एषामिति वा। सुरविरुद्धत्वाद् अनर्थवदिति वा। प्रज्ञादित्वादण् (पा० ५।४।३८)। आसुराश्च।

दैत्यः **दैतेयाः** द्यतेः क्तिन्। 'दितिः'। पूर्व्ववण् ण्यः (पा० ४।१।८५)॥ **दैतेया इति**। आदितेयवड् ढक् (पा० ४।१।१२०)॥

116 मणिभद्रादिः—B_1.

दनुजाः दनुर्दक्षदुहिता। तज्जाता 'दनुजाः'। "सप्तम्यां जनेर्डः" (पा० ३।२।९७)॥

इन्द्रारयः इन्द्रस्य अरयः, इन्द्रोऽरिर्येषामिति वा 'इन्द्रारयः'॥

दानवाः दनोरपत्यानि 'दानवाः'। "तस्यापत्यमि" (पा० ४।१।९२) त्यण्। "दैत्यानां दानवानाञ्चे"ति पृथग्दर्शनाद् यद्यप्येतौ भिन्नौ तथाप्यसुरत्वेनैकत्वात् समानशीलत्वाच्च पर्यायितामाह। यथा––दानवे––"इतः स दैत्यः प्राप्तश्रीः" (कुमार० २।५५), यथा दैत्ये––"हिरण्याक्षदानवमिवे"ति[117]॥

शुक्रशिष्याः शुक्रस्य शिष्याः शुक्रशिष्याः॥

दितिसुताः दितेः सुता 'दितिसुताः'॥

पूर्वदेवाः पूर्वे च ते देवाश्चेति पूर्वदेवाः। "पूर्वापरप्रथम" (पा० २।१।५८) इत्यादिना समासः। पूर्वं देवा[118] इति वा। "सह सुपे (पा० २।१।४।)" ति योगविभागात् समासः। एते हि पूर्वं देवा आसन्, अन्यायाद्धि देवत्वाद् भ्रष्टा इति भावः॥

सुरद्विषः सुरान् द्विषन्ति। द्विष अप्रीतौ। "सत्सूद्विष" (पा० ३।२।६१) इत्यादिना क्विप्। 'सुरद्विषः'। **दश नामान्यसुरस्य** ।।७।।

सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः।
समन्तभद्रो भगवान् मारजिल्लोकजिज्जिनः ।।८।।

सर्वज्ञः **सर्वज्ञ इत्यादि**। सर्वं जानातीति 'सर्वज्ञः'। "आतोऽनुपसर्गे कः" (पा० ३।२।३)॥

सुगतः शोभनं गतं ज्ञानमस्य। "सर्वे गत्यर्था ज्ञानार्थाः" इति 'सुगतः'। **सुष्ठु अपुनरावृत्तये** गत इति वा। "सुखेन संसाराद् गत" इत्यन्ये॥

बुद्धः प्रशस्ता बुद्धिरस्य 'बुद्धः'। प्रशंसाया"मर्श आद्यच्" (पा० ५।२।१२७)। बुध्यतेऽध्यायिभिः। "मतिबुद्धि" (पा० ३।२।१८८) इत्यादिना वर्तमाने क्तः॥

117 दानवमिति—B_1; RNC adds—"दंष्ट्राविभिन्नवक्षःस्थलम्"।
118 पूर्वा देवा—B.

(बुधः) "इगुपधज्ञे" (पा० ३।१।१३५) ति के बुधश्च। "अथ बुद्धो जिनो योगी सर्वज्ञः सुगतो बुध" इति व्याडिः ॥

धर्मराजः धर्मेण राजते। पचाद्यच् (पा० ३।१।१३४)। धर्मस्य राजा वा। "राजाहःसखिभ्यष्टच्" (पा० ५।४।९१)। 'धर्मराजः' ॥

तथागतः "यथा गतास्ते मुनयः शिवां गतिं, तथा गतः सोऽपि यतस्तथागत" इति बौद्धागमः। यथा पुनरावृत्तिर्न भवति तथा तेन प्रकारेण गत इति 'तथागतः'। सुप्सुपेति (पा० २।१।४) समासः ॥

समन्तभद्रः समन्तात् सर्वतः पुण्यसम्भारतो ज्ञानसम्भारतश्च भद्रः श्रेष्ठः। "पञ्चमी" ति (पा० २।१।३७) योगविभागात् समासः। समन्तात् संपुर्णं भद्रमस्येति वा 'समन्तभद्रः'। पृषोदरादिः (पा० ६।३।१०९) ॥

भगवान् "माहात्म्यस्य समग्रस्य धर्मस्य यशसः श्रियः।
कामस्यार्थप्रमेयस्य षण्णां भग इति[119] श्रुतिः ॥" ततो मतुपि 'भगवान्' (पा० ५।२।९४) ॥

मारजित् मारं कामं जयति 'मारजित्'। क्लेशादिना मारं जयति[120]––इति तु सर्वधरः।

लोकजित् तपसा लोकं भुवनं जयति, लोकान् जयत्युपरमयति वा 'लोकजित्'। "सत्सूद्विषे" ति (पा० ३।२।६१) क्विप् ॥

जिनः जयति जिनाति वा भवं 'जिनः'। "इणसिञ्‌जिदीङुष्यविभ्यो नक्" (उ० ३।२) इति नक् ॥८॥

षडभिज्ञो दशबलोऽद्वयवादी विनायकः।
मुनीन्द्रः श्रीघनः शास्ता मुनिः शाक्यमुनिस्तु सः ॥९॥

षडभिज्ञः दिव्यं चक्षुर्दिव्यं श्रोत्रं परचित्तज्ञानं पूर्वनिवासानुस्मृतिरात्मज्ञानं वियद्गमनं कायव्यूहादिलक्षणा ऋद्धिश्चेति षट्। षडभिज्ञा आद्यज्ञानशक्तयोऽस्य 'षड्भिज्ञः'। षट्सु दान-शील-क्षान्ति-वीर्य-ध्यान-प्रज्ञासु अभिज्ञा आद्यं ज्ञानमस्येति 'षडभिज्ञः' ––इति तु सर्वधरः ॥

---

119 भगमिति—A., B.

120 B adds––मारजित्।

दशबलः दश बलानि अस्य सन्तीति दशबलः'। पूर्ववदच्।
"दानं शीलं क्षमा वीर्यं[121] ध्यानप्रज्ञाबलानि च।
उपायः प्रणिधिर्ज्ञानं दश बुद्धबलानि वै ॥"

अद्वयवादी अद्वयविज्ञानादद्वैतं वदत्यवश्यमि "त्यद्वयवादी" त्यावश्यके णिनिः (पा० ३।३।१७०)। सत्यवादित्वाद्वा ॥

विनायकः विनयति हितमनुशास्ति विनायकः ॥

मुनीन्द्रः मुनिष्विन्द्रः श्रेष्ठो मुनीन्द्रः ॥

श्रीघनः ज्ञानं पुण्यसंभारः श्रीस्तया घनः पूर्णः। श्रिया योगविभूत्या वा घनो निविडः। "तृतीये" (पा० २।१।३०) ति योगविभागात् समासः। श्रिया घन इव वर्षति वा 'श्रीघनः'। "पूर्वपदादि"ति (पा० ८।४।३) प्राप्तं णत्वं "क्षुभ्नादित्वात्" (पा० ८।४।३९) न भवति ॥

शास्ता शास्ति विनेयान्। "तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटा" विति (उ० २।९४) तृन्। 'शास्ता'। पितृशब्दवदस्य रूपम्। शास्ता, शास्तरौ शास्तर इति। अव्युत्पत्तिपक्षे––"अप्त्रा" (पा० ६।४।११) दि सूत्रेऽनुपादानान्न दीर्घः। व्युत्पत्तिपक्षे तु नप्त्रादिग्रहणस्य नियमार्थत्वात्। "चान्द्रे "शासेः क्तिचि शिष्टि"रित्यत्र शास्तेति प्रत्युदाहरणेन औणादिकतृच एव रत्नमतिना दर्शितवात् बुद्धवाचिनोऽपि दीर्घ" इति तु सुभूतिः।

मुनिः मन ज्ञाने। "मनेरुच्चे" (उ० ४।१२२) ति इन्, उपधाया उत्वं च। मनना 'न्मुनिः'॥ **सर्वज्ञाद्यष्टादश नामानि बुद्धस्य ॥९॥**

स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः।
गौतमश्चार्कबन्धुश्च मायादेवी-सुतश्च सः ॥१०॥

शाक्येत्यादि। इक्ष्वाकुराजपुत्राः केऽपि पित्रा वनवासाय दत्ताज्ञा गौतमवंशस्य कपिलस्याश्रमे शाकच्छन्ने वसतिं कृतवन्तः शाक्या इत्यागमः। शाकवनवासित्वात् 'शाक्याः'। "दिगादित्वाद् यत्" (पा० ४।३।५४)। तथाच सुन्दरानन्दचरिते (२।२४)––

---

121 चर्या––B_2.

"शाकवृक्षप्रतिच्छन्नं वासं यस्माच्च चक्रिरे ।[122]
तस्मादिक्ष्वाकुवंश्यास्ते शाक्या इति भुवि श्रुताः ।।[123]

शाक्यमुनिः तद्वंशावतीर्णो मुनिः शाक्यश्चासौ मुनिश्चेति। तथा

शाक्यसिंहः यस्तु शाक्यमुनिः स 'शाक्यसिंहः'। शाक्यः सिंह इव।

"उपमितं व्याघ्रादिभि" रिति (पा० २।१।५६) समासः। सिंहादिशब्दा हि उत्तरपदभूताः पूर्वपदस्य श्रेष्ठतां गमयन्ति। शाक्योऽपि भीमवत् ।।

सर्वार्थसिद्धः सर्वार्थेषु सिद्धो निष्पन्नः। "सिद्धशुष्के" त्यादिना (पा० २।१।४१) समासः। "सर्वोऽर्थः सिद्धो निष्पन्नोऽस्येति त्रिपदो बहुव्रीहि"रिति तु सर्वानन्दः। अतएव 'सिद्धार्थोऽपि ।[124] "सिद्धार्थौ बुद्धसर्षपौ" इति शाश्वतः ।। (सिद्धार्थः)

शौद्धोदनिः शुद्ध उदनो यस्येति शुद्धोदनः। "शकन्ध्वादिः" (वा०)। तस्य राज्ञोऽपत्यं 'शौद्धोदनिः' ।।

गौतमः गौतमवंशस्य कपिलस्य[125] मुनेरयं शिष्य इति। "तत्येदम्" (पा० ४।३।१२०) इत्यण्। "गौतमः गोतमस्यैव शिष्य" इति तु माधवी ।।

अर्कबन्धुः 'अर्कबन्धुः' सूर्यवंशजत्वात् ।।

मायादेवीसुतः मायादेव्याः सुतो 'मायादेवीसुत'श्च सः ।। **सप्त शाक्यवंशमुनेः ।।१०।।**

ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः ।
हिरण्यगर्भो लोकेशः स्वयम्भूश्चतुराननः ।।११।।
धाताब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः ।
स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृड् विधिः ।।१२।।

ब्रह्मा **ब्रह्मेति।** बृंहतीति। बृहि वृद्धौ। "व्योमादय" इति बृंहेर्मनिन् नलोपोऽदागमश्च ।[126] 'ब्रह्मा'। तदुक्तम्—
"बृहदस्य शरीरं यदप्रमेयं प्रमाणतः।

122 ···प्रतिच्छत्रं···यस्मात् प्रचक्रिरे—B.
123 ···भुवि शाक्या इति श्रूताः—B
124 सिद्धार्थोऽपि—omitted in B_1.
125 कपिलस्य—omitted in A, B.
126 Actually the rule should be बृंहेर्नोऽच्च (उ० ४।१४५)। भानुजि severely criticises the application of व्योमादि (उ० ४।१५०) by मुकुट। The rule also appears to be a case of misquotation.

बृहद्विस्तीर्णमित्युक्तं ब्रह्मा तेन स उच्यते ।।" इति ।[127]
बृंहयति प्रजा इति ण्यन्तान्मनिन् वा ।।

आत्मभूः आत्मना भवतीत्या'त्मभूः'। "भुवः संज्ञान्तरयो" (पा० ३।२।१७९)" रिति क्विप् ।।

सुरज्येष्ठः सुराणां ज्येष्ठः प्रथमजः 'सुरज्येष्ठः' ।।

परमेष्ठी परमे स्थाने तिष्ठतीति "परमे किदि" उ० (४।१०) तीनिः ।[128] "तत्पुरुषे कृती" (पा० ६।३।१४) त्यलुक् ।[129] "स्थास्थिन्स्थृणां चेति वक्तव्यम्"[130] (वा०) इति षत्वम् ।।

पितामहः लोकपितृणां प्रजापतीनामपि पिता 'पितामहः'। "पितृव्यमातुले" (पा० ४।२।३६) ति निपातितः। "स तु पितुः पिता भवति, पितृजननी च तन्मूर्ति" रित्यागमः ।।

हिरण्यगर्भः उपचारादत्र हिरण्मयमण्डं हिरण्यम्। तथाच मनुः—
"तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्" इति। तदस्य गर्भं उत्पत्तिकारणं, तस्य गर्भोऽयमिति वा। तत्प्रभवत्वा'द्धिरण्यगर्भः' ।।

लोकेशः लोकस्य चतुर्दशभुवनस्य ईशो 'लोकेशः' ।।

स्वयंभूः स्वयमात्मना भवतीति 'स्वयंभूः'। पूर्ववत् क्विप् (पा० ३।२।१७९)। 'आत्मभू'रित्यनेनैव लब्धे स्वभूनिवृत्त्यर्थं 'स्वयंभू' रित्युक्तम्। एवमुत्तरत्रापि ज्ञेयम् ।।

चतुराननः चत्वारि आननान्यस्येति 'चतुराननः' ।।११।।

धाता सर्वं दधातीति 'धाता'। तृच् (पा० ३।१।१३३) ।।

अब्जयोनिः विष्णोर्नाभिकमलजत्वाद् 'अब्जयोनिः' ।।

द्रुहिणः कामक्रोधादिभ्योऽसुरेभ्यो वा द्रुह्यतीति 'द्रुहिणः'। "द्रुदक्षिभ्यामिन"न्निति (उ० २।५०) इनन्[131]। बाहुल्याद्*-

127 तेनायमुच्यते—शाम्बपुराणम्—B., RNC. तदुक्तं शाम्बपुराणे—RNC.
128 परमे सुः कित्—B, B_1.
129 For अलूक् तत्त्वबोधिनी cites हलदन्तात् (पा० ६।३।९) in this case.
130 काशिका cites this वा० under ८।३।९७ but भट्टोजि places it in उणादि।
131 दुहिम्यामिनन्—B., "द्रुहक्षिभ्यामिनन्" इति मुकुट—भानुजिः।
* बाहुलकाद् ?

गुणाभावः। "ब्रह्मात्मभूः स्याद् द्रुहिणो द्रुघणश्च[132] पितामहः" इति भागुरौ। (द्रुघणः) द्रुघणोऽपि ॥

विरिञ्चिः भूतानि विरचयति। रच प्रतियत्ने। अच्। पृषोदरादि (पा० ६।३।१०६) त्वादकारयोरित्वं नकारागमश्च। 'विरिञ्चिः'। रीच(?)वियोजनसंयमनयोश्चुरादिः। "अच इः" (उ० ४।१३८)। पृषोदरादित्वान्नुम्। कुञ्जरवदुपधाह्रस्वत्वञ्च 'विरिञ्चि' रित्यन्ये। 'विरिञ्चो'ऽपि। "विरिञ्चो (विरिञ्चः) द्रुघणः[133] शिञ्जो विरिञ्चिर्द्रुहिणो मत "इति शब्दार्णवात्। विरिङ्क्ते सूते 'विरिञ्चिः'। "रिभिर्हंसै रिच्यते उह्यते वा 'विरिञ्चि' रिति प्राच्याः" इति तु क्षीरस्वामी ॥

कमलासनः कमलमासनमस्य 'कमलासनः' ॥

स्रष्टा सृजतीति 'स्रष्टा'। तृजन्तः ॥[134] "सृजिदृशो" (पा० ६।१।५८) रित्यमागमः ॥[135]

प्रजापतिः प्रजानां सन्ततीनां पतिः 'प्रजापतिः' ॥

वेधाः विदधातीति। "विधाञो वेध च" (उ० ४।२२४) इत्यसुन्, वेधादेशश्च। विध विधान इत्यतो वासुनि 'वेधाः' ॥

विधाता 'विधाता' धातेतिवत्। अन्योपसर्गनिवृत्त्यर्थम् ॥

विश्वसृग् विश्वं सृजतीति। "अन्येभ्योऽपी"ति (पा० ३।२।१७८) क्विप्। क्विवन्तस्य वा क्विन्प्रत्ययो यस्माद्दृष्ट* स "क्विन्प्रत्यय" (पा० ८।२।६२) इति तद्गुणसंविज्ञानपक्षे क्विन्नन्तस्य कुत्वं, न क्विवन्तस्य––इति "व्रश्चभ्रस्जे" ति (पा० ८।२।३६) षत्वे कृते विश्वसृट्, विश्वसृड्भ्यामित्यादि। अतद्गुणसंविज्ञानपक्षे तु क्विन उपलक्षणत्वात्तदभावे क्विवन्तस्यापि कुत्वम्। विश्वसृक्, विश्वसृग्भ्यामित्यादि ज्ञेयम् ॥

विधिः विदधातीति। बहुलवचनात् कर्तरि "उपसर्गे घोः कि" (पा० ३।३।९२) रिति किः। 'विधिः'। विध विधाने।

132 द्रुघनः—B_2. 133 द्रुघनः—B_2 134 तृन्नन्तः—B_2.
135 सृजिदृशोरित्यमागमः omitted in A. * A, B. add इति here before स etc.

"इगुपधत्वात्" (पा० ३।१।१३५) वा किः"। 'विधिः'।

विंशतिर्नामाणि ब्रह्मणः ॥११–१२॥

विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः।
दामोदरो हृषीकेशः केशवो माधवः स्वभूः ॥१३॥
दैत्यारिः पुण्डरीकाक्षो गोविन्दो गरुडध्वजः।
पीताम्बरोऽच्युतः शार्ङ्गी विष्वक्सेनो जनार्दनः ॥१४॥
उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः।
पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः ॥१५॥
देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः।
वनमाली बलिध्वंसी कंसारातिरधोक्षजः ॥१६॥
विश्वम्भरः कैटभजिद् विधुः श्रीवत्सलाञ्छनः।
वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः ॥१७॥

विष्णुरित्यादि। वेवेष्टीति 'विष्णुः'। विष्लृ व्याप्तौ। विष्णुः "विषेः किच्चे" (उ० ३।३९) ति नुः। "रषाभ्यामि" (पा० ८।४।१) ति णत्वम्। विशति सर्वभूतानि वा 'विष्णुः'। पृषोदरादित्वात् (पा० ७।३।१०९) षत्वम्। "विशेर्धातोः प्रवेशनाद्" इति भारतम्'॥

नराणां समूहो नारम्। "तस्य समूह" (पा० ४।२।३७) नारायणः इत्यण्। तदेवायनं स्थानमस्येति 'नारायण' इति निरुक्तकाराः। क्वचिन्मन्वन्तरे नरस्य ऋषेरपत्यत्वमुपगत इति नरस्यापत्यम् "नडादिभ्यः फकि" (पा० ४।१।९९) 'नारायण' इति तु वैयाकरणाः।

"आपो नारा इति प्रोक्ता आपो वै नरसूनवः।[136]
ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ॥" इति तु मन्वादयः। नरादात्मनो जातानि आकाशादीनि नाराणि कार्याण्ययं कारणात्मा एति व्याप्नोति (इति) 'नारायणः'।

"नराज्जातानि तत्त्वानि नाराणीति ततो विदुः।
तान्येवायतनं तस्य तेन नारायणः स्मृतः" इति मन्त्रवर्णः। (नरायणः)

136 नरसम्भवाः—B_2.

पृषोदरादि (पा० ६।३।१०६) त्वान्नरायणोऽपि। अथ "नारायणो विष्णु रूर्ध्वकर्मा नरायण" इति शब्दार्णवात्।[137] "सर्वत्र" "पूर्वपदादि" (पा० ८।८।३) ति णत्वम्॥

कृष्णः कलियुगे कृष्णवर्णत्वात्, कर्षत्यरीन् वा 'कृष्णः'। "कृषेर्वर्णे" (उ० ३।४) इति बाहुलकान्नक्। तथाच संक्षिप्तभारते––

"सत्यत्रेताद्वापरयुगेषु सित[138]रक्तपीतवर्णाभिः।
कृष्णः किल कलिकाले स एव पुरुषोत्तमो जयति॥"
"कृषिरुत्कृष्टवचनो नश्च निर्वृतिवाचकः।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते॥"

इति त्वौपनिषदाः। उतृकृष्टा निर्वृतिरस्मादितिव्युत्पत्तेः॥

वैकुण्ठः चाक्षुषमन्वन्तरे विकुण्ठाया अपत्यं 'वैकुण्ठः'। "शिवादित्वाद्" (पा० ४।१।११२) अण्। विकुण्ठते "गुरोश्च" (पा० ३।३।१०३) इत्यप्रत्ययः। विविधा माया अस्य अस्तीति वा। "ज्योत्स्नाद्यणि" (वा० ५।१।१०३) 'वैकुण्ठः'॥

विष्टरश्रवाः [**विष्टरः इति**] "पलाशी[139] विष्टरः स्थिरः" इति त्रिकाण्डशेषः। तरुश्चात्राश्वत्थोऽभिमतः। तथा चा"श्वत्थः सर्ववृक्षाणाम्" इति गीता (१०।२६)। तत्र श्रूयत इति "सर्वभातुभ्योऽसुन्" (उ ४।१८८)। विष्टरः कुशमुष्टिरिव श्रवसी कर्णावस्येति वा 'विष्टरश्रवाः'॥

दामोदरः बाल्ये चापलनिषेधाय यशोदया दाम्नोदरे बद्धत्वाद् दाम उदरेऽस्येति 'दामोदरः'। गमकत्वाद् वैयधिकरण्येऽपि समासः॥

हृषीकेशः हृषीकस्येन्द्रियस्येशो 'हृषीकेशः'॥

केशवः प्रशस्ताः केशाः सन्त्यस्येति "केशाद्व" (पा० ५।२।१०६) इति वः। 'केशवः'।

137 संसारावर्त्तात्—B_2; साहसाङ्कः—रघुनाथः।
138 शित—B_1.
139 पलासी—B.

यद्वा––

"यस्मात्त्वयैष दुष्टात्मा हतः केशी जनार्दन!
तस्मात् केशवनाम्ना त्वं लोके ख्यातो भविष्यसी "ति हरिवंशोक्तेः हन्त्यर्थाद्वधेः केशिनं हतवान् इति "अन्येभ्योऽपि दृश्यत" (पा० ३।२।१०१) इति डः।[140] पृषोदरादित्वात् (पा० ६।३।१०६) केशिशव्दस्यैकारस्याकारे नलोपे च 'केशवः'॥

माधवः यदोर्ज्येष्ठः पुत्रो मधुः। तद्वंशजत्वात् "तस्यापत्यम्" (पा० ४।१।९२) इत्यणि 'माधवः'। अन्येऽपि तद्वंश्या 'माधवाः'। तथाच––"प्रहितः प्रधनाय माधवान्" (१६।५२) इति माघः। माया लक्ष्या धव इति वा॥

स्वभूः स्वतो भवतीति पूर्ववत् क्विपि 'स्वभूः' (पा० ३।२।१७९) ॥१३॥

दैत्यारिः दैत्यानामरि 'दैत्यारिः'॥

पुण्डरीकाक्षः अवयवलक्षणया आयतत्वात् पुण्डरीके पुण्डरीकपत्रे इव अक्षिणी अस्य, पुण्डरीकमक्षि अस्य इति वा 'पुण्डरीकाक्षः'। "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" (पा० ५।४।११३) इति षच्। अनेन किल पूर्वं शिवाय सहस्रपुण्डरीको बलिरुपनीतस्तत्र तेनैकं भक्ति ज्ञातुमपहृतम्। ततोऽनेन स्वचक्षुरेकमुत्पाट्य पुण्डरीकस्थाने दानं कृतम्। महिम्नस्तोत्रे "हरिस्ते साहस्रं कमलबलिमाधाय पदयोर्यदेकोने तस्मिन् निजमुदहरन् नेत्रकमल" (श्लो° २९) मि ति पद्ये[141] व्यक्तम्। यद्वा––अक्षेषु इन्द्रियेषु दृश्यते अधिष्ठातृरूपेण अनुभूयते इति आक्षः परमात्मा। "शेष" (पा० ४।२।९२) इत्यण्। सर्वेन्द्रियाणामधिष्ठातेत्यर्थः। हृत्[142]पुण्डरीकमध्ये परमात्मरूपेण स्थितत्वात् 'पुण्डरीकाक्षः'। सर्वेन्द्रियाणामपीन्द्रियमिति यावत्।[143] तथाच श्रुतिः––"प्राणस्य प्राण उत चक्षुषश्चक्षुः श्रोत्रस्य च श्रोत्रं मनसो मनो विदु" रिति। आलौहित्यात् पुण्डरीकं

140 Actually the rule is "अन्वेष्वपि दृश्यते।"
141 श्लोकेषु––B_1.
142 हृत्—omitted in B_1.
143 सर्वेन्द्रियाणामिन्द्रियरुप—B_1.

कप्यासमिव[144] अक्षि अस्य 'पुण्डरीकाक्षः'। कप्यास[145]शब्दस्तु वानरकटिवचन इति तु विष्णुपुराणटीकाकाराः ॥

गोविन्दः गां भुवं विन्नवान् इति। विद्लृ लाभे। "गवादिषु विदेः संज्ञायाम् (वा०)" इति शः। शे मुचादीनाम्" (पा० ७।१।५६) इति नुमि 'गोविन्दः'। "महावृष्टौ गोवर्धनगिरिमुत्पाट्य गोकुलमनेन रक्षितमिति ब्राह्मणैर्गोष्ठाधिपत्य[146]मस्मै-दत्तम्" इति सुभूतिः ॥

गरुडध्वजः गरुडो ध्वजश्चिह्नमस्य 'गरुडध्वजः' ॥

पीताम्बरः पीतमम्बरमस्येति 'पीताम्बरः।'

अच्युतः कदापि कुतोऽपि न च्युत इत्य'च्युतः।' निजपदान्नास्ति च्युतं स्खलनमस्य इत्य'च्युत' इति वा ॥

शार्ङ्गी शृङ्गस्य विकारः। "अनुदात्तादेरञ्" (पा० ४।२।४४) इत्यञ्। शार्ङ्गं धनुः। तद्योगाद् "अत इनिठनौ" (पा० ५।२।११५) इतीनिः। 'शार्ङ्गी।'

विष्वक्सेनः विषु नानार्थे प्रथने स्यादिति वोपालितः। न्यासेऽपि "लोमादि" (पा० ५।२।१००) सूत्रे विषुशब्दो नानार्थो निपातो मूर्धन्यान्तो दर्शितः। "पामादित्वा" (पा० ५।२।१००) न्नप्रत्यये विषुण इति णत्वदर्शनात्। विष्वञ्चतीति क्विपि कुत्वे विषुची नानाञ्चन्ती सेनास्येति 'विष्वक्सेनः।' विषु सर्वतोऽर्थेऽव्ययम्। विषूची सर्वतोऽञ्चन्ती सेनास्येति तु पञ्जिकादयः। "पूर्वपदात् संज्ञायामग" (पा० ८।४।३) इति न णत्वम्। विश्वक्शब्दस्य गकारान्तत्वात्। गकारन्तत्वं तु णत्वे कर्तव्ये परस्य "खरि चे"ति (पा० ८।४।५५) चर्त्वस्यासिद्धत्वादिति कलिङ्गः। विष्वगिति मूर्धन्यमध्य एव। विष्वक् विश्वक् स्मृतं विज्ञैर्विषुवं विशुवं तथा" इति द्विरूपकोषात् तालव्या मूर्धन्याश्चैते शब्दाः।

(विश्वक्सेनः) "शटी च परिवेशः विश्वक्सेनोभ्रेशः प्रतिष्कशः

144 कप्यासम् omitted in B.; कव्यासम्—B_1.

145 कव्यास—B_2, कार्पास—त्रिकाण्डविवेकः।

146 गौष्वाधिपत्यम्—B_1.

कोशविशदौ चे[147] त्यूष्मविवेकाच्च[148] कदाचित्तालव्यमध्योऽपि। विष्वक् सर्वतोव्यापिनी सेनास्य इति विष्वक्सेनः" इति तु सुभूतिः ॥

जनार्दनः जनाः समुद्रस्थदैत्यभेदाः। तेषामर्दनः 'जनार्दनः।' अर्द हिंसायाम्। "नन्दादित्वा"ल्ल्युः (पा० ३।१।१३४) ॥१४॥

उपेन्द्रः अनुजत्वादिन्द्रमुपगत इति 'उपेन्द्रः'। उपगत इन्द्रोऽस्य वा। "कुगती" (पा० २।२।१८) त्यादिना समासः। इन्द्र-लोकादप्युपरिलोके वर्तमान इति कलिङ्गः। [149] यद्वा हरिवंशे—"ममोपरि यथेन्द्रस्त्वं स्थापितो गोभिरीश्वरः। उपेन्द्र इति कृष्ण त्वां गास्यन्ति दिवि* देवताः ॥" इत्युपेन्द्रः ॥

इन्द्रावरजः इन्द्रस्यावरजातोऽनुजत्वाद् 'इन्द्रावरजः ॥'

चक्रपाणिः चक्रं पाणावस्येति "प्रहरणार्थेभ्यः परे निष्ठासप्तम्या" (वा०) विति सप्तमी-परनिपाते 'चक्रपाणिः' ॥

चतुर्भुजः चत्वारो भुजा अस्येति 'चतुर्भुजः' ॥

पद्मनाभः पद्मं नाभावस्येति 'पद्मनाभः।' "अच्प्रत्यन्ववपूर्वाद्" (पा० ५।४।७५) इत्यत्राजिति योगविभागादच्। योगविभागस्य हि पूर्वाचार्येष्टमात्रसाधकत्वं, न तु नाभ्यन्तस्य सर्वत्रैवाच् समासान्त इति नियमः। तेन "प्रजा इवाङ्गादरविन्दनाभे" रिति माघः (३।६५)। "नाधारेण विना सृष्टिरूर्णनाभेरपीष्यत" इत्यादि प्रयोगाः। उक्तं च—"योगविभागादिष्टसिद्धि" रिति ॥

मधुरिपुः मधुनाम्नोऽसुरभेदस्य रिपु 'मधुरिपुः' ॥

वासुदेवः वसुदेवस्यापत्यं 'वासुदेवः', वासुश्चासौ देवश्चेति वा।[150] तथाच विष्णुपुराणम्—"सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः।

147 "शाटी च परिवेशश्च विश्वक्सेनः शकुन्तला। अभ्रेषः कोषविषदौ" इति रायः—RNC.; शची च, वेशश्च—B_2.

148 गदसिंहः—त्रिकाण्डविवेकः।

149 —वर्तमानादुपेन्द्र इति कलिङ्गः—B. वर्तमानत्वादुपेन्द्रः—B_1.

150 omitted in A, B. * सव्वं—RNC.

अतोऽसौ वासुदेवेति विद्वद्भिः परिपठ्यत''[151] इति।

(वासुः)

'वासु'रपि। तथाच त्रिकाण्डशेषः––''वासुनारायण*-पुनर्वसु-विश्वरूपा'' इति ॥

त्रिविक्रमः

बलिवञ्चनार्थं भूव्योमस्वर्गेषु त्रयो विक्रमाः पादन्यासा अस्येति 'त्रिविक्रमः' ॥१५॥

देवकीनन्दनः

देवकस्यापत्यं देवकिः। ''अत इञ्'' (पा० ४।१।९५)। संज्ञापूर्वकत्वाद् वृद्धयभावः। ततः स्त्रियाम् ''इतो मनुष्य-जाते'' (पा० ४।१।६५) रिति ङीषि देवकी''ति वर्णदेशना। ''देवकानाचष्ट इति णिजन्तादच इः (उ० ४।१३८)। ततो ङीषि देवकीति समाधेयम्'' इति तु श्रीधरः। ''दैवकीदेवकी''ति द्विरूप-कोषश्च। तस्या नन्दनो 'देवकीनन्दन' इति वृद्धिरहितः पाठः॥

शौरिः

शूरो नाम यादवो वसुदेवपिता। तद्वंशजत्वात् 'शौरिः'। ''बाह्वादे''राकृतिगणत्वादिञ् (पा० ४।१।९६)। ''शर्वः

(सौरिः)

शिवे केशव एव शौरि'' रिति शकारभेदात्तालव्यादिः। षूङ् प्राणिप्रसवे[152]। ''सुसूधागृधिभ्यः क्रन्'' (उ० २।२४)। ''सूरो यादवे दन्त्यवान्'' इति तु मधुमाधवी ॥[153]

श्रीपतिः

श्रियः पतिः 'श्रीपतिः'। यौगिकत्वात् ''लक्ष्मीपतिः''

(लक्ष्मीपतिः)

इत्यादिः॥

पुरुषोत्तमः

पुरुषेभ्य उत्तमः 'पुरुषोत्तमः' इति। ''पञ्चमी''ति (पा० २।१।३७) योगविभागात् समासः। ''सहसुपे'' (पा० २।१।४) त्यस्य लक्षणत्वे ''अध्वगन्तव्य''वत् समासो वा।[154] तथाच गीता—

''यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः।
अतोऽस्मिन् लोके वेदे च[155] प्रथितः पुरुषोत्तमः॥''
(१५।१८)

तथाच––''उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत'' (१५।१७) इति।

151 परिकीर्त्यते—B_1. परिगीयते—RNC., भानु°
152 षूञ् अभिषवे––B_2.
153 सूरो यादवो दन्त्यादिस्तु माधवी—B.
154 समासो वा omitted in B.
155 देवे च—B, B_2.
* नरायण––भानु°

षष्ठयां तु ''न निर्धारण'' (पा० २।२।१०) इति समासनिषेधः स्यात्। ''सन्महत्'' (पा० २।१।६१) इत्यादिना कर्मधारये च उत्तमपुरुष इति। ''यत्र समुदायो, निर्धार्यमाणो, निर्धारण-हेतुश्चेति त्रयं सन्निहितं तत्रैव ''(न) निर्धारण'' (पा० २।२।१०) इति निषेधः। इह तु स भगवानेकदेशरूपतया व्याख्यातुं न शक्यत इति नास्ति निषेध'' इत्यनुन्यासः। ''शेषषष्ठ्यात्र समास'' इति तु कज्जटः ॥[156]

वनमाली

वनं वनपुष्पम्। तस्मालाऽस्यास्तीति 'वनमाली।' ''व्रीह्यादित्वा'' (पा० ५।२।११६) दिनिः। ''सपल्लव-पुष्पग्रथिता स्रग् वनमाले'' त्येके। ''आपादपद्मं या माला वन-मालेति सा मते'' ति तु कलिङ्गः॥

बलिध्वंसी

बलिमसुरं ध्वंसितुं शीलमस्येति ''ताच्छील्ये'' (पा० ३।२।७८) णिनिः। 'बलिध्वंसी'ति सदानुस्वारवान्। सकारस्य ययोऽन्तर्भाविन परसवर्णाभावात् (पा० ८।४।५८) ॥

कंसारातिः

कंसस्यारातिः कंसारातिः ॥'

अधोक्षजः

अक्षमिन्द्रिये। अध इन्द्रियं पादौ। ताभ्यां जातो-'ऽधोक्षजः'। ''अन्येभ्योऽपि दृश्यत'' (पा० ३।२।१०१)[157] इति डः। तदुक्तमेकादशेन्द्रियगणने विष्णुपुराणे––''पायूपस्थं करौ पादा''विति। अधोक्षाणां जितेन्द्रियाणां सम्बन्धेन जायते प्रत्यक्षीभवति इति वा। अक्षजं इन्द्रियजं ज्ञान-मधोऽस्य वा। अक्षादिन्द्रियाज्जाता अक्षजाः प्राणिनस्ते अधःकक्षा यस्मादिति वा। यद्वा––अधो न क्षीयते जात्विति पृषोदरादि (पा० ६।३।१०९) त्वादधोक्षजः। तथाचोद्-योगपर्वणि––''अधो न क्षीयते जातु यस्मात्तस्मादधोक्षज'' इति। ''अधोऽक्षिभ्यां दृग्भ्यां जात इत्यधोक्षज'' इति तु पञ्जिका ॥१६॥

विश्वम्भरः

विश्व बिभर्ति 'विश्वम्भरः।' ''संज्ञायां भृतृवृजि''इति (पा० ३।२।४६) खच्। ''अरुर्द्विषदजन्तस्य मुम्'' (पा० ६।३।६७) ॥

156 कैय्यटः––B_1.
157 The rule seems to be अन्येष्वपि दृश्यते।

कैटभजित् कैटभमसुरं जितवान् इति "सत्सूद्विष" (पा० ३।२।६१) इत्यादिना क्विपि 'कैटभजित् ।।'

विधुः विधत्त इति 'विधुः।' असुरान् विध्यति इति वा। व्यध्येः "पृभिदिव्यधिगृधिधृषिभ्य" (उ० १।२४) इति कुः ।।

श्रीवत्सलाञ्छनः महापुरुषलक्षणं श्वेतरोमावर्तविशेषः श्रीवत्सः। वदति महत्त्वमिति वदे "वृतृवदिहनिकमिकसिभ्यः स" (उ० ३।६२) इति सप्रत्यये वत्सः। श्रीयुक्तो वत्सः श्रीवत्सः। "क्रुद्धस्य दुर्वाससः पादाघातरूपो रेखाविशेषः श्रीवत्स" इति तु पञ्जिका। स एव लाञ्छनमस्य 'श्रीवत्सलाञ्छनः।' "शौरि-

(श्रीवत्सः) श्रीवत्सदैत्यारिविश्वक्सेनजनार्दना" इति शब्दार्णवात् श्रीवत्सोऽपि। **ऊनचत्वारिंशन्नामानि विष्णोः ।।***

वसुदेवः **वस्विति।** अस्य जनकः पिता वसुभी रत्नैर्दीव्यतीति "पचाद्यच्।" (पा० ३।१।१३४), वसूनि दीव्यतीति "कर्मण्य-णि" (पा० ३।२।१) वा ।।

आनकदुन्दुभिः कृष्णे जाते[158] देवैरानकदुन्दुभयो वादिता अस्य गृह इत्या'नकदुन्दुभिः'। पृषोदरादित्वात् (पा० ६।३।१०९) सिद्धिः। "आनकदुन्दुभो वसुदेवपिता। "तस्यापत्यम्" इत्यर्थे "अत इञ्" (पा० ४।१।९५) इति स्वामी ।।१७।। **द्वे नामनी कृष्णपितुः ।।१३–१७।।**

बलभद्रः प्रलम्बघ्नो बलदेवोऽच्युताग्रजः।
रेवतीरमणो रामः कामपालो हलायुधः ।।१८।।
नीलाम्बरो रौहिणेयस्तालाङ्को मुस(ष)ली हली।
सङ्कर्षणः सीरपाणिः कालिन्दीभेदनो बलः ।।१९।।

बलभद्रः **बलभद्र इति।** बलं भद्रं श्रेष्ठमस्य, बलेन भद्रो वा 'बलभद्रः ।।'

प्रलम्बघ्नः प्रलम्बासुरं हतवान् 'प्रलम्बघ्नः।' देवत्वाद् "अमनुष्य-कर्तृके चे"ति (पा० ३।२।५३) टक्। "मूलविभुजादित्वात्" (वा०)—क इति तु कौमुदी ।।[159]

158 कृष्णे जाते खे—B₂. 159 —कालकौमुदी—B.

* Southern mss. add here—"पुराणपुरुषो यज्ञपुरुषो नरकान्तकः।
जलशायी विश्वरूपो मुकुन्दोऽसुरमर्दनः ।।"

बलदेवः बलातिशययोगाद् 'बलः,। "अर्श आदित्वा"दच् (पा० ५।२।१२७)। बलश्चासौ देवश्चेति 'बलदेवः'। बलेन दीव्य-तीति वा ।।

अच्युताग्रजः अच्युतस्याग्रजोऽ'च्युताग्रजः ।।'

रेवतीरमणः रेवत्या रमणो 'रेवतीरमणः।' नन्द्यादित्वाल्"ल्युः (पा० ३।१।१३४) ।।

रामः रमयति मोदयति प्रजा रूपमस्य 'रामः'। "ज्वलिति-कसन्तेभ्यो णः" (पा० ३।१।१४०)।।

कामपालः काममिच्छां, भातृजत्वात् स्मरं वा, विलासित्वात् शृङ्गारात्मकं कामं वा, पालयति 'कामपालः।' पालरक्षणे, पृ पालनपूरणयो रिति वा। "कर्मण्यण्" (पा० ३।२।१) ।।

हलायुधः हलमायुधमस्य 'हलायुधः' ।।१८।।

नीलाम्बरः नीलमम्बरमस्य 'नीलाम्बरः' ।।

रौहिणेयः रोहिण्या अपत्यं 'रौहिणेयः'। "शुभ्रादिभ्यश्चे"ति (पा० ४।१।१२३)[160] ढक् ।।

तालाङ्कः तालो वृक्षविशेषोऽङ्को ध्वजो यस्य 'तालाङ्कः' ।।

(मुसली) मुस खण्डने। "वृषादिभ्यः" (उ० १।१०८) कलच्। मुसलं दन्त्यमध्यम्। तथाच "सर्वस्य द्वे" (पा० ८।१।१) इत्यत्र

(मुषली) न्यासः—"तथाच विसं विषं मुसलं मुषलमिति षत्वं स्या"दिति। "त्रसरमुसलसूपा" इति सकारभेदश्च[161]। मुष स्तेये इत्यतो मुर्धन्योऽपीति वर्णदेशना। तद्योगान् 'मुषली' ।।

हली एवं 'हली ।।'

सङ्कर्षणः संकर्षति संहारमूर्तित्वाद् हलेन वा इति 'सङ्कर्षणः'। गर्भस्थस्य सम्यक् कर्षणाद्वा। तथाच हरिवंशे—"गर्भ-संकर्षणात्[162] सोऽथ लोके संकर्षणः स्मृत" इति। "नन्द्या-दित्वा"ल्ल्युः (पा० ३।१।१३४)। द्वितीयपक्षे "अर्शआद्यच्" (पा० ५।२।१२७) ।।

सीरो लाङ्गलं पाणावस्येति 'सीरपाणिः।' सीरो

160 शुभ्रादित्वात् कः—B. 161 प्रसरमुसल. . .शकारभेदश्च—B.
162 सर्वसङ्कर्षणात्—B.

सीरपाणिः दन्त्यादिः। अजगरसर्पे शीरस्तालव्यादिः कविभिराम्नातः।[163]

शीरः (अजगरः) "लाङ्गलवचनो नियतं* दन्त्यादिर्दृश्यते शास्त्रे" इत्यूष्मविवेकात्॥

कालिन्दीभेदनः कालिन्द्या यमुनाया भेदनः 'कालिन्दीभेदनः।' ल्युः[164] (पा० ३।१।१३४)॥

बलः बलयोगाद् 'बलः'॥१६॥ **सप्तदश नामानि बलभद्रस्य**[165]॥१८–१६॥

मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः।
कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः॥२०॥
(स) शम्बरारिर्मनसिजः कुसुमेषुरनन्यजः।
पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः॥२१॥
ब्रह्मसूर्विश्वकेतुः[166] **स्यादनिरुद्ध उषापतिः।**

मदनः **मदन इत्यादि।** मदयति 'मदनः'। ल्युः (पा० ३।१।१३४)॥

मन्मथः मनो मथ्नाति इति 'मन्मथः'। पृषोदरादिः (पा० ६।३।१०६)। 'मदी हर्षे'। माद्यतीति मत्। क्विप् (वा० ३।३।६४)। मथ्नातीति मथः। मन्थ विलोडने। अच् (पा० ३।१।१३४)। मच्चासौ मथश्चेति सर्वानन्दः।(क) "मननं मत् चेतना। क्विप्। "अनुदात्तोपदेशवनती" त्यादिना (पा० ६।४।३७) अनुनासिकलोपे तुक् (पा० ६।१।७१)। मथ्नातीति मथः। अच् (पा० ३।१।१३४)। "मतो मथो मन्मथ"। इति स्वामी।

मारः म्रियतेऽनेनेति 'मारः'। करणे घञ् (पा० ३।३।१६)। विरहिणं मारयति वा। पचाद्यच् (३।१।१३४)॥

प्रद्युम्नः प्रकृष्टं द्युम्नं बलमस्येति 'प्रद्युम्नः'॥

मीनकेतनः मत्स्यजातित्वात् मकर एव मीनः। स एव केतनमस्येति 'मीनकेतनः'॥

163 आख्यातः—B, B_1., भानु°।
164 कालिन्दीभेदनः—omitted in B, B_1.
165 नामानि—omitted in A.
(क) इति भरतः—RNC.
* नित्य°—भानु°।
166 ऋष्यकेतुः—B_2., ऋश्यकेतुः—B_1.

कन्दर्पः के ब्रह्मणि तृप्तवान्[167], कं ब्रह्माणं दर्पितवान्[168] [वा] 'कन्दर्पः'। पृषोदरादिः (पा० ६।३।१०६)। कमव्ययं कुत्सायाम्। कं दर्पो अस्येति वा 'कन्दर्पः'॥

दर्पकः दर्पयतीति 'दर्पकः'॥

अनङ्गः अविद्यमानमङ्गमस्ये'त्यनङ्गः'॥

कामः कामयत इति 'कामः'। पचाद्यच् (पा० ३।१।१३४)। काम्यतेऽनेनेति वा। "पुंसि संज्ञाया"मिति घः (पा० ३।३।११८)॥

पञ्चशरः "उन्मादनस्तापनश्च शोषणः स्तम्भनस्तथा।
सम्मोहनश्च कामस्य पञ्च बाणाः प्रकीर्तिताः॥"
एते पञ्च शरा अस्येति 'पञ्चशरः'। पञ्चेन्द्रियार्थाः शरा अस्येत्यन्ये॥

स्मरः स्मरयति उत्कण्ठयति 'स्मरः'। पचाद्यच् (पा० ३।१।१३४)। स्मर्यते अनेनेति वा। घः (पा० ३।३।११८)॥२०॥

सम्बरारिः सम्बरणं सम्बरः।* तस्यारिः 'सम्बरारिः'। दैत्यपक्षे संवृणोत्याच्छादयति। पचाद्यच् (पा० ३।१।१३४)। सम्बरो दन्त्यादिः। क्लीबं तु "संबरं नीवौ वौद्धव्रतविशेषयोः। विशेषे पुंसि दैत्यस्य मत्स्यस्य हरिणस्य च" इति दन्त्यादौ रभसः। दैत्यानां शं कल्याणं वृणोति। "शमिधातो" **(शम्बरारिः)** (३।२।१४) इत्यादिनाऽच्। शंबरस्तालव्यादिः। तथाच "शम्बरं सलिले पुंसि मृगदैत्यविशेषयो" रिति तालव्यादौ मेदिनिः। तस्यारिः 'शम्बरारिः'। वर्णदेशनायामपि पक्षद्वयं दर्शितम्॥

मनसिजः (मनोजः) शृङ्गाररूपेण मनसि जायते 'मनसिजः'। "सप्तम्यां जनेर्डः"। (पा० ३।२।९७)। "तत्पुरुषे कृती"त्यलुक् (पा० ६।३।१४)। लुकि तु 'मनोजः'॥

कुसुमेषुः कुसुमानीषवोऽस्य 'कुसुमेषुः'॥

167 दृप्तवान्—B_2, RNC.
168 तर्पितवान्—B_2
* "संवरणं संवरः—इति मुकुटः"—शिवदतः।

अनन्यजः — न मनसोऽन्यस्माज्जायते, न विद्यते अन्योऽस्मात् सोऽनन्यो विष्णुः "सर्वं विष्णुमयं जगदि" ति कृत्वा। तस्माज्जातः 'अनन्यजः', नान्यस्माज्जायते[169] इति वा।

पुष्पधन्वा — पुष्पं धनुरस्य 'पुष्पधन्वा'। "वा संज्ञायाम्" इत्यनङ् (पा० ५।४।१३३)॥

(पुष्पधनुः) — पक्षे 'पुष्पधनुः'। सान्तोऽपि। "द्रुतमेत्य पुष्पधनुषो धनुष" इति माघः (६।४१)॥

रतिपतिः — रतेः पतिः 'रतिपतिः'॥

मकरध्वजः — मकरो जलजन्तुविशेषो ध्वजोऽस्येति 'मकरध्वजः'॥

आत्मभूः — आत्मना भवत्यात्मभूः। पूर्ववत् क्विप् (पा० ३।२।१७६) ॥२१॥

ब्रह्मसूः — ब्रह्म तपः सुवति चालयति, ब्रह्माणं सुवति प्रेरयति वा 'ब्रह्मसूः'। सू प्रेरणे। "अन्येभ्योऽपि दृश्यत" इति क्विप् (पा० ३।२।१७८)॥

विश्वकेतुः — विश्वव्यापी केतुर्ज्योतिरस्येति 'विश्वकेतुः'। "पताकायां द्युतौ केतुर्ग्रहोत्पातारिलक्ष्मसु" इति रभसः॥ क्वचिद् 'ऋश्यकेतु' रिति पाठः। (ऋश्यकेतुः) "खड्गायुधोऽनिरुद्धः स्यात्तथाचैवर्श्यकेतन" इति साम्बपुराणात्। "एणः कुरङ्गमो रिश्यः स्यादृश्यश्चारुलोचन" इति पुरुषोत्तमः।* "ध्वजनिर्णयस्यालौकिकत्वात् तस्य स प्रमाद" इति हड्डचन्द्रः। "ब्रह्मस्वादि नामचतुष्टयमनिरुद्धस्य" इत्येके। "अनिरुद्धो विश्वकेतुर्ब्रह्मसूरप्युषापति" रिति वृहदमरकोषात्। "ब्रह्मसूस्त्वनिरुद्धः स्या" दिति शब्दार्णवाच्च। "आत्मभूर्ब्रह्मसूः" इत्यमरमालादर्शनात् कामदेव एवोक्तत्वात् कामस्यैव नामेत्यपरे॥ **एकविंशतिर्नामानि कामदेवस्य॥**

अनिरुद्धः — **अनीति**। युद्धे केनापि न निरुद्धः 'अनिरुद्धः'॥

उषापतिः — उषायाःपतिः 'उषापतिः'। मूर्धन्यमध्यः॥ "उषा बाणस्य

169 B adds—'अनन्यजः'।

* त्रिकाण्डशेषः—शिवदत्तः।

पुत्री स्यादनिरुद्धगृहिण्यूषा" इति अजयकोषदर्शनाद्दीर्घादिरपि (ऊषापतिः) ॥२२क॥

द्वे नामनी अनिरुद्धस्य ॥२०–२२क॥

लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया ॥२२॥[170]

शङ्खो लक्ष्मीपतेः पाञ्चजन्यश्चक्रं सुदर्शनः॥

कौमोदकी गदा खड्गो नन्दकः कौस्तुभो मणिः ॥२३॥

लक्ष्मीः — **लक्ष्मीरिति**। लक्षयति पश्यति नीतिशालिनमिति 'लक्ष्मीः'। लक्ष दर्शनांकयो.। "लक्षेर्मुट् च" (उ० ३।१६०) इति ईकारप्रत्ययो मुडागमश्च। अतएव ङ्यन्तत्वाभावान्न सुलोपः॥

पद्मालया — पद्ममालयोऽस्याः 'पद्मालया'।

पद्मा — पद्मं विद्यतेऽस्याः। 'पद्मा'। अर्श आद्यच् (पा० ५।२।१२७)॥

कमला — एवं 'कमला'॥ उभयोरुपादानादन्यपर्यायेणानभिधानं सूचितम्॥

श्रीः — श्रयतीति 'श्रीः'। श्रिञ् सेवायाम्। "क्विब्वचि" (वा० ३।२।१७८) इत्यादिना क्विप्, दीर्घः, संप्रसारणनिषेधश्च। "श्रीलक्ष्म्यौ "कृदिकाराद्" (ग० ४।१।४५) इत्यत्र सावर्ण्यग्रहणात् ङीषन्तावपी"ति मैत्रेयः।* "तां दृष्ट्वा श्रीमिवायान्तीम्[171]" इति "लक्ष्मी लक्ष्मीपतेः" इत्यादि प्रयोगः।

हरिप्रिया — हरेः प्रिया 'हरिप्रिया' ॥२२॥ **इति षट् नामानि[172] लक्ष्म्याः ॥२२॥**

170 In some recensions there is an additional hemistich—इन्दिरा लोकमाता मा क्षीराब्धितनया रमा। A majority of commentators left out this passage in their commentaries. RNC informs that the Deccan recensions add here:—

चापः शार्ङ्गं मुरारेस्तु श्रीवत्सो लाञ्छनं स्मृतम्।
अश्वाश्च शैव्यसुग्रीवमेघपुष्पबलाहकाः॥
सारथिर्दारुको मन्त्री ह्युद्धवश्चानुजो गदः॥"

* हड्डचन्द्रः—RNC.

171 तां दृष्ट्वा श्रीरिवायान्तीम्—B., लक्ष्मी लक्ष्मीपतेः—omitted in A.

172 षट्कं लक्ष्म्याः—A,

पाञ्चजन्यः **शङ्ख इत्यादि।** समुद्रे तिमिरूपधारी पञ्चजनो नामासुरः प्राग् आसीत्। तदस्थिभवत्वात्[173]। "वहिर्देवपञ्चजनेभ्य" (वा० ४।३।५८ काशिका) इत्युपसंख्यानात् ञ्यः।। **विष्णोः शङ्खस्य नामैकम्।।**

चक्रमिति। लक्ष्मीपतेरित्येव। सदा रिपुच्छेदं करोत्यनेन[174]। करोतेः "के द्वे च"(क) इति क प्रत्ययो द्विर्वचनञ्च। 'चक्रम्'। भक्तैः सुखेन दृश्यत इति "भाषायां शासियुधिदृशिधृषि मृषिभ्यो युच् वक्तव्य" (वा०) इति खलपवादो युच्। अभि-
सुदर्शनः रामत्वात् शोभनं दर्शनमस्येति वा 'सुदर्शनः'। "सुदर्शनोऽस्त्रियां चक्रे" इति नामनिधानात् क्लीबत्वञ्च।। **एकं (चक्रस्य) ।।२३।।**

कौमोदकी **कौमोदेति।** लक्ष्मीपतेरित्येव। कौ पृथिव्यां मोदते सदा जययोगात् 'कौमोदकी'। "वहुलमन्यत्रापि" वुन्। "विष्णुः कुमोदकः शौरि" रिति कोषान्तरात्[175] कुमोदको विष्णुः। "तस्येद"* मित्यर्थेऽणि (पा० ४।३।१२०) 'कौमोदकी'। "संहितासु तु "कौपोदकी" ति पाठः। "कूपोदकाज्जाते" त्याम्नायात्" इति स्वामी।

गदा देवास्त्रत्वाद् गदति इति गदा। पचाद्यजन्ताट्टाप् (पा० ३।१।१३४, ४।१।४)।। **एकं (गदायाः) ।।**

नन्दकः **खड्ग इति।** लक्ष्मीपतेरित्येव। नन्दयति देवादीन् 'नन्दकः'। ण्वुल् (पा०३।१।१३३)।। **एकं (खड्गस्य) ।।**

कौस्तुभः **कौस्तुभ इति।** लक्ष्मीपतेरित्येव। ष्टुभ स्तम्भे। कौ स्तोभते कुस्तुभो विष्णुः। "इगुपधत्वात्" (पा० ३।१।१३५) कः। "तस्येद" मित्यणि (पा० ४।३।१२०) 'कौस्तुभः। "कुं भुवं स्तुम्नाति व्याप्नोति कुस्तुभो हरिस्तस्यायमि"ति स्वामी।। **एकं (मणेः) ।।२२–२३।।**

गरुत्मान् गरुडस्ताक्ष्यों वैनतेयः खगेश्वरः।
नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः ।।२४।।

(क) Not found in उणादि texts. दशपादी (८।१०३) adds कन् by the rule करोतेर्द्वे च।

173 तदस्थिजत्वात्—B_1.

174 करोतेश्चक्रः। के कृञादीनाम् इति द्विर्वचनम्—A.

175 क्षीर' reads दुर्गपाठात्।

* तस्येयम्—A.B.

गरुत्मान् इति। प्रशस्ता अतिशयिता वा गरुतः पक्षा अस्य सन्ति। मतुप् (पा० ५।२।९४)। यवादिपाठात् "झय" (पा० ८।२।१०) इति न वत्वम्।[176] 'गरुत्मान्"।। गरुत्मान्

गरं विषं हन्ति 'गरुडः'। गरुद्भि डीयते, गिरति नागं वा। "अन्येभ्योऽपि दृश्यत" (पा० ३।२।१०१) इति डः। पृषोदरादिः। 'गरुडः'।। गरुडः

एकस्मिन् कल्पे[177] तृक्षस्य मुनेरपत्यं 'ताक्ष्यः'। "गर्गादित्वात्" (पा० ४।१।१०५) यञ्। बहुत्वे "यञञो श्चे" (पा० २।४।६४) ति लुगिति 'तृक्षाः'।। ताक्ष्यः

विनताया अपत्यम्। "स्त्रीभ्यो ढकि" (पा० ४।१।१२०) 'वैनतेयः'।। वैनतेयः

खगानामीश्वरः 'खगेश्वरः'। न चात्र "प्रतिपदविधाना षष्ठी न समस्यत इति वक्तव्यमि" (वा०) ति समासनिषेधः शङ्कनीयः। यावता शेषलक्षणैवेयं षष्ठी। न हि "स्वाम्यादि" (पा० २।३।३९) सूत्रेण षष्ठी विधीयते, किन्तु 'सप्तम्यनेन विधीयमाना षष्ठ्या वाधिका मा भू'दिति चकारेण षष्ठ्याः प्रतिप्रसवः क्रियते। न त्वपूर्वरूपतया विधानम्। एवंविधविषये च समासः स्यादेव। "न निर्धारणे" (पा० २।२।१०) इति ज्ञापकात्। अन्यथा प्रतिपदविहितत्वान्न षष्ठ्या समासो भविष्यति, किं निषेधेन इति।। खगेश्वरः

नागानामन्तको 'नागान्तकः'।। नागान्तकः

रथस्थानीयत्वाद्देहत्वाद्वा विष्णो रथः 'विष्णुरथः'।। विष्णुरथः

तथा च त्रिकाण्डशेषः "रथः पौरुषदेहयो" रिति।।

कनकमयत्वात् शोभनं पर्णं पक्षोऽस्य 'सुपर्णः'।। सुपर्णः

पन्नगानश्नाति। अश भोजने। ल्युः (पा० ३।१।१३४) 'पन्नगाशनः'।। **नव गरुडस्य ।।२४।।** पन्नगाशनः

शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः।
ईश्वरः शर्व[178] ईशानः शङ्करश्चन्द्रशेखरः ।।२५।।

176 यवादिपाठात्—etc. omitted in B.

177 क्वचित् कल्पे—B_1.

178 सर्व—B_2

भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः ।
मृत्युञ्जयः कृत्तिवासाः पिणाकी प्रमथाधिपः ।।२६।।
उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत् ।
वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः ।।२७।।
कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः ।
हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः ।।२८।।
गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः ।
व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः ।।२९।।
कपर्दोऽस्य जटाजूटः पिणाकोऽजगवन्धनुः[179] ।
प्रमथाः स्युः पारिषदा ब्राह्मीत्याद्यास्तु[180] मातरः ।।३०।।
विभूतिर्भूतिरैश्वर्यमणिमादिकमष्टधा ।

शम्भुः शम्भुरिति । शं कल्याणं भवते प्राप्नोति 'शम्भुः' । भू प्राप्तावात्मनेपदी । "आधृषाद्वे" (ग०) ति न णिच्, मितद्र्वादित्वात् डुः (वा० ३।२।१८०) । शं कल्याणं भवत्यस्मादिति वा ।।

ईशः इष्ट इतीशः । ईश ऐश्वर्ये । "इगुपधत्वात्" (पा० ३।१।१३५) कः ।।

स्कान्दे*—

पशुपतिः "पालयामि पशून् यस्मात् सृजामि च यदृच्छया ।
तेषां च पतिरेवाहं तस्मात् पशुपतिः स्मृतः ।।" इति । 'पशुपतिः' । "पशुर्मृगादौ छगले प्रमथेऽपि पुमानयम्" इति तालव्यान्ते रभसः । "पशवः प्रमथास्तेषां पतिः 'पशुपति' रिति तु कौमुदी । पशूनां सुरनरतिरश्चां पतिः 'पशुपतिः' । तदुक्तम् "तिर्यग्जातौ पशुः प्रोक्तः सर्वप्राणिषु पुंस्ययम्" इति स्वामी ।।

शिवः शिवं कल्याणं तद्योगात्, लोकानां शिवकारित्वात् वा शिवः । अर्श आद्यच् (पा० ५।२।१२७) ।।

शूली शूलमस्यास्तीति "अत इनिः" (पा० ५।२।११५) । 'शूली' ।।

महेश्वरः महांश्चासावीश्वरश्चेति 'महेश्वरः' । "सन्महदि"

179 पिणाकोऽजकवं धनुः—B_2
* हरिवंशे—RNC.
180 अवाण्यद्यास्तु—B_2

त्यादिना (पा० २।१।६१) समासः । "आन्महद्" (पा० ६।३।४६) इत्यादिना आत्वम् ।।२५।।

ईश्वरः ईशितुं शीलमस्य 'ईश्वरः' । स्कान्दे—
"ईश एवाहमत्यर्थं न च मामीशतेऽपरः ।
ददामि च सदैश्वर्यमीश्वरस्तेन कीर्तितः ।।" इति ।
"स्थेशभासे" इत्यादिना (पा० ३।२।१७५) वरच्-प्रत्ययः ।।

शर्वः प्रलये सर्वं शृणातीति[181] । शृ हिंसायाम् । "कृगृशृदृभ्यो वः" (उ० १।१५५) इति 'सर्वः' । तालव्यादिः । अर्वशर्व सर्व हिंसायामित्यतः पचाद्यचि (पा० ३।१।१३४) 'सर्वो' दन्त्यादिरपीत्युपाध्यायसर्वस्वम् । अतएव "सर्वस्तु शर्वो भगवान् शम्भुः कालञ्जरः शिव" इति नामनिधानम् ।। **(सर्वः)**

ईशानः ऐश्वर्यसामर्थ्याद् 'ईशानः' । "ताच्छील्यवयोवचन" (पा० ३।२।१२९) इत्यादिना चानश् ।।

शङ्करः शश्वद्भूतानां शं कल्याणं करोतीति 'शङ्करः' । तथाच स्कान्दे—
"शङ्करोमि सदा ध्यानात् परमं यन्निरामयम् ।
भूतानामसकृद् यस्मात्तेनाहं शङ्करः स्मृतः ।।"
"शमिधातोः "संज्ञायाम्" (पा० ३।२।१४) इत्यच् ।।

चन्द्रशेखरः चन्द्रः शेखरोऽस्य 'चन्द्रशेखरः' ।।२५।।

भूतेशः भूतानां प्रमथादीनामीशः 'भूतेशः' ।।

खण्डपरशुः गजासुरवधे खण्डः परशुरस्य 'खण्डपरशुः' । खण्डयतीति खण्डः परशुरस्येति वा । "चतुरच्कोऽप्ययं, "खण्डपर्शुः पर्शुरामे शङ्करे चूर्णलेपिनी" ति विश्वात् ।। **(खण्डपर्शुः)**

गिरीशः गिरेः कैलासस्य ईशः 'गिरीशः' ।।

गिरिशः गिरौ शेते तिष्ठति । "गिरौ डश्छन्दसि" (वा० ३।२।१५) इति डे वा, गिरिराश्रयत्वेनास्यास्ति लोमादित्वात् शे वा (पा० ५।२।१००) 'गिरिशः' ।।

181 प्रलये शृणाति सर्वं—B_1.

मृडः मृडति भूतग्रामं 'मृडः'। मृड सुखने। इगुपधत्वात् कः (पा० ३।१।१३५)

मृत्युञ्जयः मृत्युं जयति मृत्युञ्जयः। "संज्ञायां भृतॄवृजी" (पा० ३।२।४६) त्यादिना खच् मुम् च ।।

कृत्तिवासाः कृत्तिश्चर्म वासोऽस्य कृत्तिवासाः'। सान्तः ।।

पिणाकी पिणाको धनुरस्यास्तीति 'पिणाकी'। इनिः ।।

प्रमथाधिपः प्रमथानां गणानामधिपः 'प्रमथाधिपः' ।।२६।।

उग्रः उच्यति रौद्रत्वात् क्रुधा समवैति, उद्धतः[182] सर्वोपरि वर्तते वा 'उग्रः'। उच समवाये। ऋज्रेन्द्रादिना (उ० २।२८) रन्, गश्चान्तादेशः ।।

कपर्दी कपर्दो जटाबन्धोऽस्यास्तीति 'कपर्दी'। इनिः ।।

श्रीकण्ठः कालकूटभक्षणात् श्रीः शोभा कण्ठेऽस्य 'श्रीकण्ठः'। "धृतं कण्ठे विषं घोरं ततः श्रीकण्ठतामगाद्" इति नीलकण्ठस्तवः ।।

शितिकण्ठः अतएव शितिः कालः कण्ठोऽस्य 'शितिकण्ठः' ।।

कपालभृत् ब्रह्मकपालं बिभर्ति 'कपालभृत्' ।।

वामदेवः लोकाचारविपरीतत्वाद् 'वामः'। टु वम उद्गिरणे। घञि "नोदात्तोपदेशेत्या" दिना (पा० ७।३।३४) वृद्धिनिषेधे प्राप्ते* "अनाचमिकमिवमीना (वा० ७।२।३४)" मित्यादिना निषेधः। "वामः सुन्दरो देवः, संसारवामत्वाद् वा "इति स्वामी।।

महादेवः एवं महांश्चासौ देवश्चेति 'महादेवः'। सर्वदेवानां महनीयत्वान्महत्त्वाच्च महादेवः। तथाच साम्बपुराणम्[183]—

'पूज्यते यः सुरैः सर्वैर्महांश्चैव प्रमाणतः।
धातुर्महेति पूजायां महादेवस्ततः स्मृतः ।।" इति।

स्कान्देऽपि—

"महतामपि देवानामहमेव महान् यतः।
न तु मत्तो महानन्यो महादेवस्ततो ह्यहम् ।।" इति ।।

विरूपाक्षः रविचन्द्राग्निरूपत्वात् विविधरूपाण्यक्षीण्यस्य, त्रिनेत्रत्वाद् वा 'विरूपाक्षः'। "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" (पा० ५।४।११३) ।।

182 उद्गतः—B. * भानु°'s ms. adds here 'अनाचमेः' 183 शाम्बपुराणम्—A., B.

त्रिलोचनः त्रीणि लोचनान्यस्य 'त्रिलोचनः' ।।२७।।

कृशानुरेताः कृशानौ रेतोऽस्य 'कृशानुरेताः' ।। "देव्या[184] सोढुमशक्यत्वादग्नौ क्षिप्तमस्य रेतः। अतएव "कुमारः पावकि" रिति स्वामी ।।

सर्वज्ञः सर्वं जानाति 'सर्वज्ञः'। कः (पा० ३।१।१३५) ।।

धूर्जटिः जटझट संघाते। "सर्वधातुभ्य" इतीन् (उ० ४।११७) "जटिर्जटी, शिला–शिली" ति द्विरूपकोषः। धुरस्त्रैलोक्यचिन्ताया जटिः संघातोऽत्र धूर्जटिः। "धूर्गङ्गा जटास्य। पृषोदरादित्वादाकारस्येत्वम्" (पा० ६।३।१०९) इति स्वामी भ्रान्तः[185]। उक्तरूपेण जटिसाधनात्। "धूर्भारभूता जटिर्जटाऽस्ये" ति तु कौमुदी ।।

नीललोहितः जुह्वतो ब्रह्मणो ललाटे स्वेदो जातस्तन्माहेश्वरं तेजोऽध्यतिष्ठत्। तच्चाग्नौ निपत्य नीलं भूत्वा लोहितं बभूव। ततोऽयं जात इति 'नीललोहितः' इति पौराणिकाः।

स्कान्दे—"नीलं येन ममाङ्गं तु रसाक्तं लोहितं त्विषा।
नीललोहित इत्येवं ततोऽहं परिकीर्तित" ।।[186] इति वा।
"नीलः कण्ठो लोहिताश्च केशा अस्येति" स्वामी।

हरः (हीरः) प्रलये कृत्स्नं हरति 'हरः'। पचाद्यच् (पा० ३।१।१३४) पृषोदरादित्वादीत्वे (पा० ६।३।१०९) 'हीर' इति च[187]। "हीरः कपर्दी च शिवो दक्षयज्ञहरो हरः" इति संसारार्णवात्[188]।।

स्मरहरः स्मरं हरति 'स्मरहरः'। "हरतेरनुद्यमनेऽच्" (पा० ३।२।९) ।।

भर्गः भर्जते 'भर्गः'। पचाद्यच् (पा० ३।१।१३४) न्यङ्क्वादित्वात् कुत्वम् (पा० ७।३।५३)। भृज्यन्तेऽनेन

184 देव्याः—A, B_1.

185 Actually the printed text of क्षीर runs as follows : "धूर्गङ्गा जटासु अस्य धूर्जटि"रिति निरुक्तम्।

186 समाङ्गे—A.; नीललोहितमित्येवं तेनाहं—B_1. · · · रत्नाभं लोहितं · · · तेनासावभवत् प्रभुः—RNC.

187 हीर इत्यपि—B_1.

188 संसारावर्तात्—B_1; हड्डः—B_2., RNC.

(भर्ग्यः)

कालादयो वा। घञ् (पा० ३।३।१२१) 'भर्गः'। भृज्यते पच्यते जगदत्रेति वा। "भर्ग्य" इति पाठे "ऋहलोर्ण्यत्" (पा० ३।१।१२४)। "चजोः कु घिण्यतो" (पा०७।३।५२) रिति कुत्वम्। बहुभिस्तु "भर्ग" इत्येव[189] मूलपाठः स्वीकृतः ।।

त्र्यम्बकः

त्रीण्यम्बकान्यक्षीण्यस्य, त्रयाणां लोकानामम्बकः पिता वा 'त्र्यम्बकः'। 'त्रिस्रोऽम्बा द्योभूम्यापोऽस्ये'ति तु भारतम् ।।

त्रिपुरान्तकः

त्रयाणां पुराणां समाहारस्त्रिपुरम्। पात्रादिः (वा० २।४।१७)। तस्यान्तकः 'त्रिपुरान्तकः' ।।२८।।

गङ्गाधरः

धरतीति धरः। पचाद्यच् (पा० ३।१।१३४)। गङ्गाया धरो 'गङ्गाधरः'। अन्यथा तु "कर्मण्यण्", (पा० ३।२।१) "संज्ञायां भृत्" इति (पा० ३।२।४६) खज् वा स्यात्।

अन्धकरिपुः

अन्धकदैत्यस्य रिपु'रन्धकरिपुः' ।।

क्रतुध्वंसी

दक्षयज्ञध्वंसनात् 'क्रतुध्वंसी'। नान्तः ।।

वृषध्वजः

वृषो ध्वजश्चिह्नमस्य 'वृषध्वजः' ।।

व्योमकेशः

गङ्गाधरणाय व्योमव्यापी केशोऽस्य 'व्योमकेशः'। व्योम द्यौः के मूर्ध्नि शेते अस्य वा। "शीर्ष्णो द्यौः समवर्तत" इति श्रुतेः। "अन्येभ्योऽपि" इति (पा० ३।२।१०१) डः। 'व्योमकेशः' ।।

भवः

भवत्यस्माद् विश्वमिति' भवः'।[190] बाहुल्यादप्। (पा० ३।३।११३) विश्वमस्त्यस्मिन्निति वा। अस्त्यादेशाद् भुवोऽप्। (पा० २।४।५२; ३।३।५७) 'भवः'। "श्रिणीभुव" इत्यत्र (पा० ३।३।२४) श्रिणीसाहचर्याद् भुवो भौवादिकादेव घञ् ।।

भीमः

विभेत्यस्माद् महाभैरवरूपाद् 'भीमः'। "भीमादयोऽपादाने" (पा० ३।४।७४) इति साधुः।

स्थाणुः

प्रलये तिष्ठतीति 'स्थाणु'। "स्थो णु" (उ० ३।३७) रिति णुः ।।

रुद्रः

'रुद्रः' उक्तः। सर्वगतरुजां द्रावणाद् रोदनहननाद्वा- 'रुद्रः'।[191] तथाच स्कान्दे—

189 भर्गम् इत्येवं—B_2

190 विश्वम्—omitted in B_1.

191 रोदनरणाद् वा—B.

"रुजः सर्वगता यस्माद् द्रावयामि जगत्यहम्।
रोदनं हन्मि यस्माच्च रुद्रस्तस्मादहं प्रिय" इति ।।

उमापतिः

उमायाः पति'रुमापतिः'।। **अष्टचत्वारिंशत् शम्भोः** ।।२९।।

कपर्दः

कपर्द इति। अस्य तु जटाजूटो जटाबन्धः। पर्व पूरणे। संपदादित्वात् क्विप् (वा० ३।३।९४)। "राल्लोप" (पा० ६।४।२१) इत्यन्त्यलोपः। कस्य गङ्गाजलस्य परापूरणेन दायति शुध्यति इति 'कपर्दः'। "दैप् शोधने। "सुपी" ति (पा० ३।२।४) योगविभागात् कः। कस्य जलस्य पूः पूरणमिति 'पृषोदरादित्वात्' (पा० ६।३।१०९) ऊकारस्य अकार इति तु अन्यः।

के शिरसि पर्दते शब्दायते वा कं शिरः पिपर्ति कपर्दः। "औणादिको द" इति तु स्वामी। जटानां जूटो बन्धः 'झुटि, झुन्ट'[192] इति ख्यातः।। **हरजटाबन्धनस्यैकम्** ।।

पिणाकः

पिणाक इति। त्रिपुरदाहे शरानलज्वालाजालेन नाकमपि पिहितवान् इति 'पिणाकः'। निजभासा पिहितनाको वा। अपिरेव पिहितार्थवाची। पृषोदरादित्वात् (पा० ६।३।१०९) पूर्व निपातोऽकारलोपश्च। यद्वा—पातीति 'पिणाकः'। "पिणाकादयश्चे" ति (उ० ४।१५) पातेराकः, नुमागम इत्वं च निपात्येते ।।

अजगवं (अजकवम्) (आजगवम्)

अजो विष्णुः। को ब्रह्मा। तावत्र स्त इति "गाण्डयजगात् संज्ञाया" (पा० ५।२।११०) मिति वः। निपातनाद् गत्वम्। 'अजगवम्, अजकवम् इति तु भाष्यम्। तन्मते सूत्रेऽपि ककारः। प्रज्ञादित्वादणि (पा० ५।४।३८) 'आजगव'मिति दीर्घाद्यपि। तेन "शार्ङ्गं धनुर्मुरारेराजगवमजगवं पिणाके" रिति वोपालितः। (क) "स्थाणोर्धनुराजगवम्" इत्यमरमाला च[193]। क-पक्षेऽन्येषामपि दृश्यते इति (पा० ६।३।१३७) दीर्घत्वेऽजकावमित्यपि। (ख) "धनुस्त्वजगवं युग्ममाजकवमज-

192 झुटिर्झुट—B_1.

193 नाममाला—B_2

(क) आजगवमजस्य वा पिणाकं–भानु°।

(ख) अजगवं, आजगवं, अजगावं, अजकवं, आजकवं, अजकावम् इति षट् रूपाणीति रायः—रघुनाथः।

कावम्" इति शब्दार्णवात् ।। (ग) **शिवधनुषो द्वे नाम्नी ।।**

प्रमथाः

प्रमथा इत्यादि। अस्येत्येव। अस्य पारिषदाः। रुद्रद्वेषिणं प्रमथ्नन्तीति 'प्रमथाः'। मन्थ विलोडने। पचाद्यच् (पा० ३।१।१३४)। परिषदि साधवः पारिषदाः। "परिषदो ण्य" (पा० ४।४।१०१) इति योगाविभागात् अण्।*ण्ये तु "पारिषद्य" इत्यपि। पर्षदो द्वचच्कत्वं। ततः पार्षदपार्षद्यावपि। "भूताः शिवस्य पार्षदा" (घ)इति संसारावर्तादेः, "सपार्षदैरम्बरमापुपूर" इति जाम्बवत्यां पाणिनिः ।। द्वे[194] **शिवानुचराणाम् ।।**

परिषदाः (पारिषद्याः)

ब्राह्मी

ब्राह्मीति। अस्य मातरो ब्रह्मादीनां स्वेदनिर्गतत्वात् "तस्येद"मित्यणि (पा० ४।३।१२०) "ब्राह्मोऽजाता" (पा० ६।४।१७१) विति टिलोपे 'ब्राह्मी'।

"ब्राह्मी माहेश्वरी चैन्द्री वाराही वैष्णवी तथा।
कौमारीत्यपि चामुण्डा चर्चिकेत्यष्ट(ङ)मातरः ।।"इति।

तथाच भट्टस्वामी--अस्याष्टौ पारिवारत्वेन मान्तिर्वर्तन्ते मातर इति। सर्वधरादयस्तु 'चामुण्डार्चचिका' शब्दावपनीय कौबेरी, ति पठित्वा "सप्तैव मातर" इत्याहुः।* 'ब्रह्माण्याद्यास्तु मातरः' इति पाठे ब्रह्माणमणति कीर्तयतीति अणरणेति दण्डकधातोः कर्मण्यणि (पा० ३।२।१) ङीपि 'ब्रह्माणी'। "ब्रह्माण्याद्याः स्मृताः सप्त देवतामातरो बुधै,"रिति हलायुधः ।। **ब्रह्मादिशक्तिदेवतानामेकैकम् ।।३०।।**

विभूतिः भूतिः

विभूतिरिति। विशेषेण भूतिर्भवनमस्या 'विभूतिः'।। एवं 'भूतिः'। भवतेः। स्त्रियां "मन्त्रेवृषेषपचमनविदभूवीरा उदात्तः"(पा० ३।३।९६) इति क्तिन्। भूतिरित्युक्त्वा विभूतिरिति अन्यप्रादिनिवृत्त्यर्थम्।

कासौ विभूतिर्भूतिश्च इत्याह--'ऐश्वर्य'मिति।

"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा।
ईशिता वशिता चैव तथा कामावशायिता ।।[195]

(ग) अजकावमजीजकम्--भानु°। * It should be ण। (घ) पार्षद्या पार्षदा--भानु°।

194 एकं--A.

(*) भानु° referring to हलायुध says--स हि "कौबेरीत्यपि कौमारी"--इति पठति।

(ङ) चण्डिकेत्यष्ट--RNC.

195 कामावसायिता--B_1, B_2.

तत्राणिमा अणुत्वम्। येन सूक्ष्मो भूत्वा विचरति। लघिमा लघुत्वम्, येन वायोरपि लघुतरो भवति। प्राप्तिरङ्गुल्यग्रेण चन्द्रादिस्पर्शः। प्राकाम्यमिच्छानभिघातः। महिमा महत्त्वम्, येन भुवनेऽपि न संमाति। ईशिता प्रभुत्वम्, येन स्थावरादि सर्वभूतान्यादेशकारीणि भवन्ति। वशिता यया भूमावपि जलवन्मज्जनोन्मज्जनम्(१)। कामावशायिता[196] सत्यसंकल्पता।(क) शीङो णिनिः (पा० ३।२।१८)। सर्वानन्दस्तु--कामावसायितेत्यनेकार्थत्वाद् धातूनां स्यतिरिह तिष्ठत्यर्थ इति वदन् दन्त्यमध्यं मन्यते।[197] एतदेव युक्तं मन्यामहे बहुषु प्रयोगात्।

ऐश्वर्यम्

ऐश्वर्यमपि नाम। "विभूतिभूतिरिति शम्भुधृतभस्मनो नामद्वयम्" इति त्वन्यः।।३१क।। **अणुत्वाद्यष्टविधप्रभावस्य नामत्रयम् ।।**

**उमा कात्यायनी गौरी काली हैमवतीश्वरा ।।३१।।
शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला।
अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका ।।३२।।***

उमा

उमेति। "उमेति मात्रा तपसे निषिद्धा पश्चादुमाख्यां सुमुखी जगाम"(कुमार० १।२६)इत्युमा।[198] यद्वा अवति रक्षति आपद्भ्य इति[199] "अविसिविसिशुषिभ्यः किद्"(उ० १।१४३) इति मन्प्रत्यये कित्वे "ज्वरत्वरे" ति (पा० ६।४।२०) बाहुलकाद्ध्रस्वत्वे च 'उमा'। क्वचित् कल्पे ओर्महेश्वरस्य मा लक्ष्मीरिति वा ।।

कात्यायनी

कतस्यापत्यमिति गर्गादित्वाद् यञ् (पा० ४।१।१०५)। ततः "सर्वत्र लोहितादिकतन्तेभ्य" (पा० ४।१।१८) इति ष्फः। षित्वात् ङीष् (पा० ४।१।४१)। 'कात्यायनी'।

(१) वशिनो भावो वशिता, यया भूमावप्युन्मज्जननिमज्जने--भानु°।

196 कामावसायिता--B.

(क) सत्यसंकल्पिता--RNC.

197 But the TSS. 38 text of सर्वानन्द reads--शीङिह तिष्ठत्यर्थे (p. 28) and there is nothing to indicate the nature of स।

* Southern mss. add--आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा।

198 मल्लिनाथ reads तपसे निषिद्धा।

199 यद्वा अवति मन्प्रत्यये रक्षत्यस्यापत्यम् इति--B, B_1

गौरी ‘गौरी’। गौरादित्वात् ङीष् (पा० ४।१।४१)। तथाच स्कान्दे––

“इच्छामि देव दिव्यञ्च वपुः कनकसुप्रभम्।
गौरीति लोके ख्याता च भवेयं कमलोद्भवा ।।” इति ।।

काली (काला) अवस्थाभेदेन ‘काली’। “जानपदे” (पा० ४।१।४२) त्यादिना ङीष्। वर्णस्याविवक्षायां ‘काला’। “उमा कात्यायनी दुर्गा काली हैमवतीश्वरा। काला कालञ्जरी गौरे”[200] ति वाचस्पतिः ।।

हैमवती ‘हैमवती’। “तस्यापत्यम्”। (पा० ४।१।९२) इत्यण् ।।

ईश्वरा ईष्टे। “स्थेशभास” इति वरच् (पा० ३।२।१७५)। टाप्। ‘ईश्वरा’। “अश्नोतेराशुकर्मणि वरट् च ईच्चादे” रिति (उ० ५।५७) टित्त्वात् ङीपि ‘ईश्वरी’ (पा० ४।२।१५)। “ईश्वरः शङ्करेऽधीशे तत्पत्न्यामीश्वरीश्वरा” इति वोपालितः ।।३१।।

शिवा (शिवी) शक्ति-शक्तिमतोरभेदात्[201] श्रेयस्करीत्वाद्वा ‘शिवा’। “पुंयोगे “शिवी”ति स्वामी ।।

भवानी, रुद्राणी शर्वाणी, मृडानी भवस्य स्त्री“भवानी”। “इन्द्रवरुणे” त्यादिना (पा० ४।१।४९) ङीषानुकौ। एवं रुद्राणी, शर्वाणी, मृडानीति ।।

सर्वमङ्गला सर्वाणि मङ्गलान्यस्यां ‘सर्वमङ्गला’ ।।

अपर्णा तपस्यन्त्यानया स्वयं विशीर्णमपि पर्णं न भुक्तम् इति न विद्यते पर्णमप्याहारो यस्याः ‘अपर्णा’। “जाते” रित्यनुवृत्तेः “पाककर्ण”––त्यादिना (पा० ४।१।६४) ङीष् न भवति।

पार्वती पर्वतस्यापत्यं ‘पार्वती’। पूर्ववदण् (पा० ४।१।९२) ।।

दुर्गा “सर्वे गत्यार्था ज्ञानार्था” इति दुःखेन गम्यते ज्ञायतेऽसाविति ‘दुर्गा’। “अन्येभ्योऽपि दृश्यत” (पा० ३।२।१०१) इति डः। दुःखेन गन्तुं ज्ञातुं शक्यते[202]ऽस्यामित्याधारविवक्षायां “सुदुरोरधिकरणे ड” (वा०) इति तु मधुमाधवी[203]। दुर्गं गिरिर्वनं

200 गौरी—B_1. हैमवतीश्वरी—भानु°। RNC.—गौरी शिवा for दुर्गा काली।
201 शिवशक्त्योरभेदात्—B_2.
202 ज्ञातुं—omited in B_1.
203 माधवी—B_1.

वा निवासत्वेन अस्या अस्तीति “अर्शं आद्यचि” (पा० ५।२।१२७) वा, दुर्गनामासुरवधाद्वा। तथाच “तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम्। दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति”।। इति मार्कण्डेयपुराणम्।

चण्डिका अतिकोपनत्वात् ‘चण्डिका’ दुर्गा। चडि कोपे। चण्डतीति पचाद्यचि[204] (पा० ३।१।१३४) स्त्रियां “बह्वादिभ्यश्च” (पा० ४।१।४५) इति ङीष्। ततः “संज्ञायाम्” (पा० ५।३।७५) इति कन्। “केऽण” (पा० ७।४।१३) इति ह्रस्वः। ण्वुल् वा (पा० ३।१।१३३) ।।

अम्बिका जगन्मातृत्वादम्बैवाम्बिका। संज्ञायां कन् (पा० ५।३।७५) ।। **सप्तदश उमायाः**[205]।।३२।।

विनायक-विघ्नराज-द्वैमातुर-गणाधिपाः।
अप्येकदन्त-हेरम्ब-लम्बोदर-गजाननाः ।।३३।।

विनायकः **विनायकेत्यादि**। विघ्नानां विशिष्टानां नायको, विगतो नायको नियन्ता अस्य वा, अन्येषां विनेता वा इति ‘विनायकः’। ण्वुल् (पा० ३।१।१३३) ।।

विघ्नराजः तथैव विघ्नानां राजा नियन्ता ‘विघ्नराजः’। ‘राजाहःसखिभ्यष्टज्” इति टच् (पा० ५।४।९१) ।।

द्वैमातुरः दुर्गया चामुण्डया[206] पालितत्वात् द्वयोर्मात्रोरपत्यं ‘द्वैमातुरः’। “मातुरुत्संख्यासंभद्रपूर्वाया” (पा० ४।१।११५) इत्यण् उत्वं रपरत्वं च। “शिरोरहितो जातो हस्तिशिरसि(सा?) योजित इत्यतो हस्तिन्या अपत्यत्वाद् द्वयोर्मात्रो रपत्य”मिति तु कौमुदी ।।

गणाधिपः गणानां प्रमथानामधिपो ‘गणाधिपः’ ।।३३।।

एकदन्तः कार्त्तिकेयेनोत्पाटितदन्तत्वात् ‘एकदन्तः’ ।।

हेरम्बः हे शङ्करे रम्बते लम्बते बाल्ये इति ‘हेरम्बः’। “हे प्रत्यूहे[207] रम्बते शब्दायते” इति तु स्वामी। यद्वा हे शिवसमीपे रम्बते शब्दायते ‘हेरम्बः’। अबिरबि शब्दे। पचाद्यच्

204 omitted in B_1.
205 सप्तदश दुर्गायाः—B, B_1.
206 दुर्गायाश्चामुण्डायाः
207 प्रत्यूषे—printed texts of क्षीर°

(पा० ३।१।१३४)। "तत्पुरुषे कृति" (पा० ६।३।१४) इत्यलुक् ।।

लम्बोदरः लम्बमुदरमस्येति 'लम्बोदरः' ।।

गजाननः गज आननमस्येति "समुदायेषु हि प्रवृत्ताः शब्दा अवयवेष्वपि वर्तन्ते" इति 'गजाननः'। गजाननमिव आननमस्येति उष्ट्रमुखवत्[208] समासोत्तरपदलोपौ ।। **अष्टौ गणपतेः ।।३३।।**

कार्त्तिकेयो महासेनः शरजन्मा षडाननः ।
पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः ।।३४।।
बाहुलेयस्तारकजिद्विशाखः शिखिवाहनः ।
षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः ।।३५।।*

कार्त्तिकेयः **कार्त्तिकेय इति।** कृत्तिकानामपत्यं तत्पालितत्वात् 'कार्त्तिकेयः' ।।

महासेनः महती सेना अस्य 'महासेनः' ।। दन्त्यसः ।।

शरजन्मा शरवणाज्जन्मास्य 'शरजन्मा'। नान्तः ।।

षडाननः कृत्तिकानामग्निपत्नीनां षण्णां स्तनपानार्थं षड् आननान्यस्य[209] इति 'षडाननः' ।।

पार्वतीनन्दनः पार्वत्या नन्दनः 'पार्वतीनन्दनः'। ल्युः (पा० ३।१।१३४)।।

स्कन्दः स्कन्दति गच्छति शोषयति वा दैत्यान् 'स्कन्दः'। तथाच वायुपुराणम्—"स्कन्दिता दानवगणास्तेन स्कन्दः प्रतापवान्" इति। स्कन्दिर् गतिशोषणयोः। पचाद्यच् (पा० ३।१।१३४)।।

सेनानीः सेनां नयति प्रापयति[210] 'सेनानीः'। "सत्सूद्विषे" ति (पा० ३।२।६१) क्विप् ।।

अग्निभूः "पुराकिल तारकोपप्लुतदेवरक्षार्थं शिवेनाग्निरूपं स्वबीजं वह्निमुखे क्षिप्तं तेनापि कृत्तिकासु क्षिप्तम्। ताश्च दैवागतगर्भसत्रपाः शरवणं प्रविश्य प्रसूताः। तेनाग्निभू" रिति सर्वानन्दः। कौमुद्यां तु—"तारकजित[211] देवरक्षाक्षमपुत्रोत्-

208 भद्रमुखवत्—B.
209 षड् आननान्यस्य—omitted in B_1.
210 omitted in B, B_1.
211 तारकभीत—B_1.
* Some mss. add— शृङ्गी भृङ्गिरिटिस्तुण्डी नन्दिको नन्दिकेश्वरः । कर्ममाटी तु चामुण्डा चर्ममुण्डा तु चर्चिका ।।

पादनाय देव्यां बीजमुत्सिसृक्षुः रुद्रो गौरीगर्भजात्तदपत्याददतिबलाद्देवा भीरव इत्यग्निना ज्ञापितो भूमौ रेतोऽक्षिपत्। देवीशापात् स गर्भोऽग्नावेवाभूत्। स तं गर्भं खिन्नो गङ्गायामक्षिपत्। सा च शरवणे कुमारमसूत।[212] स च कृत्तिकादिभिर्नीत्वा पालित इत्यतोऽयमग्निभवत्वा'दग्निभू'रित्युक्तम् ।।"

गुहः गूहति रक्षति सेनां 'गुहः'। गुह संवरणे। "इगुपधे" (पा० ३।१।१३५) ति कः ।।३४।।

बाहुलेयः बहुलाः कृत्तिकास्तासामपत्यं 'बाहुलेयः'। "स्त्रीभ्यो ढक्" (पा० ४।१।१२०) इति ढक् ।।

तारकजित् तारकं जयति 'तारकजित्' ।। क्विप् (पा० ३।२।६१) ।।

विशाखः विशाखानक्षत्रेण युक्तः कालः (पा० ४।२।३) इत्यण्। तस्य "लुबविशेष" (पा० ४।२।४) इति लूप्। "लुपि युक्तवद्व्यक्तिवचन" (पा० १।२।५१) इति प्रकृतिलिङ्गसंख्ये। ततो विशाखायां जात इति "सन्धिवेलादी" (पा० ४।३।१६) त्यण्। तस्य "श्रविष्ठाफल्गुनी" (पा० ४।३।३४) त्यादिना लुकि "लुक् तद्धितलुकि" (पा० १।२।४६)" इति टापो लुकि 'विशाखः' ।।

शिखिवाहनः शिखी मयूरो वाहनमस्य 'शिखिवाहनः' ।।

षाण्मातुरः षण्णां मातॄणामपत्यं षाण्मातुरः। द्वैमातुरवत् (पा० ४।१।११५) ।।

शक्तिधरः शक्तेर्धरः 'शक्तिधरः'। अन्यथा कर्मण्यणः प्राप्तिः[213]।।

कुमारः वायुपुराणे—"यस्मात् क्रीडति सोऽत्यर्थं कुमारस्तेन कीर्तित" इति कुमार क्रीडायामिति धातोः पचाद्यच् (पा० ३।१।१३४)। "काम्यत इति "कमेः किदुच्चोपधाया" (उ० ३।१३८) इत्यारन्प्रत्यये उपधायाश्चोत्वे कुमार" इति तु व्याख्यामृतम्। सदा बालत्वाद्वा। तथाच स्कान्दे—"पुत्रस्ते भविता देवि महायोगबलान्वितः। सदा बालोऽथ सुभगो धर्मविद्धर्मवत्सल" इति नारदवचनात्[214] षोडशवर्ष-

212 असृजत्—B, B_1. 213 अन्यथा अण्प्राप्तेः—B_1. 214 नारदवरात्—A. तथाच स्कान्दे—. . . महाबलपराक्रमः. . . बालोऽतिसुभगो धर्मज्ञो—RNC.

देशीयः, न त्वनूढतया कुमार इति प्रवाद आदर्तव्यः। यतोऽनेन देवसेना व्यूढा। तथाच वायुपुराणम्––"शतक्रतो रूपवती देवसेनेति या* सूता। सा महेन्द्रेण रत्यर्थं भार्यात्वेनोपपादिता।। उदीर्णसेनापतये महासेनाय सुव्रते।।" ति।।

क्रौञ्चदारणः (क्रौञ्चदारणः)

क्रुञ्चेः क्विनि (पा० ३।२।५९) प्रज्ञाद्यणि (पा० ५।४।३८) क्रौञ्चमसुरं पर्वतं वा दारयति 'क्रौञ्चदारणः'। दृ विदारणे। ण्यन्ताल्ल्युः (पा० ३।१।१३४)। क्रोञ्चपर्वतं वा।[215] तथाच––"कैलासे धनदावासे क्रोञ्चः[216] क्रौञ्चोऽभिधीयते" इति वृहद्धारावली(क)। इहापि द्वैरूप्यम्।।

सप्तदश कार्त्तिकेयस्य।।३५।।

इन्द्रो मरुत्वान्मघवा विडोजाः[217] पाकशासनः।
वृद्धश्रवाः सुनासीरः पुरुहूतः पुरन्दरः।।३६।।
जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः।
सुत्रामा गोत्रभिद् वज्री वासवो वृत्रहा वृषा।।३७।।
वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः।
जम्भभेदी हरिहयः स्वाराण्नमुचिसूदनः।।३८।।
संक्रन्दनो दुश्च्यवनस्तुराषाण्मेखवाहनः।।
आखण्डलः सहस्राक्ष ऋभुक्षास्तस्य तु प्रिया।।३९।।
पुलोमजा शचीन्द्राणी नगरी त्वमरावती।
हय उच्चैःश्रवाः सूतो मातलिर्नन्दनं वनम्।।४०।।
स्यात् प्रासादो वैजयन्तो जयन्तः पाकशासनिः।।

इन्द्रः

इन्द्र इति। इन्दति परमैश्वर्यं करोति 'इन्द्रः'। "ऋज्रेन्द्र" (उ० २।२८) इत्यादिना रक् (न्?)।।

मरुत्वान्

मरुतो देवता अनुचरत्वेनास्य सन्तीति 'मरुत्वान्।' मतुप् (पा० ५।२।९४) "झय" (पा० ८।२।१०) इति वत्वम्। "तसौ मत्वर्थे"(पा० १।४।१९) इति भत्वात् पदकार्यजश्त्वाभावः।।

* वै—RNC.

215 क्रोञ्च इत्यपि—A., क्रोञ्चेति पर्वते—B., क्रौ(कौ)ञ्चपर्वतं वा—B_1.

216 कौञ्चः—B_2. भानु° 217 विडौजाः—others (क) वृद्धहारावली—RNC.

मघवा

मह्यते। मह पूजायामित्यतः "श्वन्नुक्षन् पूषन्" (उ० १।१५८) इत्यादिना कनिनि 'मघव'न्निति निपातितः। "मघवा बहुलम्" (पा० ६।४।१२८) इति पक्षे त्रादेशात् सौ दीर्घाभावात् मघवन्नपि। "हविर्जक्षिति निःशङ्को मखेषु मघवानसौ" इति भट्टिप्रयोगात् (१८।१९) मघः सौख्यमस्यास्तीति मतुवन्तोऽपि। एवं 'मघवा', 'मघवन्', 'मघवान्' इति त्रैरूप्यम्।।

विडोजाः (विडौजाः)

वेवेष्टीति विट्। विष्लृ व्याप्तौ। क्विप्। विट् व्यापकमोजोऽस्येति 'विडोजाः'। सान्तः। पृषोदरादित्वादकारागमे (पा० ६।३।१०९) 'विडौजाः'[218] इति च। 'विड भेदने। इगुपधत्वात् कः (पा० ३।१।१३५)। विडं दैत्यानां भेदकं ओजोऽस्य इति 'विडोजा' इति स्वामी।। "विडौजाश्च विडोजाश्च" इति वर्णविवेके हड्डचन्द्रः।[219]

पाकशासनः

पाकं वृत्रभातरं शासितवान्। ल्युः (पा० ३।१।१३४)। 'पाकशासनः।' "दितेर्गर्भमतिबलमसह्यं मत्वान्तः प्रविश्यैकोनपञ्चाशतं खण्डान् कृतवान् इत्यतो वा। "पाकानामर्भकाणां शासन" इति तु कौमुदी।।

वृद्धश्रवाः

वृद्धेभ्यः शृणोति। असुन्(उ० ४।१८८)। 'वृद्धश्रवाः।' सान्तः। वृद्धोपजीवीत्यर्थः। वृद्धाद् बृहस्पतेः शृणोतीति वा। "वृद्धे श्रवसी अस्य" इति तु स्वामी।

सुनासीरः (शीरः सूर्यः) (शुनाशीरः) (शुनासीरः)

णासृ शब्दे। बाहुलकादीरन् (उ० ४।३०)। नासीरा अग्रेसरास्ते शोभना अस्येति 'सुनासीरः।' द्विदन्त्यः। तत्र शुनो वायुः, शीरः सूर्यस्तावस्य स्त इत्यर्श आद्यचि (पा० ५।२।१२७) "अन्येषामपी" ति (पा० ६।३।१३७) दीर्घ इति व्युत्पत्त्या द्वितालव्योऽपि। [शुनाशीरः]। एतत्पक्ष एव "शौरिशुनाशीरशीतशिवशंखा" इति तालव्यादावूष्मविवेकः। आशुर्नासीरो यस्य इति पृषोदरादित्वादाकारलोपे (पा० ६।३।१०९) 'शुनासीर' इत्यन्ये।।

पुरुहूतः

युद्धे पुरुनाम्नासुरेणाहूत इति 'पुरुहूतः।' ह्वेञः क्तः।

218 विडौजाश्च—B.

219 omitted in A.

संप्रसारणं, "हल" (पा० ६।४।२) इति दीर्घः। "पुरु प्रभूतं[220] हूतमाह्वानं यज्ञेऽस्येति 'पुरुहूत' " इति स्वामी ॥

पुरन्दरः पुराण्यरीणां दारयतीति 'पुरन्दरः।' "पूःसर्वयोर्दारिसहो" (पा० ३।२।४१) रिति खचि "वाचंयमपुरन्दरौ चे" ति (पा० ६।३।६९) निपातितः ॥३६॥

जिष्णुः जयनशीलो 'जिष्णुः। "ग्लाजिस्थश्चे"ति (पा० ३।२।१३९) ग्स्नुः ॥

लेखर्षभः लेखेषु देवेषु ऋषभो 'लेखर्षभो' देवश्रेष्ठः। "सप्तमी"ति (पा० २।१।४०) योगविभागात् समासः। लेखोऽयं ऋषभश्चेति वा। "उपमितं व्याघ्रादिभिः" इति (पा० २।१।५६) समासः ॥

शक्रः शक्नोत्यतिशयेन जेतुं[221] 'शक्रः'। "स्फायितञ्ची" त्यादिना (उ० २।१३) रक् ॥

शतमन्युः शतं मन्यवो यागा अस्य 'शतमन्युः ॥'

दिवस्पतिः दिवः स्वर्गस्य पति 'दिवस्पतिः।' "तत्पुरुषे कृती" त्यत्र (पा० ६।३।१४)बाहुलकादकृत्यपि षष्ठ्या अलुक्। "षष्ठ्याः पतिपुत्रे" (पा० ८।३।५३) त्यादिना सत्वम् ॥

सुत्रामा (सूत्रामा) सुष्ठु त्रायते भुवनमिति। त्रैङ पालने। "आतो मनिन्" (पा० ३।२।७४) इत्यादिना मनिन्। "अन्येषामपी"ति (पा० ६।३।१३७) दीर्घत्वे सूत्रामेति वर्णदेशना। पाक्षिकं दीर्घत्वमिति रूपमञ्जरी। मतिनिर्णये च सुत्रामेत्यस्य प्रत्यागतं मात्रास्विति(?) ॥

गोत्रभित् गोत्रान् गिरीन् पक्षभेदाच्छिनत्तीति 'गोत्रभित्'। भिदेः क्विप् (पा० ३।२।६१)॥

वज्री वज्रयोगाद् 'वज्री।' इनिः (पा० ५।२।११५) ॥

वासवः वसूनि रत्नानि बहून्यस्य सन्तीति 'वासवः'। ज्योत्स्नादित्वादण् (वा० ५।२।१०३)। "वसोरपत्यं वासव" इति तु स्वामी ॥

220 प्रचुरं—A.

221 omitted in B, B_1.

वृत्रहा वृत्रं हतवान् इति "ब्रह्मभ्रूणवृत्रेषु" (पा० ३।२।८७) इति क्विप्। 'वृत्रहा ॥'

वृषा वर्षतीति 'वृषा।' पृषुवृषुमृषु सेचने। "युवृषितक्षिराजिधन्विद्युप्रतिदिव" इति कनिन् (उ० १।१५६)। "सर्वनामे"त्यादिना (पा० ६।४।८) दीर्घः ॥३७॥

वास्तोष्पतिः वास्तोर्गृहक्षेत्रस्य पतिरधिष्ठातृत्वाद् 'वास्तोष्पतिः'[222] इति "द्यावापृथिवीसुनासीरमरुत्वदग्निषोमवास्तोष्पतिगृहमेधाच्छ" (पा० ४।२।३२) इति निपातनात् षष्ठ्या अलुक्। "षष्ठ्याः पतिपुत्रे"(पा० ८।३।५३)त्यादिना सत्वे इणः परत्वान्मूर्धन्यमध्यः ॥

सुरपतिः सुराणां पतिः 'सुरपतिः' ॥

बलारातिः बलासुरस्यारातिः 'बलारातिः' ॥

शचीपतिः शच्याः पतिः 'शचीपतिः' ॥

जम्भभेदी जम्भमसुरं भेत्तुं शीलमस्य 'जम्भभेदी'। णिनिः (पा० ३।२।७८) ॥

हरिहयः शालिहोत्रे——

"त्वक्केशबालरोमाणि सुवर्णाभानि यस्य तु।
हरिः स वर्णतोऽश्वस्तु पीतकौशेयसप्रभ"[223] इति

हरिर्हयो यस्येति 'हरिहयः'।

स्वाराट् स्वः स्वर्गे वा राजते। क्विप् (पा० ३।२।६१)। "रोरी"ति (पा० ८।३।१४) रलोपे "ढ्रलोप" (पा० ६।३।१११) इति दीर्घः। 'स्वाराट्।' जान्तः। "व्रश्चभस्जे"ति (पा० ८।२।३६) षः। जश्त्वम्। डकारः। "यरोऽनुनासिकेऽनुनासिको वा" (पा० ८।४।४५)। "न पदान्तादि"ति (पा० ८।४।४२) नकारस्य ष्टुत्वाभावः ॥

नमुचिसूदनः न मुञ्चतीति नमुचिः। मुच्लृ मोक्षणे। "इक् कृष्यादिभ्य" (वा० ३।३।१०८) इतीक्। नाकवत् नञ् प्रकृतिभावः। तं सूदितवान् इति 'नमुचिसूदनः'। षूद क्षरणे। नन्द्यादित्वाल्ल्युः

222 वास्तोस्पतिः—B.

223 हरिः स वर्ण्यते सुष्ठु—B., वातकौशेय—B_2, यतिकोषेय—B_2., सुप्रभ—RNC.

(पा० ३।१।१३४)। "अनुदात्तेतश्च हलादे"रिति (पा० ३।२।१४९) युच्। "सूददीपदीक्षश्चे" (पा० ३।२।१५३) त्यस्य "नय" (पा० ३।२।१५२) इति योगविभागेनानित्यत्वान्न[224] युचो निषेधः ।।३८।।

संक्रन्दनः

संक्रन्दयति दैत्यस्त्रीर्दितिगर्भं संक्रन्दितवान् इति वा 'संक्रन्दनः'। दारणाद् गर्भस्थमरुतो वा। कदिक्रदि आह्वाने रोदने च। ल्युः (पा० ३।१।१३४) ।।

दुश्च्यवनः

दुःखेन च्यवनं पतनमस्येति 'दुश्च्यवनः'। च्यवनमुनिनैकदा जितत्वात् दुःसहश्च्यवनोऽस्येति वा। दुष्टं च्यवते परदारेषु रेतःस्रुतेर्वा। "चलनशब्दार्था"दिति (पा० ३।२।१४८) युच्। "दुःखेन च्यवते रणाद्वेति प्रादिसमास" (वा०) इति तु स्वामी ।।

तुराषाट्

तुरं त्वरितं साहयत्यभिभवत्यरीन्, तुरं वेगवन्तं सहत इति वा, तुरितस्त्वरितः सन् परबलानि सहत इति वा 'तुराषाट्'। हान्तः। "छन्दसि सह" (पा० ३।२।६३) इति ण्विः। "सहेः साडः स" (पा० ८।३।५६) इति षत्वम्। "अन्येषामपि दृश्यत" (पा० ६।३।१३७) इति दीर्घः। तुरासाहावित्यादौ तु "साड्"-रूपाभावान्न षत्वम् ।।

मेघवाहनः

महामेघा गजरूपधारिण ऐरावतादयो वा वाहनमस्य, मेघान् वाहयति चालयति (आविश्य?) वर्षति[225] वा 'मेघवाहनः'। "इन्द्रो हि मेघानाविश्य वर्षति" इत्यागमः ।।*

आखण्डलः

आखण्डयत्यरीन्[226] इत्या'खण्डलः'। खण्ड खडि भेदे। वृषादिभ्यः: कलच् (उ० १।१०८) (क) ।।

सहस्राक्षः

सहस्रम् अक्षीणि अस्य। "वहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् (पा० ५।४।११३) इति षच्। 'सहस्राक्षः ।'

ऋभुक्षाः

ऋभवः क्षियन्त्यत्र इति डः (पा० ३।२।१०१)। ऋभुक्षः स्वर्गः। सोऽस्याश्रयत्वेनास्तीति इनिः (पा०

224 योगविभागानित्यत्वात्—B.　225 omitted in B, B_1.　* सर्वस्वे—RNC.
226 खण्डयतेऽरीन्—B.　(क) भट्टोजि reads the rule as वृषादिभ्यश्चित्। The suffix is कल there. But नारायण and श्वेतवनवासी have कलच्।

५।२।११५)। 'ऋभुक्ष' इति कौमुदी। "ऋभुक्षो वज्र" इति धातुपारायणे पूर्णचन्द्रः। इनिः। "ऋभुक्षः स्वर्गवज्रयो" रिति विश्वः। "अर्तेर्भुक्षिनक्" इति तु स्वामी। ऋभून् देवान् क्षिपति[227] कार्येषु व्यापारयति पृषोदरादिरिति (पा० ६।३।१०९) तु पञ्जिका। "इतोऽत् सर्वनामस्थान" (पा० ७।१।८६) इतीकारस्यात्वम्। "पथि-मथि-ऋभुक्षामा"दिति (पा० ७।१।८५) नकारस्यात्वम्। 'ऋभुक्षाः।' पथिशब्दवद्रूपम् ।। **पञ्चत्रिंशदिन्द्रस्य ।।**

पुलोमजा

तस्य त्वित्यादि। पुलोम्नो मुनेर्जाता। "पञ्चम्यामजाता" विति (पा० ३।२।९८) डः। 'पुलोमजा।' 'पौलोमी'त्यपि ।।

(पौलोमी)

(शचिः)

शचति व्यक्तं वक्तीति। शच व्यक्तायां वाचि।[228] "सर्वधातुभ्यः" (उ० ४।११७) इतीन्। शचिः। "कृदिकारा" (वा० ४।१।४५) दिति ङीष्। 'शची'। तालव्यादिः।

शची

सर्वेन्द्रियेषु सचते समवैतीति। सच समवाये। "सर्वधातुभ्य इन्" (उ० ४।११७) इति इन्प्रत्यये 'सचिः'। 'सची'ति दन्त्यादीति––पञ्जिका ।।

(सचिः)

(सची)

इन्द्राणी

इन्द्रस्य स्त्री 'इन्द्राणी।' "इन्द्रवरुणे"ति (पा० ४।१।४९) ङीषानुकौ। "अनुकि कर्तव्ये दीर्घाकारमानुकं शास्ति। तज्ज्ञापयति यतो विहितं ततोऽन्यत्रापि भवति। तेन कीर्याणी गिर्याणीत्यादि सिद्धं भवति" इति धातुपारायणम्। अतएव "लेखर्षभोऽप्यथ शची स्यादिन्द्राणी शतावरी। चारुधारा[229] महेन्द्राणी शक्राणी जयवादिनी"ति[230] रभसः ।।

तस्येति। "प्रासादो वैजयन्त" इत्येतत्पर्यन्तमुन्नेयम् ।। **त्रीणि इन्द्रपत्न्याः ।।**

अमरावती

नगरीति। अमराः सन्त्यस्याम्। मतुपि (पा० ५।२।९४) "मतौ वह्वचोऽनजिरादीनाम्" (पा० ६।३।११९) इति दीर्घः। 'अमरावती'।। **एकम् (इन्द्रनगर्याः) ।।**

227 क्षियति—B_1.　228 B reads सच with dental स
229 चारुधामा—B_1.　230 गजवाहिनी—RNC.

उच्चैःश्रवाः

हय इति। उच्चैः श्रवसी अस्य उच्चैः शृणोतीति वा 'उच्चैःश्रवाः।' असुन्नन्तः (उ० ४।१८८)। "वा शरी"ति (पा० ८।३।३६) पक्षे विसर्गस्य सत्वम्। तस्यापि चुत्वे (पा० ८।४।४०) शकारः॥ **एकम् (उच्चैःश्रवसः)** ॥

(उच्चैश्श्रवाः)

मातलिः

सूत इति। धातूनामनेकार्थत्वात् मतं गतिः। मतं लातीति 'मातलिः।' बहुलवचनात् कर्तरि किः (पा० ३।२।१७१)। पृषोदरादित्वादाकारः (पा० ६।३।१०९)। मतलस्यापत्यम्। अत इञि (पा० ४।१।९५) वा॥ **एकम् (मातलेः)** ॥

नन्दनं

नन्दनमिति। नन्दयतीति 'नन्दनम्।' ल्युः (पा० ३।१।१३४)॥ **एकम् (नन्दनस्य)** ॥३९–४०॥

वैजयन्तः

स्यादिति। प्रशस्ता वैजयन्त्यः पताकाः अत्र सन्तीति। अर्श आद्यच् (पा० ५।२।१२७)। 'वैजयन्तः।' विजयत इति विजयन्तो विष्णुः[231]। "तॄभूवहिवसिभासिसाधिगण्डिमण्डिजिनन्दिभ्यश्चे"ति झच् (उ० ३।१२८)। "तस्यायं वैजयन्त" इति स्वामी॥ **इन्द्रगृहस्यैकम्** ॥

जयन्तः

जयन्त इति। जयतीति 'जयन्तः'। "तॄभू" इत्यादिना (उ० ३।१२८) झच्। "झोऽन्त" (पा० ७।१।३) इत्यन्तादेशः॥

पाकशासनस्यापत्यं 'पाकशासनिः' "अत इञ्" (पा० ४।१।९५)॥ **द्वे इन्द्रपुत्रस्य** ॥ ४१क॥

ऐरावतो *ऽभ्रमातङ्गैरावणाऽभ्रमुवल्लभाः ॥४१॥

ऐरावतः

ऐरावत इति। इरावत्यब्धौ भव इत्यणि (पा० ४।३।५३) 'ऐरावतः।' इरावती कश्यपजा अनपत्या पुलहप्रिया। तया संभृतत्वाद् वा। तथाचागमः—"इरावत्या वृतः[232] पुत्रस्यार्थे ऐरावतस्तत" इति॥

अभ्रमातङ्गः

अभ्रात्मको मातङ्गः 'अभ्रमातङ्गः।' मध्यपदलोपिसमासः (वा० २।१।६०)॥

231 वैजयत इति वैजन्तो विष्णुः—B., जिष्णुः—B_1.

* ऐरावताऽभ्रमातङ्ग—B_1.

232 इरावत्यादृतः—A ; भृतः—B_1., शिवदत्तः

ऐरावणः

ऐरावत एव 'ऐरावणः।' पृषोदरादित्वात्तस्य णः (पा० ६।३।१०९)॥

अभ्रमुवल्लभः

अभ्रमोर्वल्लभो'ऽभ्रमुवल्लभः॥' **चत्वार्यैरावतस्य** ॥४१॥

ह्लादिनी वज्रमस्त्री स्यात् कुलिशं भिदुरं पविः।
शतकोटिः स्वरुः शम्बो[233] दम्भोलिरशनिर्द्वयोः ॥४२॥
व्योमयानं विमानोऽस्त्री नारदाद्याः सुरर्षयः ॥

ह्लादिनी

ह्लादिनीति। ह्लादत्यवश्यम्। ह्लाद अव्यक्ते शब्दे। "आवश्यके णिनिः" (पा० ३।३।१७०)। ह्लादिनी ह्लादः[234] स्फूर्जथुरस्या अस्तीति 'ह्लादिनी।' "अत इनिठना"—विति (पा० ५।२।११५) तु स्वामी॥

वज्रम्

वजति यात्येव न प्रतिहन्यत इति 'वज्रम्।' "ऋज्रेन्द्रे"ति रन् (उ० २।२८)। 'अस्त्री'ति कुलिशेनैवान्वीयते। "वज्रोऽस्त्रीहीरके पवा" विति नानार्थे वक्ष्यमाणत्वात्। "अस्त्रियौ वज्रकुलिशौ दम्भोलिरशनिर्द्वयो" रिति संसारावर्तः। "कलिङ्गस्त्वेतददृष्ट्वा "नपुंसके कुलिशशतधारे" इति रत्नकोषं पश्य'न्नस्त्री'ति वज्रेण संबध्नन् "कुलिशो मम वक्षसी"ति (५।२५) भट्टिमप्याकुलयति स्म॥

कुलिशम्

"कुलिर्हस्तो भुजादल" इति त्रिकाण्डशेषः। कुलौ हस्ते शेते इति डप्रकरणे"ऽन्येभ्योऽपि दृश्यत" (पा० ३।२।१०१) इति डः। 'कुलिशम्'। "कुलिनः पर्वतान् श्यति पक्षच्छेदेन तनूकरोति, कुत्सितं लिशति तक्ष्णोतीति वे"ति तु स्वामी॥

भिदुरम्

भेदनशीलत्वाद् 'भिदुरम्'। "विदिभिदिच्छिदेः कुरच्" (पा० ३।२।१६२)। "कर्मकर्तरि चायमिष्यत" इत्यत्र चकारः "कर्तरी"त्यनुकर्षणार्थः। तेना"कर्मकर्तरि अपि भवती"ति वामनः। तथाच—"गुरुमत्सरच्छिदुरया" इति (६।८) माघः। केचित्तु "भिदिरम्" इति पठन्ति। तत्र "इषिमदी" (उ० १।५२) त्यादिना किरच्॥

(भिदिरम्)

पविः

पुनातीति 'पविः'। हीरकस्य पवित्रत्वोक्तेः। पुनाते-

233 शम्बो—सर्वा°

234 omitted in B_1.

"रच इः" (उ० ४।१३८)। "वज्रोऽस्त्री हीरके पवा" वित्युक्तेर्न सान्तत्वाशङ्का ॥

शतकोटिः शतानि दशशतानि कोटयो धारा अस्य इति 'शतकोटिः'। "शतं बह्वयः कोटयोऽस्ये"त्यन्ये ॥

स्वरुः स्वरत्युपतापयति दैत्यान् 'स्वरुः'। स्वृ शब्दोपतापयोः। "शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च" (उ० १।११) इति उः। सु शोभनान्यरूंषि धारा अस्येति वा। "सान्त" इति तु स्वामी ॥

शम्बः (शंवः) (सम्ब्रः) शमयतीति शम्बः। अन्तर्भावितण्यर्था"च्छमेर्वन्' (उ० ४।९४) ति व(ब)न् प्रत्ययः। शं शुभमस्यास्तीत्यभेद्यत्वात् "कंशंभ्यां बभयुस्तितुतयस (पा० ५।२।१३८) इति बः। तालव्यादिरपि दन्त्यादिश्च। "शम्बशूकरपांशव" इत्यूष्मविवेकाद् दन्त्यादिरपि ॥*

दम्भोलिः दम्भादाटोपाल्लीयते श्लेषयति इति 'दम्भोलिः। पृषोदरादिः (पा० ६।३।१०९)। दम्नोति खेदयति। उलिप्रत्यये 'दम्भोलि'--रिति तु स्वामी। अत्र स्वरुदम्भोली शम्बसाहचर्यात् पुंलिङ्गौ। स्वरुसाहचर्यात् शतकोटिः। तत्साहचर्यात् तु पविरिति बोध्यम्। अन्यत्र तु "पविर्द्वयो" रित्युक्तम् ॥

अशनिः (वज्राशनिः) अश्नाति शैलानश्यते भुज्यते स्वाराज्यमनेन वा इति 'अशनिः'। "अर्तिसृधृधम्यश्यवितृभ्योऽनिः (उ० २।१०३)। "न शनैर्याति वेत्यशनि" रिति तु स्वामी। "वज्राशनि" रिति समुदितं नामास्य। "वज्राशनिं विदुर्वज्रम्" इति त्रिकाण्डशेषात्, "अथ वज्राशनिर्द्वयो" रिति नामनिधानाच्च ॥ **दश वज्रस्य ॥४२॥**

व्योमयानम् **व्योमेति**। व्योम्नि यान्त्यनेनेति 'व्योमयानम्'। करणे ल्युट् (पा० ३।३।११७) ॥

विमानः विशिष्टं मानयन्त्यनेनेति करणे घञ् (पा० ३।३।१२१)।

* This should be read as सम्बसूकरपांसव as appears from the context.

'विमानः'। "विमान्ति वर्तन्तेऽस्मिन् देवा" इति तु स्वामी ॥ **द्वे देवरथस्य ॥**

नारदः **नारदाद्या इति**। नारदाद्याः सुरर्षिशब्देनोच्यन्ते। आद्येन तुम्बुरुभरतपर्वतादेर्ग्रहणम्[234]। नरस्य धर्म्यं नारम्। "नराच्चेति वक्तव्यम् (वा० ४।४।४९) इत्यण्*। तद् ददाति 'नारदः'। यद्वा नारं पानीयं पितृभ्यः सदा ददाति 'नारदः'। तथाचागमः--

"नारं पानीयमित्युक्तं तत् पितृभ्यः(क) सदा भवान्।
ददाति (तेन) ते नाम नारदेति भविष्यति ॥

एकं (नारदस्य) ॥४३क॥

स्यात् सुधर्मा देवसभा पीयूषममृतं सुधा ॥४३॥
मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका।

सुधर्मा **स्यादिति**। शोभनो धर्मोऽस्यामिति 'सुधर्मा'। "धर्मादनिच् केवलादि" ति अनिच् (पा० ५।४।१२४)। नकारान्तः। "सुधर्मामिव तां सकौशिकां(ख) विन्ध्याटवीं विवेश" इति वासवदत्तायामावन्तत्वं "समासान्तविधिरनित्यः" इति कृत्वा। यद्वा "डाबुभाभ्या" मिति (पा० ४।१।१३) डाप्। अत्र तु "ऋन्नेभ्यो ङीप्" (पा० ४।१।५) इति ङीपि प्राप्ते "अनो बहुव्रीहे" रिति (पा० ४।१।१२) प्रतिषेधः ॥

देवसभा देवानां सभा 'देवसभा' इन्द्रस्यास्थानगृहम्। अतएव 'देवसभे'त्यत्र "अशालाचे" ति (पा० २।४।२४) न क्लीबत्वम्। नापि "सभाराजाऽमनुष्यपूर्वे" ति (पा० २।४।२३)। अमनुष्यशब्दस्य रक्षःपिशाचादिषु रूढत्वादिति ॥ **(द्वे देवसभायाः ॥)**

पीयूषम् **पीयूषेति**। पीयत इति 'पीयूषम्'। पीयुरिति सौत्रो धातुः। "पीयेरूषन्" (उ० ४।७६) ॥

अमृतम् न म्रियतेऽनेन इति 'अमृतम्'। "तनिमृङ्भ्यां किच्चे" ति तन् (उ० ३।८८), किच्च। "अविद्यमानं मृत मरणमनेने"ति तु स्वामी।

234 तुम्बुरुभरतकोहलादेर्ग्रहणम्--सर्वा° * The suffix is अञ्

(क) तत् पितॄणां--RNC. (ख) स्वच्छन्द कोशिकीं--RNC., स्वच्छ-कोशिकां--सर्वा°।

सुधा

सुखेन धीयत इति 'सुधा'। धेट् पाने। "आतश्चोपसर्गे" (पा० ३।३।१०६) इत्यङ् इति पूर्वटीकाकृतः। तदयुक्तम्। कर्मण्यङोऽभावाद् द्वितीयभावग्रहणस्य कारकाधिकारनिवृत्त्यर्थत्वात्। तस्मात् "सुष्ठु दधाति पुष्णाति शरीरमिति पचाद्यजन्ताट् टाप् (पा० ३।१।१३४, ४।१।४) 'सुधा'" इति तु रत्नेश्वरः।।[235] **त्रीण्यमृतस्य ।।४३।।**

मन्दाकिनी

मन्देति। मन्दमकितुं शीलमस्याः, मन्दमकत्यवश्यं वा 'मन्दाकिनी'। अकअग कुटिलायां गतौ। णिनिः (पा० ३।२।७८)। "खजेराक" (उ० ४।१३) इत्यत्र बहुलवचनात् मन्दतेराके मन्दाकानि स्रोतांसि सन्त्यस्यामिति मन्दाकिनी वियद्गङ्गे—ति तु धातुपारायणम्। "मन्दनाम्नः सरसः अकति 'मन्दाकिनी'" इति तु कौमुदी।।

वियद्गङ्गा

वियतो गङ्गा 'वियद्गङ्गा'।।

स्वर्णदी

स्वः स्वर्गस्य नदी 'स्वर्णदी'। "वाप्रकरणे गिरिनद्यादीनामुपसंख्यानम्" (वा० ८।४।१०) इति पूर्वटीकाकृतः। वयं तु तत्र गिरिनदी, वक्रनदी, वक्रनितम्बेत्युदाहरणत्रयमेव दृष्टवन्तस्तेन "स्वर्णदीत्यत्र "पूर्वपदात् संज्ञायाम्" इति (पा० ८।४।३) नित्यमेव णत्व"मिति कौमुद्युक्तमेव युक्तं पश्यामः। यत्तु पुरुषोत्तमेन "स्वर्णदी स्वर्नदो"ति भाषावृत्तावुदाहृतं तदमूलम्। कातन्त्ररसवज्जुमरादिव्याकरणेषु च स्वर्णदीति नित्यणत्वदर्शनात्।।

सुरदीर्घिका

सुराणां दीर्घिकेव 'सुरदीर्घिका'।। **चत्वार्याकाशगङ्गायाः।।**

मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः ।।४४।।
पञ्चैते देवतरवो मन्दारः पारिजातकः ।।
सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ।।४५।।
सनत्कुमारो वैधात्रः सर्वे द्यावश्विनीसुतौ ।
नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ ।।४६।।
स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः ।।[236]

235 वत्सेश्वरः—B.₁

236 Some mss. insert here—
घृताची मेनका रम्भा उर्वशी च तिलोत्तमा।
सुकेशी मञ्जुघोषाद्याः कथ्यन्तेऽप्सरसो बुधैः।।

मेरुः

मेरुरिति। माति मानं गच्छति। मा माने। "मापोरुरिच्चे*ति (उ० ४।१०१) रुः। इकारश्चान्तादेशः। गुणः। 'मेरुः'। "मिनोति क्षिपत्युच्चत्वाज्ज्योतींषि इति मेरु"रिति तु स्वामी।।

सुमेरुः

सुरनधिकार्थः। इन्द्रमहेन्द्रवत्। 'सुमेरुः'। "सुमेरुरित्यनेनान्योपसर्गनिवृत्ति"रिति तु सर्वधरः।

हेमाद्रिः

हेमप्रधानोऽद्रिः 'हेमाद्रिः'। शाकपार्थिवादिः (वा० २।१।६०)। "ढ्रलोप" (पा० ६।३।१११) इति दीर्घः। हेम्नोऽद्रिरिति वा।

रत्नसानुः

रत्नानि सानावस्य 'रत्नसानुः'। रत्नप्रधानः सानुरिति वा।।

सुरालयः

सुराणामालयः 'सुरालयः'।। **पञ्चकं सुमेरोः ।।४४।।**

मन्दारः

पञ्चैते इति। मन्दते मोदयति। मदि स्तुतिमोदमदस्वप्नकान्तिगतिष्वित्यतः[237] "अङ्गिमदिमन्दिभ्य आरन्" (उ० ३।१३४) इत्यारन्। 'मन्दारः'। "मन्दा आरा धारा अस्य सरलत्वात्" इति श्रीधरः।(क)

पारिजातकः

समुद्रपारे जातः 'पारिजातः'। पृषोदरादिः (पा० ६।३।१०९)। स्वार्थे कन् (पा० ५।३।८७)। "पारिणः पारवतोऽब्धेर्जात" इति तु स्वामी। पारिजातो जन्यत्वेनास्यास्तीति अर्शआद्यच् (पा० ५।२।१२७)। पारिजातः समुद्रः। तत्र भव इत्यणि (पा० ४।३।५३) पारिजात इत्यन्ये।।

सन्तानः

सम्यक् तनोति फलमिति 'सन्तानः'। "तनोतेर्ण उपसंख्यानम्" (वा० ३।१।१४०) इति णः। "तननं तानः। गन्धस्य सम्यक् तानोऽस्ये"त्यन्ये। "सम्यक् तन्यन्ते पुष्पाण्यस्मिन्नित्यधिकरणे घञि" (पा० ३।३।१२१) त्यपरे।।

कल्पवृक्षः

कल्पः संकल्प इच्छा। तत्फलको वृक्षः 'कल्पवृक्षः'। "कल्पः संकल्पितोऽर्थस्तस्य वृक्ष" इति त्वन्ये। कल्पस्थायी वृक्ष

237 मद—omitted in B₁. * मिपीभ्यां रुः—भट्टोजि, उज्ज्वल°; "मापो रुच्च"—सर्वा°; "मापो रुरीच्च"—दशपादी, १।१५७; "मापो रुरि च"—श्वेतवनवासी।
(क) क्षीर gives the same interpretation.

इति वा। "कल्पः संकल्पस्तस्य वृक्षः जन्यजनकसंबन्धात् कल्प-वृक्ष" इति तु माधवी ॥

हरिचन्दनम् चन्दत्याह्लादयति। नन्द्यादित्वाल्ल्युः (पा० ३।१।१३४)। 'चन्दनम्'। हरेश्चन्दनम्। चदि आह्लादे दीप्तौ च। "वा पुंसी" त्युक्तेः "हरिचन्दन" इत्यपि॥ **(हरिचन्दनः)** **पञ्चानां देववृक्षाणामेकैकं नाम ॥४५॥**

सनत्कुमारः **सनदिति।** "हंसगोद्रुहिणः* सनत्" इति ब्रह्मपर्याये रभसः। तस्य कुमारोऽपत्यं 'सनत्कुमारः।' दन्त्यादिः। "सनन्नित्यं कुमारः" इति स्वामी ॥

वैधात्रः विधातुरपत्यं 'वैधात्रः।' अण् (पा० ४।१।६२)। विष्णुशिवप्रस्तावे कामदेव-विनायकवद् वक्तुं योग्यस्यास्य वैद्य-संहिताप्रणेतृत्वात् स्वर्वैद्यपर्यायसन्निधौ कथनम्" इति टीका-कारः ॥[238] **द्वे ब्रह्मणः पुत्रस्य ॥**

स्वर्वैद्यौ **स्वर्वैद्याविति।** स्वः स्वर्गस्य वैद्यौ 'स्वर्वैद्यौ'।

अश्विनीसुतौ वडवारूपिणी संज्ञा रूपयोगादश्विनी। तस्याः सुतौ अश्विनीसुतौ ॥

नासत्यौ संज्ञा च सूर्यस्त्री उत्तरकुरौ धृताश्वरूपा तपस्य-न्त्यासीत्।[239] सूर्योऽपि तत्सङ्गमेच्छुस्तुरगरूपी समीपमगात्। स च तयान्यपुरुषधिया[240] निरस्तः सन् तन्नासापुटद्वये रेतो न्यषिञ्चत। तत्र तौ जातावित्याश्चर्यपर्व।[241] अतो नासां त्यक्त-वन्ताविति "अन्येभ्योऽपि दृश्यत" (पा० ३।२।१०१) इति डः। "ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्" (पा० ६।३।६३) इति ह्रस्वत्वम्। 'नासत्यौ।' यद्वा, अत एव नासाभवत्वात् सत्सु साधू सत्यौ। "तत्र साधु"रिति (पा० ४।४।९८) यत्। "न सत्यौ असत्यौ। पुनर्नञ् समासे "नभ्राण्नपादि"त्यादिना (पा० ६।३।७४) नञः प्रकृतिभाव" इति तु स्वामी। "द्वौ वाड-वेयौ नासिक्या" विति नामनिधानम्।

अश्विनौ अश्विन्यां जाताविति नक्षत्राणो (पा० ४।३।१६)

238 टीकाकृतः—B_1

239 तपस्यन्तीति प्रागासीत्—B_1.

240 सामान्यपुरुषधिया—B_1.

241 पर्वणि—B_2.

* गृहिणः—भानु°।

"नक्षत्रेभ्यो बहुलम्" (पा० ४।३।३७) इति लुकि "लुक्-तद्धित-लुकी" ति (पा० १।२।४९) ङीपो लुक्। 'अश्विनौ'। नान्तौ। ह्रस्वादी। "सदाश्वारूढत्वादश्वयोगादश्विना" विति तु स्वामी ॥

दस्रौ दस्यत उपक्षिपतो रोगान् इति 'दस्रौ'। सदन्त्यौ। तसु उत्क्षेपे दसु चेत्यतः* "स्फायितञ्ची"ति (उ० २।१३) रक् ॥

आश्विनेयौ अश्विन्या अपत्याविति स्त्रीभ्यो ढकि (पा० ४।१।१२०) 'आश्विनेयौ ॥ सर्व एवामी नित्यद्विवचनान्ताः। अत एवाह "तावुभा" विति। "उभावित्याविष्टद्वित्वत्वादेकवचनाभाव" इति स्वामी। यद्यपि "देव्यां तस्यामजायेतां नासत्यौ दस्र एव च" इति मार्कण्डेयपुराणम्(क), "एते वय वृत्ररिपुस्तथैतौ नासत्य-दस्रौ वरुणस्तथैव" इति वायुपुराणे, उत्पलिन्याञ्च, "वैव-स्वतो मनुर्नाम यमौ च(ख) यमुनायमौ। नासत्यदस्रेवन्ताः षट् संज्ञायां रवेः सुताः"—इति व्याडिरितिभेदस्तथाप्य-नयोरेकात्मकत्वात् समानसर्वप्रकारत्वाच्चाभेदोऽपि। यथा भारते—"उभावेतौ न सोमार्हौ (ग) नासत्याविति[242] मे मतिः।" तथाच माघे—"अनुसस्रतुस्तमथ दस्रयोः सुता" (Śiśu, 13/23) विति। "यदा हि नासत्य उपचाराद् दस्रेऽपि वर्तते तदा नित्यद्विवचनान्तता, नत्वेकवृत्तिः। "यच्च "नभ्राण्न-पादि" त्यादि (पा० ६।३।७५) सूत्रे "नासत्या" इत्येकस्मिन् नासत्ये बहुत्वमारोप्य बहुवचनं तच्चारोपितबहुत्वमेक-स्मिन्नपि बहुवचनं भवतीति ज्ञापनार्थम्। तेन "गुरुषु" इत्याद्युपपन्नं भवती"ति कौमुदी। यमजत्वाद् द्वित्वमित्यन्ये। तथाच भागुरिः—"नासत्यदस्रौ यमजावश्विनावर्कजौ यमा" विति। एकत्वमपि। "दीप्यमानम् ततः शूलमश्वी सुविपुलं दृढ" मिति भारतोक्तेः ॥ **षडश्विनीसुतयोः ॥४६॥**

अप्सरसः **स्त्रियामिति।** 'अप्सरस' इति पूर्वमेव व्युत्पादितम्। बहुष्विति—बहुत्वे प्रायेण प्रयोगदर्शनादित्युक्तम्। एकवचने

* तसु उपक्षये। दसु च।—पाणिनीयधातुपाठः।

(क) "नासत्यश्चैव दस्रश्च स्मृतौ द्वौ नामतोऽश्विनौ" इति मार्कण्डेयपुराणम्—RNC.

(ख) तथैव—RNC.

(ग) न चोत्साहौ—RNC.

242 सम्मोहो—B_1.

ऽपि। "चयो द्वितीयाः शरि पौष्करसादेरिति वक्तव्य"मित्यत्र (वा°) वामनेन अप्सरा इत्युदाहृतत्वात्। "स्त्रियां बहुष्वप्सरसः स्यादेकत्वेऽप्सरा अपी"ति शब्दार्णवाच्च। शुभंया[243] शब्दवद् रूपम्। तथाच "सान्द्रबाणपटसंवृत[244]मूर्तेर्दन्तिदन्तशयनीयशयस्य। मानिनः कुलवधूरिव रागादप्सरा व्यधित पार्श्व मशून्यम्" इति प्रयोगः[245]।

स्वर्वेश्याः स्वः स्वर्गस्य वेश्याः 'स्वर्वेश्याः'॥

उर्वशी (ऊर्वसी) उरून् महतो वष्टि कामयते वशीकरोति वा। वश कान्तौ। अच्। गौरादित्वाद् (पा० ४।१।४१) ङीष्। पृषोदरादित्वादुकारलोपः (पा० ६।३।१०६)। "ऊरुम् अश्नुते व्याप्नोति नारायणोरुभवत्वात्। पृषोदरादि (पा० ६।३।१०६) त्वाद्ध्रस्वत्वे "इको यणची" (पा० ६।१।७७) यणादेशः। पूर्ववदन्यदि"ति तु स्वामी। एवं ह्रस्वादिस्तालव्यान्तः। तथाच शतपथे--"उर्वशी हाप्सराः पुरूरवसमैलं चकम"इति। माघे च "दधत्युरोजद्वयमुर्वशीतलं भुवो गतेव स्वयमुर्वशीतल" (Sisu, 9/86) मिति। ऊरौ उषितेति वस निवासे इत्यत ऊर्वसी। दीर्घादिर्दन्त्यान्ता पृषोदरादित्वात् (पा० ६।३।१०६) व्युत्पादितेति वर्णदेशना। तथाच हरिवंशे--"नारायणोरूं निर्भेद्य संभूता वरवर्णिनी" ति॥

मुखशब्देनाद्यर्थेन रम्भामेनकादीनां ग्रहणम्॥ **द्वे*** **उर्वश्यादेः॥**

हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम्॥४७॥
अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः।
कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात्॥४८॥
बर्हिः शुष्मा[246] कृष्णवर्त्मा शोचिष्केश[247] उषर्बुधः।
आश्रयाशो[248] बृहद्भानुः कृशानुः पावकोऽनलः॥४६॥

243 मुकुट appears to accept अप्सरा ending in आ side by side with the word ending in अस्, but भानुजि rejects it.
244 संभृत—B_1. 245 कप्फिणाभ्युदये—सर्वा°, RNC, 246 वर्हिःशुष्मा—B_1.
247 रोचिष्केश—B_1. 248 आशयाशः—B_1. * एकं—भानु°

रोहिताश्वो वायुसखा शिखावानाशुशुक्षणिः।
हिरण्यरेता हुतभुग् दहनो हव्यवाहनः॥५०॥
सप्तार्चिर्दमुनाः[249] शुक्रश्चित्रभानुर्विभावसुः।
शुचिरप्पित्तमौर्वस्तु बाडवो बडवानलः॥५१॥
वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम्।
त्रिषु स्फुलिङ्गोऽग्निकणः सन्तापसंज्वरौ समौ[250]॥५२॥

हाहेति। गायन् हा इति कुत्सितध्वनिं जहाति 'हाहाः'। **हाहाः** जहातेर्विच् (पा० ३।२।७५)। शसाद्यचि आकारलोपे हाहः। टा--हाहेत्यादि।[251]

हू इति कृत्वा ह्वयतीति हूहूः। ह्वेञ् स्पर्धायां शब्दे च। **हूहूः** क्विप्, (पा० ३।१।१७८) "वच्यादीनां" (पा० ६।१।१५) संप्रसारणं, "हल" (पा० ६।४।२) इति दीर्घः, "संप्रसारणाच्चे"ति (पा० ६।१।१०८) पूर्वरूपत्वम्। अव्युत्पत्तिपक्षे तु सह एन विष्णुना वर्तत इति पुंलिङ्गसाशब्दवत् हाहाः पुंलिङ्गः। कर्पूशब्दवत् हूहूः। क्विबन्तत्वाभावेनाधातुत्वात् द्वितीयाबहुवचने हाहान् इति। टादौ तु "आतो धातो" रिति (पा० ६।४।१४०) योगविभागात् आकारलोपे पूर्ववद् रूपम्। बहुवचनात् "मिथुने असि"रित्यसौ (उ० ४।२२२)" 'हाहाः'। सान्तोऽपि। "गन्धर्वो गीतिहाहसो"* रिति संसारावर्तात्। **(हाहस्)** "गन्धर्वो" हाहसि प्रोक्तः" इति रत्नकोषाच्च(क)। "हाहाहूहूरित्येकं नाम" इत्यन्ये। केचित्तु हहा आदिह्रस्वोऽव्युत्पन्नो हुहुराद्यन्तह्रस्वोऽपीति आह। तथाच--

"गीतमाधुर्यसंपन्नौ विख्यातौ च हहाहुहु" रिति व्यासः।

"हंसो हहाहुहू च द्वौ[252] वृषणश्वश्च तुम्बुरु" रिति शब्दार्णवः। शृङ्गारप्रकाशे हाहाहूहूशब्दयोरव्ययत्वमप्युक्तम्। आद्येन तुम्बुरुविश्वावसुचित्ररथादिग्रहणम्॥

गन्धर्वः प्रागुक्तः। 'गन्धर्वः'। पृषोदरादित्वाद्दीर्घा- **गन्धर्वः** दिरपि (पा० ६।३।१०६)। तथाच--

249 दमूनाः—B_1. 250 सन्तापः संज्वरः समौ—B_1. 251 टाप्—B_1.
* वीतिहाहसो—भानु° (क) "गन्धर्वो हाहसि प्रोक्तो गन्धर्वौ गायनेऽपि च" इति साहसाङ्कः—RNC. 252 वृद्धौ—B_1. हंहो हहा . . . RNC.

(गान्धर्वः)
"अपि गन्धर्वगान्धर्वदिव्यगायनगातव" इति शब्दार्णवः। **द्वे देवगायनविशेषस्य ।।४७।।**

अग्निः
अग्निरिति। अङ्गत्यूर्ध्वं गच्छती'त्यग्निः'। अगिरगिलगि गत्यर्थाः। "अङ्गेर्नलोपश्च" (उ० ४।५०) इति निः, नलोपश्च ।।[253]

वैश्वानरः
विश्वानरस्यापत्यं 'वैश्वानरः'। विदादित्वादञ् (पा० ४।१।१०४)। बहुत्वे* लुकि (पा० २।४।६४) विश्वानराः।।

वह्निः
वहति हव्यमिति 'वह्निः'। "वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नि"रिति [254](उ० ४।५१) निप्रत्ययः ।।

वीतिहोत्रः
वीतिरशनं होत्रं हविरस्य 'वीतिहोत्रः,' वीतिर्होत्रे हवनेऽस्येति वा। वी गतिप्रजनकान्त्यसनखादनेषु। कर्मणि क्तिन्, (वा० ३।३।९४)। "वीतयोऽश्वा होत्रं हव्यम् अस्येत्यागम" इति तु स्वामी ।।

धनञ्जयः
"धनमिच्छेद्धुताशना" दिति धातूनामनेकार्थत्वात् धनं जयति यथेष्टं ददातीति 'धनञ्जयः'। मृत्युञ्जयवत् साधनम्। धनं जितवान् आयत्तीकृतवान् इत्यतो धनमभिलष्यत इति आगम इति वा। धनमिच्छेद्धुताशनादित्यागमात् ।।[255]

कृपीटयोनिः
"कृपीटमुदरे जले" इति रत्नकोषः। कृपीटं(क) जलं योनिरुत्पत्तिस्थानमस्य इति 'कृपीटयोनिः'। "अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम्" इति मनुः। कृपीटस्याम्भसो योनिर्धूमजत्वान्मेघानाम्। "अग्नौ प्रास्ताहुतिः सम्यग्" इति स्मृतेरिति तु भट्टः ।।[256]

ज्वलनः
ज्वलतीति 'ज्वलनः'। ताच्छील्ये "जुचंक्रम्ये"त्यादिना (पा० ३।२।१५०) युच् ।।

जातवेदाः
"जाता वेदास्त्वदर्थं च[257] जातवेदास्ततो ह्यसी" ति भारते। जातं वेत्तीति वा। "गतिकारकयोः पूर्वपदप्रकृतिस्वरत्वञ्च" (उ० ४।२२६) इत्यसिः।" जाता वेदा अस्माज्जात-

253 निः नलोपश्च—omitted in B_1. * भानु°'s reading of मुकुट adds "वहुत्वे च "यञञोश्च" इति लुक्।" 254 निदिति—B_1.
255 omitted in B_1. (क) कृपीड—सर्वा° 256 भदिः—A, भट्टिः—B_2
257 त्वदर्थं चेत्—B_1. त्वदर्थं हि—B_2. वेदास्त्वदर्थं जाताश्च—सर्वा°

वेदाः। पृषोदरादित्वात् (पा० ६।३।१०९) सान्त—इति तु कौमुदी ।।

तनूनपात्
तनोतेरौणादिक ऊः (उ० १।८२)। तनूः। न पादिति "नभ्राण्नपादि" ति (पा० ६।३।७५) सूत्रे निपातितः। अतः

(तनूनपाद्)
इध्मं[258] विना क्षणमपि तन्वाः शरीरस्य नपात् तनून् न पातीति निपातनात्। तन्वा न पात् रक्षणमस्येति कलिङ्गः। तनूनपात् तान्तः। शत्रन्त (पा० ३।२।१२४) इत्येके। तनूनपान्, तनूनपान्तौ। "आगमशासनानित्यत्वान्नुमोऽभावे तान्त" इत्यन्यः[259]। "तनूं न पातयति देहवर्तित्वादिति तनूनपा"दिति तु स्वामी। "तन्वा ऊनं पातीति तनूनपं घृतादि। तदत्तीति दान्त" इति तु रामदासटीका ।।४८।।

बर्हिः
बृंहतीति "बृंहेर्नलोपश्चे" ति (उ० २।११०) इस्[260]। 'बर्हिः'। सान्तः। पुंलिङ्गः। "बर्हिरुक्तो बृहद्भानुर्वीतिहोत्रो धनञ्जयः" इत्यमरमालापुंस्काण्डे पाठात्। भट्टस्वामी

(बर्हिःशुष्मा)
त्वाह—"बर्हिःशुष्मेति व्यस्तसमस्तं नाम। बर्हते बर्हिः। यथा बर्हिर्मुखा देवाः, बर्हिर्दर्भः। शुष्म बलमस्येति। यथा "शुक्रो वैश्वानरो बर्हिर्बर्हिःशुष्मा तनूनपा"दिति शब्दार्णवात्" इति। कौमुदीकारस्तु शब्दार्णवादेव "बर्हिः सान्तः, बर्हिरिदन्तः, शुष्मेति नान्तः पृथक्" इत्याह ।।

शुष्मा
शोषयति जलमिति शुषेर्णिजन्ताद् "अन्येभ्योऽपी" (पा० ३।२।७५) ति मनिन्। संज्ञापूर्वकत्वान्न गुणः। 'शुष्मा'। नान्तः। "शुष्यत्यनेने" ति तु स्वामी। "शुष्मणि प्रणयनाभि[261]

(शुष्मः)
संस्कृते" (Siśu, 14/22) इति माघः। अविसिविसिशुषिभ्यः किदि "ति (उ० १।१४३) मन्।" "शुष्मोऽग्नि" रित्युणादावदन्तोऽपि ।।

कृष्णवर्त्मा
कृष्णो धूमो वर्त्मास्येति 'कृष्णवर्त्मा'। नान्तः ।।

258 इन्धनं—B_1., इन्धनाभावे इति मुकुटः—शिवदत्तः। 259 पुरुषोत्तमः—नयनानन्दः।
260 इसिः—B_1. According to तत्त्वबोधिनी इसिः।
261 प्रणयनाभिसंस्कृते—A, B, B_1. but मल्लि° reads प्रणयनादि।

शोचिष्केशः शोचींषि ज्वालाः केशा इवास्येति 'शोचिष्केशः'। "नित्यं समासेऽनुत्तरपदस्थस्ये"ति (पा० ८।३।४५) षत्वम् ॥

उषर्बुधः "उषः प्रभाते सन्ध्यायाम्" इति विश्वः। उषसि सन्ध्यायां बुध्यते प्रकाशते 'उषर्बुधः'। इगुपधत्वात् कः (पा० ३।१।१३५)। "अहरादीनां पत्यादिषूभयथा रुर्वा रेफो वा" (वा० ८।२।७०) इति व्यवस्थितविभाषया नित्यं रः ॥

आश्रयाशः (आशयाशः) आश्रयमाधारमश्नातीति 'आश्रयाशः।' "आ शेरतेऽत्र इत्याशयः आधारः। तमश्नातीति आशयाश"इति तु स्वामी। उभयत्रापि कर्मण्यण् (पा० ३।२।१) ॥

बृहद्भानुः बृहन्तो भानवोऽस्येति 'बृहद्भानुः' ॥

कृशानुः कृश्यतीति 'कृशानुः'। कृश तनूकरणे। "ऋतन्यञ्जि-वन्यञ्जि-अर्पि-मदि-अति-अङ्गि-कु-यु-कृशिभ्यः कत्निच्-यतुच्-अलिच्-इष्णुच्-इष्ठच्-इसन्-स्यन्-इथिन्-उलि-अस-आस-आनुकः" (उ० ४।२) इत्यानुक्। "कृशोऽप्यनिति वर्तते कृशानु"रिति स्वामी। कृशानुर्मध्यतालव्यः। "वैश्यः किंशारु-रुदश्वित्कुशलं कृशानुश्चेति मध्यतालव्या ऊष्मविवेकात् ॥

पावकः पुनातीति 'पावकः'। पूञो ण्वुल् (पा० ३।१।१३३) ॥

अनलः अनिति प्राणिति अस्मादानयति वा। अनितिधातोरन्त-र्भावितण्यर्थाद्वृषादित्वात् कलच् (उ० १।१०८)। 'अनलः'। "अनित्यनेनेत्यनल"इति तु स्वामी ॥४६॥

रोहिताश्वः लोहितवर्णोऽश्वोऽस्येति 'रोहिताश्वः'। तथाच शालि-होत्रे—

"वरुणस्त्वसितानश्वान्[262] कुबेरः कुमुदोपमान्।
हुताशनः किंशुकाभान् वायुर्बभ्रूंस्तथावृणोत् ॥"

"रोहितो मृगोऽश्वो वाहनमस्ये"ति श्रीधरः ॥

वायुसखा (वायुसखः) वायुः सखा अनुचरोऽस्येति 'वायुसखा'। "अनङ् सा"विति अनङ् (पा० ७।१।९३)। अतत्पुरुषत्वात् टजभावः। "तत्-पुरुषे तु "राजाहःसखिभ्यष्टच्" (पा० ५।४।९१) इति टचि 'वायुसखो'पी"ति कौमुदी ॥

262 वरुणस्त्वशितानश्वान्—B_1. वरुणस्तु सितानश्वान्—रघुनाथः।

शिखावान् शिखा अस्य सन्तीति 'शिखावान्'। तान्तः ॥

आशुशुक्षणिः आशोष्टु[263] मिच्छत्याङ्पूर्वात् शुष्यतेः सन्नन्ताद् "आङि शुषेः सन् छन्दसि" (उ० २।१०४) इत्यनिः। भाषायां च दृश्यते। 'आशुशुक्षणिः'। द्वितालव्यः ॥।

हिरण्यरेताः हिरण्यं रेतोऽस्य 'हिरण्यरेताः'। सान्तः। तथाच "अग्नेरपत्यं प्रथमं सुवर्ण"मिति श्रुतिः*। अग्निना धृतस्य रुद्र-रेतसः शेषमुल्वं[264] जातम्। तच्च सुवर्णं जातमिति 'हिरण्य-रेताः' ॥

हुतभुक् हुतं भुङ्क्ते 'हुतभुक्'। जान्तः ॥

दहनः दहतीति 'दहनः'। ल्युः (पा० ३।१।१३४) ॥

हव्यवाहनः देवान् हव्यं वाहयति प्रापयतीति, स्वयं वा प्राप्नोतीति 'हव्यवाहनः'। "हव्येऽनन्तःपादम्" (पा० ३।२।६६) इति वाहेर्ञ्युट्। ५०॥

सप्तार्चिः "काली कराली च मनोजवा च सुलोहिता चैव सुधूम्र-वर्णा। स्फुलिङ्गिनी[265] विश्वविरूपिणी(क) च नीलायमानेति च सप्त जिह्वाः"—सप्त वह्नेर्जिह्वाः मार्कण्डेयपुराणोक्ताः। तासामर्चिःस्वभावात्ताः[266] सप्तार्चिषोऽस्येति 'सप्तार्चिः' ॥

दमुनाः (दमूनाः) 'दमुनाः'। दमु उपशमे। अस्मादन्तर्भावितण्यर्थात् "दमेरुनसि" (उ० ४।२३४) रितुनसिः। "दाम्यतीति 'दमुना" इति स्वामी। 'दमूना" इति दीर्घमध्योऽपि। "दमुना दमूनाः प्राचीनबर्हिःशुचिर्बर्हिषा" विति नामनिधानात् ।।(ख)

शुक्रः शोचयतीति 'शुक्रः'। "ऋज्रेन्द्रे" (उ० २।२८) त्यादिना निपातितः। "शुक्रं रेतोऽस्यास्तीति अर्शआद्यचि (पा० ५।२।१२७) 'शुक्र' "इति तु स्वामी ॥

चित्रभानुः चित्रविचित्रा भानवोऽस्येति 'चित्रभानुः'। वैचित्र्यं तु[267],

263 आशोषितु°—A., आशोषयितु°—RNC.
* स्मृतिः—रघुनाथः।
264 शेषमनु (प्सु ?)—B_1.
265 स्फुलिङ्गिनीविश्वदासाख्याः सप्त वह्लेर्जिह्वाः—A., वह्लेज्वार्लाः—B_1.
(क) विश्वसहा-सर्वा°, RNC ; विश्वदासा-भानु°।
266 तासामर्चिःषु तावत्ताः—B_1.
(ख) The दशपादी version of उणादि (६।६५) has ऊनसि and hence दमूनाः with ऊ।
267 च—B_1.

जिह्वारूपार्चिषां भेदात्। अत्र "पूर्वपदा"दिति (पा० ८।४।३) न णत्वम्। "क्षुभ्नादे"राकृतिगणत्वात् (पा० ८।४।३९)॥

विभावसुः विभा प्रभा। सैव वसु धनमस्य 'विभावसुः'। "विशेषेण भान्तो वसवो रश्मयोऽस्ये"ति तु कौमुदी॥

शुचिः शोचयति शोधयतीति 'शुचिः'। शुच शोके। अन्तर्भावितण्यर्थात् "सर्वधातुभ्य इन्" (उ० ४।११७)॥

अप्पित्तम् (अपां पित्तम्) अपां पित्तमिव दाहकत्वात् 'अप्पित्तम्'। वाहुलकादलुगपि। "सोऽङ्घ्रिपद्मैरपां पित्तमिन्धयन् शर्वरीं नयेत्" (क) इति प्रयोगात्॥ **चतुःस्त्रिशन्नामान्यग्नेः॥**

और्वः **और्वस्त्विति।** उर्वस्य ऋषेरपत्यम् 'और्वः'। "विदाद्यञ्" (पा० ४।१।१०४), बहुत्वे लुकि (पा० २।४।६४) उर्वा इत्यादि। "वरुणभयान्मात्रा ऊर्वोर्गोपितादित्यन्य" इति तु स्वामी। उर्वेण किलायोनिजपुत्रार्थिना ऊरुर्मथितस्तत्र ज्वालामयः पुरुषो जातस्तस्य च समुद्र आधार आसीदिति श्रुतिः॥[268]

बाडवः अयमेव बडवामुखभवत्वात् 'बाडवः'। भवार्थेऽण् (पा० ४।३।५३)॥

बडवानलः 'बडवानल' इत्याधाराधेयभावः सम्वन्धः[269]॥ **और्वादित्रयं बाडवाग्नेः॥५१॥**

ज्वालः **वह्नेरिति।** ज्वलतीति 'ज्वालः'। "ज्वलितिकसन्तेभ्यो णः" (पा० ३।१।१४०)। स्त्रियां ज्वाला॥[270]

कीलः कीलति बध्नाति, गन्तुं न ददाति। कील बन्धे। इगुपधत्वात् कः (पा० ३।१।१३५)। 'कीलः'। स्त्रियां कीला।

अर्चिस् (अर्चिः) अर्च्यते 'अर्चिः'। अर्च पूजायाम्। "अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः" (उ० २।१०९) इतीसिः। 'अर्चिः'। सान्ता। इनि त्विदन्तापि (उ० ४।११७)। "रजनिधमनिकाकिन्यर्चिशुच्यः[271] पुरन्ध्रि" रिति ङीष्विषये वाचस्पतिः। "स्त्रिया" मित्यर्चिरादिभिः संबध्यते। स्त्रीत्वं त्वर्चिषः

268 स्मृति—B_1. 269 आधाराधेयसम्बन्धः—B_1. 270 omitted in A, B.
271 शुण्ठ्यः—B_1. . . .तुण्डीति हट्टचन्द्रादिदर्शनात्—RNC.
(क) "सोऽङ्घ्रिपाङ्गैरपां पित्तमिन्धानः"—A., सर्वा°; "सोऽङ्घ्रिपांसै". . .—शिवदत्तः।

प्रायिकम्। "ज्वालाभासोर्नपुंस्यर्चि" रिति नानार्थे क्लीबत्वकथनात्॥

हिनोति इतस्ततो गच्छतीति हेतिः'। हि गतौ। हेतिः "ऊतियूतिजूतिसातिहेतिकीर्तयश्चे" ति (पा० ३।३।९७) निपातितः। क्तिन्नन्तः॥

शेते इति। "शीङः किद्ध्रस्वश्चे"ति (उ० ५।२४*) खः। शिखा 'शिखा'। अत्र केचिदाहुः—"प्रक्रमाद्वह्नेर्लभे वह्नेरिति नियमार्थम्। ज्वालादिपञ्चकमग्नेर्ज्वालायाम्, नान्यस्य" इति। तदयुक्तम्। "ज्वालाभासोर्नपुंस्यर्चि" रिति नानार्थे 'द्युतिमात्रे'ति पाठात्, "हेतिः स्यादायुधज्वालासूर्यतेजःसु योषिति" इति हेतेः सूर्यतेजसि च दर्शनात्। अन्येतु—ज्वालाकीलयोर्नियमार्थमिद" मित्याहुः। तदप्यसत्। शिखायाम् अपि वह्न्यर्चिर्मात्रवृत्तेः। "शिखाज्वालाबर्हिचूड़ालाङ्गलिक्यग्रमात्रक" इति कोषदर्शनात्। वयं तु ब्रूमः—"पञ्चैव वाचकानि अर्चिषः। वह्नेरिति तु तेजोमात्रवाचिका[272]प्यर्चिर्विशेषेणाग्निद्युतौ वर्तते धातुरिव गैरिक इत्येतत्सूचनार्थमिति॥ **पञ्चाग्निशिखायाः॥**

त्रिष्विति। स्फूता स्फूत्कारेण (क) लिङ्गति गच्छति स्फुलिङ्गः 'स्फुलिङ्गः'। लिगिर्गत्यर्थः। अच् (पा० ३।१।१३४)। पृषोदरादित्वात् (कारपदतकारयो) र्लोपो ह्रस्वत्वश्च (पा० ६।३।१०९)। "स्फुलेर्भावे किः। स्फुलिं गच्छति। भावे खच् (पा० ३।२।४७)। स च, डिच्च (वा०)। स्फुलिङ्ग" इति त्वन्यः। "स्फु शब्द एव स्फूत्कारवृत्ति" रिति तु कलिङ्गः। **त्रिष्विति** स्फुलिङ्गजातावपि[273]। स्फुलिङ्गा। अजादिपाठान्न ङीप् कन्दरावत् (पा० ४।१।४)॥

अग्निकणः अग्नेः कणोऽग्निकणः। **द्वे अग्निकणायाः॥**

सन्तापः सन्ताप इति। सन्तपनं 'सन्तापः'। घञ् (पा० ३।३।१८)॥

* "शीङो ह्रस्वश्च"—भट्टोजिः। 272 तेजोमात्रवाचकानि—B_1.
273 स्फुलिङ्गं जाताविति—B_1. (क) स्फुत्कार—RNC.

संज्वरः — संज्वरयतीति 'संज्वरः'। अच् (पा० ३।१।१३४)। 'समौ' समार्थौ समलिङ्गौ ।। **द्वे सन्तापस्य ।।५२।।**

धर्मराजः पितृपतिः समवर्ती परेतराट् ।
कृतान्तो यमुनाभ्राता शमनो यमराड् यमः ।।५३।।
कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः ।।[274]

धर्मराजः — **धर्मराज इत्यादि।** यथापराधदण्डदानाद् धर्मोऽस्यास्तीति धर्मः। स चासौ राजा चेति, धर्मप्रधानो वा राजा 'धर्मराजः'। टच् (पा० ५।४।९१)। "धर्मस्य राजे"ति तु स्वामी ।।

पितृपतिः — पितॄणां कव्यपालादीनां[275] पतिः 'पितृपतिः' ।।

समवर्ती — शत्रुमित्रयोः समं वर्तितुं शीलमस्येति 'समवर्ती'। णिनिः (पा० ३।२।७८) ।।

परेतराट् — परेता मृतास्तेषु राजत इति "सत्सूद्विष" (पा० ३।२।६१)इति क्विप्। 'परेतराट्'। जान्तः ।।

कृतान्तः — कृतोऽन्तो विनाशोऽनेन 'कृतान्तः'। "निष्ठे"ति (पा० २।२।३६) पूर्वनिपातः।

यमुनाभ्राता — यमुनाया नद्याः भ्राता 'यमुनाभ्राता'। ऋदन्तः ।।

शमनः — शमयतीति शमेर्ण्यन्ताल्ल्युः (पा० ३।१।१३४)। 'शमनः'।।

यमराट् — यमा मृत्युप्रभृतयोऽस्य किंकरास्तेषु राजत इति 'यमराट्'। पूर्ववत्। "यमेन संयमेन राजत"इति स्वामी ।।

यमः — यमयतीति 'यमः', यमयोगाद्वा ।।५३।।

कालः — कलते प्राणिनां धर्माधर्माविति 'कालः'। कल संख्याने इति भौवादिकात् बहु (ल)-वचनात् कर्तरि घञ्। (पा० ३।३।१२१)। "कलयत्यायु"रिति तु स्वामी ।।*

दण्डधरः — कालाख्यस्य दण्डस्य धरः 'दण्डधरः'। अच् (पा० ३।१।१३४) ।।

---

274 In some mss. we have in addition—"प्रेताधिपः पाशहस्तः कीनाशो मृत्युरर्कजः"—Poona ms.

275 कव्यवालान्दीना—B, B_1.

* "कलयत्यायुः। कल संख्याने। पचाद्यजन्तात् (३।१।१३४) प्रज्ञाद्यण् (५।४।३८)"—इति मुकुटः।—भानुजिः। He also accepts दण्डधारः।

श्राद्धदेवः — श्राद्धं पितृक्रिया। तदंशभागित्वात् पितृपतित्वाद् वा 'श्राद्धदेवः' ।।

वैवस्वतः — विवस्वतोऽपत्यं 'वैवस्वतः'। अण् (पा० ४।१।९२) ।।

अन्तकः — अन्तं करोतीति[276] 'अन्तकः'। "तत्करोती"ति (ग०) णिजन्तात् ण्वुल् (पा० ३।१।१३३) ।। **चतुर्दश यमस्य ।।**

राक्षसः कौणपः क्रव्यात् क्रव्यादोऽस्रप[277]
आशरः[278] **।।५४।।**
रात्रिञ्चरो रात्रिचरः कर्बुरो निकषात्मजः।
यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी ।।५५।।
प्रचेता वरुणः पाशी यादसांपतिरप्पतिः।

राक्षसः — **राक्षस इति।** भीमत्वात् रक्षन्त्यस्मादिति रक्षः। रक्ष पालने। असून् (उ० ४।१८८)। प्रज्ञाद्यणि (पा० ५।४।३८) 'राक्षसः'। "स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेऽपी"ति (परि० ५।४।२२ काशिका) पुंस्त्वम् ।।

कौणपः — कुणपः शवः। तद्भक्षणं शीलमस्येति 'कौणपः'। "शील"मित्यण् (पा० ४।४।६१)। "कुणपमत्तीति शेषेऽणि" (पा० ४।२।९२) तु कौमुदी। कुणपा रक्षोमाता। तस्या अपत्यमित्यन्ये (पा० ४।१।९२) ।।

क्रव्यात् — क्रव्यमण्त्तीति 'क्रव्यात्'। "क्रव्ये चे"ति विट् (पा० ३।२।६९) ।।

क्रव्यादः — **'क्रव्याद'** इति। मांसवाचककृत्तविकृत्तशब्दे उपपदे अदेः कर्मण्यण् (पा० ३।२।१)। पृषोदरादित्वात् (पा० ६।३।१०९) कृत्तविकृत्तशब्दस्य क्रव्यादेशः (पा० ३।२।६९ काशिका)। "अदोऽनन्ने" (पा० ३।२।६८) इत्येव सिद्धे "क्रव्ये चे"ति (पा० ३।२।६९) सूत्रं "वासरूप"-(पा० ३।१।९४) विधिना प्राप्तस्याणो निवृत्त्यर्थमिति न्यासः। कौमुदीकारादयस्तु—"पृषोदरादित्वात् क्रव्यभावे कृत्तविकृत्त-

---

276 कायतीति—B_1.

277 अश्रप—B_1.

278 आशिरः—B_1.

पक्वमांसभक्षः क्रव्यादः। "आममांसभक्षकस्तु क्रव्या"दिति (काशिका ३।२।६९) जयादित्यानां प्रमादः।" "नैर्ऋतः कर्वुरः क्रव्यात् क्रव्यादोऽस्रप आशर" इति शब्दार्णवसंसारावर्तादावविशेषेणैव निबन्धादिति हड्डचन्द्रः। सोऽयं चन्द्रे कलङ्को हड्डचन्द्रस्याप्रतिसन्धानदोषात्। शब्दार्णव एव रक्षःपर्यायि द्वावेतौ पठित्वापि पुनः कृदध्याये "सदान्नादकणादौ च स्यात् क्रव्यादाममांसभुक्। क्रव्यादः कृत्तविकृत्तपक्वमांसभुगुच्यते" इत्युक्तेः। तस्मात् राक्षसस्य रूढिरूपेण द्वे एते संज्ञासामान्येन[279]। यौगिकत्वे तु जयादित्यव्यवस्था" इत्याहुः॥

अस्रपः (**अश्रपः**) अस्रं रक्तं पिवति 'अस्रपः।' सदन्त्यः। "न श्रपयति कव्यात्त्वादश्रप इति पचाद्यचि (पा० ३।१।१३४) सतालव्योऽपी"ति गोवर्धनीयोणादिवृत्तिः। (पिबतेः) "सुराशीध्वो"रित्युपसंख्यानात् (वा०) "अस्रप" इत्यत्र "गापोष्टगि"ति (पा० ३।२।८) न भवति॥

आशरः (**आशिरः**) आशृणाती'त्याशरः'। शॄ हिंसायाम्। तालव्यशः। 'आशिर' इति पाठे "अशोर्णिच्च" (उ० १।५३) इति। किरच्*। "आशिरोऽनुशवः(क) शङ्कुः क्रव्यादोऽस्रप आशर" इति संसारावर्तः॥५४॥

रात्रिञ्चरः "चरेष्टः" (पा० ३।२।१६)। "रात्रेः कृति विभाषे"ति (पा० ६।३।७२) पक्षे मुमि 'रात्रिञ्चरः॥'

रात्रिचरः रात्रौ चरतीति 'रात्रिचरः॥'

कर्वुरः (**कर्वरः**) कर्वुरो वर्णन। कर्व हिंसायामित्यतो "मद्गुरादयश्चे"ति (उ० १।४२) निपातनात् कुरचि ('कर्वुरः')। "कर्वर" इति च पाठः। "नैर्ऋतः कर्वरः क्रव्यात् कर्वुरो यातुरक्षसी" इति शब्दार्णवः। अत्र "कॄगॄशॄवृचतिभ्यः(ख) ष्वरच्" (उ० २।१२३)॥

निकषात्मजः निकषा रक्षसां माता। तदात्मजत्वात् 'निकषात्मजः।' षः मूर्धन्यः॥

279 संज्ञासाम्येन—A.　* अशोर्णित्—भट्टोजिः।　(क) आशिरो धनुषः—भानुं°। ख—कॄगॄशॄवृञ्चतिभ्यः ष्वरच्—भट्टोजिः। सर्वा° reads कर्बुर with ब।

यातुधानः यातुसंज्ञां दधातीति 'यातुधानः।' अन्तःस्थादिः। या प्रापणे। "कमिमनिजनिगाभायाहिभ्यश्चेति (उ० १।७३) तुः। यातुः। यातुः "अर्धर्चादि" (पा० २।४।३१) रिति शवरस्वामी। धाञः "कृत्यल्युटो बहुलम्' इति (पा० ३।३।११३) ल्युट्। यातूनि रक्षांसि दधाति पुष्णाति स्वजातिपोषकत्वात् इति वा। "यातूनि यातना धीयन्तेऽस्मिन्नि"ति तु स्वामी।[280] "जातु कदाचित् रन्ध्रं प्राप्य धानं सन्निधानमस्येति चवर्गादिरपी"ति पुरुषोत्तमः॥[281] (**जातुधानः**)

पुण्यजनः भद्रमङ्गलादिवद् विरुद्धलक्षणया 'पुण्यजनः॥'

नैर्ऋतः निर्ऋत्यां दिशि भवो विद्यमानः। शेषेऽण् (पा० ४।२।९२)। तदपत्यत्वाद्वा[282] (पा० ४।१।९२) 'नैर्ऋतः'॥

यातु यातयति व्यथयति 'यातु॥'

रक्षः 'रक्षः' पूर्व्ववत्। द्वे क्लीबे॥ **पञ्चदश राक्षसस्य ॥५५॥**

प्रचेताः **प्रचेता इति।** प्रचेतयति 'प्रचेताः।' असुन् (उ० ४।१८८)॥

वरुणः "वरं वृणोति तं देवा वरदश्च वरार्थिनाम्।
धातुर्वृ वरणे प्रोक्तस्तस्मात् स वरुणः स्मृतः॥"
इति शाम्बपुराणम्*। वृणोतेः "कृवृदारिभ्यः उनन्" (उ० ३।५३) इति उनन्। व्रियत इति 'वरुणः॥'

पाशी नागपाशयोगात् 'पाशी'। नान्तः॥

यादसांपतिः (**यादःपतिः**) यादसां जलजन्तूनां पतिः 'यादसांपतिः।' "तत्पुरुषे कृती"त्यलुक् (पा० ६।३।१४)। लुकि तु "यादःपति" रपि॥

अप्पतिः (**अपांपतिः**) अपां पति'रप्पतिः।' अलुकि "अपांपति"रपि॥
पञ्च वरुणस्य॥

280 कौमुदी—A.　281 इति कौमुदी—adds B_1.
282 तदपत्यं वा—B_1.
* वरान् वृणन्त्यमुं देवा वरदश्च वरार्थिनाम्।
धातुर्वृ वरणे प्रोक्तस्तेनायं वरुणः स्मृतः॥ इति पद्मपुराणम्—रघुनाथः।
...धातुर्वै वरणे—भानुजि°।

श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः ॥५६॥
पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः ।
समीरमरुन्मारुतजगत्प्राणसमीरणाः[283] ॥५७॥
नभस्वद्वातपवनपवमानप्रभञ्जनाः ।

श्वसनः — **श्वसन इति।** श्वसित्यनेन 'श्वसनः।' श्वस प्राणने। ल्युट् (पा० ३।३।११७) ॥

स्पर्शनः — स्पृशति 'स्पर्शनः।' स्पृश संस्पर्शे। ल्युः (पा० ३।१।१३४)। "बहुलमन्यत्रापी" (उ० २।७८) त्यौणादिको युजिति सर्वानन्दः ॥

वायुः — वातीति 'वायुः।' वा गतिगन्धनयोः। "कृवापाजिमी" त्युण् (उ० १।१) ॥

मातरिश्वा — मातरीति सप्तम्यन्तप्रतिरूपकं ब्रह्माण्या नाम। तत्र श्वयति वर्धते 'मातरिश्वा।' अयं किल गर्भस्थ एव शक्रेणोनपञ्चाशद्भागः कृतः। "श्वन्नुक्षन्नि" (उ० १।१५८) त्यादौ निपातितः। नान्तः ॥

सदागतिः — सदागमनात् 'सदागतिः' ॥५६॥

पृषदश्वः — पृषन् मृगभेदः। स इव पिङ्गलोऽश्वोऽस्य 'पृषदश्वः।' मूर्धन्यमध्यः। "वायुर्बभ्रूनथावृणोदि" त्यागमात्। पृषन्मृग एवा श्वोऽस्ये"ति तु स्वामी। पृषन्त्यम्बुकणा अश्वोऽस्येत्यन्ये ॥

गन्धवहः — गन्धस्य वहो 'गन्धवहः।' "अकारादनुपपदात् सोपपदो भवति विप्रतिषेधेन" (वा०) इत्यस्य प्रायिकत्वात् पचाद्यच् (पा० ३।१।१३४)। वह इत्यचा व्युत्पाद्य पश्चाद् गन्धेन समासो वा ॥

गन्धवाहः — 'गन्धवाहः।' कर्मण्यण् (पा० ३।२।१) ॥

अनिलः — 'अनिलः।' उक्त एव ॥

आशुगः — आशु गच्छति। "अन्यत्रापी"ति डः (पा० ३।२।१०१)। 'आशुगः' ॥

समीरः — सम्यग् ईरति* गच्छति 'समीरः।' ईर गतौ। अच् (पा० ३।१।१३४)। "सम्यगीरयति प्रेरयती"ति तु कौमुदी।

283 मारुतमरुज्जगत्प्राण—B_1.

* ईर्ते—भानु°।

मरुत् — म्रियतेऽनेन त्रुद्धेन। "मृग्रोरुतिः" (उ० १।९६) इति उतिः।[284] 'मरुत्' ॥

मारुतः (मरुतः) — मरुदेव 'मारुतः'। प्रज्ञाद्यण् (पा० ५।४।३८)। "मरुतः श्वसनः प्राणः समीरो मारुतो मरुदि" ति संसारावर्तात् मरुतोऽपि ॥*

जगत्प्राणः — अतएव 'जगत्प्राणः' पृथगपि। तत्र "द्युतिगमिजुहोतीनां द्वे चे "ति (वा० ३।२।१७८) क्विपि द्वित्वे "गमः क्वौ" (पा० ६।४।४०) इति मलोपे तुकि जगत्, जगतौ। यदा तु "वर्तमाने पृषत्-बृहत्-महत्-जगत्-शतृवद्" इत्येतन्नास्तीति(क) (उ० २।८४) मतुप् (?) [इत्यतिः, तदा "उगिदचाम्" (पा० ७।१।७०) इति नुम्। जगन्, जगन्तौ।] ॥

समीरणः — [समीरयतीति 'समीरणः।' ल्युः (पा० ३।१।१३४) ॥५७॥]

नभस्वान् — 'नभस्वान्।' "तसौ मत्वर्थे" (पा० १।४।१९) इति भसंज्ञा। पदत्वबाधनात् न रुत्वम्। स हि नभःस्वामी। तथाच वायुपुराणम्—"शब्दाकाशबलानाञ्च वायुरीशस्तथा कृतः" इति ॥

वातः (वातिः) — वातीति। वा गत्यादौ। "हसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तनि" (उ० ३।८६)। 'वातः।' बाहुलकात् "वातेस्ति"(ख) रिति (उ० ५।६) तिप्रत्ययेन वातिः। "र्वायुर्मरुत्वान् श्वसनः पवनो मरुतोऽनिलः। नभस्वान् क्षिपणुर्वातिः शुषिरो नघटो वहः"[285] इति साहसाङ्कः ॥

पवनः — पुनाति जगत् 'पवनः।' "बहुलमन्यत्रापि" इति युच् (उ० २।७८) ॥

पवमानः — 'पवमानः।' "पूङ्यजोः शानन्।" "आने मुक्" (पा० ३।२।१२८, ७।२।८२) ॥

284 "मृग्रोरुद्" इत्युत्—is the reading of the mss. The rule, however, is मृग्रोरुतिः and तत्त्वबोधिनी explains—इकारस्तकारस्य इत्संज्ञापरित्राणार्थः।

* "इति व्याडिः"—रघुनाथः।

(क) भानु° cites it. (ख) वातेर्नित्—भट्टोजि।

285 वायुर्मरुत्वान् श्वसनः समीरः पवनोऽनिलः—B_1. . . मरुतः पवनोऽनिल—B_2., मारुतः पवनोऽनिल—Poona ms. ; नरघटो वहः—B_2 ; नद्यघटो वनः—Poona ms. "वातिर्वायुर्मरुद्वातः श्वसनः पवनोऽनिलः—RNC. . . शुषिणो नघटो-भानु°।

प्रभञ्जनः प्रकृष्टमुच्छ्रितं भनक्ति 'प्रभञ्जनः।' ल्युः (पा० ३।१।१३४) ॥ **विंशतिर्वातस्य ॥५८क॥**

प्राणोऽपानः समानश्चोदानव्यानौ च वायवः[286] ॥५८॥
शरीरस्था इमे रंहस्तरसी तु रयः स्यदः।
जवोऽथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् ॥५९॥
सत्वरं चपलं तूर्णमविलम्बितमाशु च।
सततानारताश्रान्तसन्ततविरतानिशम् ॥६०॥
नित्यानवरताजस्रमप्यथातिशयो भरः।
अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम् ॥६१॥
तीव्रैकान्तनितान्तानि गाढवाढदृढानि च।
क्लीबे शीघ्राद्यसत्त्वे स्यात् त्रिष्वेषां सत्त्वगामि
यत्[287] ॥६२।

प्राणः अपानः, समानः **प्राण इति।** "हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः।
उदानः व्यानः उदानो कण्ठदेशस्थो व्यानः सर्वशरीरगः॥
अन्नप्रवेशनं मूत्राद्युत्सर्गो[288]ऽन्नविपाचनम्।
भाषणादिनिमेषादितद्व्यापाराः क्रमादमी॥

प्राद्युपसर्गात् यथाक्रमम्। प्रसरणेनापसरणेन समन्तादूर्ध्वेन व्याप्त्या च अनित्यनेन। "हलश्च" (पा० ३।३।१२१) इति घञि "अनिते" (पा० ८।४।१९)" रिति णत्वम्। एवमपानादयः। **देहस्थपञ्चवायूनां पृथक् पृथक् ॥५८॥**

रंहः वायुधर्मत्वेन वायुप्रस्तावे रंह आदीनाह—

रंह इत्यादि। रमतेऽनेन। "रमेर्हुक् चे"ति (उ० ४।२१३) असुन्* हुक् चागमः। रंहत्यनेन वा। रहि गतौ। असुन् (उ० ४।१८८)। 'रंहः'। "रंघः संघः सुराणा" (सूर्यशतक, ७१) मित्यत्रापि हकार एव, घकारस्तु प्रामादिक इति पुरुषोत्तमगोवर्धनौ। रघि धातोस्त्वसुन् नेष्यते। रहि गतावित्यतोऽसुनि सिद्धे रंघेरसुन्निरासार्थं "रमेश्चे' ति (उ० ४।२१३) सूत्रणादिति॥

286 प्राणोऽपानसमानोदानव्यानाः पञ्च वायवः—B_1. 287 भेद्यगामि—B_1.
288 मूत्राम्बुसर्गो—A. * रमेश्च—भट्टोजि। The preceding rule is अमेर्हुक् च।

तरः तरन्त्यनेन। तरतेरसुन् (उ० ४।१८८)। 'तरः'॥

रयः रीणात्यनेन।[289] री गतिरेषणयोः। "एरच् (पा० ३।३।५६) 'रयः'॥

स्यदः स्यन्दतेऽनेन 'स्यदः'। स्यन्देः "स्यदो जवे" (पा० ६।४।२८) इति निपातितः॥

जवः जवनं 'जवः'। जुरिति सौत्रधातो"ऋदोरप्" (पा० ३।३।५७) इत्यप्। वर्ग्यो जः। "गजवती जवतीव्रहया चमू"रिति (Raghu, IX. 10.) रघोः ॥[290] **पञ्च वेगस्य॥**

अर्थेति। रंह आदयः सवेगगतिवचनाः, शीघ्रादयस्तु धर्मवचनाः। एतावता पृथङ्निर्देशः। अतएव शीघ्रं पचतीति प्रयोगो भवति, नतु जवं पचतीति।

शीघ्रम् शिङ्घति व्याप्नोति। "शीघ्रादयश्चे"ति* शिङ्घे रक्। 'शीघ्रम्॥

त्वरितम् त्वरते स्म 'त्वरितम्।' "रुष्यमत्वरसंघुषास्वनामि"ति (पा० ७।२।२८) वा इट्॥

लघु लङ्घ्यते 'लघु।' लघि शोषणे(क)। "लङ्घिवंह्योर्नलोपश्चे"ति (उ० १।३०) कुर्नलोपश्च॥

क्षिप्रम् क्षिपति 'क्षिप्रम्।' क्षिपेः "स्फायितंचि" इत्यादिना (उ० २।१३) रक्॥

अरम् 'अर'मिति। ऋ गतौ। अप्। बाहुलकात् (पा० ३।३।५७) क्लीबत्वम्।" "अरमव्ययमि"ति तु स्वामी॥

द्रुतम् 'द्रुत'मिति। द्रु गतौ। भावे क्तः (पा० ३।३।११४) ॥५९॥

सत्वरम् सह त्वरया वर्तते इति 'सत्वरम्'॥

चपलम् चुप मन्दायां गतौ। "चुपेरच्चापधाया (उ० १।११०) इति कलः। 'चपलम्'॥

289 रिणात्यनेन—B_1. * Could not be traced.
290 भानुजि—reads "चवर्गादिः। जवो वेगवति त्रिषु। पुंलिङ्गस्तु भवेद् वेगे चौड्रपुष्पे जवा स्मृता"—इति मुकुटः।" (क) लघि गतौ। लघि भोजननिवृत्तावपि—पाणिनीयधातुपाठः। "लघि शोषणे इति तु मुकुटस्य प्रमादः"—भानुजि"

तूर्णम् ‘तूर्ण’मिति। “ज्वरत्वरे”त्यादिना (पा० ६।४।२०) ऊठ्। “रदाभ्या”मिति (पा० ८।२।४२) णत्वम्॥

अविलम्बितम् विलम्बते। भावे क्तः। नञ्समासः। ‘अविलम्बितम्’॥

आशु अशू व्याप्तौ। “कृपावाजिमी”त्यादिना (उ० १।१) उण्। ‘आशु’॥ **एकादश शीघ्रस्य॥**

सततम् **सतत इति**। सन्तनोतेर्भावे क्तः (पा० ३।३।११४)। अनुनासिकलोपः (पा० ६।४।३७)। “समो वा हिततयोः” (वा० ६।१।१४४) इति विकल्पेन समो मलोपे ‘सततम्।’ पक्षे **सन्ततम्** ‘सन्ततम्’॥

अनारतम् आङ्पूर्वो रमिर्विरामे वर्तते। तथा संकीर्णे “आरत्यवरतिविरतय” इति वक्ष्यते। अविद्यमानमारतमस्मिन्निति ‘अनारतम्॥’

अश्रान्तम् ‘अश्रान्त’मिति। श्रमु तपसि खेदे च। भावे क्तः (पा० ३।३।११४)। “अनुनासिकस्ये”त्यादिना (पा० ६।४।१५) दीर्घः॥

अविरतम् नास्ति विरतमस्ये ‘त्यविरतम्’॥

अनिशम् निशाव्यापारशून्यत्वमुपचारात्। तद्रहितम् ‘अनिशम्।’ “नास्ति निशाप्रायो व्यवच्छेदकः* कालोऽस्येत्यनिशम्” इति तु सर्वानन्दः॥६०॥

नित्यम् **‘नित्य’**मिति। नियतभवमित्यर्थे नियतार्थान्निशब्दात् “त्यब् नेर्ध्रुवे” (वा० ४।२।१०४) इति त्यप्॥

अनवरतम् अनारतवद् ‘अनवरतम्॥’

अजस्रम् न जस्यति ‘अजस्रम्।’ जसु हिंसायाम्। सदन्त्यः। “नमिकम्पि” (पा० ३।२।१५७) इत्यादिना रः। सततमजस्रंशब्दावव्ययावपि नित्यपर्यायौ स्तः। “शश्वदभीक्ष्णं नित्यं सदा सततमजस्रम् इति सातत्ये” इति अव्ययप्रकरणे आपिशलिः॥ **नव निरन्तरक्रियाकरणस्य॥**

अतिशयः **अर्थेति**। सतताद्यतिशययोरयं भेदः——सततं क्रियान्तरैरव्यवधानम्। अतिशयस्तु क्रियाभ्यावृत्तिः,[291] पौनःपुन्यम्

291 क्रियाभ्यासः—B_1.

* In print we have विच्छेदकरः

इति यावत्। अतिशेते जयत्यनेन ‘अतिशयः।’[292] अतिपूर्वात् शीङः “एरच्” (पा० ३।३।५६)॥

भरः ‘भरः’ पूर्णता। भृ भरणे(क)। करणे “ॠदोरप्” (पा० ३।३।५७)॥

(निर्भरः) अन्योपसर्गनिवृत्त्यर्थं ‘निर्भरः’॥[293]

अतिवेलः अतिक्रान्तो वेलां मर्यादाम् ‘अतिवेलः।’[294] “अत्यादयः क्रान्ताद्यर्थे द्वितीयये”ति (वा०) समासः॥

भृशम् भृशुभ्रंशु अधःपतने। धातूनामनेकार्थत्वात् भृशते अतिशेते। इगुपधत्वात् कः (पा० ३।१।१३५)। ‘भृशं’ सतालव्यम्॥

अत्यर्थम् अर्थो निवृत्तिविषयो वा। तमतिक्रान्त‘मत्यर्थम्’॥

अतिमात्रम् एवम् ‘अतिमात्रम्।’ मात्रा स्तोकम्*॥

उद्गाढम् उद्गाहते स्म ‘उद्गाढम्।’ गाहू विलोडने। क्तः (पा० ३।४।७२) ढत्व-धत्व-टुत्व-ढलोप-दीर्घत्वानि (पा० ८।२।३१, ८।२।४०, ८।४।४१, ८।३।१३, ६।३।१११)॥६१॥

***निर्भरम्**

तीव्रम् तीवति ‘तीव्रम्।’ तीव स्थौल्ये। बाहुलकात् “स्फायी” (उ० २।१३) त्यादिना रक्। “ऋज्रेन्द्राग्र” इत्यत्र (उ० २।२८) बहुलवचनात् तिज निशाने अतोऽपि रन्, दीर्घत्वञ्च, जकारस्य वकारः——इत्युणादौ॥

एकान्तम् एकोऽन्तो निश्चितो ऽत्रेति ‘एकान्तम्॥’

नितान्तम् नि ताम्यति स्म ‘नितान्तम्।’ तमु काङ्क्षायाम्। क्तः, दीर्घः (पा० ३।४।७२, ६।४।१५)॥

गाढम् ‘गाढ’ मुद्गाढवत्॥

बाढम् ‘बाढम्’ इति “क्षुब्धस्वान्तध्वान्त” (पा० ७।२।१८) इत्यत्र निपातितम्॥

दृढम् ‘दृढम्।’ “दृढः स्थूलबलयो” (पा० ७।२।२०) रिति निपातितम्॥

(क) भानुजि’s version of मुकुट reads——भृ भर्त्सने।

292 जयत्यतिशयः—B_1.

293 निर्भरं—B_1.

294 अतिवेलम्—A

* स्तोकः—सर्वा°।

"यथा ओम् आं नाम अधिकं वत सत्यं बाढम् इत्यभ्युपगमार्था" इति श्रीभोजोऽव्ययमाह ।। **चतुर्दश अतिशयस्य ।।**

जवादीनां शीघ्रादीनां चापरं भेदमाह––

क्लीब इत्यादि । 'शीघ्रादि' दृढपर्यन्तं क्रियाविशेषणत्वात् 'अद्रव्ये' वर्तमानं 'क्लीबे' नपुंसकलिङ्गे वर्तते । 'यत्' तु एषां मध्ये 'सत्त्वगामि' द्रव्यगामि 'तत् त्रिषु' वाच्यलिङ्गमित्यर्थः । यथा––शीघ्रं जुहोति, सततं भुङ्क्ते । द्रव्यगामि त्रिषु । यथा[295]––कलौ शीघ्रा जरा, शीघ्रो मृत्युः, शीघ्रं वयस्तथेति । अन्यस्त्वाह––अतिशयभरौ वर्जयित्वा । एतयोर्नित्यमेवासत्त्ववचनत्वेऽपि पुंलिङ्गेन निर्देशात् । "घञ्-अच्-अप्-अन्ताः पुंसी"ति वचनात् च पुंस्त्वमेवानयोः । तथाच रभसः––"गाढैकान्तनितान्तानि पुमानतिशयो भर" इति । यत्तु "अतिशयं पठती"ति प्रयोगस्तत् क्रियाविशेषणम् । कलिङ्गस्त्वाह–– "तत्र सत्त्वगामिनः शीघ्रपर्याया आशुशब्दरहिताः, सततपर्याया अनिशाजस्ररहिताः, अतिशयपर्याया अतिशयभररहिता" इति । अत्राशुशब्दवर्जनमसम्यक् । तथाच कालिदासः––

"मेरुमेत्य मरुदाशुवाहन" (कुमार°, ८।२२) इति । अत आशुशब्दोऽपि त्रिष्वित्यन्ये । "एवमनिशशब्दस्यापि त्रिलिङ्गतां कोऽपि मन्यत" इति सर्वधरः ।।

क्वचि"द्रव्यगामी"ति पाठः । तत्र "भेद्यगामी" विशेष्यगामीत्यर्थः ।।६२।।

कुबेरस्त्र्यम्बकसखो[296] यक्षराड्गुह्यकेश्वरः ।
मनुष्यधर्मा धनदो राजराजो धनाधिपः ।।६३।।
किन्नरेशो वैश्रवणः पौलस्त्यो नरवाहनः ।
यक्षैकपिङ्गैलविल(क)-श्रीदपुण्यजनेश्वराः ।।६४।।
अस्योद्यानं चैत्ररथं पुत्रस्तु नलकूवरः* ।
कैलासं स्थानमलका पूर्विमानन्तु पुष्पकम् ।।६५।।

295 द्रव्यगामि यत् कलौ—B_1. 296 कुबेर—B_1; कुबेरोऽम्बसखो—A.

(क) भानुजि and some others read ऐडविड । मुकुट's reading is not clear from the text.

* नलकूबरः—सर्वा° ।

स्यात् किन्नरः किंपुरुषस्तुरङ्गवदनो मयुः ।
निधिर्ना शेवधिर्भेदाः शङ्खपद्मादयो निधेः ।।६६।।

।।०।। इति स्वर्गवर्गः ।।०।।

'कुबेर'इति । त्रिचरणोऽष्टदंष्ट्रो जातोऽयमतः कुत्सितं **कुबेरः**
बेरं शरीरमस्य इति 'कुबेरः' । "कुष्ठित्वेन कुत्सितदेहत्वे(त्वात्?) कुबेर" इति तु स्वामी ।

"कुत्सायां क्विति शब्दोऽयं शरीरं बेरमुच्यते ।
कुबेरः कुशरीरत्वान्नाम्ना तेनैव सोऽङ्कित ।।" इति

वायुपुराणम् । अथवा कुबि आच्छादने । "कुम्बेर्नलोपश्च" (उ० १।६०) इति एरक् । नलोपः । कुबेरो धनाच्छादको धनरक्षक इत्यर्थः* ।।

त्र्यम्बकस्य सखा 'त्र्यम्बकसखः[297] ।' टच् (पा० **त्र्यम्बकसखः**
५।४।९१) ।।

'यक्षराट्' यमराड्वत् ।। **यक्षराट्**

गुह्यकानामीश्वरो 'गुह्यकेश्वरः' ।। **गुह्यकेश्वरः**

मनुष्यस्येव धर्म आचारः श्मश्रुलत्वादिर्वास्येति 'मनुष्य- **मनुष्यधर्मा**
धर्मा ।' "सप्तम्युपमान" (वा०) इत्यादिना समासः । "धर्मादनिच् केवलाद्" (पा० ५।४।१२४) इत्यनिच् ।।

धनं दयते रक्षतीति 'धनदः ।' देङ पालने । कः[298] **धनदः**
(पा० ३।२।४) ।।

राजानो यक्षास्तेषां राजेति 'राजराजः ।' टच् (पा० **राजराजः**
५।४।९१) । "यक्षे चन्द्रे च राजा स्याद्" इति त्रिकाण्डशेषः ।।

धनानामधिपो 'धनाधिपः' ।।६३।। **धनाधिपः**

किन्नराणामीशः 'किन्नरेशः' ।। **किन्नरेशः**

पुलस्त्यपुत्रो विश्रवास्तस्यापत्यं 'वैश्रवणः ।' तालव्यमध्यः । **वैश्रवणः**
"शिवादिभ्योऽण्" (पा० ४।१।११२) इत्यत्र "विश्रवणरवणा"विति पाठात् विश्रवणादेशोऽण् च ।।

* RNC. has both कुबेर and कुवेर । 297 अम्बकस्य सखा 'अम्बकसखः'—A.
298 देङ रक्षणे । अदन्तलक्षणः कः—B_1.

पौलस्त्यः पुलस्तेरपत्यं गोत्रं वा 'पौलस्त्यः।' "गर्गादिभ्यो यञ्" (पा० ४।१।१०५)। बहुत्वे लुक् (पा० २।४।६४)। पुलस्तयः।

नरवाहनः रुद्रदत्तनरयुक्तशिविकावाहनत्वान् 'नरवाहनः।' "वाहनमाहिताद्" (पा० ८।४।८) इति न णत्वमनाहितवाचित्वात्, नापि "पूर्वपदात् संज्ञायाम्" (पा० ८।४।३) इति णत्वम्। क्षुभ्नादेराकृतिगणत्वात् (पा० ८।४।३९)।

यक्षः 'यक्षः' पूर्वमेवोक्तः॥ ई लक्ष्मीम् अक्षणोति व्याप्नोतीति तु स्वामी॥[299]

एकपिङ्गः गौरीनिरीक्षणे तत्प्रभावाद्वामे चक्षुषि नष्टे रुद्रानुनयात् तत् पिङ्गलचिह्नं देव्या दत्तमस्येति 'एकपिङ्गः।' अतएव भागुरिणा "हर्यक्ष" उक्तः॥[300]

ऐलविलः इलविला पुलस्तिभार्यास्य पितामही। तस्या अपत्यमपतनादपत्यमिति कृत्वा "अवृद्धाभ्यो नदीमानुषीभ्य" (पा० ४।१।११३) इत्यण्। ('ऐलविलः')। "इडविडा माता अस्य इति ज्योत्स्नादित्वादणि (वा० ५।२।१०३) 'ऐडविडः।' **(ऐडविडः)** "डलयोरेकत्वस्मरणात् ऐलविलोऽपी"ति तु स्वामी॥

श्रीदः धनवत् 'श्रीदः'॥

पुण्यजनेश्वरः पुण्यजना यक्षास्तेषामीश्वरः 'पुण्यजनेश्वरः'॥ **सप्तदश कुवेरस्य**॥६४॥

चैत्ररथम् **अस्येति**। अस्येति प्रत्येकमन्वीयते। उद्यान्त्यस्मिन्निति 'उद्यानम्।' चित्ररथेन निर्वृत्तमित्यणि (पा० ४।२।६८) 'चैत्ररथम्'॥ **एकं (कुबेरोद्यानस्य)**॥

नलकूवरः **पुत्रस्त्विति**। पुत्रस्तु 'नलकूवरो' युगन्धरोऽस्येति नलकूवरः। "पुत्रस्तु नलकूवर" इति शब्दार्णवादयोऽपि। "पुत्रौ तु नलकूवरा"विति त्रिकाण्डशेषमूलं गवेष्यम्॥[301] **एकं (कुबेरपुत्रस्य)**॥

कैलासः **कैलास** इति। केलीनां समूहः केलम्। अण् (पा० ४।२।३७)। तेनास्यतेऽत्र 'कैलासः।' आस उपवेशने। "हलश्चे" (पा० ३।३।१२१) त्यधिकरणे घञ्। यद्वा केलिः प्रयोजनमस्य कैलः। आस्यतेऽत्र इत्यासः। केलश्चासावासश्चेति कृष्णसर्पवन्नित्यसमासः। कं जलम्, इला भूमिः। केलयोर्जलभूम्योरास्ते, के जले लासो लसनमस्य वा 'केलासः' स्फाटिकः।[302] तस्यायं कैलासोऽद्रि––रिति तु स्वामी॥ **एकं (कुबेरस्थानस्य)**॥

अलका **अलकेति**। अलति भूषयति 'अलका।' अल भूषणपर्याप्तिवारणेषु। "क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि" (उ० २।३२) इति क्वुन्। "न यासयो"रिति (पा० ७।३।४५) योगविभागात् "प्रत्ययस्थात् काद्" (पा० ७।३।४४) इति नेत्वम्। "क्षिपकादित्वान्नेत्वमि"ति (वा०) स्वामी। "बाहुलकान्नेत्वमि"ति तु कौमुदी॥ **एकं (कुबेरनगर्याः)**॥

पुण्पकम् (पुष्पकः) **विमानन्त्विति**। पुष्प विकसने। क्वुन् (उ० २।३२)। 'पुष्पकम्।' "इवे प्रतिकृतौ कन्" (पा० ५।३।९६) इति तु स्वामी। "विमानं तु पुष्पकोऽस्त्री नगरी त्वलका प्रभा" इति तु शब्दार्णवात् पुंस्त्वमिति॥ **एकं (कुबेरविमानस्य)**॥६५॥

किन्नरः **स्यादिति**। किञ्चिन्नरोऽश्वमुखत्वात्, कुत्सितो नरो वा 'किन्नरः।' "किं क्षेपे" (पा० २।१।६४) इति समासः॥

किंपुरुषः एवं 'किम्पुरुषोऽपि'। "कुत्सा च कस्यचिन्नरमुखाश्वकायत्वात् कस्यचिदश्वमुखनरशरीरत्वादि"ति तु कौमुदी।

तुरङ्गवदनः तुरङ्गस्येव वदनमस्य इति 'तुरङ्गवदनः।'

मयुः मयत इति 'मयुः।' डु मिञ् प्रक्षेपणे। "भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उ" रिति (उ० १।७) उः। "मीनातिमिनोतिदीङां ल्यपि च" (पा० ६।१।५०) इति आत्वं बहुलवचनान्न भवती––त्युणादिवृत्तिः। केचित्तु पृथगिदं नामचतुष्टयं मन्यन्ते। तदयुक्तम्। अन्यत्रापि सर्वत्र पर्यायदर्शनात्॥६६॥ **चत्वारि किन्नरस्य**॥

299 This is not found in the printed editions. 300 Omitted in B_1.

301 कुपुत्रौ तु नलवराविति त्रिकाण्डशेषे द्वयमिति च नाम मूलं तु गवेष्यम्—B_1.

302 स्फटिकः—B_1.

निधिः — **निधिरिति**। नियतं धीयते 'निधिः।' धाञ्नः किः (पा० ३।३।९२)॥

शेवधिः — शेवृषेवृग्लेवृप्लेवृमेवृस्थेवृ सेचने।[303] तत्र तालव्यादे"र्गुरोश्च हल" (पा० ३।३।१०३) इत्यप्रत्यये शेवाऽधीयतेऽत्रेति किः (पा० ३।३।९३)। बाहुलकादापो ह्रस्वत्वम्। 'शेवधिः।' तालव्यादिः। "शे कल्याणे अवधिः शेवधि"रिति तु राजदेवः।" शेफश्येतौ शरभः शरारुशफ शूर्पशेवधिश्यामा" इति[304] तालव्यादावूष्मविवेकात्। केचित्तु शेवृधातोः किरित्याहुः (पा० ३।३।९३)। अत एव धातोः पचाद्यचि (पा० ३।१।१३४) शेवः। शेवान् दधातीति शेवधिर्बाहुलकात् कर्तरि किरिति सर्वानन्दः। शेव्यते, शेवं स्थाप्यधनं धीयतेऽत्र––इति तु स्वामी॥ **द्वे सामान्यनिधेः॥**

पद्मशङ्खादयः — **भेदा** इति। पद्मशङ्खादयो नव निधेर्भेदाः। उक्तं च––"पद्मोऽस्त्रियां महापद्मः शङ्खो मकरकच्छपौ। मुकुन्दः कुन्दनीलाश्च[305] खर्वश्च निधयो नव" इति शब्दार्णवादयः* पुराणान्तराश्रयात्। मार्कण्डेयपुराणे तु––'खर्वं' इति हित्वाष्टावेवोक्ताः॥ **निधिविशेषाणां पृथक् पृथक्॥६६॥**

स्वर्गवर्ग इति। स्वर्गप्रधानो वर्गः स्वर्गवर्गः। एव सर्वत्रवर्गसमाप्तौ बोध्यम्॥[306]

॥०॥ इति स्वर्गवर्गविवरणम्॥०॥

303 ···पेवृमेवृम्लेवृ—B_1, स्थेवृ—omitted in B_1.
304 शरावशफशूर्पशेवधिश्यामा––B_1. ···शङ्खशूर्प––रघुनाथः।
305 कुन्दलीलाश्च—B_1.;
306 Omitted in B_1.
*हारावली—सर्वा°।

२। व्योमवर्गः

द्योदिवौ द्वे स्त्रियावभ्रं व्योम पुष्करमम्बरम्।
नभोऽन्तरीक्षं[307] गगनमनन्तं सुरवर्त्म खम्॥६७॥
वियद्विष्णुपदं वा तु पुंस्याकाशविहायसी।

॥०॥ इति व्योमवर्गः॥०॥

द्यो इति। 'द्यो-दिवौ' पूर्वम् उक्तौ॥ — द्यो-दिवौ

अभ्रम् — [**अभ्रम्** इति।] अभ्रति स्थैर्यं गच्छति नित्यद्रव्यत्वात्। अच् (पा० ३।१।१३४)। न बिभर्ति किञ्चिद् इति 'अभ्रम्।' "मूलविभुजादि" (वा० ३।२।५) रिति तु कौमुदी। आपो भश्यन्त्यस्मादिति "अन्येभ्योऽपी"ति (वा० ३।२।१०१) डः। "अब्भ्रं बकारसंयुक्तम्" इत्येके। "न भ्राजते इति 'अभ्रम्'। (अब्भ्रम्) "अन्येभ्योऽपी"ति (वा० ३।२।१०१) डः" इति तु स्वामी॥

व्योम — [**व्योम** इति।] व्ययति संवृणोति शून्यत्वाज्जगदिति 'व्योम।' व्येञो "नामन्-सामन्-सीमन-हेमन्-रोमन्-लोमन्-वेमन्-वर्त्मन्-पामन्" (उ० ४।१५०) इत्यादिना[308] निपातितम्।

पुष्करम् — [**पुष्करम्** इति।] पुष्यतीति "पुष पुष्टौ।" "पुषः किद्" (उ० ४।४) करन्[309] कित्त्वं च। 'पुष्करम्।' "पुष्कं वारि राती"ति तु स्वामी॥

अम्बरम् — [**अम्बरम्** इति।] अम्बते शब्दायते 'अम्बरम्।' अबिरबिलबि शब्दे। "ऋच्छेररन्" (उ० ३।१३१) इति बाहुलकादरन्।[310]

नभः — णह बन्धने। "नहेर्दिवि भश्च" (उ० ४।२१०) इत्यसुन्। भश्चान्तादेशः। न बभस्ति, न भाति वा 'नभ' इति तु स्वामी। "अत्यविचमी" त्यादिना (उ० ३।११७) असचि 'नभसम्' अदन्तं चास्ति*॥ (नभसम्)

307 अन्तरिक्षं—क्षीर°। 308 "नामन्-सीमन्-व्योमन्-लोमन्-पाप्मन्-ध्यामन्––उज्ज्वल°। बालमनोरमा has धामन् for ध्यामन्।...नामन्-सामन्-सोमन्—B_1.; ...वेमन्-चर्मन्-पामन्—A. ...पाप्मन्––B_2 309 करच्—A. ,B_1.
310 "ऋच्छेररः—भट्टोजि, उज्ज्वल°। दशपादी reads अरन्।
* नभसः पुंसि इत्युणादिवृत्तौ––भानु°।

अन्तरीक्षम् (अन्तरिक्षम्) अन्तरीक्षते जगदस्मिन् इति 'अन्तरीक्षम्।' ईक्ष दर्शने। घञ् (पा० ३।३।१२१)। "वेदे तु छान्दसं ह्रस्वत्वम्"––इति वर्णदेशना। "अन्तर्ऋक्षाणि नक्षत्राण्यस्य इति पृषोदरादित्वाद् (पा० ६।३।१०९) इत्वम्। "द्यावापृथिव्योरन्तरीक्ष्यत इति वा"––इति तु स्वामी॥

गगनम् गच्छन्त्यनेन इति "गमेर्गश्च" (उ० २।७७) इति युच्, किच्च, गश्च अन्तादेशः। 'गगनम्'॥

अनन्तम् नित्यत्वादविद्यमानोऽन्तो विनाशोऽस्य इति 'अनन्तम्'॥

सुरवर्त्म देवा न भूमिस्पृशोऽन्तरिक्षगास्तेन 'सुरवर्त्म'। नान्तः॥

खम् **"खम्"** इति शून्यत्वात्। खातम् इव 'खम्'। "डित् खनेर्मुट् स चोदात्तः" (उ० ५।२०) इति अल्, अच् वा।[311] सच डित्। डित्वात् टिलोपः (पा० ६।४।१४३)। मुडागमस्तु आगमानित्यत्वान्न भवति। "खन्यते खम्"––इति तु स्वामी॥६७॥

वियत् वि यच्छति न विरमति 'वियत्।' विपूर्वाद् यमे "रन्येभ्योऽपी"ति (पा० ३।२।१७८) क्विप्। "क्वौ च गमादीनामनुनासिकलोपो भवतीति वक्तव्यम्" (वा० ६।४।४०) इत्यनुनासिकलोपः। तुक् (पा० ६।१।७१)॥

विष्णुपदम् विष्णोः पदमास्पदं 'विष्णुपदम्।' "विष्णोः पदं क्रमोऽत्र" इति तु स्वामी॥

आकाशः आ समन्तात् काशन्ते सूर्यादयोऽत्र इति 'आकाशः।' काशृ दीप्तौ। "हलश्चे" ति (पा० ३।३।१२१) घञ्। "न काशते वा। छान्दसो दीर्घ" इति तु कलिङ्गः। "काशाकाशकुशाङ्कुशम्" इति तालव्यान्ते चन्द्रगोमी॥

विहायः विजहाति सर्वं 'विहायः।' विपूर्वाज्जहातेर्बाहुलकादसुन्* (उ० ४।१८८)। "वा पुंस्याकाशविहायसी"ति संबन्धः॥ **षोडश आकाशस्य** ॥६८क॥

॥०॥ व्योमवर्गविवरणम् ॥०॥

311 इत्यच्––B₁. 'अल् वा' omitted.

* भानुजि adds––"णिदित्यस्यानुवृत्तेर्युक् (पाः ७।३।३३)"। "अदन्तोऽपि––"**विहायसं स्याद् गगनम्**" इति हलायुधः"––रघुनाथः।

३। अथ दिग्-वर्गः

दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः ॥६८॥
प्राच्यपाचीप्रतीच्यस्ताः पूर्वदक्षिणपश्चिमाः।
उत्तरा दिगुदीची स्याद् दिश्यन्तु त्रिषु दिग्भवे ॥६९॥
इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत्।
कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात् ॥७०॥
ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः।
पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥७१॥
करिण्योऽभ्रमुकपिलापिङ्गलानुपमाः क्रमात्।
ताम्रकर्णी शुभदन्ती[313] चाङ्गना चाञ्जनावती[312] ॥७२॥
क्लीबाव्ययं[314] त्वपदिशं दिशोर्मध्ये विदिक् स्त्रियाम्।

दिशस्तु इति। दिशन्ति तामिति, दिशत्यवकाशं वा ददातीति "ऋत्विगा" दिना (पा० ३।२।५९) कर्मणि क्विन्। कर्तरि तु "क्विप् च" (पा० ३।२।७६) इत्यनेन क्विप्। "आपञ्चापि हलन्तेभ्यः" (भागुरि) इति 'दिशा'पि। "दिक् तु स्त्रियां दिशादन्तः ककुब् देववधूः पवि"[315] रिति शब्दार्णवः॥ दिक् (दिशा)

कं वातं क्षुभ्नाति विस्तारयति। स्कुन्भुरिति* सौत्रधातौ क्विप् (पा० ३।२।१७८)। पृषोदरादित्वात् सलोपः (पा० ६।३।१०९)। 'ककुब्।' भान्ता। "केन आदित्येन कुत्सितानि भानि नक्षत्राणि अत्र" इति तु अन्यः। 'ककुभा' पीति कश्चित्॥ ककुभ् (ककुभा)

काष्ठा काशते 'काष्ठा।' काशृ दीप्तौ। "हनिकुषिनीरमि-

812 राय° tells us that this couplet is not universally accepted as original.

313 शुभ्रदन्ती––B₁., भानुजि, रघुनाथ and others. 314 क्लीबेऽव्ययम्––B₁.

315 ...दिशादान्ती––भानुजि। ...सवित् for पवि––B₂. ...दान्ती...समिरिति वाचस्पतिः––रघुनाथः।

* स्कुभु––भानुजि°।

काशिभ्य कथन् (उ० २।२)। व्रश्चादिना षत्वम् (पा० ८।२।३६)। टाप् (पा० ४।१।४)॥

आशा — आ समन्तात् अश्नुते व्याप्नोति इति 'आशा।' अशू व्याप्तौ। अच् (पा० ३।१।१३४)॥

हरित् — हरन्ति नयन्ति अनया 'हरित्'। हरतेः "हृसृतडिरुहियुषिभ्य इतिः[316](उ० १।९९) इतीतिः। "ता" इत्यनेन स्त्रीत्वं व्यनक्ति। दिशां बहुत्वाद् बहुवचनम्। "दिगेका विभ्वीति औपाधिकं तु प्राचीत्वादी"ति वैशेषिकाः। **पञ्च सामान्येन दिशाम्** ॥६८॥

प्राची — प्राचीति। प्रथमं प्रागञ्चत्युदेति रविरस्यामिति 'प्राची।' प्राथम्ये प्रशब्दोऽत्र॥

अपाची — मध्येऽह्नोऽञ्चत्यस्यामर्क इत्य'पाची'। अपशब्दोऽयमपदिशवन्मध्यवाची। "अवाची" त्यपपाठ एव। अवपूर्वोऽञ्चतिरधोमुखीभावे वर्तते, वक्ष्यति च "स्यादवाङप्यधोमुख" इति। "अवाङ् मुखस्योपरि पुष्पवृष्टि" (Raghu, II. 60) रिति रघुः। "तेन अवाचीत्यधोदिश्येव वर्तत" इति तु कौमुदीकारादयः। "अवो मध्यार्थः। अवाचीत्यपि क्वापि"[317] इति तु स्वामी॥

प्रतीची — प्रति पश्चाद् दिनान्तेऽञ्चत्यर्कोऽस्यामिति* 'प्रतीची'। सर्वत्र "ऋत्विगादिना" (पा० ३।२।५९) क्विन्।[318] "अञ्चतेश्चोपसख्यानम्" (वा० ४।१।६ काशिका) इति ङीप्। प्रतीचीत्यत्र "अच" (पा० ६।४।१३८) इत्यकारलोपः, "चा" (पा० ६।३।१३८) विति दीर्घः॥

---

316 Printed texts omit तडि in this rule.

317 The printed editions of क्षीर read—अवो मध्यार्थे। अपाचीति कात्यः। जपादित्वात् पक्षे वत्वञ्च। But it is curious that the जपादि cannot be traced in the Paninian system handed down to us.

* "सूर्य्योऽस्याम्—इति तु दुष्टम्"—भानुजि°।

318 भानुजि reads "बाहुलकादधिकरणे क्विन्" इति मुकुटः। But our mss. read otherwise. It is suspected that the scribes took it from सर्वा° in our mss. In many such instances the influence of सर्वा°'s text is clearly discernible in the mss. of मुकुट।

'पूर्वदक्षिणपश्चिमा' इति। "सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः" (वा० ५।३।२८)॥ **पूर्वदक्षिणपश्चिमानां यथाक्रममेकैकम्** ॥

उदीची — **उत्तरेति**। उत्तरत्यत्रेति 'उत्तरा'। उत्क्रान्तो दृष्टिपथम् अतीतः सूर्योऽञ्चत्यस्यामि'त्युदीची'। "उद ईदि" (पा० ६।४।१३९) ति अञ्चतेरकारस्य ईकारः॥ **एकमुत्तरस्या दिशः** ॥

दिश्यम् — **दिश्यमिति**। दिशि भवं 'दिश्यम्'। दिगादित्वाद् यत् (पा० ४।३।५४)॥ **दिग्भववस्तुन एकम्** ॥६९॥

इन्द्रः, वह्निः, पितृपतिः, नैरृतः, वरुणः, मरुत्, कुबेरः, ईशः — **इन्द्र** इति। अत्र विदिगिति प्रसिद्धा दिगुच्यते "इन्द्रो-वह्नि" रित्यादिना। पूर्वादीनामिन्द्रादीनाञ्च प्राच्यादि दिशामाधिपत्यादि[319]सूचनायाभिधानान्नाप्रस्तुतत्वोक्तिरिति कौमुदी। **इन्द्रादयोऽष्टौ प्रत्येकं पूर्वादिदिशां स्वामिनः** ॥७०॥

ऐरावतः — **ऐरावत** इति। 'ऐरावतः' पूर्वमुक्त एव॥

पुण्डरीकः — पुण्डरीकवर्णयोगात् 'पुण्डरीकः'। अर्श आद्यच् (पा० ५।२।१२७)॥

वामनः — खर्वत्वाद् 'वामनः'॥

कुमुदः — कौ मोदत इति 'कुमुदः'। "मूलविभुजे"ति (वा० ३।२।५) कः। कुमुदं रक्तोत्पलं, तत्तुल्यवर्णत्वाद् वा। "कुमुदं कैरवे रक्तपद्मेऽस्त्री" ति मेदिनिः॥

अञ्जनः — अञ्जनवर्णत्वाद् 'अञ्जनः'॥

पुष्पदन्तः — पुष्पमिव दन्ता अस्य 'पुष्पदन्तः'।

सार्वभौमः — **'सार्वभौम'** इति "तत्र विदित इति चे" (पा० ५।१।४३) त्यण्। "अनुशतिकादीनां चे" (पा० ७।३।२०) त्युभयपदवृद्धिः॥

सुप्रतीकः — शोभनं प्रतीकमङ्गमस्येति 'सुप्रतीकः'।

दिशां धारका गजा 'दिग्गजाः'। **इन्द्रादीनां दिशां गजानामष्टानां पूर्वक्रमेणैकैकम्** ॥७१॥

---

319 ऐन्द्रादिपदानां इन्द्रादीनां च प्राचीपत्यादिवाचकत्वसूचनाय—B_1.

अभ्रमुः — क्वचित् "करिण्योऽभ्रमु" रिति पाठो दृश्यते ।[320] तद्विवृतिरियम् । अभ्र आकाश एव माति महाकायत्वान्नान्यत्र ग्रहादौ ।[321] 'अभ्रमुः' । मा माने । मृगय्वादित्वात् (उ० १।३८) कुः(क) । अथवा भ्राम्यतीति भ्रमुः । "भृमृशीतृचरी"-त्यादिना उः प्रत्ययः (उ० १।७) । न भ्रमुरभ्रमुः । मन्थर-गामिनीत्यर्थः ॥

कपिला, पिङ्गला — कपिल-पिङ्गलवर्णत्वात् कपिला-पिङ्गले ॥

अनुपमा — श्रेष्ठत्वान्नास्त्युपमास्या 'अनुपमा' ॥

ताम्रकर्णी — ताम्रौ कर्णौ यस्याः 'ताम्रकर्णी' । "पाककर्णेत्या" (पा० ४।१।६४) दिना ङीष् ॥

शुभदन्ती — शुभौ शोभनौ दन्तावस्याः 'शुभदन्ती' ।[322] "नासिकोद-रौष्ठ" इत्यादिना (पा० ४।१।५५) ङीष् ॥

अङ्गना — अङ्गति गच्छति 'अङ्गना' ॥

अञ्जनावती — अञ्जनवर्णत्वेन अञ्जनमस्या अस्तीति "मतौ वह्वच" (पा० ६।३।११९) इत्यादिना दीर्घः । 'अञ्जनावती' ॥ **क्रमे-णैरावतादीनां हस्तिनीनामेकैकम्** ॥७२॥

अपदिशम् — **क्लीबाव्ययमिति**। 'क्लीबाव्ययमिति' कर्मधारयः। क्लीबे-त्यव्ययीभावत्वप्रदर्शनपरम् । तच्च "नाव्ययीभावा"दि (पा० २।४।८३) ति सूत्रकार्यप्रदर्शनार्थम् । तदप्यन्यतः सुखज्ञापनार्थं, रूपव्यक्तीनां कोषकारानभिधेयत्वात् । अव्ययानामनेकार्थत्वात् अपशब्दोऽधिकरणप्रधानो मध्यवाची ।[323] "अव्ययं विभक्ती" (पा० २।१।६) त्यत्र "अव्यय" मिति योगविभागात् समासः । "अव्ययीभावे शरत्प्रभृतिभ्य" (पा० ५।४।१०७) इत्यच्(ख)

320 This shows the dubious nature of the couplet concerned. क्षीर°'s text is also dubious here and सर्वानन्द omits it altogether. मुकुट seems to accept it half-heartedly and indicates that this is an interpolation.

321 गृहादौ—A. (क) "मित्रय्वादित्वात्"—A., B_1., भानुजि° ।

322 शुभ्रौ शोभनौ. . .शुभ्रदन्ती—B_1., भानु° । 323 अव्ययवाची—B_1.

(ख) "इति टच्" should be the correct reading.

समासान्तः । "अव्ययीभावश्चे" (पा० १।१।४१, २।४।१८) ति क्लीबत्वाव्ययीभावत्वे । 'अपदिशम्' ॥

विदिक् — दिग्भ्यां विनिर्गता 'विदिक्' । शान्ता ॥

(प्रदिक्) — "प्रदिक्" च । तथाचामरमाला—"क्लीबे दिगन्त-रालानि प्रदिशो विदिशस्तथे" ति* ॥ **द्वे अग्न्यादिकोणस्य ॥**

अभ्यन्तरं त्वन्तरालं चक्रवालन्तु[324] मण्डलम् ॥७३॥

अभ्रं मेघो वारिवाहः स्तनयित्नुर्बलाहकः ।

धाराधरो जलधरस्तडित्वान् वारिदोऽम्बुभृत् ॥७४॥

घनजीमूतमुदिरजलमुग्धूमयोनयः ।

कादम्बिनी मेघमाला त्रिषु मेघभवेऽभ्रियम् ॥७५॥

स्तनितं गर्जितं मेघनिर्घोषे रसितादि च[325] ।

अभ्यन्तरम् — **अभ्यन्तरमिति**। अन्तरं मध्यावकाशः । अभिगतमन्तरम् 'अभ्यन्तरम्' ॥

अन्तरालम् — अन्तरं लातीत्य'न्तरालम्' । कप्रत्ययः (पा० ३।२।३) । "अन्येषामपी" ति (पा० ६।३।१३७) दीर्घः ॥ **द्वे मध्यमात्रस्य ॥**

चक्रवालम् (चक्रवाडम्) — **चक्रेति**। चक्रेण चक्राकारेण वलते । वलवल्ल संवरणे । अच्, पृषोदरादिः (पा० ३।१।१३४, ६।३।१०९) । 'चक्र-वालम्' । भावे घञ्ि (पा० ३।३।१८) वालः । चक्रस्येव वालः संवरणम् अस्येति वा, चक्राकारेण वाडते इति वा 'चक्र-वाडम्' । वाडृ आप्लाव्ये । अच् (पा० ३।३।१३४) । कौमुदी-कारादयस्तु डान्तमेवात्र पठित्वा "डलयोरेकत्र स्मरणात् लान्त-मपी" त्याहुः ॥

मण्डलम् — मण्डयतीति 'मण्डलम्' । वृषादित्वात् कलच् (उ० १।१०८) । मण्डं भूषां लातीति वा । मण्डते मण्डलमिति वा । केचित् तु उभयत्रैव 'दिशा'मित्यनुवर्तयन्ति । तदप्रमाणम् । सामान्येनैव सर्वत्र दर्शनात् ॥ **द्वे मण्डलाकारेण परिणतस्य समूहमात्रस्य** ।७३॥

अभ्रम् — **अभ्रमित्यादि**। अभ्रति गच्छतीति 'अभ्रम्' इत्युपाध्याय-

324 चक्रवाडन्तु—B_1. * "यान्यासामन्तरालानि. . .विदिशश्च ताः"—भानु° ।

325 रसितं ध्वनितं तथा—B_2. . . .मेघनिर्घोषो—भानुजि° ।

सर्वस्वादिः। अतएव माघे—'(समयावनौ) घनमदभ्रमराणी" (Śisu,6/73) ति यमकितम्।* अपो बिभर्तीति मूलविभुजा-
(अब्भ्रम्) दित्वात् के (वा० ३।२।५) बकारवदिति वैयाकरणाः। न भ्रश्यन्त्यापोऽस्मादिति पौराणिकाः। तदुक्तम्—"न भ्रश्यन्ति यतस्तेभ्यो जलान्यभ्राणि तान्यतः' इति ॥

मेहति सिञ्चति। मिह सेचने। अच् (पा० ३।१।१३४)। न्यङ्क्वादित्वात् (पा० ७।३।५३) कुत्वम्।
मेघः 'मेघः' ॥

वारिवाहः वारि वहतीति कर्मण्यण् (पा० ३।२।१)। 'वारिवाहः' ॥

स्तनयित्नुः स्तनगदी देवशब्दे। चुरादावदन्तः। अतः "स्तनिहृषिपुषिगदिमदिभ्यो णेरित्नुच्" (उ० ३।२९)। "अयामन्ता" (पा० ६।४।५५) इत्ययादेशः। 'स्तनयित्नुः' ॥

बलाहकः वारिवाहको[326] 'बलाहकः'। पृषोदरादिः (पा० ६।३।१०९)। बलाकाभिर्हीयत इति वा ॥

धाराधरः जलस्य धारां धरतीति 'धाराधरः'। अच् (पा० ३।१।१३४) ॥

जलधरः एवं 'जलधरः' ॥

तडित्वान् 'तडित्वान्' मतुवन्तः (पा० ५।२।९४)। "झय" (८।२।१०) इति वत्वम् ॥

वारिदः वारि ददातीति 'वारिदः'। कः (पा० ३।२।३)

अम्बुभृत् अम्बूनि बिभर्ति 'अम्बुभृत् ॥७४॥

घनः हन्ति सन्तापमिति 'घनः'। "हन्यते वायुना घन" इति तु स्वामी। "मूर्तौ घन" (पा० ३।३।७७) इति बाहुलकात् कर्तरि हन्तेरप्, कुत्वं च ॥

जीमूत जीवनं जलं मूतं बद्धमनेनेति[327] 'जीमूतः'। मूङ बन्धने। पृषोदरादिः (पा० ६।३।१०९)। जीवनं मुञ्चति। पृषोदरादिः (पा० ६।३।१०९)। "जीवनस्य मूतः पटबन्ध" इति तु स्वामी ॥

मोदन्तेऽनेन, मोदयति प्रजा इति वा 'मुदिरः'। "इषि- मुदिरः
मुदिमदी" (उ० १।५२) त्यादिना किरच् ॥

जलं मुञ्चतीति क्विप् (पा० ३।२।७६)। 'जलमुक्'। जलमुक्
चान्तः ॥

धूमो योनिः कारणमस्य 'धूमयोनिः'। यद्यपि शब्दार्णवे— धूमयोनिः
"मेघास्तु त्रिविधास्तत्र वह्निजा धूमयोनयः। निश्वासजास्तु जीमूतास्ते ज्ञेया जीवरूपिणः ॥ यज्ञजास्तु घना घोराः पुष्करावर्तकादय" इति, तथाप्यन्यत्राभेदोऽपि दृश्यत इतीहापि तथा ॥ **पञ्चदश मेघस्य ॥**

कादम्बिनीति। कादम्बाः पक्षिणो बलाकावत् मेघमनु- कादम्बिनी
धावन्ति। तद्योगात् "ज्योत्स्नादित्वाद्"(वा०) अणि[328] ङीपि (४।१।१५) 'कादम्बिनी'। "कदम्बस्य विकाशः कादम्बः।[329] सोऽस्यास्ति कार्यत्वेन" इति तु स्वामी ॥

(मेघानां माला पङ्क्तिः 'मेघमाला' ॥) **द्वे मेघपङ्क्तेः ॥** मेघमाला

त्रिष्विति। 'अभ्रियम्'। भवार्थे "समुद्राभ्राद् घः"(पा० अभ्रियम्
४।४।११८)। "छान्दसत्वमतन्त्र"मिति स्वामी ॥ **एकं मेघभवस्य** ॥७५॥

स्तनीति। स्तनगदी देवशब्दे। भावे क्तः (पा० स्तनितम्
३।३।११४)। 'स्तनितम्' ॥

एवं 'गर्जितम्' ॥ गर्जितम्

रसतेः शब्दार्थाद् 'रसितम्'। आदिना ध्वनितह्लाद- रसितम्
रासादिग्रहः ॥ **चत्वारि मेघगर्जनस्य ॥**

(*) "अतएव बकाररहितत्वेन "समयावनौ घनमदभ्रमराणि" इति षष्ठे माघे यमकितम्"—शिवदत्तधृतः पाठः।

326 वारिवाहो बलाहकः—B_1.

327 बद्धमनेनेति omitted in B_1

328 It seems to be a curious mistake probably done by the scribe. भानुजि has rightly pointed out that—"यत्तु ज्योत्स्नादित्वात् अणि (वा० ५।२।१०३) ङीप् (४।१।१५) इति मुकुटः। तन्न। एवं हि 'कादम्बी' इति प्रयोगप्रसक्तेः।" It should rather be a case of इनि by the rule अत इनिठनौ (५।२।११५)।

329 समुदयः—B_1. Printed texts of क्षीर read कम् आददते कादम्बा मेघास्ते सन्तस्यां कादम्बिनी। कदम्बे विकाशो वा अस्त्यस्याम्।

शम्पा[330] शतह्लदा ह्लादिन्यैरावती[331] क्षणप्रभा ।।७६।।
तडित् सौदामनी[332] विद्युच्चञ्चला चपलापि च ।
स्फूर्ज थु[333] र्वज्रनिष्पेषो[334] मेघज्योतिरिरम्मदः ।।७७।।
इन्द्रायुधं शक्रधनुस्तदेव ऋजु रोहितम् ।

शम्पा
शम्पेति । भीषणत्वात्(क) शं कल्याणं पिबति। कप्रत्यये (पा० ३।२।३) 'शम्पा' ।।

शतह्लदा
शतं ह्लादा अस्याः। पृषोदरादित्वाद्ध्रस्वत्वम् (पा० ६।३।१०९)। "शतं ह्लदा अर्चींषि विद्यते अस्या" इति तु स्वामी ।।

ह्लादिनी
'ह्लादिनी'त्यावश्यके णिनिः (पा० ३।३।१७०) ।।

ऐरावती
इरावतो मेघस्येयमित्यण् (पा० ४।३।१२०)। 'ऐरावती'। "ऐरावतोऽभ्रनागस्तस्य स्त्री ऐरावती" ति तु स्वामी। मेघानां राजा ऐरावतस्तेनैकदिक् (पा० ४।३।११२) इत्यणि 'ऐरावती'त्यन्यः ।।

क्षणप्रभा
क्षणं प्रभास्याः 'क्षणप्रभा' ।।७६।।

तडित्
ताडयतीति। तड आघाते। "ताडेर्णिलुक् च" (उ० १।१००) इति इतिर्णिलुक् च। 'तडित्' ।।

सौदामनी
"श्वेतद्विपः सुदामे"ति त्रिकाण्डशेषे ऐरावतपर्यायौ। "तेनैकदिक्" (पा० ४।३।११२) इत्यण्। "अन्नि"ति (पा० ६।४।१६७) प्रकृतिभावाट्टिलोपाल्लोपौ न भवत––इति न्यासः। 'सौदामनी'। "सुदाम्नाद्रिणा एकदिगिति" तु स्वामी। "सुदाम्नी त्वशनिर्विद्युदि" ति स्वकोषे "सौदाम्नीत्यसाधु" रिति हट्टचन्द्रः। "सौदामिनी" त्यपपाठः। तथाच हरिप्रबोधे––"खेऽभ्रं जगाम काञ्चन सरसमसौदामनीलताधामास्तम्। कुवलयमयमिव सरजस्सरसमसौ दाम नीलताधामास्त" मिति यमकात् ।।[335]

330 शम्बा—B_1.
331 ऐरावत्यः––B_1.
332 सौदामिनी—B_1.
333 स्फुर्जथु—B_1.
334 निष्पेषे, निर्घोषे—B_1. निर्घोषो—भानु°।
(क) भीषणया—A., B_1.
335 The TSS. text of सर्वानन्द reads खेऽस्तं (variant खेऽन्तं), कुवलयमिव; B_1 reads सरसमासौदामिनी in the first line of the verse. कुवलयमिव हि सरजसं —शिवदत्तः।

विद्युत्
विद्योतते। द्युते"र्भ्राजभासे"ति क्विप् (पा० ३।२।१७७)। 'विद्युत्'। तान्ता ।।

चञ्चला
चञ्चतेर्घञि (पा० ३।३।१८) चञ्चः। तं लातीति 'चञ्चला' (पा० ३।२।३, ४।१।४) ।।

चपला
चुप मन्दायां गतौ। "चुपेरच्चोपधाया" (उ० १।११०) इति कलच् ।* 'चपला' ।। **दश विद्युतः ।।**

स्फूर्जथुः
स्फूर्जथुरिति । टु ओ स्फूर्जा वज्रनिष्पेषे(क)। निष्पेषः संघट्टोत्थः शब्दः। "अशन्याघात" इत्येके। निष्पेषः चूर्णनम्, साटोपध्वनिश्च। इह तु ध्वनिरभिप्रेतः। यथा भट्टिः(५।३५)––"श्रुत्वा विस्फूर्जथुप्रख्यं निनादं परिदेविनी"ति। "ममैव जन्मान्तरपातकानां विपाकविस्फूर्जथुरप्रसह्य"(Raghu, XIV. 62)इति तु रघुरुपचारात्। "अतएव विपूर्वोऽपि स्फूर्जथुरत्रे" ति कौमुदी। "ट्वितोऽथुच्" (पा० ३।३।८९)। "हलि चे"ति (पा० ८।२।७७) दीर्घः। केचित्तु दीर्घं नेच्छन्ति। "तेषां "सिपिधावोरुर्वा" (पा० ८।२।७४) इत्यतो वाग्रहणानुवृत्तौ (ख) व्यवस्थितविभाषाविज्ञानान्न भवती"ति मैत्रेयः ।।

वज्रनिष्पेषः
पिष्लृ संचूर्णने। घञ् (पा० ३।३।१८)। 'निष्पेषो' द्विमूर्धन्यः। **वज्रनिपातजनितशब्दस्यैकम्** ।।[336]

मेघज्योतिः
मेघेति । अन्योन्यसंघट्टने मेघान्निःसृत्य वृक्षादौ ज्योतिः पतति, स 'मेघज्योतिः' ।।

इरम्मदः
'इरम्मदः'। इरया जलेन माद्यति दीप्यते। मेघाग्निर्हि जलेनैव दीप्यते। "उग्रंपश्येरम्मदे" (पा० ३।२।३७) ति निपातनात् 'इरम्मदः'। "मेघे"त्युपलक्षणम्। तेन वाडवोऽपीरम्मदः। सोऽपीरया जलेन माद्यतीति––कौमुदी ।। "मेघाग्न्यादिरिरम्मद" इति शब्दार्णवः ।। **द्वे वज्राग्नेः** ।।७७।।

* उणादिवृत्ति's read कल। श्वेतवनवासी prefers 'चप सान्त्वने' इत्यस्मात् कलप्रत्ययः।
(क) वज्रनिर्घोषे—पाणिनीयधातुपाठः।
(ख) इत्यतो 'हलि च' वाग्रहणानुवृत्तौ—शिवदत्त's ms. A. reads just the same as शिवदत्त's ms.
336 वज्रपतनस्यैकम्––A.

इन्द्रायुधम्

इन्द्रेति। इन्द्रस्यायुधमिति षष्ठीसमासः ॥

शक्रधनुः

एवं 'शक्रधनु'रित्यपि ॥ "रविकिरणा बहुवर्णा वातेन विलोडिता[337] नभसि साभ्रे शक्रायुधसंस्थाना दृश्यन्ते यत् तत्तु इन्द्रधनु"रिति साहसाङ्कः ॥ **द्वे इन्द्रधनुषः** ॥

रोहितम्

तदेवेति। तदिन्द्रधनुरुत्पातादिना ऋजु अवक्रं सद् 'रोहितं' स्यात्। रोहणं रोहः। स सञ्जातोऽस्येति तारकादित्वादितच् (पा० ५।२।३६)। रुहेः "हृश्यादिभ्य इतच्" (उ० ३।९३) इतीतचि वा,(क) रोहितवर्णत्वाद्वा 'रोहितम्'। "ऋत्यक" इति (पा० ६।१।१२८) प्रकृतिभावः ॥ **एकं ऋजोरिन्द्रधनुषः** ॥

वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ ॥७८॥
धारसम्पात आसारः शीकरोऽम्बुकणः स्मृतः[338] ।
वर्षोपलस्तु करका मेघच्छन्नेऽह्नि दुर्दिनम् ॥७९॥
अन्तर्धा व्यवधा पुंसि त्वन्तर्धिरपवारणम् ।
अपिधानतिरोधानपिधानच्छदनानि च[339] ॥८०॥
हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः ।
विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिः ॥८१॥
अब्जो जैवातृकः सोमो ग्लौर्मृगाङ्कः कलानिधिः ।
द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः ॥८२॥
कला तु षोडशो भागो विम्बोस्त्री मण्डलं त्रिषु ।
भित्तं शकलखण्डे वा पुंस्यर्धोऽर्धं समेऽंशके ॥८३॥
चन्द्रिका कौमुदी ज्योत्स्ना प्रसादस्तु प्रसन्नता ।
कलङ्काङ्कौ लाञ्छनञ्च चिह्नं लक्ष्म च लक्षणम् ॥८४॥
सुषमा परमा शोभा शोभा कान्तिर्द्युतिश्छविः ।

वृष्टिः

वृष्टिरिति। पृषुवृषुमृषु सेचने। "स्त्रियां क्तिन्" (पा० ३।३।९४)। 'वृष्टिः'।

---

337 वातेनान्दोलिताः—B_1.
(क) 'इतन्' —"हृश्याभ्यामितन्"—उणादिसूत्रs. Some of the variants of दशपादी have "इतच्"।
338 सृताः—B_1. कणाः स्मृताः—others
339 च्छादनानि—B_1. भानुजि।

वर्षम् (वर्षणम्)

'वर्षं' मिति "अज्विधौ भयादीनामुपसंख्यानम् नपुंसके भावे क्तादिनिवृत्त्यर्थम्" (वा० ३।३।५६) इत्यच्। (ख) "वृषो वृषणा"दिति भाष्यप्रयोगात् (पस्पशा)। "वर्षण"मपि। "अथ वृष्टिर्वर्षमस्त्री केचिदिच्छन्ति वर्षणम्" इति शब्दार्णवः ॥ **द्वे वृष्टेः** ॥

अवग्राहः अवग्रहः

तद्वीति। "अवे ग्रहो वर्षप्रतिबन्ध" (पा० ३।३।५१) इति पक्षे घञ्। 'अवग्राहः'। पक्षे "ग्रहवृद्" (पा० ३।३।५८) इत्यप्। 'अवग्रहः' ॥ **द्वे ग्रहादिदोषेण वृष्टिविघातस्य** ॥७८॥

धारासम्पातः आसारः

धारेति। धाराणां सम्भूय पतनम् 'आसारः'। ऋसृ गतौ। घञ् (पा० ३।३।१८) ॥ **द्वे महावृष्टेः** ॥

शीकरः

शीकर इति। शीकते सिञ्चतीति 'शीकरः'। तालव्यादिः। "शश्वत्(ग)-शीकरपांशव" इति तालव्यप्रकरणे ऊष्मविवेकात्। शीकृ सेचने। "ऋच्छेररन्नि"[340] (उ० ३।१३१) ति बाहुलकादरन् ॥ **वाताहतजलकणस्यैकम्** ॥

वर्षोपलः करका

वर्षेत्यादि। कृणोति। कृञ् हिंसायाम्। कार्यते वा। "कृञादिभ्यः संज्ञायां वुन् (उ० ५।३५)। क्षिपकादिपाठादित्वाभावः (वा० ७।३।४५)। "कमण्डलौ च करक"(नानार्थ०) इति चकाराद् वर्षोपलेऽपि पुंस्त्वं दर्शयिष्यति। अतएव "वर्षोपले च करका करकोऽपि च दृश्यत इति व्याडिः ॥[341] **द्वे मेघभवशिलायाः** ॥

दुर्दिनम्

मेघेति। मेघच्छन्ने मेघान्धकारितेऽह्नि इति अहर्निशोपलक्षणं त्र्यहादिवत्। रात्रावपि 'दुर्दिनम्'। अतएव मेघान्धकारमात्रे रत्नकोषः—"दुर्दिनं जलदध्वान्त"मिति। "यत्रौषधिप्रकाशेन नक्तं दर्शितसञ्चराः। अनभिज्ञास्तमिस्राणां दुर्दिनेऽप्यभिसारिका"* इति कुमारे (६।४३) रात्रावपि

(ख) "नपुंसके" etc. is actually a भाष्योक्ति and not a वार्त्तिक though काशिका uses it as a वार्त्तिक। (ग) शम्बशीकर—भानुजि।
340 उणादिसूत्रs read the rule "ऋच्छेररः" and this makes the suffix अर but दशपादी reads अरन्। 341 रुद्रः—B_2. * दुर्दिनेष्वभिसारिकाः–मल्लि°।

दुर्दिनप्रयोगः। "यन्नेत्रयोर्दुर्दिनमत्क" इत्यत्र असम्भवत्स्वार्थाविनाभूतं पयःप्रवाहं लक्षयन्नश्रुप्रवाहं लक्षयतीति शृङ्गारप्रकाशः। एवं लक्षितलक्षणया––"अकरोत् पृथिवीरुहानपि स्रुतशाखारसवाष्पदुर्दिनान्-(Raghu, VIII. 70) इति रघुः।[342] "वार्दलं दुर्दिने मेघे" इति मेदिनिः। दुर्निन्दितं दिनं 'दुर्दिनम्'॥ **इति मेघान्धकारितदिनरात्र्योरेकम्** ॥७९॥

अन्तर्धा अन्तर्धेति। अन्तर्धानम् 'अन्तर्धा'। अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वात् (वा० १।४।६५) "आतश्चोपसर्ग" (पा० ३।३।१०६) इत्यङ। टाप् (पा० ४।१।४)॥

व्यवधा एवं 'व्यवधा'पि॥

अन्तर्धिः 'अन्तर्धि'रिति किः (पा० ३।३।९२)॥

अपवारणम् वृञ् आच्छादने। चुरादिण्यन्ताल्ल्युटि (पा० ३।३।११५) 'अपवारणम्'। "अन्तरपरिग्रह" (पा० १।४।६५) इति गतित्वे "कुगती"त्यादिना (पा० २।२।१८) समासः।

अपिधानम् अपवारणादिपञ्चके भावे ल्युट् (पा० ३।३।११५)॥

तिरोधानम् **तिरोधानमिति**। "तिरोऽन्तर्धा" विति (पा० १।४।७१) गतित्वे "कुगती" (पा० २।२।१८) त्यादिना समासः॥

पिधानम् "वष्टिभागुरि" रित्यादिना अकारलोपे 'पिधानम्'॥

छदनम् 'छदन' मिति "छादेर्घे" (पा० ६।४।९६) इति योगविभागात् ह्रस्वत्वम्॥ **अष्टावन्तर्धानस्य** ॥८०॥

हिमांशुः **हिमांशुरिति**। हिमाः शीतला अंशवोऽस्य 'हिमांशुः'॥

चन्द्रमाः चन्द्रं कर्पूरं सादृश्येन माति तुलयति 'चन्द्रमाः'। चन्द्रमाह्लादनं माति वा। माते "श्चन्द्रे मो डिच्च" (उ० ४।२२७) इत्यसुन्। 'चन्द्रमाः'। बाहुलकात् केवलादप्यसुनि "माः"। अतएव "माःशब्दः केवलोऽपीह सम्मतो बहुदृश्वनाम्" इति उत्पलिनी।* "कालं मिमीते परिमाति वा माः। माश्चासौ चन्द्रश्चेति चन्द्रमा" इति तु स्वामी॥

(क) "यत् तासां दलपाकपाण्डु वदनं यन्नेत्रयोर्दुर्दिनम्"–RNC.
342 दूषितान्—reads मल्लि°।
(*) "माःशब्दोऽपीह चन्द्रे सम्मतो बहुदृश्वनाम्—A. B.; मास्शब्दः—भानुजि°।

चन्द्रः (चन्दः) चन्दत्याह्लादयति। चदि आह्लादने। "स्फायितञ्ची" (उ० २।१३) इत्यादिना रक्। 'चन्द्रः।' अचि (पा० ३।१।१३४) रेफशून्योऽपि। "हिमांशुश्चन्द्रमाश्चन्द्रः शशी चन्दो हिमद्युति" रिति शब्दार्णवात् (क)॥

इन्दुः उनत्ति।[343] उन्दी क्लेदने। "उन्देरिच्चादे" (उ० १।१३) रिति उः, आदेश्च इकारः। 'इन्दुः'॥

कुमुदबान्धवः कुमुदानां बान्धवः 'कुमुदबान्धवः'॥

विधुः 'विधुः' प्रागुक्तः (स्वर्ग° १७)। यद्वा––वि (विशेषेण) धयन्त्येनं सुरा इति विधुः।* पृभिदिव्यधी' (उ० १।२४) त्यादिना बहुलवचनात् कुः॥

सुधांशुः "सुधा अमृतयुक्ता अंशवोऽस्येति 'सुधांशु' रित्युपचाराद्" इति सर्वानन्दः॥

शुभ्रांशुः एवं 'शुभ्रांशुः॥'

ओषधीशः ओषधीनामीश 'ओषधीशः'। आप्यायकत्वात्॥

निशापतिः निशायाः पतिः 'निशापतिः' ॥८१॥

अब्जः समुद्रोत्थत्वादद्भ्यो जातः 'अब्जः।' "पञ्चम्यामजाता" (पा० ३।२।९८) विति डः।

जैवातृकः जीवत्याप्यायनादिति 'जैवातृकः'। "जीवेरातु' (उ० १।८०) रित्यनुवृत्तौ "आतृकन् वृद्धिश्चे" (उ० १।८१) ति आतृकन् वृद्धिश्च॥

सोमः सूयते जायते "नवो नवो भवति जायमान" इति श्रुतेः, सूयते यज्ञाङ्गस्नानं[344] वा करोति, सूतेऽमृतं वा 'सोम' इति। षुञ् अभिषवे, षू प्रेरणे वा। "अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्" (उ० १।१३९)। "नामन्सामन्सीमन्सोमन्" (उ० ४।१५०) इत्युणादौ 'सोमा' नान्तोऽपि ॥[345] **(सोमन्)**

* "विध्यति विरहिहृदयम् इति—रायः"—RNC.
(क) रघुनाथ ascribes it to व्याडि।
343 उन्दति—B_1. भानुजि। 344 यज्ञाङ्गस्थानं—A., भानुजि। यज्ञाङ्गं स्नानं—B_1.
345 तत्त्वबोधिनी however reads the rule as नामन्-सीमन्-व्योमन्-रोमन्-लोमन्-पाप्मन्-ध्यामन् while बालमनोरमा reads धामन् in place of ध्यामन्। B_1 has सामन्-सोमन्। B_2—सीमन्-सोमन्। दशपादी (६।७९) reads—नामन्-सामन्-सोमन्।

ग्लौः ग्लायति क्षीयते 'ग्लौः'। ग्लै हर्षक्षये। "ग्लानुदिभ्यां डौः"(उ० २।६४) ।।

मृगाङ्कः मृगाकारा भूच्छाया अङ्के क्रोडेऽस्येति 'मृगाङ्कः।' मृगोऽङ्कश्चिह्नमस्येति वा ।।

कलानिधिः कला निधीयते अत्रेति 'कलानिधिः।' "कर्मण्यधिकरणे चे"ति (पा० ३।३।९३) किः ।।

द्विजराजः द्विजानां ब्राह्मणानां राजा 'द्विजराजः।' तथाच—
"नक्षत्रग्रहविप्राणां वीरुधां चाप्यशेषतः।
सोमं राज्ये दधौ(क) ब्रह्मा यज्ञानां तपसामपी"ति आगमः(ख) ।।

शशधरः भूच्छायायाः शशाकाराया धरः 'शशधरः।' अच् (पा० ३।१।१३४) ।।

नक्षत्रेशः नक्षत्राणामीशो 'नक्षत्रेशः' ।।

क्षपाकरः क्षपां रात्रिं करोति द्योतयति। धातूनामनेकार्थत्वात् 'क्षपाकरः'। "कृञो हेत्वि" (पा० ३।२।२०) त्यादिना टः(ग)।। **विंशतिश्चन्द्रस्य** ।।८२।।

कला **कलेति**। चन्द्रस्य षोडशो भागः 'कला'। कल संख्याने। अच् (पा० ३।१।१३४)। अत्र च "षोडशो भाग" इति पूरणप्रत्ययान्तनिर्देशात् एकादिभागस्य कलेति नामापि सिध्यति। दृश्यते च तत्रापि कलापदनिर्देश[346] इति सादृश्यलक्षणाश्रीयते। तद्यथा––स्ववैंद्यौ द्वावप्येकाकारत्वात् नासत्यौ दस्रौ च उच्येते तथात्राप्येकाकारत्वात् एकादिभागोऽपि कला इत्युच्यत––इति मन्तव्यम् ।। **चन्द्रषोडशभागस्यैकम्** ।।

विम्बः **विम्ब** इति। वेति शोभत इति। वी गतिप्रजनादौ(घ) "उल्वादयश्चे" (उ० ४।९५) ति बन्-नुमागम-ह्रस्वत्वानि। 'विम्बः।' "विम्बति भाति" इति स्वामी ।।

(क) न्यधाद्—रघुनाथः। (ख) कौर्मे—रघुनाथः। (ग) टच्––A.
346 पद omitted in B_1. शब्द—रघुनाथः।
(घ) वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु––पा० धा०।

'मण्डल' मुक्तम् (स्व० ७३)। स्त्रियां गौरादित्वान्ङीषि (पा० ४।१।४१) "मण्डली" ।। **द्वे रविचन्द्रमण्डलस्य** ।। मण्डलम् (मण्डली)

भित्तमिति। "भित्त° शकल" (पा० ८।२।५९) मिति निपातनान्निष्ठानत्वाभावः। 'भित्तम्' ।। भित्तम्

शक्यते हन्तुम्। शक्लृ शक्तौ। "शकिशम्योर्नित्" (उ० १।१११)ति कलच्। 'शकलम्।' "शूरः समर्थे शकलं च खण्डे" इति तालव्यादौ शभेदात् तालव्यादिः ।। शकलम्

खड खडि भेदे। भावे घञ् (पा० ३।३।१८)। 'खण्डम्'। खनु अवदारणे। अतो "ञमन्ताड्ड"(उ० १।११३) इति डे 'खण्ड' मिति वा। 'शकलखण्डाभ्यां' "वा पुंसी" त्यनेन संबन्धः। रूपभेदात् क्लीबत्वम् ।। खण्डम्

'अर्ध'-शब्दः पुंलिङ्ग एव खण्डे वर्तते। पुंस्त्वं चार्धशब्दस्य बाहुल्येन। शब्दान्तरसामानाधिकरण्ये तु तल्लिङ्गतापि। यथा अर्धा शाटी, अर्धं वस्त्रम्। एतच्च "अर्धं नपुंसकम्" (पा० २।२।२) इत्यत्र रक्षितेनोक्तम्। जसि अर्धा अर्धे वा। "प्रथमचरमे"ति (पा० १।१।३३) विकल्पित-सर्वनामत्वात्[347]।। **चत्वारि खण्डमात्रस्य** ।। अर्धः

अर्धमिति। समभागे 'अर्धम्।' "अर्धशब्दो नपुंसकमेव समप्रविभागे वर्तते नान्यलिङ्ग" इति भागवृत्त्यादिः। ऋध्नोति समुदायोऽनेन इति 'अर्धम्।' ऋधु वृद्धौ। करणे "हलश्चे" (पा० ३।३।१२१)ति घञ् ।। **तुल्यस्य खण्डद्वयस्य मध्ये एकखण्डस्यैकम्** ।।८३।। अर्धम्

चन्द्रिकेति। चन्द्रोऽस्यामस्तीति "अत इनिठना" (पा० ५।२।११५) विति ठन्। 'चन्द्रिका'। चन्द्रं कायति प्रतिपादयति वा चन्द्रिका।* चन्द्रमाचष्टे। णिचि (वा० ३।१।२६) ण्वुल् (पा० ३।१।१३३) वा। 'चन्द्रिमा' पि। "चन्द्रिका चन्द्रिमा चार्वी"ति[348] शब्दार्णवात् ।। चन्द्रिका (चन्द्रिमा)

347 प्रथमचरम etc. omitted in A.
(*) "चन्द्रं कायति वा—इति मुकुटः"—भानुजि°।
348 चन्द्रेति—B_2.

कौमुदी

प्रियत्वेन कुमुदस्येयमिति 'कौमुदी'। "तस्येदम्" (पा० ४।३।१२०) इत्यण्॥

ज्योत्स्ना

ज्योतिरस्यामस्तीति "ज्योत्स्ना"। "ज्योत्स्नातमिस्रे"-(पा० ५।२।११४) त्यादिना निपातिता। **त्रयं ज्योत्स्नायाः**॥

प्रसादः

प्रसादस्त्विति। षद्लृ विसरणे। घञ् (पा० ३।३।१८) 'प्रसादः'।

प्रसन्नता

सदेरेव क्तान्तात् (पा० ३।४।७२) तलि (पा० ५।१।११९)'प्रसन्नता'। "यस्य कस्यचित् प्रसन्नतादिषु यद्यपि वर्तते, तथापि चन्द्रे निर्ज्ञातत्वादत्र निबद्धा" इति तु कौमुदी॥ **द्वयं नैर्मल्यस्य**॥

कलङ्कः

कलङ्केति। कमात्मानं रङ्कयति हीनं करोति। कर्मण्यण् (पा० ३।२।१)। 'कलङ्कः'। "कल्यते लक्ष्यते अनेनेति कलङ्क" इति तु स्वामी॥

अङ्कः

अङ्कयते लक्ष्यते अनेनेति 'अङ्कः।' अकि लक्षणे। "हलश्चे"ति (पा० ३।३।१२१) घञ्॥

लाञ्छनम्

लच्छ लाच्छि लक्षणे। ल्युट् (पा० ३।३।११५)। 'लाञ्छनम्'॥

चिह्नम्

चाहयति 'चिह्नम्। चह कल्कने(क)।

लक्ष्म

लक्ष दर्शनाङ्कयोः। "अन्येभ्योऽपि दृश्यत" (पा० ३।२।७५) इति मनिन्। 'लक्ष्म।' नान्तम्॥

लक्षणम्

"लक्षेरट् चे" ति (उ० ३।७)नः। 'लक्षणम्'। निर्मकारमिति—सुभूतिः। रभसस्तु मकारमध्यं पठति। "ज्योतिष्मत्यां सारस्यां स्त्री क्लीबं(ख) तु नामचिह्नयोः। स्याद् यक्षे लक्ष्मणः पुंसि सौमित्रौ(ग)श्रीमति त्रिषु"॥ इति। "लक्ष्म्या अच्चे" (गण°)ति पठ्यते। पामादित्वान्नः(पा० ५।२।१००)।

(लक्ष्मणम्)

ईकारस्यात्वम्। 'लक्ष्मणम्'॥ **षट् चिह्नस्य**॥८४॥

(क) चह परिकल्कने—पा०धा०। "वाहुलकान्नक्, उपधाया इत्वं च"—भानुजि°

(ख) क्लीबे—भानुजि।

(ग) सौमित्रे—रघुनाथः। The verse is from रभस।

सुषमा

सुषमेति। शोभनं समं सर्वमनया इति "सुविनिर्दुर्भ्यः सुपिसूतिसमा" (पा० ८।३।८८) इति षत्वम्। 'सुषमा'। परमा श्रेष्ठा॥ **एकमुत्कृष्टशोभायाः**॥

शोभा

शोभेति। शोभन्ते अनया 'शोभा। "शुभशुम्भशोभार्था" विति निर्देशात् "गुरोश्च हल" (पा० ३।३।१०३) इत्यकार इत्यन्ये। तत्र किं 'शोभ'उत 'शोभा' इति सन्देहाच्छोभेति दुर्ज्ञानमिति "गुरोश्च हल" (पा० ३।३।१०३) इति चकारादप्रत्यय इति तु वयम्। 'शोभा'॥

कान्तिः

काम्यत इति 'कान्तिः।' स्त्रियां क्तिन् (पा० ३।३।९४)। "अनुनासिकस्ये"(पा० ६।४।१५)त्यादिना दीर्घः।

द्युतिः (द्युती)

द्योतते अनया इति 'द्युतिः।' द्युत दीप्तौ। इगुपधात् किः *(उ० ४।११९)। ङीषि (वा० ४।१।४५) 'द्युती' चेति—कौमुदी॥

छविः

छिनत्त्यसारत्वमिति[349] 'छविः।' छो छेदने। "कृविघृष्विच्छविस्थविकिकीदिवि" (उ० ४।५६) इति क्विन् ह्रस्वत्वञ्च निपातितम्। साहचर्यात् 'छवि'श्च स्त्रियाम्॥ **चत्वारि शोभामात्रस्य**॥

अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम्॥८५॥

प्रालेयं महिका चाथ हिमानी हिमसंहतिः।

अवश्यायः

अवश्याय इति। अवश्यायते श्यैत्यमापद्यते, संहतो वा भवतीति। 'अवश्यायः'। श्यैङ गतौ। "श्याद्व्यधे" (पा० ३।१।१४१) त्यादिना णः॥

नीहारः

निह्रियते 'नीहारः'। "अध्यायन्याये" (पा० ३।३।१२२) त्यत्र चकारात् घञ्। "उपसर्गस्ये ति (पा० ६।३।१२२) वा दीर्घः॥

तोषयतीति तुषेरन्तर्भावितण्यर्थात् "कमेः किदुच्चोपधाया" (उ० ३।१३८) इत्यनुवृत्तौ "तुषारादयश्च" (उ० ३।१३९) इत्यारन् किच्च। 'तुषारः'॥ तुषारः

* It should be "इगुपधात् कित्" इति इन्। cf. "इगुपधात् किरिति प्रमादपाठः। स्वरे विशेषादिति भाष्यम्"—उज्ज्वल°।

349 सत्त्वत्वम्—B_1.

तुहिनम् तोहत्यर्दयति 'तुहिनम्।' तुहिर्दुहिर् अर्दने। "वेपि-
तुह्योर्ह्रस्वश्च" (उ० २।५२) इति इनन्।
हिनोतिर्वर्धते। हिनोतेर्मन्। हिमं हन्तीति। "हन्ते-
हिमम् र्हिश्चे" (उ० १।१४६)ति मक्।* धातोश्च ह्यादेशे वा।
'हिमम्' ।।८५।।
प्रलीयन्ते पदार्था अत्रेति प्रलयो हिमालयः। तस्मादा-
प्रालेयम् गतम्। "तत आगतम्" (पा० ४।३।७४) इत्यण्। 'प्रालेयम्'।
"केकये" (पा० ७।३।२) त्यादिना यादेरियः।।
मह्यते। मह पूजायाम्। "क्वुन् शिल्पिसंज्ञयो" रिति
महिका (उ० २।३२) क्वुन्। टावादिः। 'महिका'। "मिह सेचने।
(मिहिका) मिहिका" इति तु स्वामी।। **सप्त हिमस्य**।।
हिमानी **अथेति**। हिमानां संहति 'हिमानी'। "इन्द्रवरुण"
*हिमसंहतिः (पा० ४।१।४९) इत्यादिना "हिमारण्ययोर्महत्त्वे" (वा०)
ङीषानुकौ। **द्वे हिमसमूहस्य**।।

शीतं गुणे तद्वदर्थाः सुषीमः[350] शिशिरो जड़ः ।।८६।।
तुषारः शीतलः शीतो हिमः सप्तान्यलिङ्गकाः।

शीतम् **शीत**मित्यादि। गुणे स्पर्शविशेषे 'शीत' मिति क्लीबं रूप-
भेदात्। तथाच देवदत्तस्य शीतं वर्तत इति प्रयोगः। तदुक्तम्—
"उपैत्यन्यद् जहात्यन्यद् दृष्टो द्रव्यान्तरेष्वपि।
वाचकः सर्वलिङ्गानां द्रव्यादन्यो गुणो मतः।।"[351] इति।
'शीत' मिति। श्यैङ गतौ। भावे क्तः (पा०
३।३।११४)। "द्रवमूर्तिस्पर्शयोः श्य" (पा० ६।१।२४)
इति संप्रसारणम्। "संप्रसारणाच्चे"ति (पा० ६।१।१०८)
परपूर्वत्वम्(क)। "हल" (पा० ६।४।२) इति दीर्घः। "श्योऽ-
स्पर्शे" (पा० ८।२।४७) इति निषेधान्न नत्वम्।।
तद्वेति। तद्वान् शीतगुणवान् अर्थो येषां ते 'तद्वदर्थाः'
सुषीमादयः सप्त 'अन्यलिङ्गका' वाच्यलिङ्गा इत्यर्थः।
यथा—सुषीमो वायुः, सुषीमं जलम्, सुषीमा भूरिति।

(*) "हन्तेर्हि च"—भट्टोजि; "हनेर्हि च"—उज्ज्वलदत्तः, दशापादी।
350 सुसीमः—B_1. (क) पूर्वरूपत्वम्? 351 गुणः स्मृतः—B_1., सर्वा°, RNC.

'सुषीम' इति। "सुषामादिषु च" (पा० ८।३।९८)
इति षत्वम्। स्वामी तु सुष्ठु श्यायते 'सुशीम' इति सुषीमः
व्युत्पत्त्या तालव्यमध्यमाह। तदयुक्तम्। "सुषीमश्च-
सुषेणश्च सुषन्धिः सर्षपोऽपि च" इति दन्त्यमूर्धन्यः ऊष्म-
विवेकात्।।
शिशिर इति। "अजिरशिशिरशिथिलस्थिरस्फिर- शिशिरः
स्थविरखदिरा" (उ० १।५४) इति शश प्लुतगतावित्यतः
किरच्, उपधाया इत्वञ्च निपात्यते। "शश्वच्छशाङ्क-
शिशिराः शिशुशूकशिम्बि[352]स्तालव्यशद्वययुताः कथिताः
कियन्त" इति शभेदः। "शिनोति* अत्यर्थं श्यायते वा
अनेनेति शिशिर" इति तु स्वामी।।
जलति घनीभवति। जल घान्ये[353]। अच् (पा०
३।१।१३४)। तद्योगाज् 'जडः।' डलयोरेकत्व- जड़ः
स्मरणम् ।।८६।। *तुषारः
शीतं गुणोऽस्यास्तीति सिध्मादित्वाल्लच् (पा०
५।२।९७) शीतं लातीति वा 'शीतलः'।। शीतलः
'शीत' इति "गत्यर्थे" (पा० ३।४।७२) त्यादिना शीतः
कर्तरि क्तः। अर्श आद्यज् (पा० ५।२।१२७) वा।। *हिमः
सप्त **शीतलद्रव्यस्य**।।
चन्द्रप्रसङ्गादागतमुक्त्वा प्रकृतमाह—

ध्रुव औत्तानपादिः स्यादगस्त्यः कुम्भसम्भवः ।।८७।।
मैत्रावरुणिरस्यैव लोपामुद्रा सधर्मिणी।

ध्रुव इत्यादि। स्थिरत्वाद 'ध्रुवः'। ध्रु गतिस्थैर्ययोः। ध्रुवः
अच् (पा० ३।१।१३४)। कुटादित्वात् (पा० १।२।१)
ङित्वम्। इगुपधत्वात् (पा० ३।१।१३५) को वा।
ध्रु स्थैर्ये। "स्रुवः क" (उ० २।६१) इति बाहुलकात् अतोऽपि
के ध्रुव इति तु कौमुदी।।

352 शिम्बी—B_1.; शिशिराण्यपि–भानुजि। He omits शिशु। * शिरोऽस्य रघुनाथः।
353 Tss edition of सर्वानन्द reads धान्ये while भानुजि reads घातने। Original reading appears to be घान्य। जल घातने–पा°धा°। "जलजघान्ये"—रघुनाथः।

औत्तानपादिः उत्तानपादस्यापत्यम् 'औत्तानपादिः'। ऋषित्वाद्- "ऋष्यन्धकवृष्णी" (पा० ४।१।११४) त्यणि प्राप्ते वाह्वादि-त्वादिञ् (पा० ४।१।९६)।। **द्वे ध्रुवस्य ।।**

अगस्त्यः **अगस्त्य इति ।** अगं विन्ध्यं त्यक्तवान् इति 'अगस्त्यः।' "अन्येभ्योऽपीति (पा० ३।२।१०१) डः। पारस्करादेरा-कृतिगणत्वात् सुट् (पा० ६।१।१५७)। विन्ध्याख्यमगं स्त्यायति संहतं करोतीति **वा** अगस्त्य इति तु स्वामी। 'यावदहं नायामि तावत् त्वया न वर्धितव्यम्' इति अगं विन्ध्याख्यं शब्दितवान् स्तम्भितवान्। गोवर्धनस्तु "अगमस्य-तीत्यगस्तिः। "वसेस्तिः" (उ० ४।१७९) इति बाहुल्याद-स्यतेरपि तिः। शकन्ध्वादि" (वा० ६।१।९४) रित्याह। तथाच शब्दार्णवः—"अथागस्त्यः कुम्भयोनिरगस्तिः कलसीसुत" (क) इति। "अगस्तिनाध्यासितविन्ध्यशृङ्गम्" इति भट्टिः (ख)।।

कुम्भसम्भवः कुम्भः सम्भव उत्पत्तिस्थानमस्य 'कुम्भसम्भवः'।।८७।।

मैत्रावरुणिः मित्रावरुणौ देवर्षी। 'देवताद्वन्द्वे चे" (पा० ६।३।२५) त्यानङ्। ऋषिसमुदायस्यानृषित्वात् "तस्यापत्यम्" (पा० ४।१।९२) इत्य"त इञ्" (पा० ४।१।९५) (ग)। यद्यपि मित्रस्य उर्वशीदर्शनाद् रेतश्च्युतं तत्तेन ह्रिया कुम्भे निहितं तत्रायं जातोऽत एव 'कुम्भसम्भव' इति प्रसिद्धस्तथापि सहचाराभेदाध्यवसायादुभयतेजोजाताच्च उभयापत्यव्यपदेशः। **(वारुणिः)** 'मैत्रावरुणिः।' अतएवाभेदविवक्षायां "वारुणि"रपि। तथाच भारते—"अद्यापि दक्षिणाशाया वारुणिर्न निवर्तते। इति। तथाच व्याडिः—"मित्रावरुणयोः सूनुरौर्वशेयश्च वारुणि" **(मैत्रावरुणः)** रिति। अणपि दृश्यते। "और्वशेयागस्त्यमैत्रावरुणास्त्वाग्नि-मारुता" इति नामनिधाने।। **त्रीण्यगस्त्यस्य ।।**

लोपामुद्रा **अस्येति ।** अस्यैवागस्त्यस्य। लोपयति योषितां रुपाभि-मानमिति अचि (पा० ३।१।१३४) टापि (पा० ४।१।४)

(क) कलशी—भानुजि। रघुनाथ ascribes it to व्याडि।
(ख) इति प्रयोगात्—रघुनाथः।
(ग) अनृषित्वादपत्ये "अत इञ्"—इति मकुटः—भानुजि।

लोपा (क)। मुद्रयति स्रष्टुः सृष्टिमिति मुद्रा। ततः कर्मधारयः (पा० २।१।५७)। पतिशुश्रुषालोपेषु अमुद्रा न मुदं रातीति लोपामुद्रा पृषोदरादित्वादिति (पा० ६।३।१०९) तु स्वामी।।

समानो धर्मोऽस्यामिति 'सधर्मिणी' पत्नी। अन्ययोग-व्यवच्छेदकोऽत्र एवकारः।। **एकमगस्त्यपत्न्याः ।।**

नक्षत्रमृक्षं भं तारा तारकाप्युडु वा स्त्रियाम् ।।८८।।
दाक्षायण्योऽश्विनीत्यादि तारा अश्वयुगश्विनी ।
राधाविशाखे[354] पुष्ये तु सिध्यतिष्यौ श्रविष्ठया ।।८९।।
समा धनिष्ठा स्युः प्रोष्ठपदा भद्रपदाः[355] स्त्रियः ।
मृगशीर्षं (ख) मृगशिरस्तस्मिन्नेवाग्रहायणी ।।९०।।
इल्वला[356] स्तच्छिरोदेशे तारका निवसन्ति याः ।

नक्षत्रमितिः । न क्षीयते 'नक्षत्रम्। क्षि क्षये। न **नक्षत्रम्** क्षदतीति 'नक्षत्रम्।' क्षद गतिहिंसयोः। सर्वधातुभ्यः ष्ट्रन् (उ० ४।१५८)। "नभ्राण्नपादि"ति (पा० ६।३।७५) नञः प्रकृतिभावः। "नक्षधातोः "अमिनक्षिकलिभ्योऽत्रन्" (उ० ३।१०५)[357] इत्यत्र(न्)-प्रत्ययेन 'नक्षत्रम्'" इति अन्यः।

ऋषति गच्छति। ऋषी गतौ। "ऋषिवृषिमृषिभ्यः **ऋक्षम्** किद्"[358] (उ० ३।१२३) इति सः। "षढोः कः सी"ति (पा० ८।२।४१) कत्वम्। षत्वम् (पा० ८।३।५७)। 'ऋक्षम्।'

भातीति 'भम्'। पूर्ववड् डः (पा० ३।२।१०१)।। **भम्**

354 विशाखा—B_1. 355 भाद्रपदा—B_1. 356 इन्वका—क्षीर°, भानु
(क) "रूपाभिमानम्। पचाद्यच्। टाप्। लोपा।"—मुकुट cited by भानुजि।
(ख) मृगशीर्षे—रघुनाथः।
357 तत्वबोधिनी reads the rule as अमिनक्षियजिवधिपतिभ्योऽत्रन्। उज्ज्वलदत्त and दशपादी also have the same reading.
358 मृदिभ्यः कित्—A, B_2. तत्त्वबोधिनी reads ऋषिवृषिभ्यां कित्। See notes.

तारा — तरन्ति अनया 'तारा।' भिदादिपाठादङ (पा० ३।३।१०४)। गुणः (पा० ७।४।१६)। दीर्घो निपातनात्॥

तारका — **'तारका'** इति कर्तरि ण्वुल् (पा० ३।१।१३३)। "तारका ज्योतिषि' (वा०) इतीत्वाभावः। 'अपि' शब्देन तारकापि वा स्त्रियाम्। अस्त्रीत्वेऽपि रूपभेदनिश्चितक्लीबलिङ्गस्य उडुशब्दस्य साहचर्यात् क्लीबत्वमेव। "कनीनिकायां नक्षत्रे तारकं तारकापि च" इति। अतएव कोषान्तरम्—"नक्षत्रे नेत्रमध्ये च तारकं तारकापि"(क) च इति शाश्वतः।
(तारः) 'तार'श्च। "नक्षत्रे नेत्रमध्ये च तारा स्यात् तार इत्यपि" इति व्याडिः(ख)। "द्वित्रैर्व्योम्नि पुराणमौक्तिकमणिच्छायैः स्थितं तारकैः"(ग) इति च। "अन्तिकं व्रजति तारकराजे" (९।१८) इति भारविश्च॥

उडूति। डीङ विहायसा गतौ। उत्पूर्वाद् बहुलवचनाड्
उडु — डुः (वा० ३।२।१८०)। "अवतेः 'उडुः'। उड गता" विति तु स्वामी। ईडचतेः। "मृगय्वादयश्च" (उ० १।३८) इति ईडेरुः(घ), आदेश्चोत्वम्। ह्रस्वादिः। "प्रसभमुडुगणोऽसौ-दर्शनीयोऽप्यपास्त (११।५७) इति माघप्रयोगात्॥ **षट् तारकायाः ॥८८॥**

दाक्षायण्यः — **दाक्षायण्य** इति। दक्षस्यापत्यं दाक्षिः। "आसुरेरुपसंख्यानम्" (वा०) इत्यत्र केचिद् "आसुरिदाक्ष्यो" रिति (ष्फः)। 'दाक्षायणी"—इति पारायणम्। उपाध्यायसर्वस्वेऽपि तदेव उद्धतम्।[359] कलिङ्गादयस्तु तददर्शनात् "नडादिभ्यः फक्" (पा० ४।१।९९) इत्याकुलितवन्तः। गोत्रत्वाभावात्, नडदावनाकृतिगणे[360]ऽस्यापाठाच्च। सर्वानन्दस्तु—

(क) "नक्षत्रे चाक्षिमध्ये च तारकं तारकापि च"—भानुजि°।
(ख) "नक्षत्रे चाक्षिमध्ये च तारा स्यात् तार इत्यपि"—रघुनाथः।
(ग) "द्वित्रैर्व्योम्नि पुराणसीधुविधुरच्छायैः स्थितं तारकैः" इति शाश्वतः—रघुनाथः।
(घ) ईडेः कुः—should be the correct reading, Because the suffix here is कु and not उ।

359 एतदेवौदाहृतम्—B_1.
360 नडादावाकृतिगणे—B_1.

"दक्षस्य प्रजापतेरपत्यानि दाक्षायण्यः, गोत्रत्वमुपचर्य "गोत्रे कुञ्जादिभ्यश्च्फञ्" (पा० ४।१।९८) इति च्फञि "जातेरस्त्रीविषयादयोपधाद्" (पा० ४।१।६३) इति ङीष्" इत्याह। "दक्षस्यापत्यं 'दाक्षायणी' इत्यन्यः। "अत इञ्" (पा० ४।१।९५) अनन्तरापत्येऽपि द्वैपायनवत्। "यञिञोश्च" (पा० ४।१।१०१) इति फक्—इति तु स्वामी(क)। स्त्रियामासुरिदाक्षिभ्यां ष्फ इत्युपसंख्यायते। "दाक्षायणी श्रीरिव निर्बभासे इति नन्दिस्वामी।[361] "दक्षम् अयते। ल्युः (पा० ३।१।१३४)। प्रज्ञाद्यणि (पा० ५।४।३८) 'दाक्षायणी' इत्यन्यः। ताश्च—

(१) अश्विनी, (२) भरणी, (३) कृत्तिकाः षट्। अतएव नित्यबहुवचनान्ताः। (४) रोहिणी, (५) मृगशिरः[362], (६) आर्द्रा, (७) पुनर्वसू द्वौ, (८) पुष्यः, (९) अश्लेषः,[363] (१०) मघाः स्त्रियां नित्यबहुवचनान्ताः। (११) पूर्वफल्गुन्यौ, (१२) उत्तरफल्गुन्यौ[364] द्वे। पाणिवत् कार्यकारित्वात् (१३) हस्तः। "देवपथादिभ्यश्च" (पा० ५।३।१००) इति कनो लुक्। ज्योतिषे तु स्त्रियामपि दृश्यते। अन्याश्च व्यभिचार (? व्यभिचरित)-लिङ्गवचना दृश्यन्ते। (१४) चित्रा, (१५) स्वाती च[365] स्त्रीपुंसयोः। "अज्यतिभ्याम्" (उ० ४।१३०) इतीण्। स्त्रीत्वे ङीषपि (पा० ४।१।६३)। (१६) विशाखे द्वे, (१७) अनुराधा, (१८) ज्येष्ठा, (१९) मूलः, (२०) पूर्वाषाढा, (२१) उत्तराषाढा, (२२) श्रवणा, (२३) धनिष्ठा, (२४) शतभिषग्। जान्ता। (२५) पूर्वभद्रपदे द्वे, (२६) उत्तरभद्रपदे च द्वे, (२७) रेवतीति—**अश्विन्याद्याः सप्तविंशतिः तारका[266] 'दाक्षायण्य' उच्यन्ते॥**

(क) भानुजि appears to have the following reading of मुकुट in this portion —"इतो मनुष्यजातेः" (पा० ४।१।६५) इत्यत्र "इञः" उपसंख्यानात् ङीष्। "कौरव्यमाण्डूकाभ्यां च" (पा० ४।१।१९) इति चकाराद् आसुरायणीवत् फः (ष्फः ?)।

361 नन्दीति स्वामी—B_1.
362 मृगशिरा—B_2.
363 अश्लेषा—B_2.
364 फल्गुनी—B_1.
365 चित्रा स्वातिः स्त्रीपुंसयोः—A.
366 तारा—B_1.

एताः सुप्रसिद्धपर्यायांस्त्यक्त्वा निबध्नाति––

अश्वयुक्

अश्वयुग् इत्यादि। अश्वं युनक्ति बध्नाति रूपेन 'अश्वयुक्।' जान्ता। "ऋत्विगा"दिना (पा० ३।२।५९) क्विन्॥

अश्विनी

अश्वरूपयोगा'दश्विनी।' इनिः (पा० ५।२।११५), ङीप् (पा० ४।१।४८)। अश्वकर्मण्यश्विन्याश्चादानात्॥ **द्वे अश्विनीनक्षत्रस्य॥**

राधा

राधेति। राध्नोति कार्यमनया 'राधा।' राधषाध संसिद्धौ। "गुरोश्च हल" (पा० ३।३।१०३) इत्यकारः॥

विशाखा

विशाखति व्याप्नोति 'विशाखा।' शाखृ व्याप्तौ। अच् (पा० ३।१।१३४)। तालव्यादिः। विशाखे द्वे। अतएव द्वित्वमुचितं 'विशाखे' इति। तथाच रामायणम्––

"पत्न्योर्मध्यगतस्तत्र सुग्रीवः प्लवगेश्वरः।
विशाखयोर्मध्यगतः सम्पूर्ण इव चन्द्रमाः॥" इति।

अतएव "एकत्वं प्रमादाद्" इति कौमुदी। "नक्षत्राभेद-विवक्षायां* त्वेकवचनम्" इति सुभूतिः। "एकतारापेक्षया एकवचनम्" इति श्रीभोजः। "छान्दसा अपि भाषायां प्रयुज्यन्त" इति "विशाखयोश्च" (पा० १।२।६२) इत्येकत्वादि"ति सर्वानन्दः। "मारुतोऽथ विशाखया"[367] इति वाचस्पतिः॥ **द्वे विशाखायाः॥**

पुष्यः

पुष्य इति। पुष्यन्ति सिध्यन्त्यर्था अस्मिन्निति, पुष्णाति साधयति कार्याणि वा 'पुष्यः।'

सिध्यः

'सिध्यः'। "पुष्यसिध्यौ नक्षत्रे" (पा० १।३।११६) इति क्यपि निपातितः॥

तिष्यः

तुष्यन्त्यस्मिन्निति 'तिष्यः।' तुष तुष्टौ। "अघ्न्यादयश्चे" (उ० ४।१११) ति यक्, उपधेत्वं च। 'तिष्यः।' **त्रीणि पुष्यस्य॥**

श्रविष्ठा

श्रविष्ठेत्यादि। श्रूयते शुभकर्मण्यतिशयेनेति 'श्रविष्ठा।'

---

* "नक्षत्रभेदविवक्षायां—रघुनाथः।

367 विशाखयो—B_1.

शृणोते "ॠदोरप्" (पा० ३।३।५७)। मतुप् (पा० ५।२।९४)। इष्ठन् (पा० ५।३।५५)। "विन्मतोर्लुक्" (पा० ५।३।६५) इति मतुपो लुक्॥८९॥

एवं धन धान्ये। पचाद्यजन्तान्मतुवादिना (पा० ३।१।१३४, ५।२।९४, ५।३।५५, ५।३।६५) 'धनिष्ठा'॥ **द्वे धनिष्ठायाः॥**

धनिष्ठा

प्रोष्ठपदाः भद्रपदाः

स्युरिति। प्रोष्ठो गौः, भद्रो गौः। तत्पदमिव पदमासाम् इति 'प्रोष्ठपदाः।' 'भद्रपदाः।' "अतएवायं शब्दो ह्रस्वादि" रिति वर्णविवेकः। "ग्रहपतिरिव भद्रपदानु-गत" इति श्लेषः।[368] तथाच "पूर्वभद्रपदे द्वे उत्तरभद्रपदे च द्वे" इति "फल्गुनीप्रोष्ठपदानाञ्च" (पा० १।२।६०) इत्यत्रोक्तम्। किं च चान्द्रं सूत्रम्––"जाते प्रोष्ठपदात् पदस्य" (६।१।२८)[369] इति। "तस्मात् दीर्घादिपाठः प्रमाद" इति तु कौमुदी। "भाद्रपदासु भयं सलिलोत्थम्(क)" इति तु ज्योतिषे कुलेखकदोषात्। "पूर्वे प्रोष्ठपदे द्वे। उत्तरे भद्रपदे द्वे। समुदायश्चासां चतुःसंख्य" इति बहुवचनम्। केचित्तु "भद्रपदेन युक्तः काल" इति प्रयोगात् "पुंलिङ्गो भद्रपद" इत्याहुः। यत्तु "कदा पूर्वे प्रोष्ठपदे, कदा पूर्वे भद्रपदे" इति, तत् तारकयोर्द्वित्वादुपपद्यते। "सुप्रातसुश्वसुदिवे" (पा० ५।४।१२०) त्यादौ प्रोष्ठपदाभद्रपदाश्च निपातिताः। प्रोष्ठौ सारौ पदावस्याः 'प्रोष्ठपदा।' अर्थग्रहणाद् 'भद्रपदा।' "सुप्राते" (पा० ५।४।१२०) ति साधुः। "फल्गुनी-प्रोष्ठपदानाञ्चे" (पा० १।२।६०) ति बहुत्वम्। भद्रपदौ भद्रपदश्च भद्रपदाश्चे" ति तु स्वामी।"[370] तत्र भद्रपदशब्देन तारकाविशेषाणां समुदाय उच्यते। तिरोहितावयवभेदपक्ष एकवचनम्। प्रोष्ठपदाशब्दस्तु त्यक्तावयवभेदं समुदायमाचष्टे।

---

368 आश्चर्यमञ्जरी—त्रिकाण्डविवेकः। ह्रस्वादिरेवायम्। "ग्रहपतिरिव भद्रपदानुगतः" इति श्लेषात्—शिवदत्तः।

369 टे;—B_2. परस्य जेः—A.

(क) "भद्रपदानामुभयं सलिलोत्थम्" इति वराहः—रघुनाथः।

370 In the printed texts of क्षीर° this sentence cannot be traced.

एतत्पक्षे बहुवचनम्'' इति मैत्रेयः। **द्वे पूर्वभद्रोत्तरभद्रपदानाम् ॥**

मृगशीर्षम्

मृगेति। आकृत्या मृगस्येव शीर्षमस्य 'मृगशीर्षम्'॥

मृगशिरः (मगशिरा) (मृगः)

मृगशिर इव शिरोऽस्य 'मृगशिरः।' रूपभेदात् क्लीबत्वम्। ''सौम्या मृगशिरः[371] स्यु र्मृगशिरा[372] इल्वलाः शिरस्तारा'' इति स्त्रीकाण्डे वोपालिते तु––स्त्रीत्वम्। सौम्या मृगशिरापि। प्रतीकलक्षणया––मृगश्च। ''मृगशीर्षे हस्तिजातौ मृगः पशुकुरङ्गयो'' रिति व्याडिः।

आग्रहायणी

अग्रे हायनमस्याः 'आग्रहायणी।' मार्गशीर्षादारभ्य वर्षप्रवृत्तेः। प्रज्ञाद्यणि (पा॰ ५।४।३८) ''पूर्वपदा'' दिति (पा॰ ८।४।३) णत्वम्। यद्वा––''आग्रहायण्यश्वत्थाट् ठग्'' (पा॰ ४।२।२२) इति निर्देशात् स्वार्थे अण्। गौरादित्वात् (पा॰ ४।१।४१) ङीष्। अणन्तादेव ङीपि सिद्धे गौरादिषु पाठोऽस्य पुंवद्भावनिषेधार्थः। तेनाग्रहायणीभार्य इति सिध्यति॥ **त्रीणि मृगशिरसः ॥९०॥**

इल्वला (इन्वका)

इल्वला इति। 'इल्वला।' इल प्रक्षेपणे। ''सानसिवर्णसिपर्णसितण्डुलांकुशचषालेल्वलपल्वलधिष्ण्यशल्या'' इति (उ॰ ४।१०७) वलच्प्रत्ययो गुणाभावश्च निपात्यते। ''इन्वन्ति प्रीणयन्ति मरुतो देवताः। ''इन्वका नक्षत्रम्'' इति श्रुते'' रिति तु स्वामी॥ **एकं मृगशिरसः शिरोदेशस्थानां पञ्च स्वल्पतारकाणाम् ॥**

बृहस्पतिः सुराचार्यो गीर्पति[373]र्धिषणो गुरुः ॥९१॥
जीव आङ्गिरसो वाचस्पतिश्चित्रशिखण्डिजः।

बृहस्पतिः (बृहतांपतिः)

बृहस्पतिरिति। बृहतां देवानां गुरुत्वात् पतिः 'बृहस्पतिः।' ''तद्बृहतोः करपत्योश्चौरदेवतयो'' (वा॰) इति तलोपसुटौ। 'बृहतां पति'रित्यप्यलुकि॥

सुराचार्यः

सुराणां देवानामाचार्यः 'सुराचार्यः॥'

371 मृगशिरा—B_1. मृगशिराः—B_2. मृगशिरसः––त्रिकाण्डविवेकः।
372 मृगशीर्षा—B_2.
373 गीष्पतिः, गीःपतिः––B_1

गीर्पतिः (गीष्पतिः) (गीःपतिः) (गी≍पतिः)

गिरां पतिः 'गीर्पतिः।' ''अहरादीनां पत्यादिषूभयथोपसंख्यानम्'' (वा॰ ८।२।७०) इति रेफादेशः। रेफाभावपक्षे विसर्जनीयोपध्मानीयौ। गीःपतिः, गी≍पतिः। ''गीष्पति'' रित्यसाधुरिति केचित्। ''कस्कादित्वात् (पा॰ ८।३।४८) साधु''रिति चान्द्राः[374] क्षीरस्वाम्यपि॥

धिषणः

प्रशस्तधिषणायोगात् 'धिषणः।' अर्श आदिभ्यः (पा॰ ५।२।१२७) अच्। ''धृषेर्धिष् च संज्ञायाम्'' (उ॰ २।८२) इति क्युः––''धिषण'' इति तु कौमुदी॥

गुरुः

गृणात्युपदिशति 'गुरुः।' गृशब्दे। ''कृग्रोरुच्चे'' (उ॰ १।२५) ति कुः। उच्चान्तादेशः। ''उरन् रपरः'' (पा॰ १।१।५१) इति रपरत्वम् **॥९१॥**

जीवः

असुरैर्हतानपि मन्त्रादिना जीवयति इति 'जीवः।' तथाच रामायणे––

''तानार्तान्निष्टसंज्ञांश्च हतासूंश्च* बृहस्पतिः।
दिव्याभिर्मन्त्रयुक्ताभिरोषधीभिरजीवयत्'' ॥इति॥

आङ्गिरसः (अङ्गिरसः)

अगि गतौ ''अङ्गिरसः'' (उ॰ ४।२३५) इत्यसुन्प्रत्यये इरागमे च निपातितः।[375] अपत्ये ''ऋष्यन्धक'' (पा॰ ४।१।११४) इत्यादिना अण्। अङ्गिरसोऽपत्यम् 'आङ्गिरसः।' बहुत्वे (पा॰ २।४।६५) लुक्। अङ्गि-

374 क्षीर° and चान्द्र School of grammar uphold the form गीष्पति as correct. मुकुट avoids the issue in a non-committal fashion. शिवदत्त in his edition of भानुजि (p 39) overlooks इति केचित् and ascribes ''गीष्पतिरित्यसाधुः'' to मुकुट। He, however, rightly observes that गीष्पति has no sanction of the भाष्यकार who accepts the three forms only, i.e., गीर्पतिः, गीःपतिः and गी≍पति। So the application of कस्कादि in this case has no sanction of the भाष्यकार। रघुनाथ tells us that क्षीर°, चान्द्र°, सुभूति and वोपदेव accept four forms—गीर्पतिः, गीष्पतिः, गीःपति and गी≍पतिः।

* आहतासून्—A.

375 इर्भावे च—B_1.; तत्त्वबोधिनी has अङ्गतेरसिरिरुडागमश्च and not असुन्। ''अङ्गिराः''––उज्ज्वलदत्तः, दशपादी।

(अङ्गिराः) रसोऽपि। अभेदोपचारादङ्गिराश्च। यथा––"भृगुश्चाङ्गिराश्च चरतीति[376] भार्गवे आङ्गिरसे साधुत्वम्" इति रन्तिदेवः॥

वाचस्पतिः दिवस्पतिवत् 'वाचस्पतिः॥'

चित्रशिखण्डिजः "ऋषयः सप्त धीमद्भिः स्मृताश्चित्रशिखण्डिन" इति हारावली। अङ्गिरा एव "चित्रशिखण्डी।" ततो जात- 'श्चित्रशिखण्डिजः।' सप्तर्षिजोऽपि "समुदायेऽपि प्रवृत्ताः शब्दाः अवयवेष्वपि वर्तन्त" इति कृत्वा॥ **नव बृहस्पतेः॥**

शुक्रो दैत्यगुरुः काव्य उशना भार्गवः कविः॥६२॥
अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः।
रौहिणेयो बुधः सौम्यः समौ सौरिशनैश्चरौ॥६३॥
तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः।
सप्तर्षयो मरीच्यत्रिमुखाश्चित्रशिखण्डिनः॥६४॥
राशीनामुदयो लग्नं ते तु मेषवृषादयः।

शुक्रः **शुक्र इति।** शोचति सदा दैत्यनाशेनेति शुचेः "ऋज्रेन्द्रे' (उ० २।२८) त्यादिना रन्।[377] 'शुक्रः।' "रुद्रस्य शुक्र-द्वारेण निर्गतत्वात् शुक्र" इति तु स्वामी॥

दैत्यगुरुः दैत्यानां गुरु'र्दैत्यगुरुः'॥

काव्यः कविरेव 'काव्यः।' चातुर्वर्ण्यादित्वात् (वा०) स्वार्थे ष्यञ्। कवेरपत्यं 'काव्यः।' "कुर्वादिभ्यो ण्य" (पा० ४।१।१५१)––इति स्वामी॥

उशना वष्टीति 'उशना'। वश कान्तौ। "वशेः कनसि" (उ० ४।२३८) रिति कनसिः। ग्रह्यादि (पा० ६।१।१६) त्वात् संप्रसारणम्। "ऋदुशन" (पा० ७।१।९४) इत्यादिना अनङ्। उशना। सम्बोधने तु उनशनसस्त्रैरूप्यं––सान्तं तथा नान्तमथाप्यदन्तम् इति विशेषः॥

भार्गवः भृगोरपत्यं 'भार्गवः'। बहुत्वे लुकि (पा० २।४।६५) भृगवः॥

376 भवतीति— B_1.
377 रक्—A.

कौतीति। कु शब्दे। "अच इः" (उ० ४।१३८)। 'कविः'। "कविस्त्वभेदादि'ति स्वामी॥ **षट् शुक्रस्य॥६२॥** कविः

अङ्गेति। अङ्गति अगिर्गत्यर्थः। मन्दारवदारन् (उ० ३।१३४)। अङ्गारः। अङ्गार इव 'अङ्गारकः'। कन् (पा० ५।३।९६)। "अङ्गानीर्यति पीनत्वा"दिति तु स्वामी॥ अङ्गारकः

कुः पृथिवी। ततो जातः 'कुजः'॥ कुजः

'भौम' इति शिवाद्यण् (पा० ४।१।११२)॥ भौमः

लोहितवर्णान्यङ्गान्यस्य 'लोहिताङ्गः'॥ लोहिताङ्गः

मह्याः सुतो 'महीसुतः'॥ **पञ्च मङ्गलस्य॥** महीसुतः

रौहीति। रोहिण्या अपत्यं। 'रौहिणेयः'। "स्त्रीभ्यो ढक्" (पा० ४।१।१२०)॥ रौहिणेयः

बुध्यते 'बुधः'। इगुपधत्वात् कः (पा० ३।१।१३५)॥ बुधः

सोमः पितृत्वाद्देवतास्य "सोमाड् ढ्यण्" (पा० ४।२।३०)। 'सौम्यः'। "गर्गादित्वादपत्ये (पा० ४।१।१०५) यञ्" इति श्रीधरः अमूलः। गर्गादावस्य पाठाभावात्॥ **त्रीणि बुधस्य॥** सौम्यः

सावीति। सूरस्यार्कस्य अपत्यं 'सौरिः'। दन्त्यादिः। "सौरस्तु 'तस्येद' (पा० ४।३।१२०) मणि" इति स्वामी॥ सौरिः (सौरः)

पङ्गुत्वात् शनैश्चरति। अच् (पा० ३।१।१३४)। 'शनैश्चरः'। "प्रतीकलक्षणया 'शनै' रपि। "शनैः शनैश्चरो मन्द" इति वाचस्पतिः।* "शनिसौरिशनैश्चरा" इति रभसात्[378] शनिरपि॥ **द्वे शनेः॥६३॥** शनैश्चरः (शनैः) (शनिः)

तम इति। ताम्यतीति। तमु काङ्क्षायाम्। सर्वधातु-भ्योऽसुन् (उ० ४।१८८)। 'तमः'। सान्तम्। क्लीबे। "तम-स्कारित्वात्तम" इति तु स्वामी॥ वक्ष्यति नानार्थे "राहौ ध्वान्ते गुणे तम" इति। "तमांसि गुणतिमिरसैंहिकेया" (क) इति त्रिकाण्ड- तमस् (तमः)

* "शनैश्चरे मन्द" इति वाचस्पतिः—भानुजिः।
378 छायासुतो नीलवासाः शनिसौरिशनैश्चराः—B_2, रघुनाथः।
(क) "तमांसि गुणतिमिरसैंहिकेयाः स्यु" रिति वररुचिः—रघुनाथः।

शेषः। "स्वर्भानुस्तु तमो[379] राहु"रिति पुंस्काण्डे रत्नकोषामरमालयोः पुंलिङ्गोऽपि ॥

राहुः रहयति सूर्याचन्द्रमसोः शौर्यं, रहयति गृहीत्वा त्यजति चन्द्रार्काविति वा 'राहुः'। रह त्यागे।' "रहश्च" इत्युण्॥(क)

स्वर्भानुः स्वराकाशे भाति 'स्वर्भानुः' इति क्षुभ्नादित्वात् (पा० ८।४।३९) "पूर्वपदादि"ति (पा० ८।४।३) न णत्वम्॥

सैंहिकेयः सिंहिकाया अपत्यं 'सैंहिकेयः'।

विधुन्तुदः 'विधुन्तुद' इति। विधुं तुदतीति। "विध्वरूषोस्तुद" (पा० ३।२।३५) इति खश्, मुम्॥ **पञ्च राहोः॥**

सप्तर्षयः **सप्त इति।** 'मरीच्यत्रिमुखाः' 'सप्तर्षयः' प्रत्येकं 'चित्रशिखण्डिनः' उच्यन्ते। 'सप्तर्षयः'। "दिक्संख्ये संज्ञाया" मिति (पा० २।१।५०) समासः। मुखशब्दः प्राथम्ये।[380]

"मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः।
वसिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखण्डिनः।" इति।

चित्रशिखण्डिनः चित्रो विचित्रः, शिखण्डश्चूडाविशेषोऽस्त्येषामिति 'चित्रशिखण्डिनः'॥ **सप्तर्षीणामेकम् ॥९४॥**

(राशयः) **राशीति।** राति फलम् इति 'राशिः'। राशयो ह्यहोरात्र-
लग्नम् मध्ये द्वादश उदयन्ते। लगति साध्ये निजे 'लग्नम्'। ओ लजी ओ लस्जी व्रीडे इति। क्तः। "श्वीदितो निष्ठायाम्" (पा० ७।२।१४) इतीट्निषेधः।" ओदितश्चे"ति (पा० ८।२।४५) निष्ठानत्वम्। नत्वस्यासिद्धत्वात् "चोः कु" (पा० ८।२।३०) रिति कुत्वम्॥ **एकं राश्युदयस्य॥**

राशय एते क इत्याह––**ते त्विति।** ते राशयः मेषवृषौ आदी येषां ते.तथा॥

सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः ॥९५॥
भास्कराहस्करब्रध्नप्रभाकरविभाकराः।

379 तमा––A. "स्वर्भानुः स्यात् तमो राहु"रिति वोपालितः––रघुनाथः।

(क) This rule is not available in the उणादि। उज्ज्वलदत्त has the form by बाहुलक of उ° १।१ while the दशपादी derives it by "दृसनिजनिचरिचटिरहिभ्यो ञुण्"(१।८८)

380 आद्यर्थे––B_1.

भास्वद्-विवस्वत्-सप्ताश्व-हरिदश्वोष्णरश्मयः ॥९६॥
विकर्तनार्कमार्तण्डमिहिरारुणपूषणः।
द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विरोचनः ॥९७॥
विभावसुर्ग्रहपतिस्त्विषाम्पतिरहर्पतिः।
भानुर्हंसः सहस्रांशुस्तपनः सविता रविः ॥९८॥
माठरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्विकाः।
सूरसूतोऽरुणोऽनूरुः काश्यपिर्गरुडाग्रजः ॥९९॥
परिवेशस्तु परिधिरुपसूर्यकमण्डले।
किरणोऽस्रमयुखांशुगभस्तिघृणिधृष्णयः[381] ॥१००॥
भानुः करो मरीचिः स्त्रीपुंसयो[382] दीधितिः स्त्रियाम्।
स्युः प्रभा-रुग्-रुचिस्-तिड्-भा-भाश्-छवि-द्युति-
दीप्तयः ॥१०१॥

रोचिः शुचिरुभे क्लीबे प्रकाशो द्योत आतपः।
कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति ॥१०२॥
तिग्मं तीक्ष्णं खरं तद्वन् मृगतृष्णा मरीचिका ।१०३क॥

॥०॥ इति दिग्वर्गः॥०॥

सूरेति। सूते प्रेरयत्यन्धकारम्। सू प्रेरणे। "सुसूधाञ्-गृधिभ्यः क्रन्" (उ० २।२४)। 'सूरः'। दन्त्यादिः। 'वारुणी **सूरः**
वारुणीभूतसौरभा सौरभास्पदम्" (KA. ३।१८) इति **(शूरः)**
दण्डियमकात्। "शुषिचिमिञ्जां* दीर्घश्च" (उ० २।२५) इति क्रनि 'शूर'स्तालव्यादिश्चेति कलिङ्गः। "सुरति सूरः शूरश्चे"ति स्वाम्यपि तालव्यादिः। "सुभटे शूरः सूर्ये च दन्त्योऽपी"ति ऊष्मविवेकश्च। "कुमुदाकरा इवासोढशूरभास" इति वासदत्ताश्लेषादपि तालव्यत्वमायाति॥

सरति सुवति प्रेरयति कर्मणे लोकान्(क) इति तत्रोदिते लोकानां कर्मणि प्रवृत्तेरिति वा[383] सूर्यः। "राजसूयसूर्यमृषोद्य" **सूर्यः**
(पा० ३।१।११४) इत्यादिना निपातितः॥

381 वृष्णयः, पृश्नयः, रश्मयः––B_1. 382 पुंसि वा––B_1.

* "शुषिचिमीनां––भट्टोजि, भानुजि; . . मिञ्जां––उज्ज्वलदत्तः; . . . मिभ्यः––दशपादी।

(क) "सुरति प्रेरयति कर्मणि लोकान्"––रघुनाथः। 383 कर्मनिवृत्तेरिति वा––B_1.

अर्यमा इयर्ति 'अर्यमा'। नान्तः। "श्वन्नुक्षन्पूषन्प्लीहन्नि"ति (उ० १।१५८) निपातितः॥

आदित्यः अदितेरपत्यम् 'आदित्यः'॥

द्वादशात्मा द्वादशमूर्तित्वाद् 'द्वादशात्मा'॥

दिवाकरः दिवा दिनं करोतीति 'दिवाकरः'। दिवाकरादि पञ्चसु "दिवाविभा" (पा० ३।२।२१) इत्यादिना टः॥६५॥

भास्करः "भास्करान्ता" (पा० ३।२।२१) इत्यस्मादेव निर्देशात् सत्वे 'भास्करः'॥

अहस्करः ***प्रभाकरः, *विभाकरः** "अतः कृकमी" त्यादिना (पा० ४।३।४६) सत्वे 'अहस्करः'। "भास्कराहस्करौ कस्कादित्वात् (पा० ८।३।४८) सत्वम्" इति तु स्वामी॥

ब्रध्नः तिमिरं बध्नातीति 'ब्रध्नः'। "बन्धेर्ब्रधिबुधी च" (उ० ३।५) इति नक्। ब्रध्नो रेफवान्। रुद्रभेदमूलयोस्तु उकारवान्।

भास्वान् भासः सन्त्यस्य 'भास्वान्'। मतुप् (पा० ५।२।९४)। "मादुपधायाश्च" (पा० ८।२।९) इत्यादिना वत्वम्॥

विवस्वान् विवस्ते विविधप्रकारेणाच्छादयति। वस आच्छादने। विपूर्वात् क्विप् (पा० ३।२।७६)। विवो रश्मिः। तद्योगाद् 'विवस्वान्'। पूर्ववन्मतुवादि (पा० ५।२।९४, १।४।१९, ८।२।९)। "वौ वसिरतिक्रमे। विवासोऽस्यास्ति। पृषोदरादित्वात् (पा० ६।३।१०९) 'विवस्वान्' रात्र्याद्यतिक्रमवान् इत्यर्थ" इति तु कौमुदी॥

सप्ताश्वः सप्त अश्वा अस्य 'सप्ताश्वः'॥

हरिदश्वः हरितो नीला अश्वा अस्य 'हरिदश्वः'॥

उष्णरश्मिः उष्णा रश्मयोऽस्य 'उष्णरश्मिः'॥६६॥

विकर्तनः स्वदुहितुरिच्छायै विश्वकर्मणा कुन्दे धृत्वा विकर्तित इति 'विकर्तनः'। कृती छेदने। विपूर्वः। "कृत्यल्युटो बहुलम्" (पा० ३।३।११३) इति कर्मणि ल्युट्॥

अर्कः देवैरप्यर्च्यत इति 'अर्कः'। घञ् (पा० ३।३।१८)। "चजो" (पा० ७।३।५२) रित्यादिना कुत्वम्। "कृदाधाराचिकलिभ्यः के" (उ० ३।४०) अर्क" इति तु कौमुदी॥

"अण्डे द्विधा कृते चार्तं दृष्ट्वा पिता तमब्रवीत्।*

मार्तण्डः आर्तस्त्वं भव माण्डेति मार्तण्ड[384]स्तेन स स्मृतः॥

(मार्ताण्डः) इति मृतण्डस्य[385] अपत्यं मार्तण्ड"[386] इति स्वामी। वेदे तु "मार्ताण्ड" इत्येव पाठात् "आर्तस्त्वं मा भवाण्डेति तं माता प्रत्युवाच ह" इति व्युत्पत्त्या 'मार्ताण्डो' दीर्घमध्य इति श्रीनारायणसर्वज्ञचरणाः। "अथ मार्तण्डमार्ताण्डा" विति नामनिधाने गतानुगतिकत्वादित्याहुः। शब्दार्णवेऽपि मार्ताण्डोऽपि॥[387]

मिहिरः मेहति सिञ्चति मेघरूपत्वात् 'मिहिरः'। "आदित्याज्जायते वृष्टि" रिति श्रुतेः। तथाच साम्वपुराणम्––

(महिरः) "मिहेति सेचने धातुर्मेहनान्मिहिरः स्मृतः" इति। इषिरवन्मिहिरः (उ० १।५२)। हड्डुचन्द्रस्तत्र––महिं पठित्वा महिर इति पठन् मिहेरपारायणीयतया मिहिरोऽसाधुरित्याह। वयं तु त्रिकाण्डशेषे––"महिरमिहिरगीथाः[388] कालकृत्पद्मपाणि" रिति दर्शनात्, क्षीरस्वाम्यादिभि"र्मिहिर" इत्येव व्युत्पादनाच्च "मिहिरः" अपीत्याचक्ष्महे॥

अरुणः ऋच्छती'त्यरुणः'। "अर्तेश्चे" (उ० ३।६०) त्युनन्। "अरुणो अस्त्यस्य इत्यरुण" इति स्वामी॥

पूषा वर्षेण लोकान् पुष्णाति 'पूषा'। "श्वन्नुक्षन्पूषन्नि" (उ० १।१५८) त्यादिना निपातितः। द्विवचनादौ "इन्हने" (पा० ६।४।१२) ति, "सौ चे" (पा० ६।४।१३) ति नियमाद्दीर्घाभावः॥

द्युमणिः दिवो मणिरिव 'द्युमणिः'। "दिवि मणि"रिति तु स्वामी॥

तरणिः तरन्त्यनेन संसारं 'तरणिः'। तरतेः। "अर्तिसृधृधम्यम्यश्यवितॄभ्योऽनि" (उ० २।१०३) रित्यनिः॥

---

* "अनिष्पन्नेषु गात्रेषु पुत्रं दृष्ट्वा पिताब्रवीत्" (शाम्बपुराणम्)—रघुनाथः। पितरमब्रवीत्—A,B.

384 मर्ताण्डः—B_2.

385 मृतस्यण्डस्य—B_2.

386 मार्ताण्ड—B_2.

387 मार्कण्डोऽपि—A.

388 गाथाः—B_2.

मेद्यति। ञि मिदा स्नेहने। "अमिचिमिदिशसिभ्यः
मित्रः क्त्रनि" (उ० ४।१६३)[389] 'मित्रः'। द्वितकारः॥
चित्रभानुः 'चित्रभानुः'। क्षुभ्नादित्वान्न णत्वम् (पा० ८।४।३९)॥
विरोचनः विशेषेण रोचते। रुच दीप्तौ। "अनुदात्तेतश्चे"ति
***विभावसुः,**
***ग्रहपतिः** (पा० ३।२।१४९) युच्। 'विरोचनः ॥९७॥
त्विषाम्पतिः 'त्विषाम्पति' रिति। "दिवस्पतिवदलुकि" इति कलिङ्गः। "वाक्यमेव प्रचुर-प्रयोगित्वात् नामवत् निबद्ध" मिति श्रीधरः। "पत्युस्त्विषामिह महौषधयः कलत्रस्थानम् इति माघः (४।३४)॥

अहर्पतिः गीर्पतिवद् 'अहर्पतिः'॥

भानुः भातीति 'भानुः'। "दाभाभ्यां नुः" (उ० ३।३२)॥

हंसः हन्ति तमः, गच्छति वा 'हंसः'। "वृतॄवदिहनिकमि-
***सहस्रांशु** कशिभ्यः सः" (उ० ३।६२)।

तपनः तपतीति 'तपनः'। ल्युः (पा० ३।१।१३४)। "बहुल-
(तापनः) मन्यत्रापी"ति (पा० ३।३।१३०) युजिति तु सर्वधरः। तापयते-स्तापनोऽपि। "भानुर्हंसः[390] सहस्रांशुस्तपनस्तापनो रवि" रिति संसारावर्तात्॥

सविता सूते 'सविता'। तृजन्तः (पा० ३।१।१३३)॥

रविः रूयते शब्द्यते स्तूयते 'रविः'। "अच इः" (उ० ४।१३८)॥

सप्तत्रिंशत् सूर्यस्य ॥९८॥

माठरः **माठर इति।** सूर्यः कारुणिकः। अतो देवानां* यथेष्टं वरं ददात्विति धिया अष्टादश इन्द्रादयो विघ्नदेवता नामान्तरेण स्थापिताः। तथाचागमः—तत्र शक्रो वामपार्श्वे दण्डयाख्यो दण्डनायकः। वह्निस्तद्दक्षिणे पार्श्वे पिङ्गलो

389 क्त्रः—B_2., उज्ज्वलदत्तः, भट्टोजिः, भानुजिः, दशपादी। नारायण and श्वेतवनवासी have त्रन् with कित्त्व। दीक्षित remarks—"प्रत्ययस्वरेणैते अन्तोदात्ताः।" But 'न्' being added would cause "नित्त्वात् आद्युदात्तत्वम्"। See f. n. 4 on p. 343 of दशपादी।

390 हेलिहंसः—B_1.

* दैत्यानां—रघुनाथः।

नामतश्च सः॥ यमोऽपि दक्षिणे पार्श्वे ख्यातो माठरसंज्ञया।(क) पूर्वद्वारे गुहहरौ क्रमात् कुल्माषपक्षिणौ॥[391] राहुखरौ गज-श्रोषौ क्रमेण परिकीर्तितौ" इत्यादि॥ अत्र प्राधान्यात्तु त्रय एवोक्ताः। परिपार्श्वं वर्तत इति "परिमुखञ्चेति" (पा० ४।४।२९) चकारात् ठक्। कौमुदीकारोऽप्याह—'पारि-पार्श्विका' इति बहुवचनादित्यादि। "बहुवचनान्ता गणस्य सूचका" इत्यन्येऽपि ग्राह्यास्ते च—"राहुः श्रोषः खरः पक्षी द्वारिको जान्दकारकः।[392] पिङ्गोऽग्रजश्च[393] पूरुषः[394] प्राप्तः पातप्रतापकौ॥ आश्विनेयौ तथा दण्डी कुल्माषः[395] पार्श्वगा रवे"रिति। मठति वसति सूर्यसमीपमिति 'माठरः'। मठ मदनिवासयोः। अम्बरवद् अरन् (उ० ५।३९) (ख), बाहुल-काद् दीर्घः (पा० ६।३।१३७)। "मठरस्यापत्यम्" इति तु स्वामी॥

पिङ्गलवर्णत्वात् 'पिङ्गलः'॥ **पिङ्गलः**

दण्डकारित्वात् 'दण्डः'। "दण्डोऽस्यास्ती"ति तु स्वामी॥ **दण्डः**

सूर्यपार्श्वस्थानां क्रमेणैकैकं त्रयाणाम्॥

सूरेति। सूरस्य सूतः सारथिः। ('सूरसूतः'॥) **सूरसूतः**

अरुवर्णत्वाद् 'अरुणः'॥ **अरुणः**

अविद्यमानावूरू अस्य 'अनूरुः'॥ **अनूरुः**

'काश्यपि' रिति। वाह्वादित्वाद् इञ् (पा० ४।१।९६)॥ **काश्यपिः**

गरुडस्य अग्रजो व्यक्त एव॥ **पञ्च सूर्यसारथेः ॥९९॥** **गरुडाग्रजः**

(क) रघुनाथ's version of मुकुट runs: "तत्र शक्रो वामपार्श्वे ख्यातो माठरसंज्ञया। वह्निस्तु दक्षिणे पार्श्वे पिङ्गलो नामतश्च सः॥ यमोऽपि दक्षिणे पार्श्वे दण्डाख्यो दण्डनायकः।" ...भवेन्माठर...पिङ्गलो वामनश्च...राहुखर—शिवदत्तः।

391 "पूर्वद्वारे हरगुहौ राजश्रौषौ क्रमेण तौ—सर्वानन्दः।

392 जाक्षकारकः—B_1., टान्धकारकः—B_2

393 गजश्च—B_1.

494 पुरुषः—B_1.

395 कुल्माशः—A.

(ख) 'अर'—उ°द°, भट्टो°, दशपादी। भट्टोजि has माठर with अञ् (पा० ४।१।१०४) while भानुजि adds अण् (पा० ४।१।११४) or (पा० ५।४।३८)।

9

परिवेषः (परिवेशः) **परीति**। परितो विष्यते व्याप्यते अनेनेति 'परिवेषः'। घञ् (पा० ३।३।१८), अच् (पा० ३।१।१३४) वा। पुंलिङ्गः। तथाच––"परिवेशः स्यात् परिधौ परिवेषणे" इति मूर्धन्यान्ते रुद्रः। "वेष्टने परिवेशः स्याद् भानोः परिधिमण्डले"* इति तालव्यान्ते रभसः। "एवं च विशति-वेवेष्टचोर्घञि (पा० ३।३।१८)" इति कौमुदी ॥

परिधिः परितो धीयते 'परिधिः'। "कर्तरि कि" (पा० ३।३।९२) रिति सर्वानन्दः ॥

'उपसूर्यक'–'मण्डले' द्वे नाम्नी। तथाच––"मण्डलं परिवेषश्च परिधिश्चोपसूर्यकम्" इति त्रिकाण्डे भागुरिः। "परिधिर्यज्ञियतरोः शाखायामुपसूर्यके" इति नानार्थे वक्ष्यते।

उपसूर्यकम् सूर्यम् उपगतम् 'उपसूर्यकम्'। प्रादिसमासः (पा० २।२।१८)। स्वार्थे कन् (पा० ५।३।६७) ॥

मण्डलम् 'मण्डलम्'। पूर्वमुक्तम् (स्व० ७३)। "संमूर्छिता रवेरिन्दोश्च किरणाः पवने मण्डलीभूतास्तन्वभ्रे व्योम्नि "परिवेशः' इति वराहः। **चत्वारि चन्द्रसूर्ययोरुत्पातादिरश्मिमण्डलस्य ॥**

किरणः **किरेति**। कीर्यतेऽसौ। किरतेः "कृपृवृजिमन्दिनिधाञः क्युः" (उ० २।८१)[396] इति क्युः। 'किरणः' ॥

उस्रः वसन्ति रसा रागा वा अस्मिन् 'उस्रः'। वसेः "स्फायी" (उ० २।१३) त्यादिना रक्। संप्रसारणम् (पा० ६।१।१५)। "न रपर" (पा० ८।३।११०) इत्यादिना प्रतिषेधाद् बाहुलकाद् वा "शासिवसि" (पा० ८।३।६०) इति न षत्वम् ॥

मयुखः मापयन् प्रमाणयन् गगनम् ओखति गच्छति 'मयूखः'। मा माने। उख-णखेति[397] दण्डको(क्तो) गत्यर्थः। अच् (पा० ३।१।१३४)। पृषोदरादिः (पा० ६।३।१०९) ॥[398]

* सविधमण्डले—भानुजिः। स विधुमण्डले—रघुनाथः।

396 . . .धाञ्भ्यः—B_1.

397 नखेति—B_1. उखउखि—पा°धा°।

398 1. 0. 541-42 add here—वस्तुतस्तु, मिमीते 'मयूखः'। "माङ ऊखो मय् च" (उ० ५।२५) इत्यूखप्रत्ययो मयादेशश्च। This is exactly what भानुजि says. This is probably a later interpolation.

अंशुः अस्यते 'अंशुः'। अस गत्यादौ। "मृगय्वादयश्च" (उ० १।३८) इति कुः। शुक् च। सतालव्यः। "अथो बबन्धुश्च[399] भयङ्करे करे महौषधीरुष्णकरांशुभे शुभे"इति जानकीहरणयमकात् ॥

गभस्तिः गगने भसति[400] दीप्यते। भस भंर्त्सनदीप्त्योः। "वसेस्ति" (उ० ४।१७९) रिति बाहुलकात् ति-प्रत्ययः। पृषोदरादित्वात् (पा० ६।३।१०९) गन-भागलोपे 'गभस्तिः' ॥

घृणिः जिघर्ति जलमिति घृ क्षरणदीप्त्योरित्यतो "घृणि-पृष्णि-पार्ष्णि-चूर्णि-भूर्णि" (उ० ४।५२) रिति निपातितः ॥

धृष्णिः धृष्णोति प्रगल्भते। ञि धृषा(प्रागल्भ्ये) धातो "धृषिवृषिभ्यां किद्" (उ० ४।४९)[401] इति निः, किच्च। 'धृष्णिः' ॥१००॥

भानुः 'भानुः' सूर्य एवोक्तः ॥

करः कीर्यतेः 'करः'। "ॠदोरप्" (पा० ३।३।५७) ॥

मरीचिः म्रियते तमोऽस्मिन्, म्रियन्ते क्षुद्रजन्तवोऽनेन वा। मृङ् प्राणत्यागे। "मृकणिभ्यामीचिः" (उ० ४।७०)। 'मरीचिः'॥ 'स्त्रीपुंसयो'रिति सम्बन्धः ॥

दीधितिः दीधीते दीप्यते। दीधीङ दीप्तिदेवनयोः। क्तिन् (पा० ३।३।९४)। 'दीधितिः'। "तितुत्रेषु" (पा० ७।२।९) "अग्रहादीनाम्" (वा०) इतीण्निषेधाभावाद् इट्। "यीवर्णयोर्दीधीवेव्यो" (पा० ७।४।५३) रितीकारलोपः। कौमुदीकारस्त्वाह––"गभस्तिः स्त्रियामपी"ति जातावेक एव। यदपि "दीधितिमेकामुक्त्वा रश्म्यभिधानं [तु] पुंस्येवे"ति वररुचिस्तथापि "मरीचिः स्त्रीपुंसयो" रितीह वामनादय आश्रिता इति "स्त्रिया"मिति काकाक्षिगोलकन्यायेन दीधिरितित्यत्राप्यन्वीयते ॥ **एकादश चन्द्रसूर्यरश्मेः ॥**

399 अथोद्बवन्धुश्च—B_1., ततो बबन्धुश्च—रघुनाथः। अथोडुबन्धुश्च—शिवदत्तः।

400 The root cited gives बभस्ति and not भसति।

401 वृषिवृषिभ्यां—B_1. Available उणादि texts have the rule—"सुवृषिभ्यां कित्" (उ० ४।४९)।

प्रभा — **स्युरिति।** "प्रभादयः स्त्रियां स्यु"रिति संबन्धः। "स्त्रिया" मित्यस्य पूर्वत्रैव सम्बन्धः। "रूपभेदादेव स्त्रीत्वमि" त्यन्ये। प्रकर्षेण भात्यनया 'प्रभा'। "आतश्चोपसर्ग" (पा० ३।३।१०६) इत्यङ्।

रुक्, त्विट्, भा, भास् — 'रुक्'–'त्विड्'–'भा'–'भाः'–संपदादित्वात् (वा० ३।३।९४) क्विबन्ताः। 'भास्' सान्ता। स्त्री। "सौधजालप्रविष्टैर्भाभिर्भानो"रिति वेणीसंहारः (२।८)। केचित्तु "प्रविष्टैरिति भावे क्ते (पा० ३।३।११४) हेतौ (पा० २।३।२८) तृतीयायां वैयधिकरण्येन योज्यम्" इत्याहुः। एवमन्यत्रापि योज्यम्(क)। अन्यस्त्वत एव पुंस्त्वमेवेच्छति॥

रुचिः — 'रुचिः'। इगुपधत्वात् (उ० ४।११९) किन्*॥

छविः, द्युतिः — 'छवि-द्युती' शोभापर्याये साधिते (स्व० ८५)॥

दीप्तिः — 'दीप्ति' रिति "क्तिन्नाबादिभ्यो इति वक्तव्यम्" (वा० ३।३।९४) इति क्तिन्॥**१०१**॥

रोचिः — 'रोचि'रिति "अर्चिरुचिशुचिसृपिच्छादिभ्य इसिः"[402] (उ० २।१०९)॥

ओषधीशरुचिहारकत्वेन शुच्यते ओषधीभिरिति पूर्ववद् (उ० २।१०९) इसिः। 'शोचिः'॥ **एकादश सामान्येन प्रभायाः॥**

शोचिः

प्रकाशः, द्योतः — **प्रकाश** इति। 'प्रकाश'-'द्योतौ' घञन्तौ (पा० ३।३।१८)॥

आतपः — 'आतपो'ऽजन्तः (पा० ३।१।१३४)॥ "त्रीणि रौद्रस्ये" ति कोक्कटः। अत्र कौमुद्यां त्वयं विवेकः––"किरणाद्येकादशकं चन्द्रसूर्यरश्मौ। प्रभाद्येकादशकं सामान्येन दीप्तौ। प्रकाशादित्रिकमुद्भूतरूपानुद्भूतस्पर्शे। मणिकिरण इत्यादौ तु शब्दान्तरसंनिवेशोक्त[403]सामान्यावगतिः। यद्यपि शब्दार्णवे

(क) "इति तु वेणीसंहारे भावे क्ते हेतौ तृतीयायां वैयधिकरण्येन योज्यम्"—B_1.

* The proper reading appears to be "इगुपधात् किदि" तीन्।

402 "अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः"—उज्ज्वलदत्तः,भट्टोजिः; . . . सृपिच्छादिच्छृदिभ्य इसिः—दशपादी।

403 . . . सन्निधिशक्तेः—B_1.

दीधितिरालोकपर्यायस्तथापि "दीधितिमेकामुक्त्वा रश्म्यभिधानं तु पुंस्येवे"ति वररुचिवचनात् मयूखेऽप्यस्ति। सा इहोपात्तेत्यदोषः। "किरणादयः शोचिरन्ता रश्मा" विति तु सर्वानन्दादीनां प्रमादः। इहैव नानार्थे"मयूखस्त्विट्करज्वालास्वि"ति, तन्त्रान्तरे च "अंशुः प्रभाकिरणयो" रित्युभयोपादानानर्थक्यापत्तेः। शब्दार्णवे च "द्वयोर्मरीचिः किरणो भानुरुस्रः करः पद"मित्यनन्तरं "प्रभा तु रुग् रुचिस्-त्विड्-भाभाश्छवि-द्युति-दीप्तय" इति तुशब्देन व्यवच्छेदाच्च। अतएवेह नानार्थे–– "अभिष्वङ्गे स्पृहायां च प्रभायां च रुचिः स्त्रियाम्" इत्यार्षं पाठं हित्वा "गभस्तौ च रुचिः स्त्रियाम्" इति पाठान्तरं कलिङ्गादिजनितकुवासनैः कृतमुपेक्षणीयम्, उपमानाद्वा गमयितव्यं। "रुचिर्दीप्तौ च शोभायामतिष्वङ्गाभिलाषयो"रिति पुराणाः। एवं चाप्यन्यत्रापि अधुनातनकोषे यत्र क्वचिद् यथाव्यवस्थापितव्युत्क्रमः सूक्ष्मेक्षिकाभवद्भ्रमविजृम्भितत्वाद्धेय एव। अनाकरस्यानादेयत्वात्। यदाह साहसाङ्कः––

'तस्मादाकरमादाय व्यवहर्तव्यमुत्तमैः।
मार्गमुत्सृज्य चक्षुष्मान् को गच्छति दुरध्वना"इति॥

"केचित्तु किरणाश्रिता "प्रभे"ति पृथगुपादानम्" इत्याहुः। प्रभादीनामादित्यरश्मित्वाभावात् पृथक्पाठः। "द्युतिच्छव्योरिन्दुप्रस्तावोक्तेः(क) पुनरिहोपा[दा]नं सामान्यार्थम्। "दीप्त्यातपादयो ह्यसाधारणा अपि कविभिः साधारणीकृताः। यथा––मुखदीप्तिः चन्द्रातपः" इति स्वामी॥

कोष्णमित्यादि। ईषदुष्णमित्यर्थे 'कोष्णं', 'कवोष्णं,' 'कदुष्ण'मिति "कवं चोष्ण" (पा० ६।३।१०७) इति कोः का-कव-कदादेशाः॥ — कोष्णम्, कवोष्णम्, कदुष्णम्

'मन्दोष्ण'मिति कर्मधारयः। एते गुणे क्लीबलिङ्गाः। गुणवति द्रव्ये वर्तमानास्त्रिलिङ्गाः। **चत्वारि कदुष्णस्य॥१०२॥** — मन्दोष्णम्

तिग्ममिति। तेजयति 'तिग्मम्'। तिज निशाने। "युजिरुचितिजां कुश्चे (उ० १।१४५)"ति मक् कवर्गश्चान्तादेशः॥ — तिग्मम्

(क) द्युतिच्छव्यो"रिन्दुप्रभायाम्" इत्युक्तेः—B_1.

तीक्ष्णम् एवं "तिजेर्दीर्घश्चे" (उ० ३।१८) ति क्स्न* प्रत्ययः, दीर्घत्वं कुत्वं च। 'तीक्ष्णम्'।।

खरम् खमिन्द्रियं राति 'खरम्'। रा ला दाने(क)।कः (पा० ३।२।३)। खडखडि भेदे। पृषोदरादित्वात् (पा० ६।३।१०९) डस्य रः, 'खर'मित्यन्यः।

तद्वदिति। यथा कोष्णादयो गुणे क्लीबलिङ्गाः तद्वति तु त्रिलिङ्गास्तथा तिग्मादयोऽपि इत्यर्थः। अन्यत्र तु उपचारात्। "तीक्ष्णोऽसिः"।। **त्रीण्यत्युष्णस्य।।**

मृगतृष्णा **मृगेति** जलाभासत्वात् मृगाणां तृष्णास्त्यस्याम्। अर्श-आद्यच्। (पा० ५।२।१२७) 'मृगतृष्णा'।।

मरीचिका मरीचिरिव 'मरीचिका'। "इवे प्रतिकृतौ कन्" (पा० ५।३।९६)। ग्रीष्मे मरुदेशे सिकतादावर्करश्मयः प्रतिफलिता दूरस्थानां जलत्वेनाभासन्ते। **तद्वाचि मृगतृष्णादिद्वयम्।।१०३क।।**

।।०।। दिग्वर्ग-विवरणम्(ख) **।।०।।**

* स्नक्—B_1., भानुजि।

(क) द्वावपि दाने इति चन्द्रः—भट्टोजि।

(ख) व्योमदिग्वर्गविवरणम्—B_1. व्योमदिग्वर्गौ—B.

४। अथ कालवर्गः।

कालो दिष्टोऽप्यनेहाऽपि समयोऽप्यथ पक्षतिः।।१०३।।
प्रतिपद् द्वे इमे स्त्रीत्वे तदाद्यास्तिथयो द्वयोः।
घस्रो दिनाहनी वा तु क्लीबे दिवसवासरौ।।१०४।।
प्रत्यूषोऽहर्मुखं कल्य[404]मुषःप्रत्युषसी* अपि।
प्रभातञ्च दिनान्ते तु सायः[405]सन्ध्या पितृप्रसूः।।१०५।।
प्राह्लापराह्लमध्याह्लास्त्रिसन्ध्यमथ शर्वरी।
निशा निशीथिनी रात्रिस्त्रियामा क्षणदा क्षपा।।१०६।।
विभावरीतमस्विन्यौ रजनी यामिनी तमिः[406]।
तमिस्रा तामसी रात्रिर्ज्यौत्स्नी चन्द्रिकयान्विता।।१०७।।
आगामिवर्तमानाहयुक्तायां[407] निशि पक्षिणी।
गणरात्रं निशा बह्व्यः प्रदोषो रजनीमुखम्।।१०८।।
अर्धरात्रनिशीथौ द्वौ द्वौ यामप्रहरौ समौ।
स पर्वसन्धिः प्रतिपत् पञ्चदश्योर्यदन्तरम्।।१०९।।
पक्षान्तौ पञ्चदश्यौ द्वे पौणमासी तु पूर्णिमा।
कलाहीने सानुमतिः पूर्णे राकानिशाकरे।।११०।।
अमावास्या त्वमावस्या दर्शः सूर्येन्दुसङ्गमः।
सा दृष्टेन्दुः सिनीवाली सा नष्टेन्दुकला कुहूः।।१११।।
उपरागो ग्रहो राहुग्रस्ते त्विन्दौ च पूष्णि च।
सोपप्लवोपरक्तौ द्वावग्न्युत्पात उपाहितः।।११२।।
एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ।

काल इति। कल्यते। कल संख्याने शब्दे च। कर्मणि कालः घञ्। (पा० ३।३।१९)। 'कालः'। "कालयति सर्वमिति ण्यन्तात् पचाद्यचि" (पा० ३।१।१३४) तु स्वामी।।

404 काल्यम्—B_1.

405 सायं—B_1.

406 तमी—B_1., भानुजिः, रघुनाथः and others.

407 वर्तमानाहर्युक्तायाम्—B_1., रघुनाथः, क्षीर°, सर्वा°

(*) प्रत्यूषसी—रघुनाथः।

दिष्टः दिश्यते स्म । दिश् अतिसर्जने । क्तः (पा० ३।३।१७४)। षत्वष्टुत्वादि* (पा० ८।२।३६, ८।४।४१) । 'दिष्टः' ॥

अनेहा नाहन्ति नागच्छति इति "नञ्याहन एह च" (उ० ४।२२३)[408] इत्यसुन्प्रत्ययः । आहनस्थाने एहादेशः । "तस्मान्नुडचि" (पा० ६।३।७४) इति नुट् । "ऋदुशन" (पा० ७।१।९४) इत्यादिना सावनङ । अनेहा । सान्तः । अनेहसौ, अनेहस इति ॥

समयः समेत्यनेन इति संपूर्वादिणः "एरच्" (पा० ३।३।५६) । 'समयः' ॥ **चत्वारि क्षणादिकालस्य ॥**

पक्षतिः (पक्षती) **अथेति** । पक्षस्य मूलं । "पक्षात्तिः" (पा० ५।२।२५) 'पक्षतिः' । डीषि (वा० ४।१।४५) पक्षती च **॥१०३॥**

प्रतिपद् प्रतिपद्यतेऽस्याञ्चन्द्रस्य क्षय उदयो वेति 'प्रतिपद्' । दान्ता । संपदादित्वात् (वा०) क्विप् । "प्रतिपद्यते उपक्रम्यते मासादिरनया" इति तु स्वामी । **द्वे प्रतिपत्तिथेः ॥**

तिथिः **तदाद्या इति** । अत सातत्यगमने । "ऋतन्यञ्जी" (उ० ४।२) त्यादिना इथिन् । पृषोदरादित्वादकारलोपः (पा० ६।३।१०९) । "तन्यते[409] तिथिः तेनैवार्थेने"ति तु सोमनन्दी । "द्वयो"रिति श्रुतत्वात् तिथिशब्द एव (संबध्यते)॥ **एकं सामान्येन तिथेः ॥**

घस्रः **घस्र इति** । घसति अत्त्यन्धकारं 'घस्रः' । घस्लृ अदने । "स्फायितञ्ची"ति (उ० २।१३) रक् ॥

दिनम् दीङ् क्षये । "इण्सिञ्जिदीङुष्यविभ्यो नक्" (उ० ३।२) । बाहुलकात् नकि ह्रस्वः । 'दिनम्' । द्यति तमो निर्व्यापारस्थितिं वा । "द्यतेः किनन्"[410] (उ० २।४९) । 'दिनम्' —इति स्मृतिः ॥

* षत्वष्टुत्वे—B_1.

408 तत्त्वबोधिनी reads the rule नञि हन एह च । 409 कल्पते—B_1.

410 तत्त्वबोधिनी reads only "द्यतेः" । According to उज्ज्वलदत्त and भट्टोजि the suffix is इनच् and not किनन् । भानुजि, however, faithfully follows मुकुट here. "द्यतेर्दिनं दिवसमिति पुरुषोत्तमदेवः"—उज्ज्वलदत्तः ।

अहः न जहाति कालम् । "नञि जहाते" (उ० १।१५७) रिति कनिन् । "अहन्नि"ति (पा० ८।२।६८) नकारस्य रुत्वम् । 'अहः' ॥

दिवसः दीव्यति । "दिवादिभ्यः किद्" (उ० ३।१२१) इत्यसच् किच्च* । 'दिवसः' ॥

वासरः वासयति इति वसेर्ण्यन्तात् "अर्तिकमितमियमिभ्रमिवासिभ्यश्चिद्" (उ० ३।१३२) इति अरप्रत्ययः[411] । 'वासरः' । दन्त्यमध्यः । "विबोधयामास समन्ततस्ततो रविर्मनाग्दर्शितवासरः सर" इति जानकीहरणम् । "बद्धो वासरसङ्ग" (१३।२) इति भट्टिभाषासमावेशश्च । क्वचिदुणादिवृत्तौ "वाशी" ति वाश्टृ शब्द इति पठ्यते । अतो 'वाशर' इति तालव्यमध्यमाहुः । तददर्शनम्[412] ॥ **पञ्च वासरस्य ॥१०४॥**

प्रत्यूषः **प्रत्यूष इति** । प्रत्यूषति रुजति रात्रिं 'प्रत्यूषः' । ऊष रुजायामित्यत इगुपधात् के (पा० ३।१।१३५) दीर्घमध्योऽदन्तः । "प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः" (Megha, 1. 32.) इति मेघात्[413] ॥

अहर्मुखम् अह्नो मुखं प्रारम्भः 'अहर्मुखम्' ॥

कल्यम् कलयति चेष्टाम् "अघ्न्यादयश्चे" (उ० ४।१११) ति कलेर्यक् । 'कल्यम्' ॥

उषः उष दाहे । ओषत्यन्धकारम् इति "उषः किदि" (उ० ४।२३३) (क) त्यसिः । 'उषः' ॥

प्रत्युषः एवं 'प्रत्युषः' । प्रतिरन्योपसर्गनिवृत्तये । 'उषः-प्रत्युषसी' सह्लस्वे । द्वे सान्ते । "उषसि सयावकसव्यलक्ष्मलेखे"ति[414]

* उज्ज्वलदत्त and भट्टोजि read "दिवः कित्" । In this case also भानुजि is faithful to राय° ।

411 तत्त्वबोधिनी version of the rule is अर्तिकमिभ्रमिचमिदेविवासिभ्यश्चित् । This is from उज्ज्वलदत्तः । दशपादी reads "अर्तिकमिभ्रमिदेविवाशिभ्यश्चित्" ।

412 अनार्षम्—B_1. This refers to दशपादी (८।६२) । 413 माघात्—B_1.

(क) "वसेः कित्"—दशपादी (९।९४)

414 मल्लि° reads उषसि सयावकसव्यपादरेखा ।

भारविः (५।४०)। "अधिगतरतिशोभैः* प्रत्यूषः प्रोषितश्री"रिति माघः (११।३०)॥

प्रभातम्

भातं प्रवृत्तं 'प्रभातम्'। आदिकर्मणि क्तः (पा० ३।४।७१)। "प्रपूर्वाद् भातेर्बाहुलकात् तन्" इति तु सर्वधरः॥ **षट् प्रभातस्य॥**

सायः

दिनेति। स्यति दिनं 'सायः'। "श्याद्व्यधे" (३।१।१४१) त्यादिना णेऽदन्तः। "कर्मणि घञि साय" इति कौमुदी। मान्ताव्ययं तु अव्ययवर्गे वक्ष्यति। अतः सायमितीह तु प्रामादिकम्॥ **एकं दिनान्तस्य॥**

सन्ध्या

सन्ध्येति। सम्यक् ध्यायन्ति अस्याम्। ध्यै चिन्तायाम्। अधिकरणे "आतश्चे"ति (पा० ३।३।१०६) अङ्। 'सन्ध्या'॥

पितृप्रसूः

'पितृप्रसू'रिति। पितॄन् प्रसूते। "सत्सूद्विषे" (पा० ३।२।६१) त्यादिना क्विप्। "सन्ध्या पितृप्रसूः सन्धा"इति शब्दार्णवे निर्यकारोऽपि॥ "सन्धोच्छलित" इति वासवदत्तायमके(क)॥ **द्वे सन्ध्यामात्रस्य॥१०५॥**

(सन्धा)

प्राह्णः

प्रेति। अहरवयवेऽहःशब्दो ग्रामो दग्ध इतिवत्। प्रथमं च तदहश्चेति 'प्राह्णः'। "राजाहःसखिभ्यष्टच्" (पा० ५।४।९१)। "अह्नोऽह्न" (पा० ५।४।८८) इत्यह्नादेशः। "रात्राह्नाहाः पुंसी" (पा० २।४।२९) ति पुंस्त्वम्॥

अपराह्णः

अह्नः अपरम् 'अपराह्णः'। "पूर्वापरे" (पा० २।२।१) त्येकदेशिसमासः। "अह्नोऽदन्ता" (पा० ८।४।७) दिति द्वयोरपि णत्वम्॥

मध्याह्नः

अह्नो मध्यं 'मध्याह्नः'। "संख्याविसायपूर्वस्ये"ति[415] (पा० ६।३।११०) ज्ञापकात् समासः, विशेषणसमासो वा॥

त्रिसन्ध्यम्

एतास्तिस्रः सन्ध्याः समाहृता'स्त्रिसन्ध्यम्'। "आबन्तो वे"(वा०) ति क्लीबत्वम्। "गोस्त्रियो"(पा० १।२।४८)रिति ह्रस्वत्वम्। पक्षे "त्रिसन्ध्या"[416]। **एकं दिनस्याद्यन्तमध्यानाम्॥**

(त्रिसन्ध्या)

(क) सन्धोज्ज्वलित—शिवदत्तः।

415 संख्याविषये पूर्वस्येति ज्ञापकात्—B_1,

* रतशोभैः—वल्लभः

146 त्रिसन्धी—B_2.

शर्वरी

अर्थेति। शृणाति चेष्टाः। शॄ हिंसायाम्। "कॄगॄशॄवृञ्चतिभ्यः ष्वरच्। (उ० २।१२३)"। 'शर्वरी'। तालव्यादिः पृषोदरादित्वाद्दीर्घोऽपि (पा० ६।३।१०९)। "शर्वरी शार्वरी शर्या"[417] इति शब्दार्णवः॥

(शार्वरी)

निशा

निशानं 'निशा' सर्वव्यापाराणां तनूकरणम्। निपूर्वात् शो तनूकरणे इत्यतः "आतश्च" (पा० ३।३।१०६) इति भावे अङ्। तद्योगादर्श आद्यच् (पा० ५।२।१२७)। 'निशा'। तालव्यान्ता। पृषोदरादित्वाद्धलन्तापि (पा० ६।३।१०९)। "गुणसन्धी च पुंसि निट् श्यामा तुङ्गी तमा तमी"ति* नामनिधानम्॥

(निश्)

निशीथिनी

निशीथोऽस्त्यस्यां 'निशीथिनी'। सतालव्या। "शपथनिशीथकृशानुकिशोरा" इत्यूष्मविवेकात्[418]॥

रात्रिः

राति सुखं। रा दाने। "राशदिभ्यां त्रिप्" (उ० ४।६७)[419]। 'रात्रिः'। "कृदिकाराद्" (ग०) इति ङीषि 'रात्री'। "रात्रिस्तमस्विनी" ति शब्दार्णवः॥

(रात्री)

त्रियामा

आद्यन्तयोरर्धयामयोश्चेष्टाकालत्वेन दिनप्रायत्वाद् दिनवद्व्यवहाराच्च 'त्रियामा'॥

क्षणदा

क्षणमव्यापारसुखं ददाति 'क्षणदा'। "क्षणमवसरं ददाती" ति तु स्वामी॥

क्षपा

क्षपयति चेष्टाः 'क्षपा'। अच् (पा० ३।१।१३४) ॥१०६॥

विभावरी

वृञ् आच्छादने इत्यतः पचाद्यजन्तात् (पा० ३।१।१३४) "पिप्पल्यादयश्च" (गण० ४।१।४१) इति चकारात् ङीष्। वरी। प्रभेतिवत् विभा। विभाया वरी आच्छादिका 'विभावरी'। नक्षत्रादिभिर्विशेषेण भातीति "आतो मनिन्

417 शम्या—B_1. रघुनाथः; त्रिकाण्डविवेकः has "शर्वरी शार्वरी शय्या क्षयिनी क्षणदा क्षपा इति वाचस्पतिः"।

* "निशीथिनी निशा निट् च श्यामा तुङ्गी तमा तमी"—भानुजिः।

418 शभेदात्—B_1.

419 त्रिः—B_1. सर्वानन्द reads त्रिन्, a mss. of दशपादी also has त्रिन्।

क्वनिब्वनिपश्चे" (पा० ३।२।७४) त्यादिना क्वनिबन्ता। "वनो र चे" (पा० ४।१।७) ति ङीप्। 'विभावरी––इति तु स्वामी ॥

तमस्विनी तमोयोगात् 'तमस्विनी'। "अस्मायै" (पा० ५।२।१२१) त्यादिना। विनिः। ङीप्॥[420]

रजनी (रजनिः) रज्यन्ति रागिणोऽत्र रञ्जयति तमसा वा 'रजनी'। "कृदिकारादि" (ग०) ति ङीष्। अतो "रजनि" रपि। "क्षिपेः किच्चे" (उ० २।१०८)ति चकारात् अनिः। कित्त्वान्नलोपः॥

यामिनी कार्यानर्हत्वात्(क) निन्दिताः यामाः सन्त्यस्याम्। निन्दायामिनिः (पा० ५।२।११५)। 'यामिनी'॥

तमिः (तमी) (तमा) ताम्यन्त्यस्याम्। ताम्यतेरिन् (उ० ४।११७)। 'तमिः'। ङीषि (ग० ४।१।४५) 'तमी'। पदाद्यचि (पा० ३।१।१३४) टापा (पा० ४।१।४) 'तमा' इत्यपि। तथाच विदग्धमुखमण्डनम्––"हारा महादेवरता तमात" इति। "तमी" त्यमूलम्। "तमे" त्येव पाठ इति तु जातोकादयः।[421] तदयुक्तम्। "स तमीं तमोभिरभिगम्य तता" मिति (६।२३) माघदर्शनात्; "नामनिधाने द्वयोरुपादानात् पाठद्वयमेव न्याय्यम्" इति कौमुदी। वयन्तु क्षीरस्वामिसर्वधरादिभिस्तु "तमी"-तीकारान्तः पाठ एव स्वीकृत इति "तमी"ति ईकारान्त एव मूलपाठ इत्याचक्ष्महे*॥ **द्वादश रात्रिमात्रस्य ॥**

तमिस्रा **तमीति**। तमोबहुला रात्रिः 'तमिस्रा'। तमांसि अत्र सन्तीति "ज्योत्स्नातमिस्रे" त्यादिना (पा० ५।२।११४) निपातिता॥

तामसी 'तामसी'। ज्योत्स्नादित्वान्मत्वर्थीयोऽण् (वा० ५।२।१०३)॥ **द्वे नाम्नी तमोबहुलायाः रात्रेः॥**

420 तमोऽस्त्यस्या इति मतुपि 'तमस्वती'—adds B_2. (क) कार्यानर्हत्वेन—B_1.
421 जादकादयः—B_2.
* Actually तमि with short इ has been accepted in the commentary.

"तमिस्रा तु दर्शरात्रिर्ज्यौत्स्नी स्यात् पूर्णिमानिशा" इति शब्दार्णवदर्शनात् "तामसी रात्रिमात्रेऽपी"ति कौमुदी॥

ज्यौत्स्नी **ज्यौत्स्नीति**। "रात्रि" रिति काकाक्षिगोलकन्यायेन इहाप्यन्वीयते। चन्द्रिकया ज्योत्स्नया युक्ता रात्रिः 'ज्यौत्स्नी'। पूर्ववदण् (वा० ५।२।१०३)॥ **एकं ज्यौत्स्नायुक्ताया रात्रेः॥१०७॥**

पक्षिणी **आगेति**। पूर्वपरदिनयोः पक्षयोरिव मध्ये वर्तमानत्वात् पक्षौ अत्र स्तः 'पक्षिणी'। अत इनिः (पा० ५।२।११५)। "निशी" त्युपलक्षणम्। तेन आगामिवर्तमाननिशायुक्ते दिनेऽपि 'पक्षिणी'।(क) "अहर्युक्ताया" मिति सरेफपाठे आगामिवर्तवर्तमानाभ्यामहोभ्यां युक्तं योगोऽस्या इति बहुव्रीहौ टजभावः (पा० ५।४।६१)। तद्विधौ ततपुरुष-निवृत्तेः, समासान्तविधेरनित्यत्वाद्वा॥ **एकं दिनद्वयमध्यवर्तिन्या रात्रेः॥**

गणरात्रम् **गणेति**। इह गणशब्द एकवचनान्तो बहुत्वसंख्यावचन इति "बहुगणे" (पा० १।१।२३) त्यत्र इन्दुमित्रः। रात्रीणां गणो 'गणरात्रम्'। राजदन्तादित्वात् (पा० २।२।३१) परनिपातः। 'बहुगणे" (पा० १।१।२३)ति संख्यासंज्ञा[422]। "अहःसर्वैकदेश" (पा० ५।४।८७)इत्यादिना अच्। क्लीबत्वमत्र प्रमादः "रात्राह्नाहाः पुंसी" ति (पा० २।४।२९) पुंस्त्वप्राप्तेरित्येके। "प्राप्तमपि पुंस्त्वं लोकाश्रयत्वान्न भवती" ति सर्वानन्दः। तत् कुशकाशावलम्बनादसारम्। "भवति नपुंसकयोगः संख्यापूर्वस्य रात्रिशब्दस्य" इति वररुचिवचनात्, गणशब्दस्य च संख्यात्वात् क्लीबत्वस्य सम्भवात्। तथाच नपुंसकेऽयमेव वक्ष्यति "रात्रं प्राक् संख्ययान्वितम्"–– इति कौमुदी। अन्येऽप्याहुः "गणानां रात्रीणां समाहार" इति। द्विगौ कृते समासावयवाः समासान्ता इत्यकारान्तोत्तरपदत्वाभावात् "अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते" (वा०)(ख)" इति "स्त्रीत्वाभावे नपुंसक"मिति क्लीबत्वं प्राप्तं बाधित्वानेन

(क) भानुजि ascribes this view to हरदत्तादयः। 422 संख्यात्वे––B_1.
(ख) Under पा० २।४।१७ भट्टोजि reads—"स्त्रियामिष्टः।"

पुंस्त्वे प्राप्ते "पात्रादित्वात् (वा०) क्लीबत्वम्[423]। **एकं (गणरात्रस्य)** ॥

[प्रदोषः (रजनीमुखम्)] **प्रेति**। दूष वैकृत्ये। अच्, टाप् (पा० ३।१।१३४, ४।१।४)। प्रारम्भो दोषायाः। 'प्रदोषः'। प्रादिसमासः (२।२।१८)। प्रारम्भो दोषाया यत्रेति "एकविभक्ति च" (पा० १।२।४४)[424] इत्युपसर्जनत्वे "गोस्त्रियो" (पा० १।२।४८) रित्यादिना ह्रस्वत्वम्। ननु च दोषाशब्दोऽयमव्ययम्। तथाचायमेव वक्ष्यति--"नक्तं दोषा च रजना" (अव्य०) विति[425]। तत् कथमस्त्रीप्रत्ययान्तत्वे ह्रस्वत्वम्? सत्यम्। टाबन्तोऽपि दोषाशब्दोऽस्ति। तथाच भट्टि--"ततः कथाभिः समतीत्य दोषामारुह्य सैन्यैः सह पुष्पकं ते"(२२।२४) इति॥ **द्वे (रजनीमुखस्य) ॥१०८॥**

[अर्धरात्रः] अर्धेति। अर्धं रात्रेः 'अर्धरात्रः' ॥[426]

[निशीथः] निशेरतेऽस्मिन्। शेतेः "निशीथगोपीथावसथा" (उ० २।९) इति थकि 'निशीथ' इति निपातितम्। सिंहावालोकितन्यायेन 'समा'वित्यनुवर्त्यान्वयः॥ **द्वे रात्रिमध्यस्य** ॥

[यामः] **द्वाविति**। यातीति 'यामः'। "यातेर्मगि"ति मक्*। यद्वा यच्छति उपरमति रात्रिरहश्चानेनेति। यम उपरमे। घञ् (पा० ३।३।१२१)॥

[प्रहरः] प्रपूर्वाद्धरतेः प्रह्रियते ढक्कादिरस्मिन् 'प्रहरः'। "पुंसी'ति (पा० ३।३।११८) घः॥ **द्वे प्रहरस्य** ॥

[पर्वसन्धिः] **स पर्वेति**। प्रतिपत्पञ्चदश्योर्मध्यं 'पर्वसन्धिः'। पञ्चदशानां पूरणी। "तस्य पूरणे डट्" (पा० ५।२।४८) इति डट्। "पञ्चदशी"ति द्वयोरपि पूर्णिमामावस्ययोर्ग्रहणमुक्तम्। **तिथिसन्धिकालस्यैकम् ॥१०९॥**

---

423 Curious to note here that भानुजि repeats some of the reasons advanced by मुकुट but still remarks caustically "एतेन स्वामिमुकुटयोर्नपुंसकत्वसमर्थनसंभ्रमः परास्तः though he arrived at the some conclusion.

424 एकविभक्तिश्च—B_1.

425 अथ दोषा च नक्तं च रजनाविति—अव्ययवर्ग।

426 अर्धरात्रम्—B_1.

* Not found in the उणादिसूत्र's but दशपादी (७।२६) has याम with the affix मन्।

पक्षेति। द्वे पञ्चदश्यौ पूर्णिमामावस्ये पक्षस्यान्तौ [पक्षान्तः] 'पक्षान्तौ'। **एकं (पक्षान्तस्य)** ॥

पौर्णेति। मीयते तिथीनां क्षयो वृद्धिश्चानेन। माते [पौर्णमासी] रौणादिकोऽसिप्रत्ययः(क)। माश्चन्द्रः संपूर्णो यस्यां सा 'पौर्णमासी' तिथिः। "साऽस्मिन् पौर्णमासी"ति (पा० ४।२।२१) निपातनादण्। अथवा पूर्णो माः पूर्णमास्तस्येयं तिथिः। "तत्र भवे"(पा० ४।३।५३)त्यणि। यद्वा पूर्णो मासो विद्यते(ख) ऽस्यां पूर्णमासादण् (पा० ५।४।३८)। पौर्णमासी॥

'पूर्णिमा' इति। पूरी आप्यायने। भावे क्तः (पा० [पूर्णिमा] ३।३।११४)। "भाववचनान्तादिमप् वक्तव्य" (वा०) इतीमपि टाप्[427]। "पूरणं पूर्णिः। "ल्वादिभ्यः क्तिन्निष्ठावदि"(ग)ति (वा० ८।२।४४) क्तिनि नत्वे च पूर्णिः। पूर्णिं मिमीते "पूर्णिमा'। "आत" इति (पा० ३।१।१३६) क--इति स्वामी॥ **द्वे (पौर्णमास्याः)** ॥

कलेति। 'सा' पूर्णिमा उदयकाले प्रतिपद्योगात् 'कलाहीने' चन्द्रे अनुमन्यते इति क्तिनि (पा० ३।३।९४) 'अनु- [अनुमतिः] मतिः' स्यात्॥ **एकं (कलाहीनायाः पौर्णमास्याः)** ॥

पूर्ण इति। सेत्येव। 'सा' पौर्णमासी पूर्णे चन्द्रे 'राका' [राका] स्यात्। राति शुभमिति। रा दाने। "कृदाधारार्चिकलिभ्यः क" (उ० ३।४०) इति कः। टाप् (पा० ४।१।४)। बाहुलकात् "केऽण" (पा० ७।४।१३) इति न ह्रस्वः॥ **एकं (पूर्णचन्द्रयुक्तायाः पौर्णमास्याः) ॥११०॥**

अमेति। "अमा नाम रवे रश्मिश्चन्द्रलोके प्रतिष्ठितः। [अमावास्या]
तत्र सोमो वसत्यस्याममावास्या ततः स्मृता॥"[428] इति

(क) Under ४।२२७ उज्ज्वलदत्त says—"बाहुलकात् केवलादपि मोऽसिः। मीयन्ते अनेनेति माः, मासौ, मासः। पूर्णो माः। तस्येयं पौर्णमासी।"

(ख) वर्तते—B_1.

427 इमन्—B_1.; the वार्त्तिक under पा० ४।४।२० reads—भावप्रत्ययान्तादिमब् वक्तव्यः।

(ग) "ऋकारल्वादिभ्यः क्तिन् निष्ठावद् भवतीति वक्तव्यम्" (वा°) in काशिका।

428 . . .प्रतिष्ठिता. . .अमावस्या ततः स्मृता—B_1., रघुनाथः।

अमा सह वसतोऽस्यां चन्द्रार्कावििति "अमावस्यदन्यतरस्याम्" (पा० ३।१।१२२) इति ण्यति 'अमावास्या'।।

अमावस्या पक्षे वृद्धयभावनिपातनात् ['अमावस्या']।।

"दर्शोऽमाऽमावसी चे"ति रभसः। "अप्यमावास्यामावासी चामामस्याप्यमामसी"ति शब्दार्णवे चानेकरूपता।

दर्शः दृश्यते याज्ञिकैः। 'दर्शः'। "पुंसि घः" (पा० ३।३।११८)। यद्वा न दृश्यते चन्द्रोऽत्र मङ्गलवददर्श एव 'दर्शः'। दृश्येते उपलक्ष्येते[429] चन्द्रार्कावत्रेति 'दर्श' इत्यन्यः।।

सूर्येन्दुसङ्गमः सूर्येन्द्वोः सङ्गमोऽत्रेति। व्यधिकरणो बहुव्रीहिः।। **चत्वारि दर्शस्य।**

सिनीवाली **सेति**। सा अमावस्या चतुर्दशीयोगात् दृष्टचन्द्रा सती 'सिनीवाली'। सह एन विष्णुना वर्तते 'सा' लक्ष्मीस्तद्योगात्। व्रीह्यादेरिनिः (पा० ५।२।११६)। सिनी चन्द्रकला सा बालाल्पात्र। गौरादिपाठात् (पा० ४।१।४१) ङीष्। सिनीं वलति धारयति वा। कर्मण्यणि (पा० ३।२।१) 'सिनीवाली'। "स्त्रियाः पुंवदि"ति (पा० ६।३।३४) न पुंस्त्वं*, "संज्ञापूरण्योश्च" (पा० ६।३।३८) इति निषेधात्। "सिनी सिता बाला कला अस्त्यस्या'मिति तु स्वामी।। **एकं (दृष्टचन्द्राया अमावस्यायाः)।।**

कुहूः (कुहुः) **सेति**। उदयेऽमावस्यायोगान्नष्टचन्द्रकलाऽमावास्या 'कुहूः'। कुहयति विस्मापयति[430]। कुह विस्मापने।[431] चुरादिः। अतः "कृषिचमितनिधनिसर्जिखर्जिभ्यः ऊ" (उ० १।८२) रिति "बाहुलकात् कुहेरपी" ति धातुप्रदीपः। मृगय्वादित्वात् (उ० १।३८) 'कुहुः'। तथाच "धेनुरज्जुकुहुसरयुतनुकरेणवः स्त्रिया"मिति विन्ध्यवासी। उदन्तात् पुंस्त्वे प्राप्ते तदपवादमाह।। **एकं (नष्टचन्द्राया अमावस्यायाः) ।।१११।।**

उपरागः **उपेति**। रञ्जेरुपपूर्वाद् भावे घञ् (पा० ३।३।१८)। "घञि च भावकरणयो" (पा० ६।४।२७) रिति नलोपः।

429 लक्ष्येते—B_1.

430 विस्माययति—A.

* पुंवत्त्वं—भानुजिः।

431 विस्मायने—A.

वृद्धिः। 'उपरागः'। "उपरज्यत्यनेनेति उपराग" इति तु स्वामी।।

ग्रहणं 'ग्रहः'। "ग्रहवृद्" (पा० ३।३।५८) इत्यप्।। ग्रहः

द्वे राहुणा चन्द्रार्कग्रासस्य।।

सोपेति। "वोपसर्जनस्ये" (पा० ६।३।८८) ति सभावः।। सोपप्लवः

'उपरक्तः'। कर्तरि क्तः (पा० ३।४।७२) **द्वे प्रत्येकं** उपरक्तः **राहुग्रस्तचन्द्रार्कयोः।।**

अग्नीति। अग्नेरुत्पातो वैकृत्यम्।। अग्न्युत्पातः

उप आसन्नम्। आहितमर्पितं फलमस्येति 'उपाहितः'।। उपाहितः

द्वे आकाशादिषु अग्नेर्वैकृत्यस्य ।।११२।।

एकयोक्त्या इति। एकयोक्त्या अपृथग्वचनेन रोदसी- पुष्पवन्तौ तिवत् चन्द्रार्कौ 'पुष्पवन्तौ' इत्युच्येते। एकैकाभिधाने एकवचनान्तोऽपि 'पुष्पवान् इति। मतुबन्तश्चायमिति। (पा० ५।२।९४)। केचित् तु "रविशशिनौ पुष्पवन्ताख्यौ" इति नाममालायां, "प्राकप्रत्यग्धरणीधरशिखरस्थित पुष्पवन्ताभ्याम्" इति आश्चर्यमञ्जर्यां च अदन्तत्वे* द्विवचनान्तत्वदर्शनात् नित्यद्विवचनान्तश्चायं मिलितयोरेवाभिधायकत्वात्, तथैव सर्वत्र दर्शनाच्चेति (आहुः)।।

दिवाकर- निशाकरौ इति। "देवताद्वन्द्वे च" (पा० दिवाकर-निशाकरौ ६।३।२६) इति न आनङ्। तत्र "आनङ् ऋतो द्वन्द्व" (पा० ६।३।२५) इत्यतो द्वन्द्वग्रहणे अनुवर्तमाने पुनर्द्वन्द्वग्रहणेन वेदलोकसहचरितद्वन्द्वग्रहणात्। अस्य तु द्वन्द्वस्य अतथात्वात्। अतएव "रविचन्द्रावपि नोपलक्षितौ" इति घटकर्परः (श्लोक-१)।। एकं **(दिवाकर-निशाकरयोः सहचरितयोः)।।**

अष्टादश निमेषास्तु काष्ठा त्रिंशत् तु ताः कलाः ।।११३।।
तास्तु त्रिंशत् क्षणस्ते तु मुहूर्तो द्वादशाऽस्त्रियाम्।
ते तु त्रिंशदहोरात्रः पक्षस्ते दश पञ्च च ।।११४।।

* अदन्तत्वदर्शनात्—शिवदत्तः।

पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस्तु तावुभौ ।
द्वौ द्वौ माघादिमासौ[432] स्याद् ऋतुस्तैरयनं त्रिभिः ।।११५।।
अयने द्वे गतिरुदग्दक्षिणार्कस्य वत्सरः ।
समरात्रिन्दिवे[433] काले विषुवद् विषुवं च तत् ।।११६।।[434]
मार्गशीर्षे सहा मार्ग आग्रहायणिकश्च सः ।
पौषे तैषसहस्यौ द्वौ[435] तपा माघेऽथ फाल्गुने ।।११७।।
स्यात् तपस्यः फाल्गुनिकः स्याच् चैत्रे चैत्रिको मधुः ।
वैशाखे माधवो राधो ज्यैष्ठे शुक्रः शुचिस्त्वयम् ।।११८।।
आषाढे श्रावणे तु[436] स्यान् नभाः श्रावणिकश्च सः ।
स्युर्नभस्यप्रोष्ठपदभाद्रभाद्रपदाः समाः[437] ।।११९।।
स्यादाश्विन इषोऽप्याश्वयुजोऽपि स्यात् तु कार्त्तिके ।
बाहुलोर्जौ कार्त्तिकिके हेमन्तः शिशिरोऽस्त्रियाम्।।१२०।।
वसन्ते(क) पुष्पसमयः सुरभिर्ग्रीष्म ऊष्मकः(ख) ।
निदाघ उष्णोपगम उष्ण ऊष्मागमस्तपः(ग) ।।१२१।।
स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षा अथ शरत् स्त्रियाम् ।
षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमात् ।।१२२।।

---

432 मार्गादिमासौ—भानुजिः । क्षीरः° says—"इर्यति ऋतुः, माघाद्युपक्रमः । ततोऽयनारम्भात् ।" रघुनाथ holds—"मार्गम् आरभ्य ऋतुक्रमस्य वक्ष्यमाणत्वात् हेमन्तादिक्रमः प्रसज्येत इति तन् निराकुर्वन् अयनं विशिनष्टि "माघादी"ति । पीयूष quoted by शिवदत्तः states—""माघादिः सौरो वत्सरः. . .मार्गादिश्चान्द्रः संवत्सरः ।" So the statement here is "अयनद्वयपुरस्कारेण ।" Hence it is माघादि and not मार्गादि ।

433 रात्रिन्दिने—B_1.

434 पुष्ययुक्ता पौर्णमासी पौषी मासे तु यत्र सा ।
नाम्ना स पौषो माघाद्याश्चैवमेकादशापरे ।।
I. O. ms. 1758 and a number of Bengal mss. add this stanza here while others omit it. रामनाथ and echoing him रघुनाथ inform us that सुभूति had this verse in some of his mss. A solitary ms. of राय° records this verse. "श्लोकोऽयं क्वचित् पुस्तके इति सुभूतिः"—रामनाथः ।

435 तैषः सहस्यश्च—B_2.

436 श्रावणस्तु—B_2.

437 भाद्रपदाश्च ये—B_2.

(क) वसन्तः—B_2.

(ख) उष्म च—B_2.; उष्णकः—रामनाथः, रघुनाथः ।

(ग) उष्णागमः—रघुनाथः, सर्वा°

संवत्सरो वत्सरोऽब्दो हायनोऽस्त्री[438] शरत् समाः ।
मासेन स्यादहोरात्रः पैत्रो वर्षेण दैवतः ।।१२३।।
दैवे युगसहस्रे द्वे ब्राह्मः कल्पौ तु तौ नृणाम् ।
मन्वन्तरन्तु दिव्यानां युगानामेकसप्ततिः ।।१२४।।
संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि ।

अष्टेति । पुंसो यावत्कालमकृत्रिमनेत्रविकाशानन्तरं पक्ष्माकुञ्चनं जायते स 'निमेषः' ।। **निमेषः**

ते अष्टादश 'काष्ठा' । सा च दिक्पर्याये (दिक्० ६८) साधिता । समूहवाचित्वात् 'काष्ठा' इत्येकवचनम् । एवमन्यत्रापि बोध्यम् ।। **एकमष्टादशनिमेषावच्छिन्नकालस्य ।।** **काष्ठा**

ताः । काष्ठास्त्रिंशत् कलाः । कल संख्याने । कलयति 'कला' । अच् (पा० ३।१।१३४) । टाप् (पा० ४।१।४) ।। **एकं (त्रिंशत्काष्ठावच्छिन्नकालस्य) ।।११३।।** **कला**

ताः । कलास्त्रिंशत् 'क्षणः' । क्षणू हिंसायाम् । अच् (पा० ३।१।१३४) ।। **एकं (त्रिंशत्कलावच्छिन्नकालस्य) ।।** **क्षणः**

ते तु क्षणा द्वादश 'मुहूर्तः' । हुर्छा कौटिल्ये । बाहुलकाद् "अञ्जिघृषी" ति (उ० ३।८६) क्तः, मुडागमश्च । "राल्लोप" (पा० ६।४।२१) इति छकारलोपः । "हलि चे" (पा० ८।२।७७) ति दीर्घः ।। **एकं (द्वादशक्षणावच्छिन्नकालस्य) ।।११४।।** **मुहूर्तः**

ते तु मुहूर्तास्त्रिंशद् 'अहोरात्रः' । अह्ना सहिता रात्रिरिति समासः द्वन्द्वो वा । गणरात्रवदच् (पा० ५।४।८७) । "अह्नो रुविधौ रूपरात्रिरथन्तरेषु उपसंख्यानम्" (वा०) इति रुः । 'अहोरात्रः' । "द्वन्द्वे तु अहोरात्राविमौ पुण्यौ*" इति स्वामी । एवं समाहारे क्लीबमपि । अहोरात्रम्" । वामनलिङ्गानुशासने "द्विगुरपि पात्राद्यदन्त" इति नपुंसकत्वेन अहोरात्रं द्विरात्रमित्युदाहृतम् —इति सुभूतिः ।। **एकं (त्रिंशन्मुहूर्तावच्छिन्नकालस्य) ।।** **अहोरात्रः** **(अहोरात्रम्)**

---

438 हायनः स्त्री—B_1.

* स्याताम्—रघुनाथः ।

पक्षः

ते पञ्च दशाहोरात्राः 'पक्षः'। पचति भूतानि । पचेः "वृतृवदिहनिकमिकशिभ्यः स" (उ० ३।६२) इति बाहुलकात् सः। "क्षयति। अच् (पा० ३।१।१३४)। पृषोदरादित्वाद् (पा० ६।३।१०९) वर्णविपर्यये पक्ष" इत्यन्यः ।। **एकं (पञ्च-दशाहोरात्रावच्छिन्नकालस्य) ।।११४।।**

पूर्वः, अपरः

पक्षौ इति । शुक्लपक्षः पूर्वसंज्ञः । कृष्णपक्षः अपरसंज्ञः ।। **क्रमेणैकैकं (शुक्लकृष्णपक्षयोः) ।।**

मासः

तौ पक्षौ । मासः चन्द्रस्य अयं 'मासः'। एतच्चान्द्रेण मानेन। सौरादिमानैस्तु मस्यते परिमीयतेऽनेनासौ वा।

(मास्)

मसी परिमाणे। "हलश्चे" (पा० ३।३।१२१) ति घञ्। पृषोदरादित्वात् (पा० ६।३।१०९) हलन्तोऽप्ययम्। "तौ द्वौ वर्षांशकश्रामो[439] वर्षाङ्गमा अहर्गण" इति नामनिधानात्। **एकं (पक्षद्वयावच्छिन्नकालस्य) ।।**

ऋतुः

द्वाविति। द्वौ द्वौ माघादिमासौ 'ऋतुः'। इयर्ति। "अर्तेश्चे" ति (उ० १।७२) तुः। चकारेण कित्त्वाद् गुणाभावः। माघफाल्गुनौ शिशिरर्तुः। एवं द्वाभ्यां द्वाभ्यामपरे पञ्च। ननु च--"षडमी ऋतवः पुंसि मार्गादीनां युगैः क्रमाद्" इत्यादि वक्ष्यते। तत् कथं "द्वौ द्वौ माघादिमासौ ऋतुः" इत्युच्यते? सत्यम्। एतदयनप्रदर्शनार्थमुक्तम्। "मार्गादिमासा" वित्युच्यमाने हेमन्तशिशिरवसन्तैस्त्रिभिरयनमुक्तं स्यात्। न च तैरयनं। किन्तु शिशिरवसन्तग्रीष्मैः प्रावृट्शरद्धेमन्तैश्च। अतः प्रकृतोपयुक्तमिदमुक्तम्। वास्तवं तु वक्ष्यते--"मार्गादीनां युगै"रिति। अनुवादश्चायं, न विधिरित्यतो वक्ष्यमाणेन सह न पौनरुक्त्यम् ।। **एकं (मासद्वयावच्छिन्नकालस्य) ।।**

अयनम्

तैस्त्रिभिः ऋतुभिरेकम् "अयनम्'। अयतेऽर्कोऽनेनेति। इण् गतौ। ल्युट् (पा० ३।३।११७)।। **एकम् (ऋतुत्रयावच्छिन्न-कालस्य ।।११५।।**

उत्तरायणम्

अयने इति। द्वे अयने। के ते? अर्कस्य उत्तरा गति-

439 मासा—B_2.

दक्षिणा च। उत्तरा गतिर्माघादारभ्याषाढपर्यन्तमुत्तरायणम्। दक्षिणा गतिः श्रावणादारभ्य पौषपर्यन्तं[440] दक्षिणायनम् ।। **अयनद्वयस्यैकैकम् ।।**

दक्षिणायनम्

*वत्सरः

समेति। रात्रिन्दिवम्। "अचतुर" (पा० ५।४।७७) इत्यादिना साधु। समं रात्रिन्दिवं यत्र। विषु साम्येऽव्ययम्। तद्विद्यतेऽस्येति मतुप् (पा० ५।२।९४)। "संज्ञायाम्" इति (पा० ८।२।११) वत्वम्। 'विषुवत्' ।।

विषुवत्

'विषुवम्' इति। वप्रकरणे "अन्यत्रापी" (वा० ५।२।१०९)(क) ति वः। "विषुवान् समरात्रिवासरः काल" इति तु पुंस्काण्डे वोपालितः। "विषुवोऽप्यत्र"[441] इति "लोमादि" (पा० ५।२।१००) सूत्रे रक्षितः ।। **द्वे विषुवस्य ।।११६।।**

विषुवम्

(विषुवः)

[**पुष्ययुक्तेति**। सुबोधः ।[442](?)]

मार्गशीर्षः

मार्गेति। मृगशिरसा युक्ता पौर्णमासी। "नक्षत्रेण युक्तः-कालः" (पा० ४।२।३) इत्यण्। "अचि शीर्ष" (वा०) ६।१।६२)इति शीर्षादेशः। मार्गशीर्षी पोर्णमासी अस्मिन् इति "साऽस्मिन् पौर्णमासीति संज्ञायाम्" (पा० ४।२।२१) इत्यण्। 'मार्गशीर्षो' मासः। एवं पौषादिरपि ।।

"मार्गपौषयोः प्राणिनां बलम् उपचीयत" इति वैद्यकम्। ततः सहो बलमुपचीयते[443]ऽस्मिन्निति 'सहाः'। सहःशब्दा-"न्मत्वर्थे मासतन्वो" (पा० ४।४।१२८) रिति यत्। "तस्य लुगकारेकाररेफाश्च वक्तव्या" (वा० ४।४।१२८) इति वा लुक्। अलुक्पक्षे तु "सहस्यः"। स पौषे रूढः। "अथ[444] मार्गे सहः सहाः" इति शब्दार्णवात् अदन्तोऽपि सहशब्दः। तथाच--"सहस्य प्रथमे मासि वाहयेद् दोषसञ्चयम्" इति चरकम् ।।

सहाः

(सहः)

(सहस्यः)

मृगशिरा[445] एव मृगः। "तथा मृगशिरा मृग" इति

मार्गः

440 पौषं यावत्—B_1.

441 विषुणः—B_2.

443 उपचितम्—B_1.

445 मृगशिर—B_2.

(क) अन्येभ्योऽपि दृश्यते—महाभाष्यम्।

442 Found only in I. O. ms. 558.

444 तत्र—B_1.

रुद्रकोषात्। तद्युक्ता पौर्णमासी मार्गी। ततः पूर्ववदण्णादिः (पा० ४।२।३, ४।१।१५, ४।२।२१)। 'मार्गः'॥

आग्रहायणिकः (आग्रहायणः)

'आग्रहायणीयोगाद् 'आग्रहायणिकः'। "आग्रहायण्यश्वत्थाट् ठक्" (पा० ४।२।२२)। "ज्योत्स्नादित्वादणि (वा० ५।२।१०३) आग्रहायणोऽपी" ति पुरुषोत्तमः॥ **चत्वारि मार्गमासस्य॥**

पौषः तैषः

पौष इति। पौषतैषौ पूर्ववत् (पा० ४।२।३, ४।१।१५, ४।२।२१)। "पुष्यतिष्ययोर्नक्षत्राणि यलोपो वक्तव्य" (वा० ६।४।१४९) इति यलोप इति तु विशेषः॥

सहस्यः

'सहस्य' इति। "तत्र साधु" रिति (पा० ४।४।९८) यत्॥ **त्रीणि पौषस्य॥**

तपाः

तपा इति। तपतेरसिः (उ० ४।२२६)। तपः*। पुण्यमासत्वात् तपोऽत्रास्ति 'तपाः'। सान्तः। सहोवत् साधनम् (पा० ४।४।१२८)॥

माघः

मार्गव'न्माघः'॥ **द्वे माघस्य॥**

फाल्गुनः फाल्गुनिकः (फल्गुनः)

अथेति। "फलेर्गुक् च" (उ० ३।५६) इत्युनन्। फल्गुन्यौ ह्रस्वादी। "फल्गुन्योः काले जात इति "फल्गुन्यषाढाभ्यां टाना" (वा०) विति टप्रत्यये फल्गुनोऽर्जुनेऽपि ह्रस्वादि" रिति रूपरत्नाकरः। "फल्गुनस्त्वर्जुने मासे नक्षत्रे फल्गुनी स्मृता" इति[446] गोवर्धनानन्दः। कातन्त्रोणादौ (क) तु "पिशुनफाल्गुना" विति वृद्धि निपात्य "फाल्गुनोऽर्जुन" उक्तः[447]"। "फाल्गुनस्त्वर्जुने मासि (ख) फाल्गुनी चास्य पूर्णिमा" इति धरणिश्च (ग)। फल्गुनीभिर्युक्ता पौर्णमासी फाल्गुनी। "विभाषा फाल्गुनी" (पा० ४।२।२३) त्यादिना ठगणौ। 'फाल्गुनिकः', 'फाल्गुनः' ॥११७॥

---

* "सर्वधातुभ्यः असुन्" (४।१८८) seems to be appropriate here.

446 B_2 दन्त्यान्ते।

447 फाल्गुनोऽर्जुने दृष्टः—A.

(क) कातन्त्रेण आदौ—A.

(ख) मासे—भानुजिः

(ग) रघुनाथ wrongly ascribes it to मेदिनि।

तपस्यः

तपसि साधुः (पा० ४।४।९८) 'तपस्यः'॥ **त्रीणि फाल्गुनस्य॥**

*चैत्रः चैत्रिकः मधुः

स्यादिति। 'चैत्रिकः' फाल्गुनिकवत् (पा० ४।२।२३)॥ मन्यते सर्वत्र कामदेवोऽत्र। मन ज्ञाने। "फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्चे" (उ० १।१९) ति उः। धश्चान्तादेशः। 'मधुः'। यद्वा मधुर्वसन्तोऽत्रास्तीति मत्वर्थे "मधोर्ञ चे" (पा० ४।४।१२९) ति ञस्य वा लुकि 'मधुः'॥ **त्रीणि चैत्रस्य॥**

(वैशाखः) माधवः

वैशाख इति। पुष्पगतं मध्वत्रास्ति। "मधोर्ञ चे" (पा० ४।४।१२९) ति ञः। 'माधवः'।

राधः

राधया युक्ता पौर्णमासी राधी (पा० ४।२।३, ४।१।१५)। ततः पूर्ववदणि (पा० ४।२।२१) 'राधः'॥ **त्रीणि वैशाखस्य॥**

ज्यैष्ठः (ज्येष्ठः)

ज्यैष्ठ इति। 'ज्यैष्ठ' इत्यण्द्वयेन पूर्ववत् (पा० ४।२।३, ४।१।१५, ४।२।२१)। संज्ञापूर्वकत्वाद् वृद्ध्यभावे 'ज्येष्ठो'ऽपि। "ज्येष्ठो मासि च वृद्धे च ज्येष्ठा च गृहगोधिका" इति त्रिकाण्डशेषः। "प्रणाशो मित्रस्य प्रसभमजनि ज्येष्ठविरह"* इति कुमारदासद्व्यर्थसिद्धः (जानकीहरण, ११।९२)॥

शुक्रः

शुक् (पा० ३।२।१७८) शोचनमस्त्यत्र। शुक्शब्दात् "लुगकारेकाररेफाश्च वक्तव्या" (क) इति 'शुक्रः'॥ **द्वे ज्यैष्ठस्य॥**

शुचिः आषाढः

शुचिस्त्विति। अग्नौ 'शुचि' (स्व० ५१) रुक्तः ॥११८॥ अषाढा नक्षत्रम्। ततः पूर्ववदण्द्वयेन (पा० ४।२।३, ४।१।१५, ४।२।२१)। 'आषाढः'।

"अयम्" इति—शुचेः पुंस्त्वव्यक्त्यर्थम्[448]। "नक्षत्रे

(क) काशिका has शुक्र with र in terms of this वार्त्तिक under पा० ४।४।१२८ but भानुजि employs उ० २।२८ while दशपादी (८।४६) derives it from शुभ दीप्तौ। मैत्रेय derives it from शुक गतौ। सायण in his धातुवृत्ति (p. 58) rejects this as अनार्षः।

* Variant प्रसभरचित—ed. हरिदास शास्त्री

448 शुचेः पुंस्त्वार्थम्—B_1.

(अषाढ़ः) "अषाढेत्यव्युत्पन्नं मूर्धन्यवत् ह्रस्वादि" इति "श्रविष्ठादि" (पा० ४।३।३४) सूत्रे रक्षितः। "यद् रोहिणीयोगफलं तदेव सूतेऽषाढासहिते च चन्द्र" इति वराहः। मासे तु पृषोदरादित्वाद् (पा० ६।३।१०९) द्वैरूप्यं। "स्यादाषाढेत्वषाढक" इति शब्दार्णवः। "आशा दिशो ढौकत" इति तालव्यवानपि* (इति) जातोकवचनम् अमूलकम्[449] ।। **द्वे आषाढस्य ।।**

श्रावणः **श्रावण इति।** शृणोते"र्बहुलमन्यत्रापी" (पा० ३।३।१३०) ति युच्। श्रवणा। पूर्ववदणि (पा० ४।२।३, ४।१।१५, ४।२।२१) 'श्रावणः'। मध्यवकारवान्। "स्त्रीपुंसयोर्ऋक्षभेदे श्रवणं श्रुतिकर्णयो" रिति रभसकोषात् ।।

नभाः नभसो मेघाः सन्त्यत्र 'नभाः'। सहोवत् (पा० ४।४।१२८)। "धनुर्धरे त्रिषु नभाः क्लीबं व्योम्नि पुमान् घने। घ्राणश्रावणवर्षासु विसतन्तौ पतद्ग्रहे" इति मेदिनिः। "न भासनं मेघाच्छन्नत्वादस्य नभा" इति तु स्वामी ।।

श्रावणिकः 'श्रावणिक' इति "विभाषा फाल्गुनी" (पा० ४।२।२३) त्यादिना ठक् ।। **त्रीणि श्रावणस्य ।।**

नभस्यः **स्युरिति।** तपस्यवत् (पा० ४।४।९८) 'नभस्यः' ।।

प्रोष्ठपदः प्रोष्ठपदी पौर्णमासी। ततः पूर्ववदण् (पा० ४।२।३, ४।१।१५, ४।२।२१)। ('प्रोष्ठपदः'।) ।।

भीम-भामेतिवद् एकदेशे व्यवहाराद् भद्रया युक्ता भाद्री।
भाद्रः ततः पूर्ववदणि (पा० ४।२।३, ४।१।१५, ४।२।२१) 'भाद्रः' ।।

भाद्रपदः एवं 'भाद्रपदः' ।। **चत्वारि भाद्रपदस्य ।।११९।।**

आश्विनः **स्यादिति।** 'आश्विनः' पूर्ववत् (पा० ४।२।३, ४।१।१५, ४।२।२१) ।।

इषि गतौ। एषणम् इट् (पा० ३।२।१७८) यात्रा। साऽस्मिन् मासे जिगीषूणामस्ति। अचि (पा० ५।२।१२७)

* "आशा दिशो ढौकतेऽत्र इति ड-प्रत्यये तालव्यवानप्युक्तमासस्य वाचक––इति जातरूपः।" रघूनाथः।

449 जातक—B_1., जातोर्वचनम्—B_2.

'इषः'। समूर्धन्यः ।। "ध्वनिमिषेऽनिमिषेक्षणमग्रतः" इति (६।४९) माघयमकात् ।। इषः

'अश्वयुक्' अश्विनी। तत आश्वयुजी (पा० ४।२।३, ४।१।१५) पौर्णमासी। ततो मासे पूर्ववदण् (पा० ४।२।२१)। 'आश्वयुजः'। पृषोदरादित्वाद्ध्रस्वोऽपि (पा० ६।३।१०९)। आश्वयुजः "आश्विनोऽश्वयुजश्चेष"(क) इत्यमरमाला ।। **आश्विनादि** (अश्वयुजः) **त्रीणि आश्विनस्य ।।**

स्यादिति। 'कार्त्तिकः' पूर्ववत् ।। कार्त्तिकः

बहुलाः कृत्तिकाः। पूर्ववदणि (पा० ४।२।३, ४।१।१५, बाहुलः ४।२।२१) 'बाहुलः' ।।

"ऊर्जमुत्साहमाहु" रिति नाममाला। तदत्र मासे जिगीषतामस्ति। अचि (पा० ५।२।१२७) 'ऊर्जः' ।। ऊर्जः

'कार्त्तिकिक' इति श्रावणिकवत् ठक् (पा० ४।२।२३)।। कार्त्तिकिकः **चत्वारि कार्त्तिकमासस्य ।।**

हेमन्त इति। हन्ति दुःखं 'हेमन्तः'। "हन्तेर्मुट् हि च" हेमन्तः इति (उ० ३।१२९) झच्, हिरादेशो मुडागमश्च। 'हेमा'पि। यद् भाष्यं––"हेमन्तस्य तलोपवचनानर्थक्यं हेम्नः प्रकृत्यन्तरस्य (हेमः) सत्वा"दिति* (महाभाष्य ४।३।२२) ।। मार्गपौषाभ्यां हिम ऋतुः। **तस्यैकम् ।।**

शीति। 'शिशिरो' द्वितालव्यः। प्रागुक्तः (दिक् ८९) ।। शिशिरः **एकं माघफाल्गुनाभ्यां ऋतोः ।।१२०।।**

वसन्त इति। वसति कामोऽत्र 'वसन्तः'। "तॄभूवही" वसन्तः त्यादिना (उ० ३।१२८) झच् ।। *पुष्पसमयः

सुष्ठु रभन्ते रभसयुक्ता भवन्ति इति 'सुरभिः'। सुरभिः सुपूर्वात् रभेः "सर्वधातुभ्य" (उ० ४।११७) इतीन् ।। **त्रयं चैत्रवैशाखाभ्याम् ऋतोर्वसन्तस्य ।।**[450]

ग्रीति। गिरति पीडयति प्राणिनः। "घर्मसीमभीमग्रीष्म"

(क) "आश्विनोऽश्वयुजश्चैत्रेति हड्डः––रघुनाथः।

* ...वचनमनर्थकं—B_2.

450 A- omits वसन्तस्य।

(उ० ११४६) इत्यौणादिकनिपातनसूत्रेण(क) गिरतेर्मक्-
ग्रीष्मः प्रत्ययः, ग्री-आदेशः, सुडागमश्च निपात्यते। 'ग्रीष्मः'॥

ऊष्मकः ऊष्मैवो'ष्मकः'। उष दाहे। बाहुलकान्मनिन् (पा० ३।२।७५) दीर्घश्च। यावादिपाठात् (पा० ५।४।२९) कन्। मकि (उ० ११४४) अदन्तोऽपि। "ऊष्म घर्मेऽश्रुणि तथा। ज्यैष्ठे[451] तूष्माऽस्त्रियां त्विषी" ति वोपालितात्[452]॥

नितान्तं दह्यतेऽत्र निपूर्वाद्दहेः "हलश्चे" ति (पा० ३।३।१२१) घञ्, न्यङ्क्वादित्वात् (पा० ७।३।५३) कुत्वम्।
निदाघः 'निदाघः'॥

उष्णोपगमः उष्णाणामुपगमोऽत्रेति 'उष्णोपगमः'॥

उष्णः ओषति(ख)। उष दाहे। "इण्सिञ्जिदीङुष्यविभ्यो नक्" (उ० ३।२)। 'उष्णः'।

ऊष रुजायाम्। मनिन् (पा० ३।२।७५)। 'ऊष्मा'।
ऊष्मागमः "ऊष्मा तापनिदाघयो" रिति नान्ते वोपालितः। 'ऊष्मागम' इत्यन्योपपदनिवृत्त्यर्थम्॥(ग)

तपः तपति 'तपः'। असि (पा० ३।१।१३४) अदन्तः। "तपेन वर्षाः शरदा हिमागम" (११६६) इति माघः॥ **सप्त ग्रीष्मर्तोः। स च ज्यैष्ठाषाढाभ्याम्॥१२१॥**

स्त्रियामिति। प्रकृष्टं वर्षमत्र 'प्रावृट्'। पान्ता। "पृषु-
प्रावृट् वृषुमृषु सेचने। संपदादित्वात् क्विप् (वा० ३।३।१०८)। "नहि वृती" (पा० ६।३।११६) त्यादिना दीर्घः॥

वर्षाः वर्षणं वर्षम्। तदतिशयि अत्र अस्ति। अचि (पा०

(क) निपातसूत्रेण—B_1. . . .षुगागमः—उज्ज्वलदत्तः। "ग्रसु अदने। अस्योपधाया ईत्वं षश्चान्तादेशः। ग्रसते जनान् स्वतेजसा इति ग्रीष्मः"—दशपादी (७।३७); the rule eited by राय is not found in any available उणादि

451 ग्रीष्मे—B_2., ज्येष्ठे—भानुजिः।

452 तारपालात्—B_2., "उष्मो घर्मेऽश्रुणि ज्यैष्ठे पुमानुष्मा स्त्रियां त्विषि—इति तारपालः"—रघुनाथः। उषकः—Colebrooke

(ख) उषति—B_1.

(ग) अन्योपसर्ग—B_1.

५।२।१२७) टाप् (पा० ४।१।४)। वर्षन्ति मेघा अत्रेति वा।(क) अच्, टाप् (पा० ३।१।१३४, ४।१।४)। 'वर्षाः'। 'भूम्नी' ति बहुत्वे। **द्वयं वर्षाख्यर्तोः। स च श्रावणभाद्राभ्याम्।**

अथेति। शीर्यन्तेऽस्यां पाकेनौषधयः, शृणाति हिनस्ति तापेन वा। "शृदृभसोऽदिः" (उ० ११२९)। 'शरत्'। शरद्
दान्ता। भागुरीयटापि 'शरदा'पि। तथा च—"शरद्भवेच्छरदया (शरदा)
प्रावृट् प्रावृषया सह" इति विश्वः॥ **एकमाश्विनकार्त्तिकाभ्या-मृतोः॥**

षडमी। अमी हेमन्तादयः षट् मार्गादीनां मासानां द्वयेन द्वयेन 'ऋतवः' पुंसि भवन्ति। ऋ गतौ। "केत्वादय" (उ० ऋतवः
१।७२) इति तुन्[453]। **हेमन्तादीनां षण्णामेव प्रत्येकमेकम्॥१२२॥**

संवेति। संवसन्ति ऋतवोऽत्र। संपूर्वाद् (वसतेः) "वसेश्चे" (उ० ३।७१) ति सरन्।[454] "सः स्यार्धधातुके" (पा० ७।४।४९) इति सस्य तकारः। "वा पदान्तस्य" (पा० ८।४।५९) इति पक्षे सानुनासिको वकारः। पक्षे अनुस्वारः। सव्वँत्सरः,* 'संवत्सरः'। अनुस्वारपक्षेऽपि वकारस्य दन्तौष्ठ- संवत्सरः
त्वात् न मत्वम् (पा० ८।४।५८)॥

एवं 'वत्सरः'। "संवत्सरानुवत्सरपरिवत्सरवत्सराः" वत्सरः
इति शब्दार्णवः॥

आप्यतेऽसौ। आप्लृ व्याप्तौ। "अब्दादयश्च" (उ० ४।९८) इति दन्, ह्रस्वत्वं च। ['अब्दः']॥ अब्दः

(क) वर्षन्तीत्यत्र मेघा वा—B_1.

453 तुः—B_1. उज्ज्वलदत्त and others derive ऋतु with तु। cf. "अर्तेश्च तुः" (उ० १।७२)। With the same suffix केतु has been formed. cf. "चायः किः" (उ० १।७४)। The rule refered to by राय° could not be traced.

454 उज्ज्वलदत्त, दशपादी (८।५१) and others have सरन्। भट्टोजि, ज्ञानेन्द्र सरस्वती and others make it सर। In the महाभाष्य, however, we have both सर and सरन्। cf. "अश्नोतेर्वा सरोऽक्षरम्" and "अश्नोतेर्वा पुनरयमौणादिकः सरन्-प्रत्ययः।" (महाभाष्य, आ० २, under "लण्")

* सँव्वत्सरः—B_1.

जहाति, जिहीते वा।(क) "हश्च व्रीहिकालयो"रिति
हायनः (पा० ३।१।१४८)ल्युट्। 'हायनः'। [ग्र–] स्त्रीति संबन्धः।
"हायनः स्त्री" ति पाठे "शरद्" इत्यन्वयः ॥
शरत् ('शरत्')। प्रज्ञादित्वात् (पा० ५।४।३८) "शारदो'पि।
(शारदः) "समा योषिति शारदे" इति रत्नकोषात्॥

समतीति 'समः'। सम-ष्टम वैक्लव्ये। दन्त्यादिः। पचाद्यच् (पा० ३।१।१३४), टाप् (पा० ४।१।४)। "समन्ति
समाः समाः।(ख) सह मान्ति ऋतवोऽस्यां वा समा" इति तु स्वामी। "समा नित्यबहुवचनान्ता" इत्येके। तथाच वामनः–"समा-सिकता-वर्षाप्-सुमनो-जलौकस" इति। "समां समां विजायत" (पा० ५।२।१२) इति निर्देशात्, "समायां समायाम्" इति वृत्तिदर्शनाच्च एकत्वमपि दृश्यते। ग्रतएवायं कुशलो "भूम्नी"ति न निश्चितवान्। बहुवचनेन तु बहुवचनान्तत्वं सूचयति स्म।
षट् वत्सरस्य ॥

पैत्रः **मासेनेति**। मानुषेणेति शेषः। मानुषेण मासेन पितृणां कव्यवाहादीनाम्[455] 'ग्रहोरात्रः।[456] मानुषेण वर्षेण देवानामहो-
दैवतः रात्रः।[456] 'पैत्र'-'दैवत'योः "तस्येदम्" (पा० ४।३।१२०) इत्यण्। तत्र पितृणां कृष्णपक्षो दिनं शुक्लपक्षो रात्रिः। उत्तरायणं देवानां दिनं दक्षिणायनं रात्रिः ॥**१२३**॥

ब्राह्मः देवानां युगसहस्रद्वयेन ब्रह्मणोऽहोरात्रः। 'ब्राह्म' इति पूर्ववदण् (पा० ४।३।१२०)। "ब्राह्मोऽजाता" विति (पा० ६।४।१७१) टिलोपः। मानुषेण चतुर्युगेन देवानामेकं युगम्। लैङ्गे युगमानं यथा–

"पूर्वं कृतयुगं नाम ततस्त्रेताभिधीयते।
द्वापरश्च कलिश्चैव युगान्येतानि सुव्रताः[457] ॥
सहस्राणां शतान्यासंश्चतुर्दश च संख्यया।
चत्वारिंशत्सहस्राणि तथान्यानि कृतं युगम् ॥

(क) "जहाति ऋतून्—इति रायः"—रघुनाथः। (ख) समा समन्ति—B_1.
455 कव्यवालादीनाम्—B., B_1. 456 ग्रहोरात्रम्—A.
457 युगा एते हि विश्रुताः—B_2. . . . . .त्रेता विधीयते—सर्वानन्दः।

तथा दशसहस्राणि वर्षाणां शतसंख्यया।
ग्रशीतिश्च सहस्राणि कालस्त्रेतायुगस्य च ॥
सप्तैव नियुतान्याहुर्वर्षाणां मानुषाणि च।
विंशतिश्च सहस्राणि वर्षाणां शतसंख्यया ॥[458]
षष्टिश्चैव सहस्राणि कालः कलियुगस्य च।(क)
एवं चतुर्युगः कालः ऋतुसन्ध्यांशकात् स्मृतः ॥[459]

ज्योतिषे तु–
"वस्वश्विमैत्रा ऋतुरन्ध्रमासा वेदा रसाष्टौ भुज-
वह्निवेदाः।[460]
एतानि शून्यत्रयभाजितानि[461] युगाब्दसंख्यापरिकीर्ति-
तानि ॥'

एतच्च मानुषमानेन सत्यादीनां मानम्। तदङ्केनापि यथा–

सत्यस्य–	१७२८०००	त्रेतायाः–	१२९६०००
द्वापरस्य–	८६४०००	कलेः–	४३२०००

इदानीं च शकाब्दाः–१३५३[462] द्वात्रिंशदब्दाधिकपञ्च-शतोत्तरचतुःसहस्रवर्षाणि कलिसन्ध्याया भूतानि[463]। ४५३२। तथाच गणितचूडामणौ महिन्तापनीयराजपण्डितश्रीनिवासः[464] –कलिसन्ध्यायाः खसमयकरकृतवर्षाणि भूतानि–४२६०। तच्च ब्रह्मणो दिनम्। नृणां द्वौ कल्पौ। ग्रत्रापि स्थितिकालो

458 कालः स द्वापरस्य तु—सर्वा०°। (क) . . .युगस्य तु—B_1.
459 ऋते सन्ध्यांशकात्—B_2. सर्वानन्द here adds a line more—"तथा शतसहस्राणां वर्षाणां त्रीणि संख्यया।"
* वस्वक्षिमैत्राः—रघुनाथः।
460 भुजवह्निदेहाः—सर्वा°
461 शून्यत्रयभाजितानि—B_1.; शून्यत्रयताडितानि—सर्वा°
462 १३६३—A. 463 कलिसंख्याया—B_2.
464 महिन्तापनीयराजपण्डित omited by सर्वा°। According to this calculation श्रीनिवास's date of writing corresponds to 1159 A.D. while that of राय° corresponds to 1431 A.D.

भूतानां ब्रह्मणो दिनं, प्रलयकालश्च भूतानां ब्रह्मणो रात्रिः। तथाच लैङ्गे—

"चतुर्दशसहस्राणि[465] कल्पश्चैको द्विजोत्तमाः।
निशान्ते[466] सृजते लोकान् नश्यन्ति निशि जन्तवः॥
कोटीनां द्वे सहस्रे तु अष्टौ कोटिशतानि च।
द्विषष्टिश्च तथा कोटचो नियुतानि च सप्ततिः॥
कल्पस्य संख्या कथिता कल्पशेषं तु कल्पयेत्।[467]
कल्पानां वै सहस्रं तु[468] वर्षमेकमजस्य तु॥
कल्पानामष्टसाहस्रं ब्राह्मणैर्ब्रह्मणो युगम्॥" इति॥

मन्वन्तरम् **मन्वन्तरमिति।** दिव्यानां युगनामेकसप्तति 'मन्वन्तरम्'। मनोरन्तरम् अवकाशः, अवधिर्वा अत्र इति 'मन्वन्तरम्'। "सुप्सुपे"ति (पा० २।१।४) समासः। तदुक्तं लिङ्गपुराणे—

"एवं चतुर्युगाख्यानां साधिका ह्येकसप्ततिः।
कृतत्रेतादियुक्तानां मनोरन्तरमुच्यते॥
मन्वन्तरस्य संख्या च वर्षाग्रेणेह कीर्तिता।
त्रिंशत् कोटचस्तु वर्षाणां मानुषेण द्विजोत्तमाः॥
सप्तषष्टिस्तथान्यानि नियुतान्यधिकानि तु।
विंशतिश्च सहस्राणि कालोऽयं साधिकं विना॥
मन्वन्तरस्य संख्यैषा लिङ्गेऽस्मिन् कथिता द्विजाः।"
मनवो ब्रह्मसुताश्चतुर्दशैव। तथाच ब्रह्मपुराणे(क)—

465 चतुर्युगसहस्रो वै—B_1. 466 निश्यन्ते—A., सर्वा°
467 "कल्पान्तसंख्या दिव्या वै कल्पमेवं तु कल्पयेत्"—सर्वा° 468 सहस्रे तु—A.
(क) "तथाच विष्णुपुराणे—मनुः स्वायम्भुवो नाम मनुः स्वारोचिषस्तथा।
. . . .
षडेते मनवोऽतीताः सप्तमस्तु रवेः सुतः।
सावर्णिदक्षसावर्णो ब्रह्मसावर्ण इत्यपि।
धर्मसावर्णरुद्रस्तु सावर्णो रौच्यभौत्यवत्॥ इति मन्वन्तरमनोनयनम्। नाम-निधाने सर्वज्ञश्रीनारायणचरणाः—
"दैविकानां युगानां तु सहस्रं ब्रह्मणो दिनम्।
मन्वन्तरं तथैवैकं तस्य भागाश्चतुर्दश॥" इत्यनेन

"स्वायम्भुवो मनुस्तात[469] मनुः स्वारोचिषस्तथा।
औत्तमिस्तामसिश्चैव रैवतश्चाक्षुषस्तथा॥
षडेते मनवोऽतीताः साम्प्रतं[470] तु रवेः सुतः।
वैवस्वतोऽयं यस्यैतत् सप्तमो वर्तते युगम्॥" इति॥

"एकसप्तति" रिति। यद्यपि गणनया सार्धयुगेनाधिका सा(क)। यथाहुर्नामनिधाने सर्वज्ञश्रीनारायणचरणाः—

"दैविकानां युगानां तु सहस्रं ब्रह्मणो दिनम्।
मन्वन्तरं तथैवैकं तस्य भागाश्चतुर्दश॥
तत् किञ्चिदधिका दिव्ययुगानामेकसप्ततिः॥" इति।

तथाप्यल्प(ख)त्वात्तदिह नोक्तम्। अपरे सप्त मनवः—

सावर्णिर्दक्ष[471] सावर्णो ब्रह्मसावर्ण इत्यपि।
धर्मसावर्णरुद्रस्तु सावर्णो रौच्यभौत्यवत्॥(ग) एते चतुर्दश मनवः॥ **एकं मन्वन्तरस्य॥१२४॥**

संवर्त इति। संवर्तते उपरमते जगदत्रेति 'संवर्तः'। **संवर्तः** "हलश्चे"ति (पा० ३।३।१२१) घञ्। वृत्तिरत्रावसानार्थः। यथा लोकोऽयं निवृत्तः[472]। उपरत इत्यर्थः॥

प्रलीयतेऽत्रेति। लीङ श्लेषणे। "एरच्" (पा० ३।३।५६)। 'प्रलयः'॥ **प्रलयः**

कल्पन्ते विरुद्धलक्षणया क्षीयन्तेऽत्र। "पुंसि संज्ञायाम्" (पा० ३।३।११८)इति घः। "कृपो रो ल"(पा० ८।२।१८) इति लत्वम्। 'कल्पः'॥ **कल्पः**

एवं क्षीयतेऽत्र 'क्षयः'। पूर्ववद् घः (पा० ३।३।११८)॥ **क्षयः**

स्फुटमेव उक्तवन्तः। तथाचैकस्य मन्वन्तरस्य ३०८५७१४२८ दिनानि, षट् मासाः, २५ दिनानि, ४२ घटिकाः, साग्राण्येकपञ्चाशत्पलानि भवन्तीति मुकुटाशयः।"—शिवदत्तः।

469 मनुः पूर्वं—A. 470 सप्तमस्तु—A.
(क) सार्धे युगेऽधिकानां सा—A.
(ख) तथाप्यन्यत्वात्—A. प्यनल्पत्वात्? 471 दक्षि—B_2.
(ग) धर्मसावर्णरुद्रसावर्णौ रौच्यभौत्यवत्—A.; धर्मसावर्णश्च रुद्रसावर्णो—B_1.
472 लोकोऽमितिवृत्तः—B_1., cf. अमुको निवृत्तः—सर्वानन्दः।

कल्पान्तः कल्पस्य ब्रह्मदिनस्यान्तोऽवधिः। एकः कल्पोऽत्र क्षयार्थः। अन्यस्तु ब्रह्मणो दिनार्थः। "कल्पः शास्त्रे विधौ न्याये संवर्ते ब्रह्मणो दिने" इति शाश्वतः ॥ **पञ्च प्रलयस्य ॥**

अस्त्री पङ्कः[473] पुमान् पाप्मा पापं किल्विषकल्मषम् ॥१२५
कलुषं वृजिनैनोऽघमंहो दुरितदुष्कृतम् ॥

अस्त्रीति। पच्यते*ऽनेन। पचि व्यक्तीकरणे, पचि विस्तारे वा। "अकर्तरि चे"ति (पा० ३।३।१९) घञ्।
पङ्कः कुत्वम्। 'पङ्कः' ॥

पाप्मा प्राप्नोति व्याप्नोति 'पाप्मा'। "नामन्सीमन्नादि" (उ० ४।१५०) सूत्रे निपातितः ॥

पान्त्यस्मादात्नानं। पा रक्षणे। "पानीविषिभ्यः
पापः पः" (उ० ३।२३)। 'पापम्' ॥

किलति शिंतिं[474] कृष्णं करोति। किल शैत्यक्रीड़नयोः। "किलेर्वुक् चे"ति (उ० १।५१) टिषच्, वुगागमश्च।
किल्विषम् 'किल्विषम् ॥'

कल्मषम् कर्म शुभं श्यति तनूकरोति 'कल्मषम्'। पृषोदरादिः (पा० ६।३।१०९) ॥१२५॥

कलयति। "पॄनहिकलिभ्य उषच्" (उ० ४।७५)।
कलुषम् 'कलुषम्'। त्रीण्यपि मूर्धन्यषाणि ॥

वृज्यते। "वृजेः किच्चे"ति (उ० २।४७) इनच्।
वृजिनम् 'वृजिनम्' ॥

एनः यान्त्यधोऽनेन। इण् गतौ। "इण आगसि" (उ० ४।१९७) इत्यसुन्। नुट् च। 'एनः'। सान्तम् ॥

न हन्ति धन्यमिति। "अन्येभ्योऽपि" (पा० ३।२।१०१)
अघम् इति डः। न्यङ्क्वादित्वात् (पा० ७।३।५३) कुत्वम्। 'अघम्' ॥
अंहः अमति यात्यनेनाध इति। अम गत्यादिषु। "अमेर्हुक् चे"ति (उ० ४।२१२) असुन्, हुगागमश्च। 'अंहः'। ऊष्मोपान्तसान्तम्। "शीघ्रमंहोविघात" मिति अनुस्वारपरो

473 पङ्कम्—B_1.

* पञ्च्यते—A.

474 सिंति—A.

हकारो घकार इव श्रूयते इत्यक्षरभेदेऽप्येकत्वबुद्धेर्नागरानुप्रासमात्रम्। तदुक्तम्––

"एकत्वं बुद्धिभेदेऽपि तत्त्वेऽप्येकत्वनिह्नवः।
जायते यत्र वर्णानामनुप्रासः स उच्यते ॥(क)

"अहि गतावित्यतोऽसुना 'अंह' इति सिद्धे "अघिरघिलघि" इत्यतोऽसुन्-भ्रान्तिनिरासार्थम् "अमेर्हुक् च" (उ० ४।२१२) इति सूत्रम्"––इति हि भीमः। "उपाध्यायसर्वस्वे तु––"अंघतेरप्यसुन् मतभेदाद्"" इति कौमुदी ॥[475]

दुर्गमनमस्मात्। दुर्-पूर्वादिणो भावे क्तः (पा० ३।३।११४)। 'दुरितम्' ॥ **दुरितम्**

दुर् निन्दितं कृतं करणम् अस्य 'दुष्कृतम्'। **दुष्कृतम्** "इदुदुपधस्य" (पा० ८।३।४१) इत्यादिना षत्वम् ॥

द्वादश पापस्य ॥

स्याद् धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः ॥१२६॥
मुत् प्रीतिः प्रमदो हर्षः प्रमोदामोदसंमदाः।
स्याद् आनन्दथुरानन्दशर्मसात[476] सुखानि च ॥१२७॥
श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ॥
भावुकं भविकं भव्यं कुशलं क्षेममस्त्रियाम् ॥१२८॥
शस्तं चाथ त्रिषु द्रव्ये पापं पुण्यं सुखादि च[477]।
मतल्लिका मर्चाचिका प्रकाण्डमुद्घतल्लजौ ॥१२९॥
प्रशस्तवाचकान्यमून्ययः शुभावहो विधिः ॥१३०क ॥

(क) "तदुक्तम्––'एकत्वबुद्धेर्भेदेऽपि तत्त्वेऽप्येकत्वनिह्नवः।
यस्य शब्दस्य तं प्राहुरनुप्रासस्य जीवितम् ॥"
यथा––"हरेर्लङ्घितघर्मांशुर्व्योम्नि दीर्घेण रंहसा।
बलिवञ्चनघोषेऽङ्घ्रि रंहःसंघं विहन्तु वः।"
अत्र हकारघकारयोर्भेदेऽपि तुल्यश्रुतित्वादभेद––इति सुभूतिः।"––रघुनाथ।

475 "अहिरहिभ्यामसुना सिद्धे" अघिरघिभ्यामसुनि अंघो रंघ इति मा भूद्––इति सूत्रद्वयम्"––इति गोवर्धनः। "रंघः संघः सुराणाम्" (सूर्यशतके-७१) इति घकारपाठोऽनुप्रासरसिकानां प्रामादिक एव।––तत्त्वबोधिनी।

476 शात—B_1.; भानुजि।

477 पापपुण्यसुखादि च—B_1.

धर्मम् (धर्मः)

स्याद् इति। धरति विश्वम्। "र्अतिस्तुसुहुसृधृक्षी" (उ० १।१३९) ति मन्। अस्त्रियाम्। धर्मम्, धर्मः॥

पुण्यम्

पुनाति। "पूञो यण्णुग्ह्रस्वश्च" (उ० ५।१५) इति यत्-णुगागम*-ह्रस्वत्वानि। 'पुण्यम्'॥

श्रेयः

इदमनयोरतिशयेन प्रशस्तम्। ईयसुनि (पा० ५।३।५७) श्रादेशः (पा० ५।३।६०)। 'श्रेयः'। सान्तम्॥

सुकृतम्

'सुकृतम्'। शोभनं कृतं कर्म। विशेषणसमासः।[478]

वृषः

वर्षति इष्टम्। इगुपधत्वात् (पा० ३।१।१३५) कः। 'वृषः'॥ **पञ्च धर्मस्य**।[479] ॥१२६॥

मुत्

मुदिति॥ मोदनं 'मुत्'। दान्ता। मुद हर्षे। क्विप् (पा० ३।२।१७८)॥

प्रीतिः

'प्रीतिः'। प्रीञः क्तिन् (पा० ३।३।९४)। प्रीतिसाहचर्यात् मुदः स्त्रीत्वम्॥

प्रमदः, संमदः

'प्रमद'-'संमदौ' हर्षे (पा० ३।३।६८) इति निपातितौ॥

प्रमोदः, आमोदः
आनन्दः, (हर्षः)
आनन्दथुः

हर्षे 'प्रमोदामोदानन्दा'[480] घञन्ताः (पा० ३।३।१२१)॥
ट्वितोऽथुच् (पा० ३।३।८९)। 'आनन्दथुः'॥

शर्म

शृणात्यशुभम्। "सर्वधातुभ्यो मनिन्" (उ० ४।१४४)। 'शर्म'। नान्तम्॥

सातम् (शातम्)

सायत्यशुभम्।[481] 'सातम्'। षै क्षये। "हसिमृग्रिण्वामिदमिलूपूधुर्विभ्यस्तन्" (उ० ३।८६) इति बाहुलकात् तन्। अयं च दन्त्यादिः। तथाच देवीशतके अनुलोमप्रतिलोमयमकम्––"सातं वर्माननस्थारहसिरसिहरस्थाननर्मावतंसा"[482] इति। "श्यतेः सौत्रात् तालव्यादीत्यपर" इति तु कौमुदी। "स्यति दुःखं सातं। सोऽन्तकर्मणि" इति तु स्वामी(क)।

* णुडागमः—A.
478 सुकृतं दुष्कृतवत्—B_1
479 पुण्यस्य—B_1.
480 प्रमोदामोदसंमदानन्दाः—B_1.
481 सिनोत्यशुभम्—B_2, भानुजि°
(क) श्यति दुःखं शातं, शो तनुकरणे, तन्। —क्षीर (Oka's ed.)
482 "सातं वर्माननस्थारहसिहरिहरस्थाननर्मावतंसा"—शिवदत्तः। B_2 adds—"पायादक्ता रणत्रा मतनमनतमत्राणरक्ता दयापा"। सर्वा° quotes the full verse.

"षणु दाने। क्तः। "जनसनखना" (पा० ६।४।४२) मित्यात्वम्। सातम्"––इति सोमनन्दी॥

सुखम्

शोभनानि खानि इन्द्रियाण्यनेन, सुष्ठु खनति अशुभमिति वा 'सुखम्'। "जातिकालसुखादिभ्योऽनाच्छादनात्" इति स्वरसूत्रेण (पा० ६।२।१७०) सुपूर्वात् खनतेर्डः॥ **द्वादश प्रीतेः॥ "सप्त प्रीतेः, शेषं सुखस्य। प्रीतिः सुखजो विकार इत्यन्य"इति तु कौमुदी ॥१२७॥**

श्वःश्रेयसम्

श्व इति। श्वः आगामि श्रेयोऽत्र 'श्वःश्रेयसम्'। "श्वसो वसीयः श्रेयस" (पा० ५।४।८०) इत्यच् समासान्तः। आद्यौ तालव्यौ॥

शिवम्

श्यति अशुभम्। शो तनूकरणे। वन् (उ० १।१५३)। शिवम्॥[483]

भद्रम्

भन्दते 'भद्रम्'। भदि कल्याणे। "ऋज्रेन्द्रे"ति (उ० २।२८) रक्[484] निपातितः॥ "भन्दं भद्रं शिवं तथे"ति त्रिकाण्डशेषः॥

कल्याणम्

कल्यं नीरुजत्वमणति। अणतेः कर्मण्यण् (पा० ३।२।१)। 'कल्याणम्'॥

मङ्गलम्

मङ्गचते। मगिर्गत्यर्थः। मङ्गेर्वृषादित्वात् (उ० १।१०८) कलच्।* 'मङ्गलम्'॥

शुभम्

शोभते 'शुभम्'। "इगुपधे"ति कः (पा० ३।१।१३५)॥

भावुकम्

धन्ये(षु) भवनशीलम्। "लषपतपदे" (पा० ३।२।१५४) त्युकञ्। 'भावुकम्'॥

भविकम्

"भवो भद्राप्तिसत्तयोः" इति अजयः। भवो भद्राप्तिरत्रास्ति ठन् (पा० ५।२।११५)। 'भविकम्'॥

भव्यम्

धन्ये(षु) भवति 'भव्यम्'। "भव्यगेये"ति (पा० ३।४।६८) साधुः॥

कुशलम्

वृषादेराकृतिगणत्वात् कुशेः सौत्रात् "वृषादित्वात्" (उ० १।१०८) कलच्। 'कुशलम्'। तालव्यमध्यम्।

483 शेतेऽस्मिन् सर्वमिति शिवः—भट्टोजि। 484 रन्—उज्ज्वलदत्त and others.
* उज्ज्वलदत्त (५।७०) and दशपादी (८।१२३) have अलच्।

"कुशलवर्धित" (श्लोक–४६) इति विदग्धमुखमण्डनम्। "कुश-लवयोरूपोच्छ्राय"[485] इति वासवदत्ताश्लेषः। कुष निष्कर्षे इत्यतो मूर्धन्यमध्योऽपीत्यलंकारोऽमूलः ॥[486] "कुषलं मूर्धन्यम्" इति जातरूपः ॥[487]

क्षिणोत्यशुभम्। क्षि क्षये। "अर्तिस्तुस्वि" (उ० क्षेमम् १।१३९) ति मन्। ['क्षेमम्'।] "क्षेममस्त्रिया"मिति संबन्धः ॥१२८॥

शस्यते। शन्सु स्तुतौ। भावे क्तः (पा० ३।३।११४)। शस्तम् 'शस्तम्' ॥ **द्वादश कल्याणमात्रस्य ॥**

अर्थेति। पापपुण्यशब्दौ सुखादयश्च शस्तान्ताः गुणे यथोक्तलिङ्गा। उपचारात् तद्वति 'द्रव्ये' विशेष्ये वर्तमानाः त्रिलिङ्गाः। ततः स्त्रियां कल्याणी। अन्ये तु टाबन्ताः। सुष्ठु कृतः सुकृतः, दुष्ठु कृतो दुष्कृत इति क्रियानिबन्धनम् वाच्यलिङ्गत्वं न गुणनिबन्धनम्। "कल्म-षोऽयमध्यारोप"[488] इति तु अशिष्ट[489]प्रयोगः। ननु कथं "दारिद्र्येऽपि धनित्वेऽपि वशः परिजनः सुखम्" इति? उच्यते। अभेदोपचारेऽपि द्रव्यं प्रति विशेषणत्वेन सुखादि द्रव्यलिङ्गम्। इह तु स्वार्थप्रधानं द्रव्यं प्रति विशेष्यभूतं विवक्षितम् इति स्वलिङ्गमेव। "केचित् तु "पापपुण्य-सुखादि च" इति समस्तं पठित्वा आदिशब्देन प्रत्येकमभि-संबध्नन्ती"ति कौमुदी ॥

मतल्लिकेति। * [तल प्रतिष्ठाकरणे। सम्पदादित्वात् क्विबन्तेन तेन (वा० ३।३।१०८) माशब्दस्य षष्ठीसमासे मातलिरिति शोभास्थैर्यवाचकम्। तस्मिन्नुपपदे लातेः क-

485 B_1 adds राम इव जनितकुशलवयो etc.

486 B_1 shows—सुभूतिः। रामनाथ ascribes it to सुभूति।

487 जातरूपसुभूती—मथुरेश।

488 सकल्मषः—A. आत्मन्यध्याहारः—सर्वानन्द। कल्मषोऽयमध्याहारः—रघुनाथः।

489 शिष्ट—B_2.

* [ ]* These are from the text cited by रघुनाथ।

प्रत्यये (पा० ३।१।१३६), "ङ्यापो" (पा० ६।३।६३) रिति ह्रस्वत्वे मतल्लाः। ततः संज्ञायां कनि (पा० ५।३।७५) ह्रस्वत्वे च (पा० ७।४।१३) 'मतल्लिका'॥ मतल्लिका

मया शोभया चर्च्यते इति 'मर्चचिका'। चर्च मर्चचिका अध्ययने। संज्ञायां ण्वुल् (पा० ३।३।१०९)। पूर्ववत् ह्रस्वत्वम् (पा० ७।४।१३)॥

प्रकर्षेण कण्यते ज्ञायते इति 'प्रकाण्डम्'। कण गतौ। प्रकाण्डम् "ञमन्ताड्डः" (उ० १।११३)। बाहुलकाद् (पा० ६।३।१३७) दीर्घः॥

उच्चैरतिशयेन हन्यते ज्ञायते]* "सङ्घोद्घा" (पा० ३।३।८६) विति निपातनाद् 'उद्घः'॥ उद्घः

['तल्लज'स्तु पूर्ववत्(?)] **पञ्च प्रशस्तस्य ॥१२९॥** तल्लजः

ननु शस्तप्रशस्तयोः को भेदो येन मतल्लिकादयः शस्तपर्यायाः पृथगुच्यन्ते? उच्यते। शस्तं मङ्गलं प्रशस्त-मत्यर्थं श्रेष्ठम्। किंच शस्तवचनाः शिवादयो गुणे वर्तन्ते द्रव्येऽपि। मतल्लिकादयस्तु आविष्टलिङ्गा द्रव्य एव वर्तन्ते खट्वादिवत्। आविष्टलिङ्गाश्चान्यलिङ्गानां सामाना-धिकरण्येऽपि निजलिङ्गं न जहति। यथा—अश्वमतल्लिका, गोप्रकाण्डं, कुमारीतल्लजः। तथाच माघः—"अरिर्मधोरै-क्षत गोमतल्लिकाम्" (१२।४१) इति। "अस्त्री प्रकाण्डो विटपे तरुस्कन्धप्रशस्तयो" रिति रभसादौ[490] पुंस्त्वं च। ततः कनि (पा० ५।३।९७) "दण्डकामध्यवात्तां यौ वीररक्षः-प्रकाण्डकौ" (५।६) इति भट्टिः। अतएव मतल्लिकादीनां रूढिशब्दत्वात् "प्रशंसावचनैश्च" (पा० २।१।६६) इति नित्यसमासः॥ **१२९**॥

अय इति। शुभकारि दैवम् 'अयः'। इण गतौ। अयः पचाद्यच् (पा० ३।१।१३४)। अदन्तः। "शुद्धपार्ष्णि-रयान्वितः" (४।२६) इति रघुः। "सुलभैः सदा-

490 मेदिन्यादौ—B_1. Actually this is not found in मेदिनी।

नयवताऽयवता" (५।२०) इति किरातश्च ॥ **एकं (शुभकारिदैवस्य)॥ १३०क ॥**

दैवं दिष्टं भागधेयं भाग्यं स्त्री नियतिर्विधिः ॥१३०॥
हेतुर्ना कारणं वीजं(क) **निदानं त्वादिकारणम् ॥**

दैवम् **दैवमिति।** देवादात्मन[491] आगतम् (पा० ४।३।७४)। 'दैवम्' पूर्वकर्म ॥

दिष्टम् दिश्यते स्म 'दिष्टम्'। दिश अतिसर्जने। क्तः (पा० ३।२।१०२) ॥

भागधेयम् "भाग्यैकदेशयोर्भागः" इति रुद्रकोषः। भाग एव 'भागधेयम्'। स्वार्थे "भागरूपनामभ्यो धेयः" (वा० ५।४।३५) ॥

भाग्यम् **'भाग्यम्'।** भज सेवायाम्। "ऋहलोर्ण्यत्" (पा० ३।१।१२४)। वृद्धिः (पा० ७।२।११६)। "चजोः कु" (पा० ७।३।५३) इति कुत्वम्। "भागाद् यच्च" (पा० ५।१।४९) इति 'भाग्य'मिति स्वामी ॥

नियतिः नियम्यतेऽनया 'नियतिः'। क्तिन् (पा० ३।३।९४) ॥

विधिः विधीयतेऽनेनेति 'विधिः'। "उपसर्गे घोः किः" (पा० ३।३।९२) ॥ **षट् प्राक्तनशुभाशुभकर्मणः ॥१३०॥**

हेतुरिति। हिनोति व्याप्नोति कार्यम्। हि गतौ। "कनि-मनि-जनि-गा-भा-या-हिभ्यश्च" (उ० १।७३) इति

हेतुः तुन्।(ख) 'हेतुः' ॥

करोतीति। "ल्युट् च" (पा० ३।३।११५) इति

कारणम् चकारात् ल्युट्। 'कारणम्' ॥(ग)

विशेषेण जायतेऽनेन। "उपसर्गे च संज्ञायाम् (पा० ३।२।९९) इति डः। "अन्येषामपीति (पा० ६।३।१३७)

वीजम् दीर्घः। 'वीजम्' ॥ **त्रीणि कारणस्य ॥**[492]

(क) वीज°—भानुजि and many others.
(ख) तु—उज्ज्वलदत्त and others.
(ग) भानुजि criticises राय° for this derivation. He derives it with णिच्।

491 देवस्यात्मनः—B_1

492 कारणमात्रस्य—B_1.

निदेति। 'निदानम्'। "बहुलमन्यत्रापी"ति (पा० निदानम् ३।३।१३०) युच् ॥

आदि च प्रथमं च तत् कारणं चेति 'आदिकारणम्'। आदिकारणम् एतच्च वैशेषिकादिभिः समवायिकारणमुच्यते। अन्यैस्तूपादानकारणम्[493]। वैद्यैस्तु कारणमिति ॥ **द्वे प्रथमकारणस्य ॥१३१क ॥**

क्षेत्रज्ञ आत्मा पुरुषः प्रधानं प्रकृतिः स्त्रियाम् ॥१३१॥
विशेषः कालिकोऽवस्था गुणाः सत्त्वं रजस्तमः।
जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवः ॥१३२॥
प्राणी तु चेतनो जन्मी जन्तुजन्युशरीरिणः[494]
चित्तस्तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ॥१३३॥

॥०॥ इति कालवर्गः ॥०॥

क्षेत्रेति। तथाच गीता (१३।१)— क्षेत्रज्ञः
"इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते।
एतद् यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥"
क्षेत्रे शरीरे जानाति 'क्षेत्रज्ञः'। "ज्ञानस्य शरीरात्मसंयोगासमवायिकारणकत्वा"दिति कौमुदी ॥

अतति संचरति। अत सातत्यगमने। "सातिभ्यां मनिन्-मनिणा" (उ० ४।१५२) विति मनिण्। 'आत्मा' ॥ आत्मा

"अव्यक्तं मन इत्याहुः शरीरं पुरमुच्यते।
अव्यक्तके पुरे शेते पुरुषस्तेन चोच्यते ॥" इति 'पुरुषः'। पुरुषः
पृषोदरादिः (पा० ६।३।१०९)। "पुनात्यनेन। पुनातेः कुषन् (उ० ४।७४) पुरुष" इत्यन्ये। **त्रीणि आत्मनः ॥**

प्रेति। प्रधीयतेऽत्र। 'प्रधानम्'। ल्युट् (पा० प्रधानम् ३।३।११७) ॥

493 बौद्धानामुपादानकारणम्—B_2.

494 Some mss add here—"जातिर्जातञ्च सामान्यं व्यक्तिस्तु पृथगात्मिका।" It seems that क्षीर° recognizes this by "व्यक्तिः विशेषाख्या" but सर्वानन्द and मुकुट omit this, भानुजि reads. . .पृथगात्मता।

प्रकृतिः प्रारम्भात्[495] क्रियतेऽनया। 'प्रकृतिः'। क्तिन् (पा० ३।३।९४) ॥ **द्वे सत्त्वरजस्तमसां साम्यावस्थायाः ॥१३१॥**

अवस्था **विशेष इति।** कालकृतो वस्तुधर्मो यौवनादिश्च विशेषः 'अवस्था'। अङ। "व्यवस्थाया" (पा० १।१।३४) मिति निर्देशात् "स्थागापापचो भावे" (पा० ३।३।९५) इति न क्तिन् ॥

'कालिक' इति "निर्वृत्तेऽक्षद्यूतादिभ्य" (पा० ४।४।१९) इति ठक् ॥ **एकं (कालजनितविशेषस्य) ॥**

गुणा इति। सत्त्वादयस्त्रयः प्रकृतेर्गुणाः। सत्त्वं लघु प्रकाशकत्वात्* ज्ञानसुखहेतुः। रजो रागात्मकं चलं क्षोभजनकं दुःखहेतुः। तम आवरकं प्रमादमोहजनकं गुरु इति सांख्यशास्त्रम्।

सत्त्वम् सतो भावः 'सत्त्वम्' ॥

रजस् रञ्जयति। "भूरञ्जिभ्यां किद्" (उ० ४।२१६) इति

(रज) असुन्। 'रजः' ॥

तमस् ताम्यत्यनेन असुनि (उ० ४।१८८) 'तमः'। पृषोदरादित्वाद् (पा० ६।३।१०९) अदन्तपुंलिङ्गावपीमौ। "पुष्पे रेणौ गुणे चैव रजोऽयं रजसा सह" इति उत्पलिनी। "पुष्प" इति स्त्रीपुष्पे।

(तम) "तम" इत्यचि (पा० ३।१।१३४) अदन्तोऽपि। "सत्यं वदन्ति ते कस्मादसत्यं नीरजस्तमा" इति चरकम्(क) ॥[496] **त्रीणि स्वनामप्रसिद्धानि पृथक् पृथग् गुणशब्दवाच्यानि ॥**

जनुः **जनुरिति।** जननं 'जनुः'। "जनेरुसिः" (उ० २।११६) ॥

जननम् जन जनने। भावे ल्युटि (पा० ३।३।११५) 'जननम्' ॥

जन्मन् 'जन्म'। मनिन् (उ० ४।१४४)। "इषियुधी" (उ०

(जन्म) १।१४४) ति मकि 'जन्म' अदन्तमपीत्युणादौ(ख) ॥

जनिः "जनिघसिभ्यामिण्" (उ० ४।१२९)। "जनिवध्योश्चे" (पा० ७।३।३५) ति वृद्धयभावः। 'जनि'श्च स्त्री उत्पत्ति-

495 प्रारम्भे—B_1.

* प्रकाशनं—B_1.

496 रजकम्—B_2.

(क) इति प्रयोगात्—शिवदत्तः

(ख) जन्मस्तु पुंसि सम्भवः—उज्ज्वल°।

साहचर्यात्। "किमर्थं(?) जनिना जन्तोर्वृथाजन्मन"(क) इति शिष्टप्रयोगात् पुंस्त्वं च ॥

'उत्पत्तिः'। क्तिन् (पा० ३।३।९४) ॥ उत्पत्तिः

'उद्भवः'। अप् (पा० ३।३।५७) ॥ **षट्कं जन्मनः ॥ १३२॥** उद्भवः

प्रेति। 'प्राणि-शरीरिणौ'। अत इनिः (पा० ५।२।११५) ॥ प्राणी, शरीरी

'चेतनो' नन्द्यादिः (पा० ३।१।१३४) ॥ चेतनः

'जन्मी'। "व्रीह्यादिभ्यश्च" इनिः (पा० ५।२।११६)। "न स्तद्धित" (पा० ६।४।१४४) इति टिलोपः। अदन्तत्वाद्वा "अत इतिठनौ" (पा० ५।२।११५) ॥ जन्मी

जायते। जनेः। हेतुवत् (उ० १।७३) तुन्।[497] 'जन्तुः' ॥ जन्तुः

एवं "यजिमनिशुन्धिदसिजनिभ्यो युच्" (उ० ३।२०)। 'जन्युः' ॥ **षट् प्राणिनः ॥** जन्युः

चित्तमिति। चिती संज्ञाने। भावे क्तः (पा० ३।३।११४)। ('चित्तम्'।) ॥ चित्तम्

चेतते। असुनि (उ० ४।१८८) 'चेतः' ॥ चेतः

ह्रियते विषयैः 'हृदयम्'। "वृह्रोः षुग्दुकौ च" (उ० ४।१००) इति कयन्, दुगागमश्च। 'हृदयम्' ॥ हृदयम्

यद्यपि वाह्यविषयेषु अविक्षिप्तमनाकुलं मनः स्वान्तं "क्षुब्धस्वान्ते"ति (पा० ७।२।१८) निपातितं, तथाप्यभेदो दृश्यते इतीहापि तथा ॥ स्वान्तम्

ह्रियते। हरतेः क्विप्तुकौ (पा० ३।२।१७८, ६।१।७१)। वर्णव्यत्ययात्तकारस्य दकारः (पा० ६।३।१०९)। तथाच "हृदि प्राण" इति प्रयोगः। "दान्तं प्रकृत्यन्तरमस्ती"ति तु स्वामी ॥ हृत् (हृद्)

मन एव 'मानसम्'। प्रज्ञाद्यण् (पा० ५।४।३८) ॥ मानसम्

(क) किमत्र जनिना etc. रघुनाथः। He ascribes it to सरस्वतीकण्ठाभरण। किमम्ब–सर्वा°

497 तुः—B_1.

मनः मन्यत इति असुनि (उ० ४।१८८) 'मनः'। "अर्धर्चादि" (पा० २।४।३१) इति उपाध्यायसर्वस्वम्*॥ **सप्त मनसः ॥१३३॥**

॥०॥ कालवर्ग-विवरणम् ॥०॥

* तदा 'मनाः' इत्यपि—adds भानु°।

५। अथ धीवर्गः

बुद्धिर्मनीषा धिषणा धीः प्रज्ञा शेमुषी मतिः।
प्रेक्षोपलब्धिश्चित्संवित्प्रतिपज्ज्ञप्तिचेतनाः ॥१३४॥
धीर्धारणावती मेधा संकल्पः कर्म मानसम्।
चित्ताभोगो मनस्कारश्चर्चा संख्या विचारणा ॥१३५॥
अध्याहारस्तर्क ऊहो विचिकित्सा तु संशयः।
सन्देहद्वापरौ चाथ समौ निर्णयनिश्चयौ ॥*१३६॥
मिथ्यादृष्टिर्नास्तिकता व्यापादो द्रोहचिन्तनम्।
समौ सिद्धान्तराद्धान्तौ भ्रान्तिर्मिथ्यामतिर्भ्रमः ॥१३७॥
संविदागूप्रतिज्ञाननियमाश्रवसंश्रवाः(क)।
अङ्गीकाराभ्युपगमप्रतिश्रवसमाधयः ॥१३८॥

बुद्धिरिति। बुध्यतेऽनया 'बुद्धिः'। क्तिन्॥ बुद्धिः

ईष गतिहिंसादानेषु। "गुरोश्च" (पा० ३।३।१०३) इत्यकारः। ईषा। मनस ईषा 'मनीषा'। पृषोदरादित्वाट्टिलोपः (पा० ६।३।१०९)। मूर्धन्यषा॥ मनीषा

धृष्णुवन्ति प्रगल्भन्तेऽनया इति "धृषेर्धिष् च[498] संज्ञायाम्" (उ० २।८२) इति युचि 'धिषणा'। णकारान्तत्वान्मूर्धन्यषा। अन्यथा णत्वाभावात् धिसना[499]॥ 'देधेष्टि धिषणा'। "धिष शब्दे"––इति तु स्वामी॥ धिषणा

ध्यायति इति। ध्यायतेः "संप्रसारणं क्विप् चे ति" (वा० ३।२।१७८) क्विप्। "हलः (पा० ६।४।२) इति दीर्घः। 'धीः'॥ धीः

'प्रज्ञा'। अङ (पा० ३।३।१०६)। प्रद्धापि। "प्रज्ञा[500]-प्रद्धा धरा ज्ञप्तिः पण्डा संवेदनं विदा" इति शब्दार्णवात्॥ प्रज्ञा (प्रद्धा)

* निश्चयनिर्णयौ—some mss.

(क) संविदागूः प्रतिज्ञानं––रघुनाथ।

498 तत्त्वबोधिनी reads the rule "धृषेश्च संज्ञायाम्"। The suffix there is क्यु and not युच्।

499 omitted in B_1.

500 प्रद्धा-परमानन्द, रघुनाथ; श्रद्धा––भानुजि; प्राज्ञ––मथुरेश, प्रज्ञा––रामनाथ। We are not sure if भानुजि is right.

शेमुषी शेत इति विच् (पा० ३।२।७५)। शेः मोहः संशयः। विचार्य तं मुष्णाति। "मूलविभुजादित्वात्" (वा० ३।२।५) के "गौरादित्वात्" (पा० ४।१।४१) डीष्। 'शेमुषी'। तालव्यादिर्मूर्धन्यान्ता ॥ "शमेः क्वसौ एत्वाभ्यासलोपे शेमुषी"ति तु कौमुदी ॥

मतिः मन्यतेऽनया क्तिन् (पा० ३।३।९८)। 'मतिः' ॥

प्रेक्षा प्रकर्षेण ईक्षते ज्ञायतेऽनया। "गुरोश्च" (पा० ३।३।१०३) इत्यकारे 'प्रेक्षा' ॥

उपलब्धिः **'उपलब्धिः'।** षित्वादङि (पा० ३।३।१०४) प्राप्ते बाहुलकात् क्तिन् (पा० ३।३।९४) ॥

चित्, संवित्, प्रतिपत् चिदादिषु त्रिषु करणे संपदादित्वात् क्विप् (वा०)। 'चित्'। तान्ता ॥

ज्ञप्तिः ज्ञप मिच्च (पा० धा० १६२५)। चौरादिकात् क्तिन् (पा० ३।३।९४)। "तितुत्रतथे" (पा० ७।२।९)" ति इट्-निषेधः। 'ज्ञप्तिः' ॥

चेतना 'चेतना'। चित् संचेतने। चुरादिः। युच् (पा० ३।३।१०७)। तत्र कौमुद्यां क्षीरस्वामिनि चायं विवेकः––बुद्धयादयश्चतुर्दश बुद्धेरिति वैशेषिकाः। सत्त्वप्रधानं महदाख्यमन्तःकरणं बुद्धिः। विषयाकारोपग्रहायां* बुद्धौ प्रतिविम्बितायाश्चिच्छक्तेर्बुद्धिवृत्त्यनुकार उपलब्धिरिति सांख्यदर्शनात्। बुद्धयादिसप्तकं बुद्धौ, प्रेक्षादिसप्तकमुपलब्धावित्यपरे। सांख्ये बुद्धिधर्मस्य ज्ञानस्यैते पर्याया इति भट्टोऽपि ॥[501] **बुद्धेश्चतुर्दश ॥१३४॥**

मेधा **धीरिति।** धारणाशक्तियुक्ता धी 'मेधा'। मेधते सङ्गच्छतेऽस्यां सर्वम्। मेधृ संगमे। "गुरोश्चे" (पा० ३।३।१०३) त्यकारः ॥ **एकं (धारणावत्याः धियः) ॥**

संकल्पः **संकल्प इति।** इदमहं कुर्यामिति मनसो व्यापारः

501 The printed text of क्षीर° omits "ज्ञानस्य" and adds—वैशेषिकादौ चतुर्दशापि बुद्धचर्याः।

* विषयाकारग्रहायां––रघुनाथ।

'संकल्पः'। भावे घञ् (पा० ३।३।१८)। **एकं (मनसोव्यापारस्य) ॥**

चित्ताभोगः मनस्कारः **चित्तेति।** "पूर्वोक्तस्य चित्तस्य सन्तानद्वारेण स्थैर्यम् 'आभोगः" इति भट्टः[502]। "आभोगस्तात्पर्यम्" इति सर्वानन्दः।* "व्यापार" इति मधुमाधव्यादौ। "अनागतचिन्तारूपचित्ताभोगो मनस्कार" इति तु कौमुदी। "एकस्मिन् विषये पुनः पुनश्चित्तवृत्तिराभोग" इति तु पञ्जिका[503]। मनसः कारो निश्चय(क) इति षष्ठीसमासे "अतः कृकमि" (पा० ८।३।४६) इत्यादिना सत्वम्। मनसिकरणं 'मनसिकार' इत्यपि दृश्यते। (मनसिकारः) तत्र बाहुलकात् (पा० ६।३।९) सप्तम्यलुक्समासः ॥ **द्वे मनसः सुखादौ तत्परत्वस्य ॥**

चर्चा **चर्चेति।** चर्च अध्ययने। चुरादिण्यन्तात् भावे "चिन्तिपूजि" (पा० ३।३।१०५) इत्यादिना अङ। 'चर्चा' ॥

संख्या संख्यानं 'संख्या'। अङ (पा० ३।३।१०६) ॥

विचारणा चर असंशये। चुरादिः। "ण्यासे" (पा० ३।३।१०७) ति युच्। "विचारणा ॥ **त्रयं प्रमाणैरर्थपरीक्षाया इत्येके। विमर्शमात्रस्य इत्यन्ये ॥१३५॥**

अध्याहारः **अध्याहार इति।** अध्याहरणम'ध्याहारः'। "न्युनपदपूरणार्थमधिकपदोहकरणम्" इति सर्वधरः।

तर्कः तर्कणं 'तर्कः'। वृतुवृधु भाषार्था इति चुरादिदण्डकात् घञ् ॥

ऊहः ऊह वितर्के। भावे घञि (पा० ३।३।१८) 'ऊहः'। "वितर्कस्तु तर्क ऊहो द्वयोरित्यूहनं न ना। शंका त्वाशंकिराशंका श्रमस्तु स्यात् परिश्रम" इति शब्दार्णवः ॥ **त्रयमूहनस्य ॥**

विचिकित्सा **विचीति।** उभयकोटिस्पृग् ज्ञानं 'विचिकित्सा'।

502 Actually क्षीर° ascribes this to बौद्धाः।

* रघुनाथ adds "स्थैर्यमित्यन्ये।"

503 According to रामनाथ this is the view of सुभूति echoed in पञ्जिका।

(क) "मनसः मनसि वा कारः निश्चय इति रायः"—रघुनाथ।

एकत्रानारूढ़ेः। कित निवासे। स्वार्थे "गुप्तिज् (पा० ३।१।५)" इति सन्, अप्रत्ययः (पा० ३।३।१०२)॥

संशयः सं द्वयोर्नानार्थयोः शयितं 'संशयः'। समो नानार्थता। शीङ "एरच्" (पा० ३।३।५६)।

दिह उपचये। अत्रापि नानार्थसंशब्दे उपपदे घञि (पा० ३।३।१८) 'सन्देहः'॥ **सन्देहः**

द्वौ पक्षौ स्थाणुर्वा पुरुषो वेत्येवंरूपौ परावात्मीयौ प्रधानभूतावंशौ[504] वा अस्मिन्निति 'द्वापरः'। "सर्वनामसंख्ययोरि" (वा० २।२।३५) ति संख्यायाः पूर्वनिपातः। पृषोदरादित्वात् (पा० ६।३।१०९) पूर्वस्यात्वम्॥ **चत्वारि सन्देहस्य॥** **द्वापरः**

अर्थेति। निपूर्वान्नयतेः "एरच्" (पा० ३।३।५६) "उपसर्गादसमासेऽपी" (पा० ८।४।१८) ति णत्वम्। यदा तु निस उपसर्गप्रतिरूपत्वं तदा न णत्वम्। 'निर्णयः'॥ **निर्णयः**

निश्चिनोतेः "ग्रहवृदृ" (पा० ३।३।५८) इत्यप्। 'निश्चयः'। स्थाणौ स्थाणुरेवायमित्यस्य[505] **निर्णयस्य द्वयम्॥१३६॥** **निश्चयः**

मिथ्यादृष्टिः **मीति।** मिथ्या चासौ दृष्टिश्चेति कर्मधारयः। ('मिथ्यादृष्टिः')। यथा—नास्ति कृतं, नास्ति स्वर्ग इत्यादि।

नास्तिकता 'नास्तिकते'ति। नास्ति परलोक इति मतिर्यस्येति "अस्तिनास्तिदिष्टं मति" (पा० ४।४।६०) रिति ठक्। ततो भावे तल् (पा० ५।१।११९)॥ **द्वे परलोको नास्तीति बुद्धेः॥**

व्यापादः व्यापादनं 'व्यापादः'। ण्यन्ताद् (पा० ३।१।२६) घञ् (पा० ३।३।१८)॥

द्रोहचिन्तनम् द्रोहस्य चिन्तनं 'द्रोहचिन्तनम्'। बाहुलकात् ल्युट् (पा० ३।३।११३, ३।३।११५)॥ **द्वे परद्रोहचिन्तायाः॥**

सिद्धान्तः **सेति।** सिद्धोऽन्तो निश्चयोऽनेन इति। 'सिद्धान्तः'॥

राद्धान्तः एवं राद्धः सिद्धोऽन्तो निश्चयोऽनेन 'राद्धान्तः'॥ **द्वे सिद्धान्तस्य॥**

---

504 -भूतावंशविशेषौ—B_1.

505 स्थाणुरेवायमित्यादिनिर्णयस्य द्वयम्—B_1.

भ्रान्तिरिति। अतस्मिस्तदिति ज्ञानं 'भ्रान्तिः'। भ्रमेः **भ्रान्तिः** क्तिन् (पा० ३।३।९४)। "अनुनासिकस्ये" (पा० ६।४।१५) ति दीर्घः॥

अतस्मिंस्तदिति मन्यते। मन्यतेः थ्यदित्वं च*। मिथ्येत्यव्ययम्। तथा मतिः। 'मिथ्यामतिः'॥ **मिथ्यामतिः**

घञि 'भ्रमः'। "नोदात्तोपदेशे" (पा० ७।३।३४) **भ्रमः** त्यादिना वृद्धिनिषेधः। **त्रीणि भ्रान्तेः॥१३७॥**

समिति। संवेदनं 'संवित्'। विदेः संपदादित्वात् (वा०) **संवित्** क्विप्॥

आगमनम् 'आगूः'। "भ्रमेश्च डूः (उ० २।६८)" **आगूः** इति डूः। चकारो "गमेर्डो" (उ० २।६७) रित्यतो "गमे" रित्याकर्षणार्थः। यदा तु "ऊङ च गमादीनाम्" (वा० ६।४।४०) इति क्विप्, ऊङ च, तदा खलपूवत्[506]। संवित्साहचर्यात् स्त्रियामागूः[507]।

'प्रतिज्ञानम्'। ल्युट् (पा० ३।३।११७)॥ **प्रतिज्ञानम्**

'नियमः'। "यमः समुपनिविषु च" (पा० ३।३।६३) **नियमः** इत्यप्॥

'आश्रवः'। अप् (पा० ३।३।५७)॥ **आश्रवः**

एवं 'संश्रवः'। समाङ्पूर्वः श्रृणोतिरभ्युपगमे॥ **संश्रवः**

एवं 'प्रतिश्रवः'॥ **प्रतिश्रवः**

'अङ्गीकार' इति। च्व्यन्तानुप्रयुक्तात् कृञो भावे घञ् **अङ्गीकार** (पा० ३।३।१८)॥

"ग्रहवृदृ" (पा० ३।३।५८) इत्यादिना अपि 'अभ्युपगमः'॥ **अभ्युपगमः**

किः (पा० ३।३।९२)। 'समाधिः'॥ **दश अङ्गीकारस्य॥१३८॥** **समाधिः**

मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः।
मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम्॥१३९॥

---

506 "ऊ च गमादी नाम्. . . .क्विप् ऊ च"—B_1.

507 B_2 adds—"गुरौ उद्यमने इत्यस्मात् आगूः, आगुरौ।" भानुजि elaborates its—"क्विपि (पा० ३।३।१०८) धूर्वत्।"

* मन्थतेः यग् इत्वं च (?) अघ्न्यादित्वात् (?) (उ० ४।१११)

मोक्षोऽपवर्गोऽथाज्ञानमविद्याहंमतिः स्त्रियाम् ।
रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी ॥१४०॥
गोचरा इन्द्रियार्थाश्च हृषीकं विषयीन्द्रियम् ।
कर्मेन्द्रियन्तु पाय्वादि मनोनेत्रादि धीन्द्रियम् ॥१४१॥
तुवरस्तु[508] कषायोऽस्त्री मधुरो लवणः कटुः ।
तिक्तोऽम्लश्च[509] रसाः पुंसि तद्वत्सु षडमी त्रिषु ॥१४२॥
विमर्दोत्थे परिमलो गन्धे जनमनोहरे ।
आमोदः सोऽतिनिर्हारी वाच्यलिङ्गत्वमागुणात् ॥१४३॥
समाकर्षी तु निर्हारी सुरभिर्घ्राणतर्पणः ।
इष्टगन्धः सुगन्धिः स्यादामोदी मुखवासनः[510] ॥१४४॥
पूतिगन्धिस्तु दुर्गन्धो विस्रं स्यादामगन्धि यत् ।
शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डराः[511] ॥१४५॥
अवदातः सितो गौरो वलक्षो धवलोऽर्जुनः ।
हरिणः पाण्डुरः पाण्डुरीषत्पाण्डुस्तु धूसरः ॥१४६॥
कृष्णे नीलासितश्यामकाल-श्यामल-मेचकाः ।
पीतो गौरो हरिद्राभः पलाशो[512] हरितो हरित् ॥१४७॥
रोहितो लोहितो रक्तः शोणः कोकनदच्छविः ।
अव्यक्तरागस्त्वरुणः श्वेतरक्तस्तु पाटलः ॥१४८॥
श्यावः स्यात् कपिशो धूम्रधूमलौ कृष्णलोहिते ।
कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ ॥१४९॥
चित्रं किर्मीरकल्माषशवलैताश्च कर्बुरे ।
गुणाः शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति ॥१५०॥
॥०॥ इति धीवर्गः ॥०॥

ज्ञानम् **विज्ञानम्** **मोक्ष इति**। 'मोक्षे' मोक्षविषये यज् 'ज्ञानं' तद्'धी'-रुच्यते। अन्यत्र 'ज्ञानं'। शिल्पशास्त्रविषये तु 'विज्ञानम्' इति शील-कलिङ्गौ। अन्ये तु मोक्षविषये धी'र्ज्ञानम्'। अन्यत्र मोक्ष-प्रतिपादकशास्त्रादन्यत्र[513] शिल्पादौ चित्रादौ 'विज्ञानम्' इति

508 कुवरस्तु—B₁., कुबरस्तु—Colebrooke

509 अम्ल—रघुनाथ।

510 शुभवासनः—B_1.

511 Many mss. read पाण्डुराः

512 पालाशो—B_1.

513 अन्यत्राशास्त्रे—B_1.

वदन्ति। 'मोक्ष' इति तु निमित्तसप्तमी। मोक्षनिमित्तम् शिल्प-शास्त्रयोर्धीर्ज्ञानमुच्यते। तन्निमित्ततोऽन्यनिमित्तं यत् (या?) तयोर्धीः सा विज्ञानम्* इति तु वयं व्याचक्ष्महे। अत्र मोक्षे धीरे-वोच्यते॥ एकं (**मोक्षशास्त्रग्राहिण्या बुद्धेः**)॥

अन्यत्र [इति]। अन्यत्र शिल्पे चित्रादौ, शास्त्रे स्मृत्यादौ धी'विज्ञानम्'। विरूपं ज्ञानं 'विज्ञानम्'॥ **एकं शिल्पशास्त्र-ग्राहिण्या बुद्धेः**॥

मुक्तिरिति। शरीरेन्द्रियाभ्यामात्मनो मुक्तत्वं 'मुक्तिः'। **मुक्तिः**
क्तिन् (पा० ३।३।९४)॥

एतयोरेव विरहेणात्मनः केवलत्वं 'कैवल्यम्'॥ **कैवल्यम्**

निर्वान्त्यत्र 'निर्वाणम्'। "निर्वाणोऽवात" (पा० **निर्वाणम्**
८।२।५०) इति निपातितम्॥

धर्मपर्याये (स्व० १२६) 'श्रेय' उक्तम्॥ **श्रेयः**

निश्चितं श्रेयो 'निःश्रेयसम्'। "अचतुर" (पा० **निःश्रेयसम्**
५।४।७७) इत्यादिना अच्॥

"तनिमृङ्भ्यां किच्चे" ति (उ० ३।८८) तन्। 'मृतम्'। अविद्यमानं मृतम् अत्र 'अमृतम्' ॥१३९॥ **अमृतम्**

मोक्ष अवसाने। चुरादिः। "एरच्" (पा० ३।३।५६), **मोक्षः**
घञ् (पा० ३।३।१८) वा। "युमुचिभ्यां ष" इति षे(क) मोक्ष —इति तु कौमुदी॥

अपवर्जनम् 'अपवर्गः'। वृजी वर्जने। घञ् (पा० **अपवर्गः**
३।३।१८)॥ **अष्टौ मोक्षस्य**॥

अथेति। न ज्ञानम् 'अज्ञानम्'॥ **अज्ञानम्**

विरुद्धं वेदनम् 'अविद्या'। अधर्मानर्थवत् विपर्यासे नञ्। **अविद्या**
"संज्ञायां समज" (पा० ३।३।९९) इत्यादिना क्यप्॥

* अन्यनिमित्तं या तयोर्धीः सा विज्ञानम्—भानुजि०; तदन्यनिमित्तं—mss.

(क) This is obviously a reference to the rule—"वृतुवदिहनिकमिकषियु-मुचिभ्यः सः" (९।२१) of the दशपादी। The corresponding rule in the पञ्चपादी reads—"वृतुवदिहनिकमिकषिभ्यः सः" (३।६२) and omits the two last mentioned roots. The sufflx enjoined is 'स' and not ष।

अहंमतिः अहमिति निपातोऽहंकारे। तत्प्रधाना मतिः 'अहंमतिः'[514]। "सुप्सुपे" (पा० २।१।४) ति समासः।। **त्रीण्यविद्यायाः ।।**

रूपम् **रूपमिति।** अमी पृथक् पृथक् प्रसिद्धाः चक्षुरादिग्राह्याः पञ्च विषयादिशब्दत्रयवाच्याः। तत्र "खष्पशिल्पशष्पवाष्परूपपर्पतल्पा" (उ० ३।२८) इति रौतेः 'रूपम्' निपातितम् ।।

शब्दः **'शब्द' इति।** शप आक्रोशे। "शाशपिभ्यां ददना" (उ० ४।९७) विति दन्। 'शब्दः' ।।

गन्धः गन्ध अर्दने। अच् (पा० ३।१।१३४)। 'गन्धः' ।।

रसः रस आस्वादने। चुरादिः। "एरच्" (पा० ३।३।५६)। 'रसः' ।।

स्पर्शः "अकर्तरि चे" (पा० ३।३।१९) ति घञि 'स्पर्शः' ।।

विषयाः विषिण्वन्ति निबध्नन्ति इन्द्रियाणि इति 'विषयाः'। षिञ् बन्धने। अच् (पा० ३।१।१३४)। "परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्" (पा० ८।३।७०) इति षत्वम् ।। **[पञ्च विषयाणाम्] ।।१४०।।**

गोचराः गाव इन्द्रियाणि चरन्त्येषु 'गोचराः'। "गोचरसंचरे (पा० ३।३।११९)" त्यादिना निपातितम् ।।

इन्द्रियार्थाः इन्द्रियैर्वर्ण्यन्ते अभिलष्यन्ते 'इन्द्रियार्थाः'। अर्थ याच्ञायाम्। स्पर्शवद् घञ् (पा० ३।३।१९) ।।

हृषीकमिति। हृष्यन्त्यनेन। हृषु अलीक्ये। मूर्धन्यषः। "अनिहृषिभ्यां किदि" (उ० ४।१७) ति करणे ईकन्[515]।

हृषीकम् 'हृषीकम्' ।।

विषयी विषयो ग्राह्यत्वेनास्यास्तीति 'विषयी'। इनिः (पा० ५।२।११५) ।।

इन्द्रस्यात्मनो लिङ्गम्। तेन वा दृष्टं, सृष्टं वा।

इन्द्रियम् 'इन्द्रियम्'। "इन्द्रियमिन्द्रलिङ्गे" (पा० ५।२।९३) ति घच् निपात्यते। **त्रयमिन्द्रियस्य ।।**

514 A and B_2 add here—अहंशब्दोऽव्ययम्।

515 अनिहृषिभ्यां किच्च—तत्त्वबोधिनी।

कर्मेति। पाय्वादि कर्मेन्द्रियमुच्यते। कर्मसाधकमिन्द्रियं 'कर्मेन्द्रियम्'। पायुर्गुदम्। आदिना उपस्थादिग्रहः। तथाच **कर्मेन्द्रियम्**

कामन्दकीये—"पायूपस्थं पाणिपादं वाक् चैवेन्द्रियसंग्रहः।[516]

उत्सर्गानन्दनादानगत्यालापाश्च तत्क्रियाः।।"

इति ।। **एकं गुदादीन्द्रियस्य ।।**

मन इति। मनोनेत्रादीनि धीन्द्रियाणि। धीर्ज्ञानम्। तन्निमित्तमिन्द्रियम्। तथा (च)— **धीन्द्रियम्**

"मनःकर्णौ तथा नेत्रे[517] रसना च त्वचा सह।

नासिका च षडेतानि धीन्द्रियाणि प्रचक्षते।।"[518] इति ।।

एकं बुद्धीन्द्रियस्य ।।१४१।।

तुवरेति। तु इति सौत्रो धातुर्धारणार्थः। तत औणादिकः "छित्वरछत्वर" (उ० ३।१) इत्यादिना ष्वरच्।[519] ह्रस्वादिः, दीर्घादिश्च। तथाच— **तुवरः**

"नरेऽश्मश्रुणि शृङ्गाभ्यां रहिते गवि तूवरः। **(तूवरः)**

काले प्राप्ते कषाये च रसे पुंव्यञ्जनेऽच्युते।।"[520]

इत्युत्पलिनी। "नापि कषायस्तुवरः" इति वोपालितात्। अत्र दीर्घे त्वार्याभङ्गः स्यात्। "पुंसि कषायस्तुवरम्" इति क्लीबकाण्डे रत्नकोषाच्च ह्रस्वादिरेवात्र पाठः। बहुपुस्तकदर्शनात्। "कुत्सितो वरः 'कुवरः'। कुवरो ह्रस्वादिः, कवर्गादिश्च।" **(कुवरः)** "कुवरस्तु कषायोऽस्त्रीत्येके पठन्ती"ति सर्वानन्दादयः।।*

कषति कण्ठम् इति 'कषायः'। मूर्धन्यषः।। **द्वे कषायरसस्य ।।** **कषायः**

मधुर इति। मधु माधुर्यम्। तद्योगात् "ऊषशुषिमुष्कमधो र" (पा० ५।२।१०७) इति रः। 'मधुरः'। **मधुरः**

516 पाणिपादौ—A; वाक् कर्मेन्द्रियसंग्रहः—B_1; वाक्कर्मे चेतीन्द्रियसंग्रहः—B_2. पायूपस्थे पाणिपादौ—भानुजि।

517 नेत्रं—A.

518 नासिका चेति षट् तानि—A.

519 In the तत्त्वबोधिनी version of the rule there is तीवर and not तुवर। Cf. उज्ज्वलदत्त। दशपादी rule omits this word.

520 पुंव्यञ्जनेऽच्युत—B_1.; पुंव्यञ्जनाच्युते—A. पुंव्यञ्जनेऽपि च—रघुनाथ।

* "तुधातोः सौत्रात् पीवरादित्वात् ट्वरचि निपात इति सुभूतिः"—रघुनाथ।

लवणः लुनाति जाड्यम्। लूञ् छेदने। ल्युः (पा० ३।१।१३४)। 'लवणः'। "लवणाल्लुग्" इति (पा० ४।४।२४) निपातनात् णत्वम् ॥

कटुः कटत्यावृणोति तीक्ष्णत्वेन मुखमिति 'कटुः'। कटे वर्षावरणयोः। "कटिवटिभ्यां च" (उ० १।६) इत्युः ॥[521]

तिज निशाने। बाहुलकात् "अञ्जिघृषिभ्यः क्तः"
तिक्तः (उ० ३।८९)। 'तिक्तः' ॥

अम्बतीति। अबि-रबि-लबि शब्दे। "मूशक्यबिभ्यः[522]
अम्ब्लः क्लः" (उ० ४।१०८)। मबलसंयोगवान् 'अम्ब्लः' ॥

'रसा' इति। रस्यन्त इति रसाः। गुणमात्रे वर्तमाना 'पुंसि' मधुरादयः। **पञ्च प्रत्येकं मधुरादिरसशब्दवाच्याः ॥**

तद्वत्सु [इति]। कषायादिरसवत्सु द्रव्येषु वर्तमाना 'अमी' 'रसाः' रसशब्दवाच्या अर्था इति। अर्थे लिङ्गे चार्थस्य वृत्त्यसंभवात् "षड्रसवाचिनः शब्दास्त्रिषु लिङ्गेषु वर्तन्त" इत्यर्थो लभ्यते। यदि तु "षट् शब्दाः" तदादेस्तुवरस्य त्रैलिङ्गं न स्यात्। "तुवरो विभीतकः", "तुवरं जलं", "तुवरा हरीतकी" इति। कटुशब्दस्य स्त्रियां कटुः, कट्वी वा ॥१४२॥

परिमलः **विमर्दोत्थ इति।** सुरतादिविमर्दोत्थे माल्यादिगन्धे द्रव्याणां च परिमलादुद्भूते मनोहरे 'परिमलो' वर्तते। मलमल्ल धारणे। घञ् (पा० ३।३।१९)। संज्ञापूर्वकत्वाद् वृद्ध्यभावः। जनग्रहणं किम्? मक्षिकादेर्मनोहरे मा भूत् ॥ **एकं (विमर्दोत्थ-गन्धस्य ॥**

आमोदः 'स' परिमलः[523] अतिनिर्हारी अतिदूरगामी अतिमनोहारी वा 'आमोदः'। आ समन्तान्मोदन्तेऽनेनेति। मुद हर्षे। घञ् (पा० ३।३।१२१) ॥ **एकं (दूरगामि-परिमलस्य) ॥**

521 Under "अणश्च" (उ० १।८) तत्त्वबोधिनी observes—"चात् कटिवटिभ्याम्।"
522 शूकशक्यम्बिभ्यः क्लः—A. "वकार-रहितोऽपि मकारोऽत्र"—उज्ज्वल°। Hence अम्लः।
523 "According to स्वामी 'स' refers to गन्ध while मुकुट and सुभूति hold that it refers to परिमल"—observes रामनाथ।

वेति। 'आगुणात्' गुणवाचकशुक्लशब्दं यावत्।[524] अतः परं "वाच्यलिङ्गता" इत्यधिकारोऽयम् ॥१४३॥

समाकर्षी **समेति।** समाकर्षत्यवश्यम्। आवश्यके णिनिः (पा० ३।३।१७०) ॥ ['समाकर्षी' ॥]

निर्हारी एवं 'निर्हारी' ॥ **द्वे दूरगामिगन्धस्य ॥**

सुरभिः **सुरेति।** 'सुरभि'र्वसन्त उक्तः (स्व० १२१) ॥

घ्राणतर्पणः घ्राणं घ्राणेन्द्रियं तर्पयति 'घ्राणतर्पणः'। नन्द्यादिः (पा० ३।१।१३४) ॥

इष्टगन्धः इष्टो गन्धोऽस्य 'इष्टगन्धः' ॥

सुगन्धिः एवं 'सुगन्धिः'। "गन्धस्येदुत्पूति" (पा० ५।४।१३५) इत्यादिना इत् समासान्तः। "तदेकान्तग्रहणं कर्तव्यम्" (वा०) इत्यनौपाधिकस्यैवेति "आघ्रायि वान् गन्धवहः सुगन्ध" (भट्टि° २।१०) इति भट्टौ न समासान्त इत् ॥ **चत्वारि सुगन्धेः ॥** "इष्टगन्धादिद्वयं व्युत्पत्त्यनुसारेण[525] सुरभिगन्धयुक्तद्रव्यस्ये" ति कौमुद्यादयः ॥

आमोदी **आमोदीति।** आमोदयुक्तः कर्पूरादिः 'आमोदी'। अत इनिः (पा० ५।२।११५) ॥

मुखवासनः **(शुभवासनः)** मुखं वासयति 'मुखवासनः'। नन्द्यादिः (पा० ३।१।१३४)। "शुभवासनः" इति क्वचित् पाठः। "तत्र शुभं मनोहरं वासनो वासो यस्येति बहुव्रीहि" रिति सर्वधरः ॥ **द्वे मुखवासनवटिकादेः ॥१४४॥**

पूतिगन्धिः **पूतीति।** पूतिर्विस्रः। पूतिरिव गन्धोऽस्येति 'पूतिगन्धिः'। सुगन्धिवदिकारः (पा० ५।४।१३५) ॥

दुर्गन्धः दुष्टो गन्धोऽस्य 'दुर्गन्धः'। "गन्धस्येदुत्पूति" (पा० ५।४।१३५) इत्यादौ दुरोऽभावात् न इत्वम्। अतएव काव्यादर्शे[526] वामनः—"दुर्गन्धिमदादिषु पदेषु इत् समासान्तो दुर्लभः।

524 "गुणे शुक्लादयः पुंसी" ति (धी° १५०) यावत्। रमानाथ observes—"गुणः शुक्लादिस्तत्पर्यन्तम्" इत्येके। युक्तं चेदम्। तत्र विशेष्यवाच्यत्वात्।
525 व्युत्पत्त्यन्तरेण—A.
526 It appears to be a scribal error for काव्यालङ्कारे। Cf. काव्यालंकार (५।२।६६)।

("गन्धस्येद्) उत्पूति" (पा० ५।४।१३५) इत्यादिषु दुःशब्दस्यापाठादि" ति। केचित्तु मत्वर्थीयमिनिं कृत्वा 'दुर्गन्धी'ति नान्तमाहुः। तदसत्। "कर्मधारयमत्वर्थीयाभ्यां[527] बहुव्रीहिरेवेष्टो लाघवाद्" इति कात्यायनोक्तेः। केचित्तु लाघवमनादृत्य इच्छन्त्येव मत्वर्थीयम्। "विसकिसलयच्छेदपाथेयवन्त"(मेघ० १।११) इतिवत् प्रयोगश्चायम्[528]। "यद् दुर्गन्धि यदाविलं मलशतैर्यत् पूतिनाडीमयम्" इति शृङ्गारप्रकाशे[529]॥ **द्वे दुर्गन्धस्य ॥**

विस्रम् — **विस्रमिति।** बिस प्रेरणे। दन्त्यान्तः। बाहुलकात् "स्फायितञ्ची (उ० २।१३)" ति रक्। बिस उत्सर्गे इति तु भट्टः॥ (क)

आमगन्धि — **'आमगन्धी'** ति। आमोऽपक्वो मलस्तस्येव गन्धोऽस्येति "उपमानाच्चे" (पा० ५।४।१३६) ति इत् समासान्तः॥ **विस्रादिद्वयमपक्वमांसादिगन्धे ॥** शब्दार्णवे तु—"कस्तूरिकायामामोदः कर्पूरे मुखवासनः। वकुले स्यात् परिमलश्चम्पके सुरभिस्तथा॥ गन्धादिषड्भिरप्येते गुणिवृत्तौ त्रिलिङ्गकाः॥" इति। "सुरभ्यादिभ्यः "कृदिकारादक्तिनः" (वा० ४।१।४५) सर्वतोऽक्तिन्नर्थादित्येके इति[530] पक्षे ङीष्। सुरभी, सुगन्धी" इति तु कौमुदी॥

शुक्लः — **शुक्लेति।** शोकति मनोऽस्मिन्। शुक गतौ। 'शुक्लः'। "ऋज्रेन्द्रे" (उ० २।२८) त्यादौ निपातितः॥

शुभ्रः — शोभते 'शुभ्रः'। शुभ शुन्भ शोभार्थे*। "स्फायितञ्ची" (उ० २।१३) ति रक्॥

शुचिः — 'शुचिः'। अग्नावुक्तः (स्व० ५१)॥

527 मत्वर्थीययोः—सर्वानन्द।

528 वतुप्रयोगश्च—B_2.

529 सर्वानन्द adds—विभाकरवर्मा। Cf. The extract quoted from बुधमनोहरा by शिवदत्त। रघुनाथ introduces it—"यदुक्तं शृङ्गारप्रकाशे विभाकरशर्मणा।"

530 A adds—इति तु स्वामी but क्षीर's text does not corroborate it.

* शुभशुम्भ शोभार्थे—पा°धा°

(क) क्षीर°—Oka's ed.; "बवयोरभेदः"—भानु°

श्वेतः — श्विता वर्णे। "अकर्तरि चे" (पा० ३।३।१९) त्यादिना-कर्तरि घञ्। 'श्वेतः'। सतालव्यः(क)। "श्वेतो धावती" ति श्लेषात्॥

विशदः — विशीयते 'विशदः'। शद्लृ शातने। अच् (पा० ३।१।१३४)। "विशदा विशदा मत्तसारसे सारसे जले" (KA. III. 14.) इति दण्डियमकात्॥

श्येतः — श्यायते। श्यैङ्गतौ। "हृश्याभामितन्" (उ० ३।३९)। 'श्येतः'॥

पाण्डरः — पण्डते याति मनोऽस्मिन् 'पाण्डरः'। पडि गतौ। "पण्डेर्दीर्घश्च"[531] इति (अ)रः॥१४५॥

अवदातः — अवदायते शोध्यते 'अवदातः'। दैप् शोधने क्तः॥

सितः — सिनोति मनः। षिञ् बन्धने। "अञ्जिघृषिभ्यः क्तः" (उ० ३।८९)। 'सितः'। दन्त्यादिः "क्षितौ विकसितं सितम्" इति कीचकयमकात्॥

गौरः — गोरति(ख) मनोऽस्मिन्। गुरी उद्यमे। "ऋजेन्द्रे" (उ० २।२८) ति 'गौरो' निपातितः। "गुङ गतावित्यस्य निपात" इति सर्वधरः।

वलक्षः — अवलक्ष्यत इति 'वलक्षः'। पूर्ववद् घञ् (पा० ३।३।१९)। "रूढित्वान्नित्यो" वष्टिभागुरी" त्यकारलोप" इति स्वाम्यादयः। वलतेः क्विप् (पा० ३।२।१७८)। वलमक्षन्त्यस्मिन् पूर्ववद् घञि (पा० ३।३।१९)। 'वलक्ष' इति कषसंयोगवान्। "अथ स वलक्षो भानां पतिरिव कर्तारमरिबलक्षोभानाम्" इति वृन्दावनाद् इति कौमुद्यादयः॥

धवलः — धावति मनोऽत्र। धावु गतिशुद्धोः। वृषादित्वात् (उ० १।१०८) कलच्। 'धवलः'। बहुलवचनाद् ह्रस्वत्वम्। "धावो ह्रस्वश्चे" ति कलच्-ह्रस्वाविति भोजराजः॥

अर्जुनः — अर्ज्यत जनानुराग इति। अजसर्ज अर्जने। "अर्जेर्णिलुक् चे"

531 This rule has also been given in सर्वानन्द but could not be traced in printed texts. भानुजि instead of citing any rule says बाहुलकात् अरः, दीर्घश्च।

(क) शस्तालव्यः—B_1.

(ख) गुरते?

(उ० ३।५८) त्युनन्।[532] 'अर्जुनः'। अत्र यद्यपि शब्दार्णवे भेदः––"श्वेतस्तु समपीतोऽसौ रक्तेतरजवारुचिः। वलक्षस्तु सितश्यावः(क) कदलीकुसुमोपमः ।। अर्जुनस्तु सितः कृष्णलेशवान् कुमुदच्छवि"रिति, तथाप्यस्य भेदस्यानादरणादिह पर्यायता ।। **त्रयोदशकं शुक्लवर्गस्य ।।**

हरिणः **हरीति।** हरति मनो 'हरिणः'। "श्यास्त्याहृञ्विभ्य इनच्" (उ० २।४६) ।।

पाण्डुरः पाण्डुगुणयोगात्(ख) "नगपाण्डुपांशुभ्यो र" (वा०) (५।२।१०७) इति रः। अस्य अनार्षत्वात् "पाण्डुरोऽसाधु"रिति भाषावृत्तिकृतो[533] दुर्ज्ञानं जयादित्यं प्रति वाम्यमात्रं च जनितम्(ग)। भाष्यविरुद्धं हि चेदम्, न तु अयुक्तम्। वृद्धान्तरोक्तानामन्येषामपि[534] ग्राह्यत्वात्। भाष्यानुक्तानां भट्टिकोक्तानामन्यथा[535] अप्रामाण्यापत्तेः। अयं च शब्दार्णवादिभिरपि परमशिष्टैरनुशिष्टः। यथा––"पाण्डुरस्तु पीतरक्तभागी प्रत्यूषचन्द्रवत्। पाण्डुस्तु पीतभागार्धः केतकीधूलिसन्निभः ।। पाण्डरः पाण्डुरे कैश्चित् कैश्चित् पाण्डौ प्रवेशित"* इति। पाण्डरस्त्वल्पभेदाविवक्षायां शुक्लेऽपि प्रयुज्यत इति शुक्लपर्याये निबद्ध इति तु विशेषः ।।

पाण्डुः सितपीतसमायोगः पाण्डुवर्णः प्रकीर्तितः ।। **त्रयं पाण्डुरवर्णस्य ।।**[536]

धूसरः ईषत् शब्दोऽव्यक्तपरः। धुनोति चेतो 'धूसरः'। धूञ् कम्पने। "कृधूमादिभ्यः सरन्" (उ० ३।७३)। वाहुलकादषत्वम्। "महिषधूसरितः सरितस्तटः"[537] इति जानकीहरणम् (११।७१)। "धूसरस्तु सितः पीतलेशवान् वकुलच्छवि"रिति शब्दार्णवः ।। **एकम् (ईषत्पाण्डुवर्णस्य) ।।१४६।।**

---

532 अजेर्लुक् च—A_2. अर्जषर्ज–पा०धा० (क) पितः श्याव :— A.

(ख) "पाण्डुगुणयोगात् ऊषरादिभ्यो र इति सुभूति"––रघुनाथ।

533 भागवृत्तिकृतो—B_2. 534 ऋष्यन्तरोक्तानाम्—A.

535 Should we read it as तट्टीकोक्तानाम्? (ग) वाम्यमात्रजनितं च?

* "पाण्डुरः पाण्डरे कैश्चित्"। "उकारमध्यः अकारमध्यश्चेति सर्वानन्दः"—रघुनाथ।

536 पाण्डुवर्गस्य—B_1. 537 B_1. adds––परिगतो विषदाविषदापितः।

कृष्णः **कृष्ण इति।** कर्षति मनः 'कृष्णः'। कृष विलेखने। "कृषेर्वर्णे" (उ० ३।४) इति नक् ।।

नीलः 'नील वर्णे'। इगुपधत्वात् (पा० ३।१।१३५) कः। 'नीलः' ।।

असितः सितविरुद्धो'ऽसितः' ।।

श्यामः श्यायते मनोऽस्मात् 'श्यामः'। श्यैङ गतौ। "इषियुधीन्धिदसिश्याधूसूभ्यो मक्" (उ० १।१४४)।

कालः 'कालः'। उक्तो यमे (स्व० ५३) ।।

श्यामलः श्यामोऽस्यास्ति 'श्यामलः'। सिध्मादित्वाल्लच् (पा० ५।२।९७) ।।

मेचकः मचति मिश्रीभवति वर्णान्तरेण 'मेचकः'। मचमुचि कल्कने। वुन् (उ० ५।३५)। "गमिपचिमचां नाम्नी" (उ० ५।३७) त्येत्वम्(क)। "मेचकः कृष्णनीलः स्यादतसीपुष्पसन्निभः" इति तु शब्दार्णवे भेदः ।। **सप्त कृष्णवर्णस्य ।।**

पीतः **पीत इति।** पीयते वर्णात्। पातेर्बाहुलकाद् "अञ्जिघृषिभ्यः क्तः" (उ० ३।८९)। "घुमास्थागे" (पा० ६।४।६६) त्यादिना ईत्वम्। 'पीतः' ।।

गौरः 'गौर' उक्तः (स्व० १४६) ।।

हरिद्राभः हरिद्राया इव आभा दीप्तिरस्य 'हरिद्राभः' ।। **त्रयं पीतस्य ।।**

पलाशः (पालाशः) (हरितः, हरित्) **पलाश इति।** पत्रं पलाशम्। तत्तुल्यवर्णतया 'पलाशः'। "पत्रं पलाशं[538] ना रक्षःशटीहरितकिंशुक" इति तालव्यान्ते रुद्ररभसौ ।। अतो ह्रस्वादिः पुंलिङ्गः। "पालाश" इति दीर्घपाठे तु "शेष" (पा० ४।२।९२) इत्यस्य विधित्वाङ्गीकारादण् इत्याहुः ।। **त्रीणि हरितवर्णस्य ।।१४७।।**

रोहितः लोहितः **लोहित इति।** रुह जन्मनि प्रादुर्भावे। "रुहेरश्च लो वा" (उ० ३।९४) इति इतन्। 'लोहितः'। पक्षे "रोहितः" ।।

(क) "पचिमच्योरिच्च"––उज्ज्वलदत्त, भट्टोजि। This rule gives इ which takes गुण by पा० ७।३।८६।

538 पत्रे पलाशं––सर्वानन्द।

रक्तः रञ्ज रागे। (क्तः) 'रक्तः'॥ **त्रयं रक्तवर्णस्य**॥[539]

शोणः **शोण इति।** 'कोकनदच्छविः' रक्तोत्पलाभः 'शोणः'। शोणृ वर्णे। शोणति। पचाद्यच् (पा० ३।१।१३४)॥ **एकं (रक्तोत्पलाभस्य)**॥

अरुणः **अव्यक्तेति।** 'अव्यक्तरागः' किञ्चिल्लोहितोऽरुणः'। यथा मदमत्तस्य[540] चक्षूरागः। "अरुणः कृष्णलोहित" इत्यमरमाला॥ **एकम् (ईषल्लोहितस्य)**॥

पाटलः **श्वेतेति।** श्वेतरक्तमिश्रः पाटलाकुसुमाभः 'पाटलः'। अटपट गतौ। ण्यन्तात् वृषादिभ्यः (उ० १।१०८) कलच्।

(श्वेतरक्तः) "पटेरलज् बाहुलकाद्" इति तु भट्टः॥ **द्वे**[541] **(श्वेतरक्तस्य)** ॥१४८॥

श्यावः **श्यायत इति।** 'श्यावः'। श्यैङ गतौ। बाहुलकात् "कृगृशृदृभ्यो वः" (उ० १।१५५)

कपिशः कपिर्वर्णस्याख्या। लोमादित्वाच्छः (पा० ५।२।१००)। 'कपिशः'। तालव्यान्तः। तथाच—"कपिशितं पिशितं मदनाग्निना" (Śiśu, 6/5) इति माघः॥ **द्वे कृष्णपीतमिश्रवर्णस्य**॥

धूम्रः **धूम्रेति।** धूमं रातीति 'धूम्रः'। रा दाने। पृषोदरादित्वादकारलोपः (पा० ३।२।३, ६।३।१०९)॥

धूमलः धूममेव लातीति 'धूमलः'॥

कृष्णलोहितः कृष्णमिश्रो लोहितः। शाकपार्थिवादिः (वा०)॥ **त्रयं कृष्णलोहितमिश्रस्य**॥

कडारः **कडेति।** गडतीति गड सेचने। "गडेः कड् च" (उ० ३।१३५) इत्यारन् कडादेशश्च। 'कडारः'॥

कपिलः 'कपिलः'। कबृ वर्णे। "कबेः पश्च" (उ० १।५६)* इति

539 B_1. adds भागुरिस्तु लोहितरक्तयोरल्पं भेदमाह—"बन्धुजीवजवासन्ध्याच्छवौ वर्णौ मनीषिभिः। शोणलोहितरक्तानां प्रयोगः परिकीर्तितः" इतीह तु भेदो नादृतः।

540 दरमत्तस्य—A. 541 एकं—B_1.

* भानुजि also gives the same rule, but it cannot be traced. उज्ज्वलदत्त and भट्टोजि derive the word from कमु कान्तौ and the rule is : "कमेः पश्च।"

इलच् पश्चान्तादेशः। "कपिवर्णं लाति इति कपिलः" इति तु स्वामी॥

पिञ्जति। पिजि वर्णे। 'पिङ्गः'॥ पिङ्गः

पिंशति। पिश अवयवे। "विडादिभ्यः किद्" (उ० १।१२०) इत्यङ्गच्। 'पिशङ्गः'। तालव्यमध्यः। तथाच माघे— पिशङ्गः
"परिपाकपिशङ्गलतारजसा रोधश्चकास्ति कपिशङ्गलता" इति (Śiśu, 4/48)॥

कमु कान्तौ। "जत्र्वादयश्चे" (उ० ४।१०२) त्यनेन रुः टिलोपाभावश्च[542] निपात्येते। दकारश्चान्तादेशः। 'कद्रुः'॥(क) कद्रुः

पिजि वर्णे। वृषादित्वात् (उ० १।१०८) कलच्। "न्यङ्क्वादीनाञ्चे" (पा० ७।३।५३) ति कुत्वम्। 'पिङ्गलः'। पिङ्गलः
पिङ्गं लातीति तु स्वामी। शब्दार्णवे तु भेदः—

"सितपीतहरिद्रक्तः कडारस्तृणवह्निवत्।[543]
अयन्तूद्रिक्तपीताङ्गः[544] कपिलो गोविभूषणः॥
हरिताङ्गे च हीनेऽसौ[545] पिशङ्गः पद्मधूलिवत्।
पिशङ्गस्त्वसितावेशात् पिङ्गो दीपशिखादिषु॥
पिङ्गलस्तु परच्छायः पिङ्गे शुक्लाङ्गखण्डवत्।" इति॥

षट् कपिलवर्णस्य[546] ॥१४९॥

चित्रमिति। चीयते 'चित्रम्'। "अमिचिमिदिशसिभ्यः क्त्र" (उ० ४।१६३)[547] इति क्त्रः। "गुणे शुक्लादयः पुंसि" इति वक्ष्यते। अतो नानार्थपुंस्काण्डे निबन्धनात्[548] "चित्रम्" इति पाठो लिपिदोषजः। तस्मा"च्चित्रकिर्मीरे" ति समस्तं पाठ्यमित्येके। क्लीवनिर्देशः "तद्वदि" ति गुणिलिङ्गत्वेन कामचारादित्यन्ये। प्रक्रान्तसमासं विहाय "चित्रम्" इति पृथक् चित्रम्

542 पिशङ्गादयश्चेत्यनेन तन् रुन् डागमः टिलोपाभावश्च निपात्यन्ते—A.

(क) उज्ज्वलदत्त derives it from कबृ वर्णे।

543 मणिरश्मि—B_2. 544 पीतांशः—B_2.

545 हरितांशेन हीनोऽसौ—B_1. हरितांशेऽधिकेऽसौ तु—भानुजि°।

546 पिङ्गलवर्णस्य—B_1. 547 अमिचिमिदिशसिगमिभ्यः त्र इति त्रः–B_1.

548 नामानुशासने—B_1.; निर्वचनात्—B_2.

रूपभेदप्रदर्शनमत्र* "गुणे शुक्लादयः पुंसी" त्यस्य बाधनार्थमिति तु वयम्। तथाच शब्दार्णवे क्लीवत्वं दृश्यते। मेदिनीकारोऽपि विस्पष्टमेव--"तिलकालेख्ययोः क्लीवं कर्वुराद्भुतयोरपी" ति, "एवं[549] चेत्, तत् कथं चित्रं चित्रं चेदेकता कुत" इति धर्मकीर्तिवार्त्तिकञ्च ? (क)। नामानुशासने तु क्व[550] पुंस्त्वमिति न विद्मः ॥

कीर्यते। 'किर्मीरः'। "गम्भीरादयश्चे"(ख)ति (उ०
किर्मीरः ४।३५) किरतेरीरन् मुडागमश्च ॥

कलयति वर्णमिति। 'कल्माषः'। "कल्माषः कर्वुरे कृष्णे"
कल्माषः इति मूर्धन्यान्ते रभसः ॥

शपत्याक्रोशति वर्णान् इति "शर्पेर्वश्चे" (उ० १।१०७) ति
शवलः कलः वत्वं च। 'शवलः'(ग)। तालव्यादिः। "शकुनिपताकाशवलं घनवृन्दं चक्षुषा पताऽऽकाशवलम्" इति वृन्दावनात् ॥

एतः एति वर्णान्। एतेर्वर्णे तन् (उ० ३।८६) (घ)। 'एतः' ॥

कर्वुरः 'कर्वुर'(ङ) उक्तो राक्षसे (स्व० ५५) ॥ **षट् नानावर्णस्य ॥**

गुण इत्यादि। 'गुणे' वर्णमात्रे वर्तमानाः 'शुक्लादयः' कर्वुरान्ताः 'पुंसि'। यथा--पटस्य शुक्लो गुणः। 'तद्वति' द्रव्ये वर्तमानाः अभेदोपचारात् 'गुणिलिङ्गा' वाच्यलिङ्गाः। ततः स्त्रियां शुचिः शुची। "वर्णादि"त्यादिना (पा० ४।१।३९) ङीप् तकारनकारौ वा। श्येता, श्येनी। हरिता, हरिणी। लोहिता, लोहिनी। रोहिता, रोहिणी। एता, एनी। ङीष् (पा०

* A adds—उच्यते।

549 एकं चेत्--mss. excepting A.; शिवदत्त

(क) "चित्रं चित्रं च देवता कुत"--B_1....... "इति धर्मकीर्तिप्रयोगश्चोपलभ्यते"--शिवदत्तः। "क्लीवनिर्देशस्तु तद्वति गुणिलिङ्गत्वेन कामचारादिति सुभूतिः"--रघुनाथ।

550 कथं--B_1. Actually in नानार्थ० we have "आलेख्याश्चर्ययोश्चित्रम्" in neuter.

(ख) भानुजि also cites the rule, but it can not be traced. Both पञ्चपादी and दशपादी (८।७७) have "गभीरगम्भीरौ"। The latter, however, admits of बाहुलक।

(ग) शबलः—भानु°।

(घ) भानुजि also says "एतेर्वर्णे तन्।" The rule is "हसिमृग्रिण्वामिदमिलूपूधुर्विभ्यस्तन्।"

(ङ) कर्बुरः—भानु°, मेदिनी।

४।१।४१)। गौरी, अर्जुनी, हरिणी, धूसरी, पलाशी, कडारी, किर्मीरी, कल्माषी, शवली। "खरुसंयोगोपधात् प्रतिषेधो वक्तव्यः" (वा०) इति पाण्डुः, कद्रुः। "नीलात् प्राण्योषध्योः" (वा०)। नीली वडवा। नीली औषधिः। "वा संज्ञायाम्" (वा०)। नीली, नीला। अन्यत्र नीला शाटी। "कुवलयदलनीला कोकिला बालचूते" इति अपपाठः--इति वामनः। "जानपदे"-त्यादिना (पा० ४।१।४२) वर्णे ङीष्। "शोणात् प्राचाम् (पा० ४।१।४३) इति पक्षे शोणी शोणापि। "पिशङ्गादुपसंख्यानम्" (वा०)। पिशङ्गी। "भ्रमरोत्कटकल्माषा:[551] कुसुमानां समृद्धय" इति टाबन्तदर्शनात् कल्माषेति टाबन्तमपि। "शवलेति टाबन्तमसाधु" इति वामनभट्टः।[552] अर्श आद्यचि (पा० ५।२।१२७) टापि तु साध्वेव। रोहिणी रोहितेति पाठः क्वचिद् दृश्यते। तद्व्याख्या तु लिखितस्त्रीलिङ्गप्रयोगादेव कृतप्रायेति न क्रियते[553] ॥१५०॥

॥०॥ **धीवर्गविवरणम्** ॥०॥

551 भ्रमरोत्कर--B_2; रघुनाथ।

552 वाणभट्टः, वामनभट्टः--B_1. वाग्भट्टः--A. Actually this refers to "शवलादिभ्यः स्त्रियां टापोऽप्राप्तिः" (काव्यालंकार, ५।२।४५) but we are not sure if वाग्भट or any other authority has any such view.

553 In some mss. we have the following additional verses :

"रोहिणी रोहिता रक्ता लोहिनी लोहिता च सा।
रोहितिका लोहितिका(a) रागात् कोपादिनापि वा॥
शोणी शोणाथ पिशङ्गी(b) पिङ्गला हरिणी त्वियम्।
हरितैनी तथैवैता(c) श्येता श्येनी सिता च सा॥
नीलैव वस्त्रे तन्नाम्नि(d) नीली प्राणिनि चोषधौ।" मुकुट here seems to refer to these verses.

(a) लोहितिका लोहिनिका--रघुनाथ। (b) शोणी शोणा पिशङ्गी च—रघुनाथ।
(c) तथैता च—रघुनाथ। (d) तन्नाम्नी—B_1.

६। अथ शब्दादिवर्गः

ब्राह्मी तु भारती भाषा गीर्वाग् वाणी सरस्वती ।
व्याहार उक्तिर्लपितं भाषितं वचनं वचः ।।१५१।।
अपभ्रंशोऽपशब्दः स्याच्छास्त्रे शब्दस्तु वाचकः ।[554]
तिङसुबन्तचयो वाक्यं क्रिया वा कारकान्विता ।।१५२।।
श्रुतिः स्त्री वेद आम्नायस्त्रयीधर्मस्तु तद्विधिः ।[555]
स्त्रियाम् ऋक्सामयजुषी इति वेदास्त्रयस्त्रयी ।।१५३।।
शिक्षेत्यादि श्रुतेरङ्गम् ओङ्कारप्रणवौ समौ ।
इतिहासः पुरावृत्तम् उदात्ताद्यास्त्रयः स्वराः ।।१५४।।
आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः ।(क)
आख्यायिकोपलब्धार्था पुराणं पञ्चलक्षणम् ।।१५५।।
प्रबन्धकल्पना कथा प्रवल्हिका[556] प्रहेलिका ।
स्मृतिस्तु धर्मसंहिता समाहृतिस्तु संग्रहः ।।१५६।।
समस्या तु समासार्था[557] किंवदन्ती जनश्रुतिः ।
वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्याद् अथाह्वयः ।।१५७।।
आख्याह्वे चाभिधानञ्च नामधेयञ्च नाम च ।
हूतिराकारणाह्वानं संहूतिर्बहुभिः कृता ।।१५८।।
विवादो व्यवहारः स्याद् उपन्यासस्तु वाङमुखम् ।
उपोद्घात उदाहारः शपनं शपथः पुमान् ।।१५९।।

---

554 काव्ये त्वाभीरादिगिरः––सुभूति ।

555 भानुजि reads—"त्रयी। धर्मस्तु तद्विधिः।" In his opinion "त्रय्यन्तानि चत्वारि वेदस्य नामानि।" He, however, justifies the expression त्रयीधर्म independent of this particular context. "तान्त्रिकसौगतादिधर्मव्यावृत्त्यर्थमिदं धर्मस्य विशेषणं संगच्छते।" But in consideration of the word 'त्रयी' in the next line राय's view seems to be better than that of भानुजि ।

(क) आन्वीक्षिकीदण्डनीती तर्कविद्यार्थशास्त्रयोः––रघुनाथ

556 प्रवह्लिका—A. ; रघुनाथ ।

557 समस्यार्था––सर्वानन्द ।

ब्राह्मीत्यादि । ब्रह्मण इयं 'ब्राह्मी'। "ब्राह्मोऽजाता" विति (पा० ६।४।१७१) टिलोपे "टिड्ढाणञ्" (पा० ४।१।१५) इत्यादिना ङीप् ।। **ब्राह्मी**

भरतेनावतारितत्वाद् 'भारती'। शेषे अण् (पा० ४।२।९२) ।। **भारती**

भाष्यते 'भाषा'। "गुरोश्च" (पा० ३।३।१०३) इत्यप्रत्ययः ।। **भाषा**

गृणन्ति ताम् । गॄ शब्दे । संपदादित्वात् (वा०) क्विप् । "र्वोरुपधाया दीर्घः (पा० ८।२।७६)। 'गी' रेफान्ता। भागुरिमते 'गिरा' अपि ।। "ब्रवणी[558] वचनं वाचा जल्पितं गदितं गिरा" इति शब्दार्णवः। ब्रवणीति "ब्रह्मणो ब्रवाणाद्"*––इति निरुक्तादेव वच्यभावः ।। **गीः** **(गिरा)**

उच्यते 'वाक्'। चान्ता। "क्विब् वची"त्यादिना (वा० ३।२।१७८) क्विप्, दीर्घोऽसंप्रसारणं च ।। **वाक्**

'वाणी' । अणरणवणेति दण्डकः । घञि (पा० ३।३।१९) गौरादि (पा० ४।१।४१) ङीष् ।। **वाणी**

सरोऽस्या आश्रयत्वेनास्ति। मतुपि (पा० ५।२।९४) 'सरस्वती'। इयं ब्रह्मलोके ब्रह्मसरः समाश्रित्य शापात् नदी भूत्वा लोकम् अवतीर्णा। अत्र शक्तिशक्तिमतोरभेदात् वचनमपि सरस्वतीशब्दवाच्यम् ।। **सरस्वती**

भावे घञि (पा० ३।३।१८) 'व्याहारः' ।। **व्याहारः**

वचेः क्तिन् (पा० ३।३।९४) 'उक्तिः' ।। **उक्तिः**

'लपितम्'। भावे क्तः (पा० ३।३।११४) ।। **लपितम्**

एवं 'भाषितम्' अपि ।। **भाषितम्**

वचेर्ल्युट् (पा० ३।३।११५) 'वचनम्' ।। **वचनम्**

असुनि (उ० ४।१८८) 'वचः'। सान्तम् ।। **त्रयोदश वचनस्य ।।१५१।।** **वचः**

अपभ्रंशेति । शब्दानुशासने शिष्टादितरो गावी, गोणी, गोपोतलिकादि'रपभ्रंशः' अपशब्द उच्यते संस्कृतादपभ्रश्यत **अपभ्रंशः**

---

558 ब्रवाणी, ब्राह्मणी––B_2 ; ब्रह्माणी—भानुजिः। ब्रुवाणी?

* ब्रुवाणाद्—B_2.

इति व्युत्पत्तेः। 'अपभ्रंश'स्तालव्यान्तः। संस्कृतादपभ्रश्यत इति भ्रशु भ्रन्शु अधःपतने। कर्मणि घञ् (पा० ३।३।१९)। दन्त्योऽपीत्येके[559]। तदसत्। "स्रन्सु भ्रन्सु अधःपतने[560] इत्यस्य घञि रूपं न दृश्यते" इति भाष्यादावुक्तत्वात्।

अपशब्दः

शब्दानुशासने अपभ्रष्टः* शब्दः 'अपशब्दः'। निपातस्यानेकार्थत्वात् अत्र अपशब्दोऽसंस्कृतार्थः। अपेत्यव्ययं कुत्सायाम्।(क) तथाच--"कुत्सितश्चारोऽपचार" इति "परिन्योर्नीणो" (पा० ३।३।३७) रिति सूत्रे न्यासः। संस्कारविरहादेव कुत्सितत्वम्।।(ख) **द्वे आभीराद्युक्तिरूपासंस्कृतवचनस्य।।**

शब्दः

शब्देति। "शास्त्रे व्याकरणादौ वाचको यः स 'शब्द'" इति स्वामी। "शास्त्रे यः 'शब्दः' स 'वाचक'" इत्यन्ये। अयमेव साधुरपि। प्रकृतिप्रत्ययद्वारेण अर्थस्य वाचको गवादिरूपः संस्कृतः शास्त्रे व्याकरणे तर्कादौ च 'शब्द' उच्यते। लोके तु संस्कृतोऽसंस्कृतश्च 'शब्द' उच्यते।।

वाचकः

वचेर्ण्वुलि (पा० ३।१।१३३) 'वाचकः'।। **द्वे वाचकस्य।।**[561]

वाक्यम्

[**तिङसुबन्तेति।** तिङसुबन्तयोश्चयः समुदायो वाक्यम्। "द्वन्द्वात् परो यः श्रूयते लभतेऽसौ[a] प्रत्येकमभिसम्बन्धम्" इति 'अन्त'[b] उभयोरपि संबध्यते। 'वाक्यं' वक्तव्यम्। वचेर्ण्यति (पा० ३।१।१२४) "चजोः कु" (पा० ७।३।५२) इति कुत्वम्। ओदनं पचति। तिङग्रहणं क्रियोपलक्षणम्। तेन कटं कृतवान् इत्याद्यपि वाक्यम्। यद्वा--तिङन्तचयः सुबन्तचयश्च वाक्यम्। यथा--पचति भवति। पाको[c] भवतीत्यर्थः।

559 सर्वानन्दादयः—B_2.

560 पा° धा° has भृशुभ्रंशु अधःपतने and स्रंसुध्वंसुभ्रंसु अवस्रंसने।

* असंस्कृतः—A.; असंस्कृतशब्दः—B_1.

(क) अपशब्दोऽव्ययं कुत्सायाम्—B_1.

(ख) B_1. omits this sentence.

561 एकं वाचकस्य—भानुजि।

[ ] Portion enclosed is omitted in A.; B_1. and रघुनाथ।

a लभते सः—रघुनाथ

b अन्तं शब्दः—Ibid.

c पाचको—B_1.

सुबन्तचयो यथा--"प्रकृतिसिद्धमिदं हि महात्मनाम्" इति। भवत्यध्याहारस्तत्र वाचकमात्रम्। एतच्च मतान्तरमावेदितम्।

अत्रोपलक्षणप्रयासं दृष्ट्वा स्वमतमाह--**क्रिया वेति।** यथा--देवदत्तो ग्रामं गच्छति, गत इति वा। "पश्य त्वं मृगो धावतीत्यत्र "पश्य त्वम्" इत्येकं[d] वाक्यम्, मृगो धावतीत्यपरम्। क्रिययोः* सम्बन्धाभावाद्" इति पूर्वटीकाकाराः। वयं तु --"कारकान्विता" कारकैः सम्बन्धितार्था (क) इति व्याचक्ष्महे। तेन "आकाङ्क्षायोग्यतासत्तिमतां पदानां समूहो वाक्यम्" इति लक्षणमेवेदं कृतम्। तेन "देवदत्त गामभ्याज[e] शुक्लां[f] दण्डेन" इतीदृशमेव वाक्यम्। "प्रकृतिसिद्ध"मित्यादौ "यत्रान्यत् क्रियापदं न श्रूयते तत्र अस्तिभवतिकरोत्यादीनामन्यतमाध्याहारः कर्तव्य" इति भाष्योक्तेः क्रियासम्बन्धिता[g] अस्त्येवेति पचति भवतीत्यत्रापि साध्यस्वभावोऽपि धात्वर्थः प्रार्थनादिक्रियां प्रति सिद्धत्वेन[h] आश्रीयत इति ज्ञापितत्वात् सिद्धत्वे[i] लक्षणव्याप्तिः।। **एकं पदसमूहस्य।।**(ख) ।।१५२।।

d Omitted in रघुनाथ।

e देवदत्तो ग्रामं तत्याज--रघुनाथ

f Omitted in रघुनाथ।

g क्रियासम्बन्धान्विता--Ibid.

h क्रियाप्रसिद्धत्वेन--Ibid.

i सिद्धत्वेन--Ibid.

(क) सम्बन्धार्थे--रघुनाथ

* क्रियायाः--रघुनाथ

(ख) In B_2 we have a different version which runs as follows :—

तिङसुबन्तेति। तिङः एकार्थपरपदसमूहो 'वाक्यम्' (वा० २।१।१) इत्युच्यते, विवक्षितार्थप्रतिपादनात्। वचेर्ण्यत् (पा० ३।१।१२४)। "वचोऽशब्दसंज्ञायाम्" (पा० ७।३।६७) इति निषेधस्य पर्युदासादिह "चजोः कु" (पा० ७।३।५२) इति कुत्वम्। समूहश्चैकार्थकत्वात्। अर्थो महाविशेष्यम्। महत्त्वं तु अनुपसर्जनता। ऐक्यं तु एकवृत्तिविषयता। इदं च लक्षणं सूत्रभाष्ययोर्मतम्। तच्च वाक्यं त्रिधा--(१) तिङन्तचयः, (२) सुबन्तचयः, (३) उभयचयश्चेति।

(१) आद्यो यथा--पचति भवति। एककर्तृका वर्तमाना पचिक्रिया भवतीत्यर्थः। "क्रियाप्रधानमाख्यातम्" इति सिद्धान्तात् क्रियायाश्चासत्त्वभूतत्वेऽपि कर्तृतया च सम्बन्धस्य "भूवादि" (पा० १।३।१) सूत्रे भाष्यकैयटादौ स्थापितत्वात्।

(२) द्वितीयो यथा--"प्रकृतिसिद्धमिदं हि महात्मनाम्।" (नीतिशतकम्, ९)

(३) तृतीयो यथा--घटमानय।

"भ्रेमुर्ववल्गु"रित्यादि तु नैकं वाक्यम्। भ्रमणवल्गनादीनां प्रत्येकं प्राधान्यात्। किन्तु आक्षिप्तकारकगर्भाणि नानावाक्यान्येवेति दिक्।।

श्रुतिः **श्रुतिरिति ।** श्रूयते धर्मोऽनया 'श्रुतिः' । "श्रुयजीषिस्तुभ्यः करणे" (वा०) इति क्तिन् ॥

वेदः विदन्त्यनेन धर्मम् इति घञि (पा० ३।३।१२१) 'वेदः'॥

आम्नायः आङ्पूर्वो म्नायतिरुपदेशार्थः(क) । आम्नायेते उपदिश्येते धर्माधर्मावनेन। घञि (पा० ३।३।१९) "आतो युक् चिण्कृतोः" (पा० ७।३।३३) इति युक् । आमनति उपदिशति तौ । "श्याद् वधे" ति (पा० ३।१।१४१) कर्तरि णे वा 'आम्नायः' ॥ **त्रीणि प्रत्येकं समुदायेन च वेदस्य ॥**

त्रयीति । त्रयी वक्ष्यमाणा । तया विधिर्विधीयमानो
त्रयीधर्मः यज्ञादिः 'त्रयीधर्मः' । उक्तं च––"विधानमृग्यजुःसाम्नां त्रयीधर्मं विदुर्बुधाः ।" इति ।[562] समासे गुणीभूतस्यापि त्रयीशब्दस्य वक्तुर्विवक्षावशात्[563] तच्छब्देन परामर्शः ।[564] यथा––"अथ शब्दानुशासनम् ।(ख) केषां (शब्दानाम्) ? लौकिकानां वैदिकानाञ्च" (महाभाष्य १।१।१) । "भोगिभोगासनासीनं ददृशुश्च* दिवौकसः । तत्फणामण्डलोदर्चिर्मणिद्योतितविग्रहम्" इति रघुः (X. 7.) । **एकं (त्रयीविहितधर्मस्य)॥**

ऋक् **स्त्रियाम्** इति। ऋच्यन्ते(ग) देवा अनया 'ऋक्' । चान्ता। ऋच स्तुतौ । क्विप् (वा० ३।३।९४) ॥

इदानीं वार्त्तिकमते लक्षणान्तरमाह––**क्रिया वेति ।** क्रियापदमित्यर्थः । उक्तं हि कात्यायनेन––"यत्रान्यत् क्रियापदं नास्ति तत्रास्तिर्भवन्तीपरोऽप्रयुज्यमानोऽप्यस्ति" इति। अतएव अभिहिते प्रथमेति संगच्छते । एतन्मते द्विविधमेव वाक्यम्, केवलसुबन्तचयानभ्युपगमात् । एतन्मतखण्डनं तु आकरे स्पष्टम् । ग्रन्थगौरवभयान्न लिख्यते ॥ **एकं पदसमूहस्य ॥**

562 परमानन्द ascribes it to नाममाला । रघुनाथ ascribes the same to भरत । भानुजि reads––"त्रय्या धर्मस्त्रयीधर्मः । तया त्रय्या विधिर्विधीयमानो यज्ञादिस्तद्विधिः । विधानमृग्यजुःसाम्नां त्रयीधर्मं विदुर्बुधाः । एकम्"––इति मुकुटः ।

563 बहुविवक्षावशात्––A, भानुजि । (क) म्नाति-?

564 This is exactly what सर्वानन्द says. क्षीर° also eccepts the reading त्रयीधर्मः । 'त्रयी' in the next line tends to support this view. भानुजि's arguments in favour of separating त्रयी and धर्मः is not convincing.

(ख) भानुजि in his quotation from मुकुट drops 'अथ' ।

* "ददृशुस्तं"––मल्लिनाथ's reading. (ग) शिवदत्त's ms. has ऋच्यन्ते स्तूयन्ते ।

सोऽवसाने । स्यति पापम् । "सातिभ्यां मनिन्मनिणा"
(उ० ४।१५२) विति मनिन् । 'साम' । **साम**

इज्यतेऽनेन 'यजुः' । "अर्तिपृवपियजितनिधनितपिभ्यो **यजुः**
नित्" (उ० २।११८) इत्युसिः ॥ **वेदानां पृथक् पृथगेकैकम् ॥**

इतीति । इतिरिति क्रान्तवाची ।[565] एते वेदास्त्रयः 'त्रयी'- **त्रयी**
शब्देनोच्यन्ते । ऋग्यजुःसामलक्षणास्त्रयोऽवयवा यस्याः । त्रिशब्दात् "संख्याया अवयवे तयप्" (पा० ५।२।४२) । तस्य "द्वित्रिभ्यां तयस्यायज् वा" (पा० ५।२।४३) इत्ययच् । "टिड्ढाणञ्" (पा० ४।१।१५) इत्यादिना ङीप् ॥ **वेदत्रयसमुदितस्यैकम् ॥१५३॥**

शिक्षेत्यादि । श्रुतेर्वेदस्य शिक्षेत्याद्यङ्गम् । अङ्गते ज्ञायते **श्रुत्यङ्गम**
अनेनेति कृत्वा । आदिना कल्पादिसंग्रहः ।* तदुक्तम्––"शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषां श्रुतिः ।(क) छन्दसां विचितिः षष्ठः[566] षडङ्गो वेद उच्यते ।।" इति ।।

अकारादिवर्णानां स्थानकरणप्रयत्नबोधिका(ख) "अकु- **शिक्षा**
हविसर्जनीयाः कण्ठ्या" इत्यादिका 'शिक्षा' । शिक्षते । शिक्ष विद्योपादाने । "गुरोश्च" (पा० ३।३।१०३) इत्यकारः ।।

यागक्रियाणामुपदेशः 'कल्पः' ।। **(कल्पः)**

साधुशब्दान्वाख्यानं 'व्याकरणम्' ।। **(व्याकरणम्)**

"वर्णागमो वर्णविपर्ययश्च" इत्यादिना निश्चयेनोक्तं
'निरुक्तम्' ।।(ग) **(निरुक्तम्)**

ग्रहणादिगणनशास्त्रं 'ज्योतिःश्रुतिः' ।। **(ज्योतिः-श्रुतिः)**

छन्दसां पद्यानां शास्त्रं 'छन्दोविचितिः' ।। एकं **(छन्दोविचितिः)**
वेदाङ्गस्य ।।

ओङ्कार इति । पापेभ्योऽवति रक्षति भूतानि । **ओङ्कारः**
"अवतेष्टिलोपश्च" (उ० १।१४१) इति मन्-टिलोपौ ।

---

565 अतिरतिक्रान्तवाची––B_1. ऋतक्रान्तवाची––B_2.

* कल्पादिग्रहः––B_1. (क) गतिः––भानुजि ।

566 छन्दोविचितिरित्येत्यैः––B_1. (ख) स्थानवारणप्रयत्न––B_1.

(ग) इत्यादिना निश्चयेनोक्तिः निरुक्तिर्येनोक्तं 'निरुक्तम्'––A.

टिलोपसामर्थ्यात् प्रत्ययस्यैव। अन्यथा हि "डिदि" त्येवोच्यते। "ज्वरत्वर" (पा० ६।४।२०) इत्यादिना ऊठ्। गुणः। ततो बाहुलकात् "वर्णात्कारः" (वा०)। 'ओङ्कारः'॥

प्रणवः प्रकृष्टो नवः 'प्रणवः'। नवः स्तुतिः। प्रणूयते वा 'प्रणवः'। नु स्तुतौ। अप् (पा० ३।३।५७)। "उपसर्गादि" (पा० ८।४।१४)ति णत्वम्॥ **द्वे ओङ्कारस्य**॥

इतिहासः **इतिहास इति**। 'इति ह' शब्दः पारम्पर्योपदेशेऽव्ययम्। इति ह आस्तेऽत्र। "हलश्चे" (पा० ३।३।१२१) ति घञ्। 'इतिहासः'। "इति एवमर्थे, ह किलार्थे। एवं किलास्त इति पचाद्यचि (पा० ३।१।१३४) 'इतिहास'" इति तु भट्टः॥[567]

पुरावृत्तम् 'पुरावृत्तम्'। पुरावृत्तोपनिबन्धनप्रायत्वात् "पुरावृत्तम् पूर्वचरित" मिति तु स्वामी॥ **द्वे पूर्ववृत्तप्रतिपादकस्य व्यासादिप्रणीतग्रन्थस्य**॥

स्वराः **उदेति**। उदात्ताद्यास्त्रयः स्वराः। आदिना अनुदात्तस्वरितयोर्ग्रहणम्। तदुक्तम्––"उदात्तश्चानुदात्तश्च स्वरितश्च त्रयः स्वराः।(क) चतुर्थः प्रचितो नोक्तो यतोऽसौ छान्दसः स्मृतः॥" इति। स्वरन्ति शब्दायन्ते। स्वृ शब्दोपतापयोः। बाहुलकादप् (पा० ३।३।११३)। 'स्वराः'॥

उदात्तः उच्चैरादीयते उच्चार्यते 'उदात्तः'॥ **एकं (स्वराणाम्)** ॥१५४॥

(तर्कविद्या) **(अर्थशास्त्रम्)** आन्वीति। तर्कशास्त्रं न्यायवैशेषिकादिः। 'अर्थशास्त्र' चाणक्यादिप्रणीतम्। अर्यन्ते अधिगम्यन्ते। ऋ गतौ। "उषिकुषिगार्तिभ्यस्थन्" (उ० २।४) इति थन्। 'अर्था' भूमिहिरण्यादयः। तेषु प्रधानमर्थो भूमिः। इतरेषां तद्योनित्वात्। तदर्थं शास्त्रम्। तथागमप्रतिपादितानां वस्तुतत्त्वानामनु पश्चादीक्षणं परीक्षणम् अन्वीक्ष्यते अन्वीक्षा। "तदस्य प्रयोजन"मिति

आन्वीक्षिकी (पा० ५।१।१०९) ठक्। 'आन्वीक्षिकी'। दीर्घादिः।

दण्डनीतिः सामादीनां चतुर्थ उपायो दमो दण्डः।* तत्साधनं च

567 इत्येवमर्थो हः किलार्थे––क्षीर°। (क) उदात्ताश्चानुदात्ताश्च––A.,B_1.

* दण्डं––B_1.

प्रकृत्यादि। तस्य नीति'र्दण्डनीतिः'। प्रायो दण्डनीत्या नीतिप्रणयनं 'दण्डनीति'र्दण्डेन व्यपदेशः।* प्रजादोषबाहुल्येन प्रायशो दण्डस्य प्रणयनात् दण्डो नीयते दण्ड्यं प्रति पात्यते[568]ऽनया 'दण्डनीतिः'॥ यथाक्रमम् 'आन्वीक्षिकी'ति 'दण्डनीति'रिति **तर्कशास्त्रार्थशास्त्रयोरेकैकम्**॥

आख्येति। उपलब्धः केनाप्यर्थो यस्याः सा 'उपलब्धार्था'। भूतार्थेत्यर्थः। आचष्टे प्रतिपादयति सत्यमर्थम् 'आख्यायिका'। आख्यातेर्ण्वुल् (पा० ३।१।१३३)। **आख्यायिका**

तदुक्तम्––

"कन्यापहारसंगरसमागमाभ्युदयभूषितं यस्याम्।
नायकचरितं ब्रूते नायक एवास्य वानुचरः॥
वक्त्रापरवक्त्रवती सोच्छ्वासा संस्कृतेन गद्येन।
साख्यायिकेति कथिता माधविका-हर्षचरितादिः।" **एकं ज्ञातसत्यार्थायाः कथायाः**॥

पुरेति। पुरा पूर्वस्मिन् भूतं 'पुराणम्'। "पुराणनवकेवलाः" (पा० २।२।४९) इति निर्देशान्निपातितम्। "पुरा अनिति प्राणिति पुराणम्" इति तु स्वामी॥ **पुराणम्**

पञ्च लक्षणान्यस्य 'पञ्चलक्षणम्'। **पञ्चलक्षणम्**

"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
भूम्यादेश्चैव संस्थानं[569] पुराणं पञ्चलक्षणम्॥ (विष्णुपु°)

द्वे व्यासादिप्रणीतमत्स्यपुराणादेः॥१५५॥

प्रबन्धेति। प्रबन्धस्य रचना बहुलता स्तोकसत्या 'कथा'। कथ वाक्यप्रबन्धे। चौरादिकः। "चिन्तिपूजिकथी" त्यादिना अङ (पा० ३।३।११५)। तदुक्तम्–– **कथा**

पर्यायेण बहूनां यत्र प्रतियोगिनां कथा कुशलैः।
क्रियते शूद्रकवधवज्जिगीषुभिः[570] परिकथा सा तु॥
ग्रन्थान्तरप्रसिद्धं यस्यामितिवृत्तमुच्यते विबुधैः।

568 दम्यं प्रतिपाद्यते––B_1. 569 राजानुकीर्तनञ्चेति––B_2.

570 शूद्रकारवज्जिगीषुभि––B. . . . मनीषिभिः––सर्वानन्द।

* व्यपदिश्यते?

मध्याद्युपान्ततो वा सा खण्डकथा तु (तू ?) पात्तम् ।।"
इत्यादि (?)[571]।

"यत्राश्रित्य कथान्तरमतिप्रसिद्धं निबध्यते कविभिः।
चरितं विचित्रमन्यत्र सोपकथा चित्रलेखादिः ।।
लक्ष्यान्वयाद्भुतार्था पिशाचभाषामयी बहुविषया ।[572]
नरवाहनदत्तादेश्चरितमेव बृहत्कथा भवति ।।
आख्यायिकेव साङ्का सोच्छ्वासा दिव्यगद्यपद्यमयी[573]
सा दमयन्तीवासवदत्तादिरिहोच्यते चम्पू"रिति ।।

कोहलाचार्यस्त्वेवमाह––

"प्रबन्धकल्पनां स्तोकसत्यां सन्तः कथां विदुः।
परस्पराश्रयो यस्यां सा मताख्यायिका क्वचिद्" ।।[574]

इति ।। **एकं प्रबन्धकल्पनायाः ।।**

प्रवल्हिका **प्रवेति।** प्रवल्हते प्राधान्यं भजते। वर्हवल्ह भाषण-[575] हिंसादानेषु। क्वुन् (उ० २।३२) 'प्रवल्हिका'।।

प्रहेलिका 'प्रहेलिका'। "प्रवल्हतेरिन् (उ० ४।११७)। प्रवल्हिः। ततो ङीष्। प्रवल्ही। एवं हिलेरिन् 'प्रहेलिः'। "उभयत्र स्वार्थे कन् (पा० ५।३।८७)। प्रहेलिका" इति कौमुदी। "प्रहेलिका प्रवल्ही च प्रश्नदूती विपादिका" इत्युत्पलिनी।

"व्यक्तीकृत्य[576] कमप्यर्थं स्वरूपार्थस्य गोपनात्।
यत्र बाह्यार्थसंबद्धः[577] कथ्यते सा प्रहेलिका ।।"

यथा––"तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः ।।*
गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः ।।"

---

571 . . .त्तापात्तमित्यादिः––A ; तु पार्थमित्यादि––सर्वानन्द ।
572 लक्ष्याङ्कताद्भुतार्थापि सा च भाषामयी बहुविषया––A. लक्षाङ्किता भूतार्था––B. . . . महाविषया–सर्वानन्द ।
573 आख्यायिकैव साङ्का सोद्भासा––A,B.
574 प्रबन्धकल्पनायां प्राक् सत्यां सुज्ञाः. . .परम्पराश्रयो यस्यां––सर्वानन्द । . . . प्राज्ञाः कथां––रघुनाथ ।
575 भट्टोजि reads परिभाषण. . . ।
576 एकीकृत्य––B, सर्वा° ।
577 बाह्यान्तरावर्थौ कथ्येते सा––सर्वा° ।
* -संस्थितः––रघुनाथ ।

"पानीयकुम्भः" इति विदग्धमुखमण्डनम् ।। **द्वे दुर्विज्ञानार्थस्य प्रबन्धस्य ।।**

स्मृतिः **स्मृतीति।** महर्षिभिर्वेदार्थस्मरणं 'स्मृतिः'। तद्योगाद् ग्रन्थोऽपि 'स्मृतिः' ।।

धर्मसंहिता धर्मः सन्धीयतेऽस्यां 'धर्मसंहिता' धर्मशास्त्रम् ।। **द्वे मन्वादिप्रणीतशास्त्रस्य ।।**

समाहृतिः **समेति।** समाहरणं 'समाहृतिः'। क्तिन् (पा० ३।३।९४) ।।

संग्रहः 'संग्रहः'। "ग्रहवृदृ" (पा० ३।३।५८) इत्यप्। तदुक्तम्–

"विस्तरेणोपदिष्टानामर्थानां सूत्रभाष्ययोः।
निबन्धो(क)यः समासेन संग्रहं तं विदुर्बुधाः ।। (NŚ. (KSS), 6/9)

"इतस्तत आकृष्य एकत्र निबन्धनं 'संग्रहः'" इति च ।। **द्वे संग्रहस्य ।।१५६।।**

समासार्था **समेति।** समासोऽर्थो यस्याः वाचः सा 'समासार्था'। कर्मणि घञ् (पा० ३।३।१९) ।।

समस्या अपूर्णत्वाद् विक्षिप्तं समस्यते संक्षिप्यते अनया इति 'समस्या'। "संज्ञायां समजे"ति (पा० ३।३।९९) बाहुलकात् क्यप्, "ऋहलोर्ण्यत्" (पा० ३।१।१२४) इति वा। संज्ञापूर्वकत्वाद् वृद्ध्यभावः। 'समासार्था'[578] इत्येष एव मूलपाठः। क्वचित् "समस्यार्था" इत्यपि दृश्यते" इति तु पूर्वटीकाकाराः। "वयं तु "समासार्था" इति पाठमेव क्षीरस्वामि-हड्डचन्द्रकोक्कटादौ प्रायेणामरकोषेष्वपि दृष्टवन्तोऽतस्तमेव बहु मन्यामहे ।। **द्वे श्लोकस्य पादेनैकेन द्वाभ्यां त्रिभिर्वा यत् पूरणं तस्य।** तद् यथा––"मुमूर्षोः किं तवाद्यापि चित्रकानननागरैः ।[579] स्मर नारायणं येन त्रेतायां रावणो हत" इत्यादि श्लोकादौ पादादिपूरणरूपेयमित्येके। "सा ते भवतु सुप्रीता किन्ते दुर्भगया मये" त्यादि ।।

(क) निबद्धो––variant.
578 समस्यार्था––B.
579 च विचित्रकानन ।––B. चव्यचित्रकनागरैः––सर्वा° ।

किंवदन्ती **किमिति।** कोऽपि वादः 'किंवदन्ती'। किंपूर्वाद् वदतेः "तॄभूवहिवसिभासी" (उ० ३।१२८) त्यादिना झच्। गौरादित्वात् ङीष् (पा० ४।१।४१)। "भुवो झच्। बाहुल-
(किंवदन्तिः) काद् वदेश्च। ततः किंवदन्ति"रिति हट्टचन्द्रः। "ततो ङीष्, किंवदन्ती" ति तु कौमुदी।

जनश्रुतिः जनेभ्यः श्रुतिः 'जनश्रुतिः'॥ **द्वे सत्यानृतसाधारण्याल्लोकप्रसिद्धेः ॥**

वार्ता **वार्तेति।** वृत्तिर्लोकवृत्तान्तो विद्यतेऽस्यां 'वार्ता'। "प्रज्ञाश्रद्धा" इत्यादिना (पा० ५।२।१०१) णः।[580]

प्रवृत्तिः प्रमाणे वर्तनं 'प्रवृत्तिः'।

वृत्तान्तः वृत्तोऽनुवर्तनीयोऽन्तः समाप्तिरस्य 'वृत्तान्तः'।

उदन्तः उद्गतोऽन्तोऽस्य 'उदन्तः॥ **चतुष्कं वार्तायाः ॥**

आह्वयः **अथेति।** आहूयतेऽनेन 'आह्वयः'। ह्वेञ् स्पर्धायां शब्दे च। "पुंसि" (पा० ३।३।११८) इत्यादिना घः। बाहुलकादात्वाभावः। स्वामी तु बाहुलकात् छप्रत्ययमाह। तदा "अशिती" (पा० ६।१।४५) ति निषेधात् न आत्वम् ॥१५७॥

आख्या "आख्या'। अङ (पा० ३।३।१०६)॥

आह्वा एवम् 'आह्वा'॥

अभिधानम् 'अभिधानम्' इति करणे ल्युट् (३।३।११७)।

नामधेयम् भागधेयवत् (काल° १३०) 'नामधयम्'॥

नाम व्योमवत् (व्योम° ६७)'नाम'॥ **षट् नाम्नः ॥**

हूतिः **हूतिरिति।** ह्वेञः क्तिन् (पा० ३।३।९४)। संप्रसारणं, "हल" (पा० ६।४।२) इति दीर्घः॥

आकारणम् 'आकारणम्' आकारणा। कृञो ण्यन्ताद् युच् (पा० ३।३।१०७)। आकारयतिराह्वाने वर्तते। तथाच माघः— "अहमाकारयितुं महीभुजा" (Śiśu, 16/52)[581] इति॥

580 काशिका inserts 'वृत्ति' in the सूत्र and राय° seems to follow काशिका here. क्षीर° also quotes the काशिका version. भानुजि criticises मुकुट because he ignored the वार्त्तिक—"वृत्तेश्च"।

581 मल्लि° reads महीभृता।

ल्युटि (पा० ३।३।११५) 'आह्वानम्'। "हाक्कारके आह्वानम्
स्यादाह्वानं हूतिराकारणा हवः। हक्कारकमुपासने" इति शब्दार्णवः॥ **त्रयमाह्वानस्य ॥**

बहुभिः कृता आहूतिः संहूतिः'॥ **अनेकैः कृतस्याह्वानस्यैकम् ॥१५८॥** संहूतिः

विवाद इति। विरूद्धो वादः 'विवादः'॥ विवादः

ऋणादिन्यायो 'व्यवहारः'। उभयत्र घञ् (पा० ३।३। व्यवहारः
१८)"

"वि नानार्थेऽव सन्देहे (क) हरणं हार उच्यते।
नानासन्देहहरणाद् व्यवहार इति स्मृतः॥" इति कात्यायनः॥ **द्वे ऋणादिन्यायस्य ॥**

उपेति। असु क्षेपणे। भावे घञ् (पा० ३।३।११५)। 'उपन्यासः'॥ उपन्यासः

वाचो मुखम् उपक्रमः 'वाङ्मुखम्'॥ **द्वे वचनोपक्रमस्य ॥** वाङ्मुखम्

उपेति। उपेति। उप समीप उद्धृत्य हन्यत इति उपोद्घातः
'उपोद्घातः'॥ यदाहुः प्राचीनाचार्याः—"चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधा[582] इति।

यद् उद्धृत्य क्रियते तद् 'उदाहारः'। उभयत्रापि घञ् उदाहारः
(पा० ३।३।१८)॥ **द्वे प्रकृतोपपादकस्य दृष्टान्तादेः ॥**

शपेति। शप आक्रोशे। ल्युटि (पा० ३।३।११५) 'शपनम्'॥ शपनम्

अस्मादेव "शीङ्शपिरूगमिवञ्चिजीविप्राणिभ्योऽथच्"[583] (उ० ३।११३)। स च "अनृतं वदन् नरकं यास्यामी" त्येवंरूपः। 'शपथः'॥ **द्वे शपथस्य ॥१५९॥** शपथः

प्रश्नोऽनुयोगः पृच्छा च प्रतिवाक्योत्तरे समे।
मिथ्याभियोगोऽभ्याख्यानमथ मिथ्याभिशंसनम् ॥१६०॥
अभिशापः प्रणादस्तु शब्दः स्यादनुरागजः।
यशः कीर्तिः समज्या च[584] स्तवः स्तोत्रं नुतिः स्तुतिः[585] ॥१६१॥

(क) विर्नानार्थे—A. 582 प्रचक्षते—A. 583 अथः—B.

584 समज्ञा—पुरुषोत्तम, भानु°; समाज्ञा—क्षीर° 585 स्तुतिर्नुतिः—भानुजि, क्षीर°

आम्रेडितं द्विस्त्रिरुक्तमुच्चैर्घुष्टन्तु घोषणा ।
काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः ।।१६२।।
अवर्णाक्षेपनिर्वादपरीवादापवादवत् ।
उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे ।।१६३ ।।
पारुष्यमतिवादः [a]स्याद् भर्त्सनं त्वपकारगीः ।
यः सनिन्द उपालम्भस्तत्र स्यात् परिभाषणम् ।।१६४।।
तत्र त्वाक्षारणा यः स्यादाक्रोशो मैथुनं प्रति ।
स्यादाभाषणमालापः प्रलापोऽनर्थकं वचः ।।१६५।।
अनुलापो मुहुर्भाषो[586] विलापः परिदेवनम् ।
विप्रलापो विरोधोक्तिः संलापो भाषणं मिथः ।।१६६।।
सुप्रलापः सुवचनमपलापस्तु निह्नवः(क) ।
सन्देशवाग् वाचिकं स्याद् वाग्भेदास्तु त्रिषूत्तरे ।।१६७।।
उषती[887] वागकल्याणी स्यात् कल्या तु शुभात्मिका ।
अत्यर्थमधुरं सान्त्वं सङ्गतं हृदयङ्गमम् ।।१६८।।
निष्ठुरं परुषं[b] ग्राम्यमश्लीलं[c] सुनृतं प्रिये ।
सत्येऽथ सङ्कुलक्लिष्टे परस्परपराहते ।।१६९।।
लुप्तवर्णपदं भ्रष्टं[588] निरस्तं त्वरितोदितम् ।
अम्बूकृतं सनिष्ठेवमबद्धं स्यादनर्थकम् ।।१७०।।
अनर्थकमवाच्यं(ख) स्यादाहतन्तु मृषार्थकम् ।*
अथ म्लिष्टमविस्पष्टं वितथं त्वनृतं वचः ।।१७१।।
सत्यं तथ्यमृतं सम्यगमूनि त्रिषु तद्वति ।१७२क ।

प्रश्नः **प्रश्न इति।** "यजयाचे" (पा० ३।३।९०) त्यादिना भावे प्रच्छेर्नङि "च्छ्वोः शूडि" (पा० ६।४।१९) त्यादिना

586 मुहुर्भाषा––क्षीर°, सर्वा°, भानु°
a अभिवादः––रघुनाथ
b परुषे––क्षीर°
c . . .श्लीले––क्षीर°
(क) Southern mss. add––"चोद्यमाक्षेपाभियोगौ शापक्रोशौ दुरेषणा ।
अस्त्री चाटु चटु श्लाघा प्रेम्णा मिथ्याविकत्थनम् ।"।
587 भानुजि and others read रुशती, सर्वा° उषती, क्षीर° रुषती ।
588 ग्रस्तं––all others.
(ख) अनक्षर. . .––Colebrooke, क्षीर° भानु°, रघुनाथ
* Some mss. add––"सोल्लुण्ठनं तु सोत्प्रासं मणितं रतिकूजितम् ।
श्राव्यं हृद्यं मनोहारि विस्पष्टं प्रकटोदितम् ।।"

च्छस्य शे 'प्रश्नः'। "प्रश्ने चासन्नकाले" (पा० ३।२।११७) इति निर्देशात् "ग्रहिज्या" (पा० ६।१।१६) इत्यादिना न संप्रसारणम् ।।

अनुयोगः अनुयोजनम् 'अनुयोगः'। घञ् (पा० ३।३।१८) ।।

पृच्छा 'पृच्छा'। भिदादित्वादङ् (पा० ३।३।१०४) ।। **त्रीणि पृच्छायाः ।।**

प्रतिवाक्यम् प्रतीति। पृष्टस्य[589] प्रतिवचनं 'प्रतिवाक्यम्'। प्रादिसमासः (वा०) ।।

उत्तरम् उत्तरन्त्यनेन 'उत्तरम्'। अप्। (पा० ३।३।५७) बाहुलकात् क्लीवत्वम् ।। **द्वे उत्तरस्य ।।**

मिथ्याभियोगः **मीति।** "शतं मे धारयसी"त्यादिरभियोगः। मिथ्या चासौ अभियोगश्चेति 'मिथ्याभियोगः' ।।

अभ्याख्यानम् 'अभ्याख्यानम्' इति भावे ल्युट् (पा० ३।३।११५)। "अध्ययनत्वराभियोगः। स एव दम्भप्रयुक्तोऽभ्याख्यानम्" इति सुभूतिवचनमनागमं वाक्यप्रक्रमनिबन्धात् ।। **द्वे मिथ्याविवादस्य ।।**

मिथ्याभिशंसनम् **अभिशापः** **अथेति।** 'मिथ्याभिशंसनं' मिथ्यादूषणम'भिशापः'। घञ् (पा० ३।३।१८) ।। **द्वे सुवर्णस्तेयादिना वाच्यत्वस्य ।।१६०।।**

प्रणादः **प्रणेति।** प्रीतिजनितो मुखकण्ठादिशब्दः 'प्रणादः'। प्रीतिजं शीत्कृतं 'प्रणादः'। "अनुरागकृते शब्दे। प्रणादः शीत्कृतं(क) नृणाम्" इति शब्दार्णवाद्"––इति कौमुदी। नदेर्घञ् (पा० ३।३।१८)। "उपसर्गादि" (पा० ८।४।१४) त्यादिना णत्वम्। **एकम् (अनुरागकृतस्य शब्दस्य) ।।**

यशः **यश इति।** ईं लक्ष्मीम् अश्नुते व्याप्नोति। असुन् (उ० ४।१८८)।" अशेर्देवने युट् च" (उ० ४।१९०) इति असुनि युटि च 'यशः' इति कलिङ्गः। "याति अश्नुते वा दिशो 'यशः'। पृषोदरादित्वात्" (पा० ६।३।१०९)––इति तु भट्टः ।।

589 प्रश्नस्य––B.
(क) सीत्कृतं––भानु°

क्रुत संशब्दने।[590] "उतियूति" (पा० ३।३।९७) इति
कीर्तिः निपातनात् 'कीर्तिः'।(क)

समज्या (समज्ञा) अज गत्यादौ। "संज्ञायां समजे" (पा० ३।३।९९) "त्यादिना क्यप्। "क्यपि च प्रतिषेध" (वा०)[591] इति अजेर्न वीभावः। "समज्या कीर्ति"रिति मैत्रेयः। "समैः सर्वैर्ज्ञायते। घञर्थे कः (वा०)। समज्ञे" ति तु पुरुषोत्तमः। समाङ्पूर्वो जानातिरवगतौ।[592] अतएव "ख्यातो विश्रुतः समाज्ञात" इति
(समाज्ञा) रत्नकोषः। "ततोऽङि (पा० ३।३।१०६) समाज्ञे" ति तु कौमुदी ।। **त्रीणि कीर्तेः** ।।(क)

स्तव इति। स्तौतेः करणे अप् (पा० ३।३।५७)।
स्तवः 'स्तवः' ।।

स्तोत्रम् "दाम्नी" (पा० ३।२।१८२) त्यादिना ष्ट्रनि 'स्तोत्रम्' ।।]

णु स्तवने। बाहुलकात् करणे क्तिनि (पा० ३।३।९४)
नुतिः 'नुतिः'।

स्तुतिः "श्रुयजीषिस्तुभ्यः करणे क्तिन्" (वा०)। 'स्तुतिः' ।। **चतुष्कं स्तुतेः** ।।१६१।।

आम्रेडितम् **आम्रेति।** 'आम्रेडित' मिति द्वौ वारौ त्रीन् वारान् वा उक्तम्। 'द्विस्त्रिरुक्तम्'। "द्वित्रिचतुर्भ्यः सुच्" (पा० ५।४। १८)। तदाम्रेडितं यथा अहिरहिरित्यादि। मेडृम्लेडृम्रेडृ उन्मादे। क्तः (पा० ३।२।१०२) ।। **एकं (द्विस्त्रिरुक्तस्य)** ।।

घुष्टं **उच्चैरिति।** 'घुष्टम्' ।। घुषिर् अविशब्दने।* भावे क्तः (पा० ३।२।१०२)। "घुषिरविशब्दने" (पा० ७।२।२३) इतीडभावः ।।

घोषणा 'घोषणे'ति "न्यास" (पा० ३।३।१०७) इति युच् ।। **द्वे उच्चैः शब्दस्य** ।।

---

590 संवेदने—A.

(क) "दानादिप्रभवा कीर्तिः शौर्यादिप्रभवं यशः"––इति रघुनाथधृतो भेदः।

591 भट्टोजि reads—"अजेः क्यपि वीभावो नेति वाच्यम्"।

592 जानातिः ख्यातौ—B.

* "विशब्दनं प्रतिज्ञानं ततोऽन्यस्मिन्नर्थे इत्येके। शब्दे इत्यन्ये पेठुः।"—भट्टोजि। विशब्दनं स्वाभिप्रायप्रकाशनम्—भानु°

काकुः **काकुरिति।** 'ध्वनेः' शब्दस्य 'शोकभीत्यादिना' 'यो विकारो' विकृतिः स 'काकुः'। आदिशब्देन कामक्रोधादीनां ग्रहणम्। कक्यत इति। कक लौल्योपतापयोः। "स्वादय"[593] इत्युण्-प्रत्यये दीर्घे च काकुरित्यन्ये। कानं काः शब्दः।[594] कुत्सितो यत्रासौ 'काकुः'।।। **एकं (शोकादिना विकृतस्य ध्वनेः)** ।।१६२।।

अवर्णः **अवेति।** "यथा अवर्णादयो निन्दायां वर्तन्ते तथा उपक्रोशादयोऽपी"ति वतेरर्थः। "पुंसीति वाच्ये प्रौढित्वादन्यथोक्ति"[595]रिति भट्टः। वर्णः स्तुतिः। तद्विरुद्धः 'अवर्णः' ।।

आक्षेपः, निर्वादः, परीवादः, अपवादः, उपक्रोशः आक्षेपादयः पञ्च घञन्ताः (पा० ३।३।१८)। निर्वादपरीवादापवादाः। 'परीवाद' इत्यत्र "उपसर्गस्य घञि" (पा० ६।३।१२२) इति वा दीर्घः ।।

जुगुप्सा 'जुगुप्सा'। गुप गोपनकुत्सनयोः। "गुप्तिज्किद्भ्यः सन्" (पा० ३।१।५)" इति निन्दायां सन्। "अ प्रत्ययाद्" (पा० ३।३।१०२) इत्यकारः ।।

कुत्सा (निन्दा) एवं कुत्स आक्षेपणे[596]। "निन्दि कुत्साया"* मिति निर्देशात् ।।

गर्हणम् गर्हगल्ह कुत्सायाम्। ल्युट् (पा० ३।३।११५)। 'गर्हणम्' ।। **दश निन्दायाः** ।।१६३।।

पारुष्यम् **पारुष्यमिति।** अप्रियं वचः परुषम्। तद्भावः 'पारुष्यम्' (पा० ५।१।१२४) ।।

अतिवादः भावे घञ् (पा० ३।३।१८)। 'अतिवादः' ।। **द्वे अप्रियवचसः** ।।

भर्त्सनम् (अपकारगीः) **भर्त्सनेति।** "चौरोऽसि। त्वां घातयिष्यामी" त्यपकारार्थं वचनं 'भर्त्सनम्'। भर्त्सतर्ज संतर्जने। करणे ल्युट् ।। (पा० ३।३।११७) ।। **द्वे (अपकारार्थवचनस्य)** ।।

---

593 We are not sure if मुकुट refers to उणादयो बहुलम् (पा० ३।३।१)।

594 A, B read this just before कक्यत इति।

595 The printed texts of क्षीर° read प्रौढिम्ना।

596 कुत्साकुत्स अवक्षेपणे—B.

* णिदि—पा० धा०

परिभाषणम् **य इति।** उपालम्भो द्विविधः। गुणाविष्करणपूर्वको निन्दापूर्वकश्च। आद्यो[597] यथा––महाकुलजस्य भवतः किमुचितमिदम्? द्वितीयो[598] यथा––बन्धकीसुतस्य भवत उचितमेवेदम्। यः सनिन्द उपालम्भः तत्र 'परिभाषणम्'। भावे ल्युट् (पा० ३।३।११५)। तथाच भागुरिः––"निन्दापूर्वं उपालम्भः परिभाषणमुच्यते" इति ।। **(एकं निन्दापूर्वकोपालम्भस्य) ।।१६४।।**

आक्षारणा (क्षारणा) (क्षरणा) (क्षारणम्) **तत्रेति।** स्त्रीनिमित्तं पुंनिमित्तं वा मैथुनं प्रति य आक्रोशः उद्घोषणा तत्र 'आक्षारणा'। क्षर संचलने। प्रयोजकण्यन्ताद् युच् (पा० ३।३।१०७)। "क्षरणा"पि। "क्षरणाक्षारणाक्रोशा साभिशापाभिमैथुनाः" इति[599]। "क्षारणम्" इति क्लीवम् अपि, "नीचमाक्षारणं यः स्यादाक्रोशो मैथुनं प्रति"* इति शब्दार्णवात्।" "नीचम्" इति पुंविहीनस्य संज्ञा।। **एकं परस्त्रीनिमित्तं पुंसः, परपुरुषनिमित्तं वा स्त्रिया आक्रोशस्य ।।**

आभाषणम् **आभाषणमिति।** भावे ल्युट्। (पा० ३।३।११४)।।

आलापः आलापादयोऽपलापान्ताः परिदेवनरहिताः घञन्ताः (पा० ३।३।१८)।। **द्वे संभाषणस्य ।।**

प्रलापः प्रयोजनशून्यमुन्मत्तादिवचनं 'प्रलापः'।। **निरर्थकोक्तेरेकम् ।।१६५।।**

अनुलापः (मुहुर्भाषः) मुहुरसंभ्रमेण पुनःपुनर्भाषणम् 'अनुलापः'।। **द्वे (मुहुर्भाषणस्य) ।।**

विलापः "विलपनं 'विलापः'। घञ् (पा० ३।३।१८)।।

परिदेवनम् 'परिदेवनम्' इति। दिवु परिदेवने। चुरादिः। ल्युट् (प० ३।३।११५)।। **द्वे अनुशोचनोक्तेः ।।**

विप्रलापः (विरोधोक्तिः) विरुद्धः प्रलापो 'विप्रलापः'।। **द्वे अन्योन्यविवादवचनस्य ।।** "तत्रायं विरोधवचनस्ये"ति तु कौमुदी ।।

संलापः मिथोऽन्योन्यं प्रीतिभाषणं 'संलापः'। "रहसि भाषणं

597 आद्यं––B.

598 द्वितीयं––B.

599 भानुजि ascribes it to दुर्ग, रघुनाथ to हट्ट। * यः स आक्रोशो––भानु°

संलाप" इति तु कौमुदी। यस्तु आलापः स एकेनापि क्रियते। इदं तु परस्परभाषणमेव इति भेदः ।।१६६।।

सुप्रेति। सु अतिशयेन* प्रकृष्टो लापः 'सुप्रलापः'। सुप्रलापः 'सुवचनम्'(क)। ल्युट् (पा० ३।३।११५)।। **द्वे शोभनोक्तेः ।।** **सुप्रलापः सुवचनम्**

अपलापेति। 'निह्नवः'। ह्नुङ अपनयने। "ऋदोरप्" (पा० ३।३।५७)।। **द्वे धार्यमाणेऽपि न धारयामीत्यादिकोक्तेः ।।** **अपलापः निह्नवः**

सन्दिश्यते 'सन्देशः'। कर्मणि [घञ्] (पा० ३।३।१९)। तस्य वाक्। यया सन्दिष्टोऽर्थ उच्यते सा 'सन्देशवाक्' ।। **सन्देशवाक्**

'वाचिक' मिति। "वाचो व्याहृतार्थायाम्" इति स्वार्थे ठक् (पा० ५।४।३५)।। **द्वे सन्देशवाक्यस्य ।।** **वाचिकम्**

इह तु भावे वक्ष्यमाणा उषत्यादयः सम्यगन्ता वाग्विशेषास्त्रिषु। यथा उषती वाक्, उषन् व्याहारः, उषद् वचः ।।१६७।।

उषेति। अकल्याणी निन्दार्था वाक् 'उषती'। यथा–– ब्राह्मणो हन्तव्य इति। उष दाहे। शत्रादेशे "आगमशासनमनित्य" मिति "शप्श्यनोर्नित्य" (पा० ७।१।८१) मिति शतुर्नुमभावः। "रुशती"ति तु स्वामी[600]। तदा रुशरिश हिंसायाम्। तालव्यशान्तो। तौदादिकात् ङीपि (पा० ४।१।६) रूपम्। "आच्छीनद्यो"रिति (पा० ७।१।८०) विकल्पान्नुमोऽभावः। रुशती हिस्रेत्यर्थः। "उषत्यादेस्त्रिलिङ्गत्वादेव कामचारात् स्त्रीत्वमुक्तम्" इति भट्टः[601]। "स्त्रीनिर्देशः स्त्रियां प्रायः प्रयोगदर्शनात् शत्रन्तत्वप्रदर्शनार्थं वा" इति तु कौमुदी।। **एकं (निन्दार्थाया वाचः) ।।** **उषती (रुशती)**

शुभात्मिका शुभस्वभावा वाक् 'कल्या'। यथा–– जयतीत्यादि। प्रत्यूषे कल्यमुक्तम् (काल० १०५)। टापि (पा० ४।१।४) कल्या[602]।। **द्वे (शुभात्मिकाया वाचः) ।।** **कल्या (शुभात्मिका)**

600 Printed texts read "(रुषति) हिंस्रेत्यर्थः। "न तां वदेद् रुषतीं (गां) पापलोक्याम्"। अत 'उषती'त्यसभ्यः पाठः।"

* सुप्रातिशयेन––A., B.

601 Could not be traced in the printed editions of क्षीर°।

602 क्षीर° adds "काल्येति कात्याद्याः।"

(क) "शोभनं वचनं सुवचनम्" इति रायभरतौ––रघुनाथ।

सान्त्वम् अत्यर्थमतिशयेन मधुरं वाक्यं 'सान्त्वम्।' सान्त्व सामप्रयोगे। चुरादिः। पचाद्यच् (पा० ३।१।१३४)। "दिष्टचा रमसे सामनि परमे वचसां त्वं। सुजनो हि वदति मित्रं परमेव च सान्त्वम्" इति शिवभद्रेण* दन्त्यादियमकात् दन्त्यादिता।। **एकम् (अतिमधुरवाक्यस्य)।।**

सङ्गतम् संगमेः कर्तरि क्तः (पा० ३।४।७२)। 'सङ्गतम्'। युक्त्या मिलितम्।।

हृदयङ्गमम् 'हृदयङ्गमम्'। "गमश्चे"ति (पा० ३।२।४७) खच्।। **द्वे शोभनवचनस्य।।१६८।।**

निष्ठुरम् **निष्ठुरमिति**[603]। नितिष्ठते "मंद्गुरादयश्चे"ति (उ० १।४२) कुरच्। कित्त्वादा[का]रलोपः (पा० ६।४।६४)। "उपसर्गादि"त्यादिना (पा० ८।३।६५) षत्वम्। 'निष्ठुरम्'।।

परुषम् पॄ पालनपूरणयोः। "वृहिनिपॄकलिरहित्रपिपूरिभ्यः उषन्"[604] (उ० ४।७५) 'परुषम्'। मूर्धन्यषम्।। **द्वे कर्कशवाक्यस्य।।**

ग्राम्यम् हालिकशाकटिकप्राधानिकत्वात् ग्रामस्य ग्रामे भवं 'ग्राम्यम्'। "ग्रामाद् यखञा" (पा० ४।२।९४) विति यत्।।

अश्लीलम् श्रीः शोभा अस्यास्तीति सिध्मादेराकृतिगणत्वात् लच् (पा० ५।२।९७)। श्लीलं सुन्दरम्। न श्लीलम् 'अश्लीलम्'। "कपिलिकादीनामुपसंख्यानम्" (वा०) इति लत्वम्।। **द्वे भण्डादिवचनस्य।।**

सुनृतम् "इन्द्रो भवान्" इति प्रियं, न सत्यम्। "काणो भवान्" इति सत्यं, न प्रियम्। यत्तु प्रियं च सत्यं च तत् 'सुनृतम्'। सुष्ठु नृत्यन्त्यनेन। मूलविभुजादित्वात् के (वा० ३।२।५) "अन्येषामपी"ति (पा० ६।६।१३७) दीर्घत्वे दन्त्यसादिकम्। "सुष्ठु ऋतं सुनृतम्। पृषोदरादि" (पा०

603 निष्ठुरं. . . .कर्कशवाक्यस्य omitted in B. * शिवभद्रे—शिवदत्त।

604 भट्टोजि° and उज्ज्वलदत्त read the rule as पॄनहिकलिभ्य उषच् while सर्वा° reads नहिकलिहनिपॄलस्यर्तिभ्य उषच्। "पॄकलिभ्यामुषच" (उषन्)—दशपादी।

६।३।१०९) इत्यन्यः। "अपि ते सखि वल्लभः असूनृतं दधदपि सूनृतभाषी"ति वासवदत्ताविरुद्धालङ्कार(क)-दन्त्यश्लेषात्*। असूण् प्राणान्, ऋतं सत्यं दधदपीत्यर्थः।। **एकं (प्रियसत्यवचसः)।।**

संकुलम् 'संकुलम्'। कुल संस्ताने। कः (पा० ३।१।१३५)। "फणिसंकुलभीमगुह"मिति (१३।१८) भट्टिभाषासमावेशः।।

क्लिष्टम् 'क्लिष्टम्'। "यस्य विभाषे"ति (पा० ७।२।१५) इडभावः।। **द्वे "यावज्जीवमहं मौनी"त्यादि वाक्यस्य परस्परविरुद्धस्य।।१६९।।**

भ्रष्टम् लुप्तेति। असम्यगुच्चारणात् लुप्तवर्णपदं यद्वचः। असम्पूर्णमिति यावत्। तद् 'भ्रष्टम्'। "ततस्तत् लुप्तोच्चारितो वर्णः पदं वा यत्र वाक्ये तद् 'ग्रस्तम्'" इति तु कौमुदी। **(ग्रस्तम्)** ग्रसुग्लसु अदने। क्तः[605] (पा० ३।२।१०२)।।

निरस्तम् त्वरितोदितं वाक्यं 'निरस्तम्'। असु क्षेपणे। क्तः (पा० ३।२।१०२)।। **द्वे शीघ्रोच्चारितवचसः।।**

सनिष्ठेवम् 'सनिष्ठेवं' श्लेष्मकणादिनिर्गमसहितम्[606]। अम्बुशब्द उपचारादम्बुयुक्ते। ततः च्वौ कृते "च्वौ चे"ति (पा० ७।४।२६) दीर्घः। "पृषोदरादि (पा० ६।३।१०९)-दीर्घत्वे 'सनिष्ठीव' मित्यपि केचि"दिति सर्वानन्दः। 'सनिष्ठीव' मित्यपपाठः। "ल्युट् चे"(१।३।९७) त्यनन्तरं "ष्ठिवुसिव्योर्दीर्घश्चे(१।३।९८)"ति चान्द्रादौ सूत्रणात् "ल्युटचेव" दीर्घात्। "त्रिकाण्डामरमालयोस्तु दीर्घपाठो यदि न लिपिदोषस्तदा घञ्यपि वा दीर्घो बाहुलकात् (पा० ६।३।१२२) समर्थनीय" इति तु कौमुदी।। **श्लेष्मकणनिर्गमसहितस्य**[607] **वचस एकम्।।**

अबद्धम् **'अबद्धम्' इति।** अनर्थकं समुदायार्थशून्यं वचनम् 'अबद्धम्'। यथा—"जरद्गवः कम्बलपादुकाभ्यां द्वारि स्थितो

(क) विरोधाभासालंकार (?) * दीर्घान्तिदन्त्यादि—शिवदत्त

605 B adds here एकम् which appears to be redundant.

606 श्लेष्मकणावलिङ्गितमम्बुसहितम्—B.

607 श्लेष्मकणावलीसहितस्य—B.

गायति मङ्गलानि[608]। तं ब्राह्मणी पृच्छति पुत्रकामा राजन् रुमायां[609] लशुनस्य कोऽर्घ" इति। अत्र समुदायेनैकार्थो

(अवध्यम्) नास्ति। 'अबद्धम्'। बध बन्धने। क्तः (पा० ३।२।१०२)। नञ् समासः। "अवध्यमवधार्हे स्यादनर्थकवचस्यपि" इति कोषदर्शनात् 'अवध्य'मिति तु कौमुदी॥

अनर्थकम् अविद्यमानः समुदायार्थोऽस्य इति 'अनर्थकम्'। "नञोऽस्त्यर्थाना"मिति (वा०) समासः। "अर्थान्नञ" (ग०) इति उरःप्रभृति-(पा० ५।४।१५१) पाठात् नित्यं कप् समासान्तः। **द्वे समुदायार्थशून्यवचसः ॥१७०॥**

अनेति। निन्दितान्यक्षराणि यत्र 'अनक्षरम्'। निपात-

अनक्षरम् स्यानेकार्थत्वात् नञो निन्दार्थता॥

एवम् 'अवाच्यम्'। वच भाषणे। ण्यत् (पा०

अवाच्यम् ३।१।१२४)। "वचोऽशब्दसंज्ञायाम्" (पा० ७।३।६७) इति न कुत्वम्॥ **द्वे दुर्वचसः।** गुणाक्षेपदोषाधिकारि-वाक्यस्येति कौमुदी॥

अत्यन्ताभूतार्थखपुष्पादिपदम् 'आहतम्'। हन्तेर्भावे

आहतम् क्तः (पा० ३।३।११४)॥ **एकं (मृषार्थकस्य)॥**

म्लिष्टमिति। म्लेच्छ अव्यक्ते शब्दे। क्तः (पा०

म्लिष्टम् (अविस्पष्टम्) ३।२।१०२)। "क्षुब्धस्वान्तध्वान्त" (पा० ७।२।१८) इत्यादिना निपातितम्॥ **द्वे अव्यक्तवचनस्य॥**

न ऋत'मनृतं' वचो 'वितथम्'। विगतं तथा सत्यं

वितथम् (अनृतम्) यत्र तद् 'वितथम्'॥ **एकमसत्यवचसः ॥१७१॥**

सत्यमिति। सति साधु 'सत्यम्'। दिगादित्वाद् यत्

सत्यम् (पा० ४।३।५४)॥

तथाशब्दोऽयम् ऋतपर्यायः। तत्र साधु 'तथ्यम्'।

तथ्यम् "तत्र साधु"रिति (पा० ४।४।९८) यत्।

ऋतम् 'ऋत'मिति। ऋ गतौ क्तः (पा० ३।२।१०२)॥

अर्थेन सह समञ्चति संगच्छते 'सम्यक्'। अञ्चु

सम्यक् गतिपूजनयोः। "ऋत्विगा"दिना (पा० ३।२।५९)

608 मद्रकाणि––रघुनाथ, सायण। 609 राजनगर्मी––B.

क्विन्। "समः समी"ति (पा० ६।३।९३) समः सम्यादेशः। 'सम्यक्'। पुंसि तु सम्यङ, सम्यञ्चौ। सम्पद्यचि(क) भत्वे "अच" (पा० ६।४।१३८) इत्यकारलोपे "चा"विति (पा० ६।३।१३८) दीर्घत्वे समीच इत्यादि। स्त्रियाम् "अञ्चतेश्चोपसंख्यानम्" (वा०) इति ङीपि समीची॥ **चत्वारि सत्यवचसः॥**

अमूनि सत्यादीनि उपचारात् तद्वति वर्तमानानि त्रिषु। यथा सत्यो ब्राह्मणः, सत्या नारी, सत्यं जलम्। "वाग्भेदास्तु त्रिषूत्तरे" इत्यनेन तु वाग्विशेषाणां त्रिलिङ्गत्वम्। यथा––सत्या वाक् इत्यादि। एतेन च "वाग्भेदास्तु त्रिषूत्तरे" इत्यसाववधिर्दर्शितः ॥१७२क॥[610]

शब्दे निनाद-निनद-ध्वनि-ध्वान-रव-स्वनाः ॥१७२॥
स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वनाः।
आरवारावसंरावविरावा अथ मर्मरः ॥१७३॥
स्वनिते वस्त्रपर्णानां भूषणानान्तु शिञ्जितम्।
निक्वाणो निक्वणः क्वाणः क्वणः क्वणनमित्यपि॥१७४॥
वीणायाः क्वणिते प्रादेः प्रक्वाणप्रक्वणादयः।
कोलाहलः कलकलस्तिरश्चां वाशितं* रुतम् ॥१७५॥
स्त्री प्रतिश्रुत्-प्रतिध्वाने गीतं गानमिमे समे ।१७६क॥

॥०॥ इति शब्दादिवर्गः ॥०॥

शब्द इति। 'निनादनिनदौ'। णद अव्यक्ते शब्दे। "नौ गदनदपठस्वन" (पा० ३।३।६४) इत्यप्। पक्षे घञ्॥ **शब्दः, निनादः, निनदः**

स्वनध्वन शब्दे। खनिकषिअंजिअसिवसिवनिसनिध्वनि-ग्रन्थी" त्यादिना (उ० ४।१३९) इः। 'ध्वनिः'। घञि (पा० ३।६।१८) 'ध्वानः'॥ **ध्वनिः, ध्वानः**

रौतेरप् (पा० ३।३।५७)। 'रवः'॥ **रवः**

(क) शसाद्यचि (?) * वासित°—some mss.

610 A puts a colophon here इति धीवर्गविवरणम् in addition to its usual place.

स्वनः, स्वानः 'स्वनस्वानौ'। "स्वनहसोर्वा" (पा० ३।३।६२) इत्यप्घञौ ।।१७२।।

निर्घोषः घुष घुष्टौ। 'निर्घोषः' ।।

निर्ह्रादः ह्राद अव्यक्ते शब्दे। 'निर्ह्रादः' ।।

निस्वानः, निस्वनः घञपौ (पा० ३।३।६२)। 'निस्वान-निस्वनौ' ।।

नादः 'नादः'। निनादवत्। निग्रहणमुपसर्गनियमार्थम् ।।

आरवः, आरावः 'आरवाराव'योः "विभाषाङि रुप्लुवो" (पा० ३।३।५०) रित्यप्घञौ ।।

संरावः, विरावः (रावः) 'संरावविरावयोः "उपसर्गे रुवः" (पा० ३।३।२२) इति घञ्। चान्द्रे तु बाहुलकाद् घञ्। "रावो"ऽपि। अतएव "निनादितं भीषणरावगह्वरम्" इति सप्तकुमारिका ।। **शब्दादिसप्तदशकं शब्दस्य ।।**

मर्मरः **अथेति**। वस्त्रपर्णयोर्ध्वनौ 'मर्मरः'। मृङ प्राणत्यागे। "कृदरादयश्चे" (उ० ५।४१) त्यरन्मुगागमौ (?)। "मर्मत्वं राति मर्मर" इति तु कौमुदी ।। **वस्त्रस्य पर्णस्य (च) ध्वनेरेकम् ।।१७३।।**

शिञ्जितम् (शिञ्जा) भूषणाणां नूपुराणां ध्वनौ 'शिञ्जितम्'। शिजि अव्यक्ते शब्दे। तालव्यादि। भावे क्तः (पा० ३।३।११४) "गुरोश्च हल" (पा० ३।३।१०३) इत्यकारे 'शिञ्जा'पीति स्वामी ।। **एकं भूषणानां ध्वनेः ।।**

निक्वाणः, निक्वणः 'निक्वाण-निक्वणयोः' "नौ गदनदे"त्यतो "ना" वित्यनुवर्तमाने (पा० ३।३।६४) "क्वणो वीणायाञ्च" (पा० ३।३।६५) इत्यप्। पक्षे घञ् ।।

क्वाणः, क्वणः 'क्वाण-क्वणयोः' "व्यधजपोरनुपसर्ग" (पा० ३।३।६१) इत्यनुवर्तमाने "क्वणो वीणायाञ्च" (पा० ३।३।६५) इत्यनेन घञपौ ।।

क्वणनम् ल्युटि (पा० ३।३।११५) 'क्वणनम्' ।। **पञ्च वीणाया अन्यस्यापि किन्नरादेः क्वणनस्य**(क) **।।१७४।।**

"वीणायाः क्वणिते प्रादे"रुपसर्गादुत्तरस्य क्वणेर्धातोः

(क) "यत्तु 'पञ्च वीणाया अन्यस्य च किन्नरादेः क्वणने'––इति मुकुटः"––भानुजि।

प्रक्वाणः, प्रक्वणः "प्रक्वाण-प्रक्वणादयः" प्रयोगा भवन्ति। तथाहि "क्वणो वीणायाञ्च" (पा० ३।३।६५) इत्यपि विकल्पः। तत्र वीणाग्रहणस्यैतदेव प्रयोजनं वीणादिविषये अन्योपसर्गाद् अपि[611] यथा स्यात्। आदिना उपक्वाणोपक्वणादयः ।। **(उपक्वाणः) (उपक्वणः)**

कोलाहलः कुल संस्त्याने। कोलनं कोल एकीभावः। तमाहलतीति[612]। हल विलेखने। अच् (पा० ३।३।१३४)। 'कोलाहलः' ।।

कलकलः कल शब्दसंख्यानयोः। "गोचरे" (पा० ३।३।११९) त्यादिना चकारस्यानुक्तसमुच्चयाद् घप्रत्यये "नित्य वीप्सयो" रिति (पा० ८।१।४) द्वित्वम्। 'कलकलः' ।। **द्वे बहुभिः कृतस्य कलकलध्वनेः ।।**

वाशितम् तिरश्चां पशुखगादीनां रुतं 'वाशितम्'। वाश्टृ शब्दे। तालव्यान्तः। "सहोपशल्याशनवाशिताश्विनै" रिति तालव्यमध्येषु ऊष्मविवेकात्।

रुतम् रौतेः क्तः (पा० ३।३।११४) 'रुतम्' ।।**एकं (?) तिरश्चां रुतस्य ।।१७५।।**

प्रतिश्रुत् **स्त्रीति**। संपदादित्वात् (वा०) क्विप्। 'प्रतिश्रुत्' ।।

प्रतिध्वानः 'प्रतिध्वानः'। पूर्ववत् ।। **द्वे प्रतिशब्दस्य ।।**

गीतम्, गानम् 'गीतं गानम्' इति गायतेः ।। क्त-ल्युटौ (पा० ३।२।१०२, ३।३।११५) ।। **द्वे गीतस्य* ।।१७६क।।**

।। ० ।। इति शब्दादिवर्गविवरणम्(क) ।। ० ।।

611 Omitted in B. 612 इत्येकीभावः। तमाहलयतीति––B.

(क) A reads शब्दवर्गः।

* "पदस्वरतालावधानात्मकं गान्धर्वरागगीत्यादिकं गीतम्, प्रावेशिक्यादिध्रुवारूपं गानमिति भरताद्युक्तो विशेषो नाश्रितः।"—क्षीर°।

७। अथ नाटचवर्गः

निषादर्षभगान्धारषड्जमध्यमधैवताः ।।१७६।।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः।
काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे ।।१७७।।
कलो मन्द्रस्तु गम्भीरे तारोऽत्युच्चैस्त्रयस्त्रिषु।
समन्वितलयस्त्वेकतालो वीणा तु वल्लकी ।।१७८।।
विपञ्ची सा तु तन्त्रीभिः सप्तभिः परिवादिनी।
ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् ।।१७९।।
वंश्यादिकन्तु शुषिरं[613] कांस्यतालादिकं घनम्।
चर्तुविधमिदं वाद्यं वादित्रातोद्यनामकम्[614]।।१८०।।

अमी निषादादयः सप्त स्वराः तन्त्रीतः कण्ठाच्च उच्चरन्ति।

तथाच नारदः--"षड्जं रौति मयूरस्तु गावो नर्दन्ति[615] चर्षभम्।
अजाविकं[616] च गान्धारं क्रौञ्चो रोदिति[617] मध्यमम् ।।
पुष्पसाधारणे काले कौकिलो रौति पञ्चमम्।
अश्वस्तु[618] धैवतं रौति निषादं रौति कुञ्जरः ।।" इति।

एते च समदाः पञ्चमं गायन्ति। तथाच विशाखिलः--
"अश्वस्तु धैवतं सोऽपि मत्तः पञ्चमसंज्ञितम्[619]।
निषादन्तु गजो गर्जत्युन्मदोऽसौ तु[620] पञ्चमम्" ।। इति।
"निषीदन्ति स्वरा अस्मिन्निषादस्तेन हेतुना।
अशेषसन्धिविषयं स हि[621] व्याप्यावतिष्ठते ।।"

---

613 सूषिरं—भानुजि, "दन्त्याद्यपि"—क्षीर°।
614 वाद्यवादित्रातोद्यनामकम्--भानुजिः। वादित्रादि द्विनामकम्--कलिङ्ग and others.
615 रंहन्ति—सर्वा°
616 अजाविकौ--B, अजाविके—सर्वा°
617 नर्दंति—B, नदति—सर्वा°
618 अश्वश्च--B.
619 सङ्गतम्—सर्वा°
620 सपञ्चमम्—सर्वा°
621 स तु—सर्वा°

सदे"रकर्तरि च" (पा० ३।३।१९) इति घञ्। **निषादः**
"सदिरप्रते" रिति (पा० ८।३।६६) षत्वम् ।।
"वायुः समुद्गतो नाभेः कण्ठशीर्षसमाहृतः[622]।
नदत्यृषभवद् यस्मात् तेनैष[623] ऋषभः स्मृतः ।।" इति
ऋषी गतौ। "ऋषिवृषिभ्यां किद्" (उ० ३।१२३) **ऋषभः**
इति अभच् ।।
"वायुः समुद्गतो नाभेः कण्ठशीर्षसमाहतः।
नानागन्धवहः पुण्यो गान्धारस्तेन हेतुना[624]।।"
गन्धम् इर्यति। ऋ गतौ। "कर्मण्यण्" (पा० ३।२।१)। पृषोदरादित्वात् (पा० ६।३।१०९) दीर्घः। 'गान्धारः'। यद्वा गान्धारः अभिजनोऽस्य। "सिन्धुतक्षशिला- **गान्धारः**
दिभ्योऽणञौ" (पा० ४।३।९३) ।।
"कण्ठादुत्तिष्ठते व्यक्तं षड्जः षड्भ्यस्तु जायते। **षड्जः**
कण्ठोरस्तालुनासाभ्यो जिह्वाया दशनादपि ।।"
पूर्ववत् जनेर्डः (पा० ३।२।९७) ।।
"तद्वदेवोत्थितो वायुरुरःकण्ठसमाहतः।
नाभिप्राप्तो महानादो मध्यस्थस्तेन मध्यमः ।।" **मध्यमः**
"मध्यान्मः" (पा० ४।३।८) ।।
"अभिसन्धीयते यस्मात् स्वरांस्तेनैष धैवतः। **धैवतः**
स तु तारप्रधानत्वाल्ललाटे व्यवतिष्ठते ।।"
धीमद्भिर्धीयत इत्यस्मिन्नर्थेऽणि (पा० ४।२।९२) पृषोदरादित्वात् (पा० ६।३।१०९) ।।१७६।।
"वायुः समुद्गतो नाभेरुरोहृत्कण्ठमूर्धसु।
विचरन् पञ्चमस्थानप्राप्त्या पञ्चम उच्यते ।।" **पञ्चमः**
पञ्चन्शब्दा"न्नान्तादसंख्यादेर्मट्" (पा० ५।२।४९) [इति मट्-] प्रत्ययः ।। **तन्त्रीसमुत्थितानां कण्ठोत्थितानां च स्वराणां पृथगेकैकम् ।।**

---

622 कण्ठशीर्षे--B. समाहतः--सर्वा°
623 तेन स—सर्वा°
624 स स्मृतः--सर्वा°

काकली — **काकेति।** मधुरास्फुटो ध्वनिः कलः। तस्मिन् कले सूक्ष्मः 'काकली'। ईषत् कलश्च 'काकली'। "ईषदर्थे चे" (पा० ६।३।१०५) ति कोः कादेशः। "गौरादिङीषि" (पा० ४।१।४१) इति स्वामी। कलेरिण् (उ० ४।११७)।

(काकलिः) — कलिः शब्द ईषदत्रेति 'काकलिः'। "कृदिकारा"दिति (ग० ४।१।४५) ङीषि 'काकली'। "ओषधिपद्धतिपक्षतिपङ्क्ति-वर्तनिवासिवितर्दिपुरन्ध्र[625]अङ्गुलिकाकलिशारिशरारितुन्दितु-रियुधिदीधितिर्वति" रिति शवरस्वामी। "साधूदितं काक-लिभिः कुलीना" (२३।२३)(क) इति अभिनन्दः। "तस्मात् काकलीति गौरादि" (पा० ४।१।४१) रिति स्वामिकलिङ्गा-दीनां प्रमाद––इति तु कौमुदी।। **एकं सूक्ष्मस्य (मधुरास्फुट-ध्वनेः)** ।।१७७।।

'मधुरे' श्रुतिसुखे, 'अस्फुटे' अव्यक्ताक्षरे ध्वनौ

कलः — 'कलः'। कड मदे। "गोचरे" (पा० ३।३।११९) त्यादिना चकारस्यानुक्तसमुच्चयार्थत्वात् घः। डलयोरेकत्रस्मरणम्। **एकम् (मधुरास्फुटध्वनेः)** ।।

मन्द्रः (मद्रः) — गम्भीरे मेघादिध्वनौ 'मन्द्रः'। मदि स्तुतिमोदमद-स्वप्नगतिषु। "स्फायी"ति (उ० २।१३) रक्। शक्रवत्। "मद्रोऽपी"ति तु स्वामी।। **एकं (मेघादिध्वनेः)** ।।

तारः — अतुच्चे कांस्यादिध्वनौ 'तारः'। तारयति रोधयति। अच् (पा० ३।१।१३४)।। **एकं (कांस्यादिध्वनेः)** ।।

'त्रयः' कलादयः 'त्रिषु'। यथा––कलो ध्वनिः, कलं रुतं, कला वाणी इत्यादि।।

समेति। सम्यगन्वितः लयो नृत्यगीतवाद्यानां साम्यं

एकतालः — यत्र स 'एकतालः'। 'सम्यक्' यथाशास्त्रम् 'अन्वितलयो'[626] मध्यमलयः स 'एकतालः' "समताल" इति यस्याख्या। "तौर्यत्रिकमेकताल" इति केचित्।। **एकं (समलयस्य)** ।।

वेति जायते स्वरोऽस्याम्। "रास्नासास्नास्थूणावीणा"––

625 पुरन्ध्रीः––B. "अङ्गुलिकाकलिशारिपेशिकलशयः" स्त्रीप्रकरणे अरुणदत्तः––रघुनाथ।
(क) भानुजि reads 'कुलीनैः'। 626 बन्धितलयः––B.

इत्यनेन (उ० ३।१५) वी गतिप्रजनकान्त्यसनखादनेषु इत्यतो न-प्रत्यये, णत्वे, गुणाभावे 'वीणा'।। — वीणा

वलवल्ल संवरणे। "क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि" (उ० २।३२) इति क्वुन्। गौरादिः (पा० ४।१।४१)। 'वल्लकी' ।।१७८।। — वल्लकी

विपञ्चयति विस्तारयति शब्दं। पचि विस्तारवचने। ण्यन्तादच् (पा० ३।१।१३४)। 'विपञ्ची'। गौरादिः (पा० ४।१।४१)।। **त्रीणि वीणायाः** ।। — विपञ्ची

'सा तु' वीणैव 'सप्तभि'स्तन्त्रीभिर्लक्षिता 'परिवादिनी'। "सवरसिआ" इति प्रसिद्धा। परितो वादः परिवादः। तद्-योगाद् "अत इनिठना" (पा० ५।२।११५) विति इनिः ङीप् [च]।। **एकं (सप्ततन्त्रीलक्षिताया वीणायाः)** ।। — परिवादिनी

ततमिति। वीणादिकं 'वाद्यं' वादनीयं 'ततम्'। "तनिमृङ्भ्यां किच्च" (उ० ३।८८) इति तन्।। तन्त्री तननात्। वाद्यमपि 'ततम्'।। **एकं (वीणादिवाद्यस्य)** ।। — ततम्

मुरजादिकं वादनीयम् 'आनद्धम्'। मुखे चर्मणा बद्धम् 'आनद्धम्'। नह बन्धने। भावे क्तः (पा० ३।३।११४)। आदिना पटहादिसंग्रहः।। **एकं (मुरजादिवाद्यस्य)** ।।१७९।। — आनद्धम्

वंशी वेणुस्तदादिकं वादनीयं 'शुषिरम्'। शुषिः छिद्रं तद्योगात् मधुरवत् रः (पा० ५।२।१०७)। आदिना शङ्खकाहलादिग्रहः। "शिरीषं शुषिरं शिष्यं शीर्षं तालव्य-शादयः(क) इति शभेदः। **एकं (वंश्यादिवाद्यस्य)** ।। — शुषिरम्

कांस्यतालादिकं वादनीयं 'घनं' निविडत्वात्। घनं मेघे (दिक्° ७५) साधितम्। आदिना घण्टादिग्रहः।। **एकं (कांस्यादिवाद्यस्य)** ।। — घनम्

चेति। इदं ततादिचतुर्विधं चतुष्प्रकारं वाद्यादि-

क "सूर्म्यं सुषिरामिव" (महाभाष्य) इति प्रयोगात् सुषिरं दन्त्याद्यपि। प्राच्यास्तु तालव्याद्येव इत्याहुः।––भानुजि। शिवदत्त reads––तालव्यादयः। Quoting "विवराभिधायिनि शुषिरादौ शास्त्रेषु दन्त्यतालव्यौ" from ऊष्मविवेक he concludes वह्निवाचकशुषिरशब्द is with the palatal श। But this does not follow from the data.

वाद्यं त्रिक-नामकम्। वादयन्ति तद् वाद्यं। कर्मणि "अचो यत्" (पा० ३।१।९७) ॥

"भूवादिगृभ्यो णित्रन्" (उ० ४।१७०) इति णित्रन्। **वादित्रम्** 'वादित्रम्' ॥

"समन्तात् तुद्यते ताडचते। तुद व्यथने। कर्मणि **आतोद्यम्** ण्यत् (पा० ३।१।१२४)। 'आतोद्यम्'।"––इति स्वामि-सर्वानन्दौ। इतीदं चतुर्विधं वाद्यम्। "वादित्रादि द्विनामकं वाद्य"मित्यसमस्तं प्रथमान्तं विशेष्यम्" इति तु कलिङ्ग-कौमुदी-कोक्कटप्रभृतयः ॥१८०॥

मृदङ्गा मुरजा भेदास्त्वङ्क्यालिङ्ग्योर्धकास्त्रयः।[627]
स्याद् यशःपटहो ढक्का भेर्यामानकदुन्दुभिः ॥१८१॥*
आनकः पटहोऽस्त्री स्यात् कोणो वीणादिवादनम्।
वीणादण्डः प्रवालः स्यात् ककुभस्तु प्रसेवकः ॥१८२॥
कोलम्बकस्तु कायः स्यादुपनाहो निबन्धनम्।
वाद्यप्रभेदा डमरुमड्डु[628]डिण्डिमझर्झराः ॥१८३॥
मर्दलः प्रणवोऽन्ये[629] च नर्तकीलासिके समे।[630]
विलम्बितं द्रुतं मध्यं तत्वमोघो घनः[631] क्रमात् ॥१८४॥
तालः कालक्रियामानं लयः साम्यमथास्त्रियाम्।
ताण्डवं नटनं नाटचं लास्यं नृत्यञ्च नर्तने ॥१८५॥
तौर्यत्रिकं नृत्यगीतवाद्यं नाटचमिदं त्रयम् ॥१८६क॥

मृदङ्गः मृत् अङ्गमस्य 'मृदङ्गः'। यद्वा मृद्यते कर्मणेत्यर्थे। मृद क्षोदे। "त्रादिभ्यश्चे" (उ० १।११९) त्यङ्गच्[632]। बाहुलकाद् गुणाभावः ॥

मुरजः मुरात् संवेष्टनाज् जातो 'मुरजः'। व्यक्तौ बहुवचनम् ॥ **द्वे मृदङ्गस्य ॥**

627 लिङ्ग्योर्ध्वका––क्षीर°, भानु° * भेरी स्त्री दुन्दुभिः पुमान्––क्षीर°, रघुनाथ।
628 मड्डु––A,
629 पणवोऽन्ये च––क्षीर°, भानु°
630 मुकुट suggests––नर्तको लासकः समौ।
631 घनं––क्षीर°, सर्वा°, भानु°
632 तत्त्व° reads the rule as तरत्यादिभ्यश्च। दशपादी ३।६० gives "त्रादिभ्यश्च"।

मुरजस्याङ्क्यादयस्त्रयो भेदाः। तदुक्तम्––
"सार्धतालत्रयायामश्चतुर्दशाङ्गुलाननः।
हरीतक्याकृतिर्यः स्यादङ्क्योऽङ्के स हि वाद्यते॥"
"चतुरङ्गुलहीनोऽङ्क्यान्मुखे चैकाङ्गुलेन यः।
यवाकृतिः स आलिङ्ग्य आलिङ्ग्य स हि वाद्यते॥"
ऊर्धको गोपुच्छवत् स त्रितालोऽष्टाङ्गुलो मुखे।
धृत्वोर्ध्वं वाद्यतेऽन्येषां वादनादूर्धकं ततः॥"

इति शब्दार्णवः। अङ्के उत्सङ्गे वाद्यते इति 'अङ्क्यः'। **अङ्क्यः** "तत्र साधु" (पा० ४।४।९८) रिति यत् ॥

वाद्यमान आलिङ्ग्यत इति 'आलिङ्ग्यः'। आङ्पूर्वात् **आलिङ्ग्यः** लिगिर्गत्यर्थ इत्यतः कर्मणि ण्यत् (पा० ३।१।१२४)। कित्वाभावे (?) घञन्तादालिङ्गशब्दात् पूर्ववत् (यत्) ॥

वादनार्थमूर्धः सन् कायति शब्दायते इति 'ऊर्धकः'। **ऊर्धकः** ऊर्धशब्दोऽयं निर्वकारः। तदुक्तं वर्णदेशनायाम्––"उज्जिहीते उद्गच्छतीति ऊर्धः। उत्पूर्वाद् दधातेर्डप्रत्ययः। उपसर्ग- **(उर्ध्वः)** स्यादिवर्णस्योरादेशे नैरुक्ते वकाररहितः 'ऊर्धः'। यस्तु उपरिपर्याय आश्रयपरतन्त्रः स समकारोऽव्ययं वकारवांश्च। तथाच कविरहस्ये[633] "ऊर्ध्वं धुनोति वायु" रिति। उपरि ध्वन्यत इति 'ऊर्ध्वम्'। वकारवत् मान्तव्ययम्। तन्त्रान्तरे **(ऊर्ध्वम्)** ऊर्ध्वसमानार्थं ऊर्ध्वशब्दोऽप्यनव्ययमदन्तोऽस्ति। ऊर्ध्वदेहे भव- **(ऊर्ध्वः)** मौर्ध्वदेहिकमित्यदन्तः [इति] "पूर्वपदाट् ठञ्" (वा० ४।३।६०) जयादित्यः।

"कुर्वतीरुपलैस्तुङ्गैर्भुवनं नीचमूर्ध्वजैः।
तस्या वनालीरन्वेति* चित्रा नागचमूर्ध्वजै"रिति कीचक-वधे यमकात् वकारवत्वमूर्ध्वशब्दस्य व्युत्पादितम् ॥ **त्रयं मुरजविशेषस्य पृथक् पृथक् ॥**

स्यादिति। यशोऽर्थं पटहः 'यशःपटहः'। शाकपार्थिवादिः **यशःपटहः** (वा० २।१।६९) ॥

633 भवभूतिः––A, B. * तस्याचलाली–सर्वा°, रघुनाथ।

ढक्का — ढक् इति कायति 'ढक्का'। "आत" (पा० ३।२।३) इति कः ॥ **द्वे ढक्कायाः ॥**

भेरी (भेरिः) — विभ्यत्यस्यारवात्। विभेतेरिन्द्रवत् रन् (उ० २।२८)। ङीष्। 'भेरी'। ञि भी भये। "वङ्क्रयादयश्च" (उ० ४।६६) इति [क्रिन्।] 'भेरिः'। "रवः प्रगल्भाहतभेरिसम्भवः प्रकाशयामास समन्ततस्ततः" इति कुमारदासः।*

आनकः — आनित्यनेन वादितेन सान्त्विको योध्यः(क)। आङ्पूर्वादनितेः "कृञादिभ्यः संज्ञायां" (उ० ५।३५) वुन्। 'आनकः'॥

दुन्दुभिः — द्वन्द्वशब्देन उभिः पूरणं यत्र स 'दुन्दुभिः'। उभ उम्भ पूरणे। औणादिक इन् (उ० ४।११७), शकन्ध्वादिः (वा० १।१।६४)। "द्वन्द्व इत्यव्यक्तशब्देन भातीति औणादिक इ" (उ० ४।१३८) इति तु कौमुदी। "स्याद् भेर्यां दुन्दुभिः पुंसि" इति नानार्थे लिङ्गं वक्ष्यते। स्वामी तु "भेरी स्त्री दुन्दुभिः पुमान्" इति पठति ॥ **त्रयं भेर्याः ॥१८१॥**

आनकः — 'आनक' उक्तः ॥

पटहः — पटच्छब्दं जहाति 'पटहः'। पृषोदरादित्वात्तकारलोपः (पा० ६।३।१०९)। पटहन्ति 'पटह' इत्यन्यः। 'पटहोऽस्त्री' ति संबन्धः। पुंनपुंसकाधिकारे चन्द्रगोमी—"उपवासं गृहं देहं लोहं पटहमित्यपि" इति ॥ **द्वे पटहस्य ॥**

कोणः — वीणादिर्वाद्यते येन धनुराद्याकृतिना स 'कोणः'। कुण शब्दोपकरणयोः। "हलश्चे" ति (पा० ३।३।१२१) घञ्। "द्वयोस्तु कोणो वीणादिवादनं(ख) सारिका च सा" इति शब्दार्णवः ॥ **एकं (वीणादिवादनस्य) ॥**

वीणादण्डः प्रवालः — **वीणेत्यादि**। वीणादण्डः 'प्रवालः'। वलवल्ल संवरणे। कर्मणि घञ् (पा० ३।३।१९) ॥ **द्वे वीणादण्डस्य ॥**

ककुभः — कं वात स्कुभ्नाति। स्कुभेः सौत्रान्मूलविभुजादित्वात् (वा० ३।२।५) कः। पृषोदरादित्वात् (पा० ६।३।१०९) सलोपः। ['ककुभः'।] "ककुभः प्रसेवक उक्त" इति रत्नकोषः ॥

* The quotation seems to be from कुमार° (१४।३२)। जानकीहरण (६।१२) reads—"ततः प्रगल्भाहतभेरिसम्भवः प्रकाशयामास गतिं समन्ततः।

(क) साहसिको योधः ?

(ख) वीणादेर्वादन°—भानु°

प्रसेवकः — सेवृमेवृपेवृ सेचने। दन्त्यादिः। "क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापी" ति (उ० २।३२) 'प्रसेवकः'॥ **द्वे वीणादण्डाधरस्थितं शब्दगाम्भीर्याय दारुमयं भाण्डं यच्चर्मणा आच्छाद्यते तस्य।** वीणाप्रान्ते वक्रकाष्ठेकृते(क) ककुभप्रसेवकौ वर्तत इत्यन्यः ॥**१८२** ॥

कोलम्बकः — अस्या वीणायाः कायोऽलाबुदण्डककुभसमुदायस्तन्त्रीहीनः 'कोलम्बकः' क्रोडलम्बमानः। पृषोदरादित्वात् (पा० ६।३।१०९) ॥ **एकं (वीणाक्रोडलम्बमानस्य तन्त्रीहीनस्यालाबुदण्डकस्य) ॥**

उपनाहः — नह बन्धने। "हलश्चे" (पा० ३।३।१२१) ति घञ् ['उपनाहः' ॥]

निबन्धनम् — 'निबन्धनम्' इति ल्युट् (पा० ३।३।११७) ॥ **द्वे यत्र तन्त्रीर्निबध्यते तस्योर्ध्वभागस्य ॥**

वाद्येत्यादि। डमरुप्रभृतयः षट् वाद्यानां प्रभेदाः। कापालिकयोगिवाद्यं 'डमरुः' प्रसिद्धः ॥

डमरुरेव महान् मड्डुः। "चुरुक"[634] इति यस्य प्रसिद्धिः ॥

डमरुः — डम् इति शब्दम् इयर्ति। मृगय्वादित्वादर्तेः कुः (उ० १।३८)। गणपाठादेव गुणः। 'डमरुः'॥

मड्डुः — टु मस्जो शुद्धौ। "भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः (उ० १।७)।" पृषोदरादित्वात् (पा० ६।३।१०९) जकारस्य डकारः। 'मड्डुः'[635] ॥

डिण्डिमः — 'डिण्डी'' ति शब्दं मिनोति। "अन्येषामपी" (पा० ३।२।१०१) ति डः। 'डिण्डिमः'। "डेण्डु"* रिति यस्य प्रसिद्धिः ॥

झर्झरः — झर्झ शब्दं[636] राति[637]। "आत" (पा० ३।२।३) इति कः[638]। 'झर्झरः'। "झर्झ शब्दे। अरन्[639] (उ० ३।१३१)। "झर्झरः करज"[640] इति **हट्टचन्द्रः ॥१८३॥**

(क) वक्रकाष्ठविशेषे (?)

* डेङ्गुरीति—सर्वा°

634 चुचुक-सर्वा°

635 मड्डुः—A.

636 जर्जरशब्दं—A.

637 करोति—B.

638 A adds जर्ज इति।

639 According to उज्ज्वलदत्त the suffix is अर। "अरन् इति प्रमाद इति पारायणीयम्"—उज्ज्वल°।

640 करडक—A, करड—सर्वा°

मर्दलः मृद तृप्तियोगे। चुरादिः[641]। वृषादित्वात् कलच् (उ० १।१०८)। बाहुलकाद् गुणः। मर्दं लातीति 'मर्दल' इति वा ॥

प्रणवः **(पणवः)** प्रणुवन्ति स्तुतिं कुर्वन्त्यनेन 'प्रणवः' गायनपटह उच्यते। नु स्तुतौ। "पुंसी" (पा० ३।३।११८) ति घः। पृषोदरादित्वात् (पा० ६।३।१०९) रेफलोपे णत्वे च केचित् 'पणव' इति वर्णयन्तीति भट्टस्वामि-सर्वधरादयः। कौमुदीकारादयस्तु 'प्रणव' इत्येवं पाठमिच्छन्ति।

अन्यशब्देन पेरगोमुखहुडुक्कादयः ॥ **वाद्यविशेषाणां पृथक् पृथक् ॥**

नर्तकी **नर्तेति।** नृत्यन्तीति "शिल्पिनि ष्वुन्" (पा० ३।१।१४५)। षित्वान् ङीषि (पा० ४।१।४१) 'नर्तकी'॥

लासिका **(नर्तकः)** **(लासकः)** लस श्लेषणक्रीडनयोः। ण्वुल् (पा० ३।१।१३३)। "नृतिखनिरञ्जिभ्यः" (वा० ३।१।१४५) इति परिगणितत्वात् नात्र ष्वुन्। "लासिके समे" इत्यनेन स्त्रीलिङ्गत्वं प्रदर्शितम्। "नर्तको लासकः समा" विति न्याय्यः पाठः। अनयोः स्त्रिया योगोपाधिकतया* वाच्यलिङ्गत्वात्। अथवा वाच्यलिङ्गत्वेऽपि कामचारात् स्त्रीनिर्देशः। "शिल्पिनि ष्वुनि (पा० ३।१।१४५) स्त्रीत्वे षित्वात् ङीष्-(पा० ४।१।४१) प्रदर्शनार्थम्" इति तु कौमुदी ॥ **द्वे नर्तक्याः ॥**

विलम्बितम् **वीति।** विलम्बन्ते करचरणादयः प्रत्येकं गतिविशेष-प्रदर्शनायात्र 'विलम्बितम्'। भावे क्तः (पा० ३।३।११४)[642] ॥

द्रुतम् द्रवन्ति गच्छन्ति समुदायगतिप्रदर्शनार्थं करादयोऽत्र 'द्रुतम्'। द्रु गतौ। पूर्ववत् क्तः (पा० ३।३।११४) ॥

मध्यम् विलम्बितद्रुतयोर्मध्यभवत्वात् 'मध्यम्'। "अ साम्प्रतिके" (पा० ४।३।९) इत्यकारप्रत्ययः ॥ **एषु यथाक्रमं तत्वादित्रयं ॥**

641 In Pāṇinian धातुपाठ मृद क्षोदे belongs to क्र्यादि while the चुरादि root is मद तृप्तियोगे and not मृद।

642 "क्तोऽधिकरणे" (पा० ३।४।७६) इत्यादिना क्तः––सर्वा°

* योगः सोपाधिकतया ?

तत्वम् 'तत्वं'। करचरणानां तननं 'तत्'। सम्पदादित्वात् क्विप् (वा० ३।३।१०८)। तद्योगाद् "अन्येषामपी"(क) ति वः (वा० ५।२।१०९) ॥

ओघः 'ओघ' इति। उच समवाये घञ् (पा० ३।३।१८)। पृषोदरादित्वाद् (पा० ६।३।१०९) घत्वम् ॥

घनः 'घनः' प्रागुक्तः (दिक्°७५) ॥ **विलम्बितद्रुतमध्यानां[643] नृत्यगीतवाद्यानां क्रमेणैकैकम् तत्वादिनामत्रयम् ॥१८४॥**

तालः अयं स्वर इयत्कालं गेय इयत्कालं विलम्बितमियत्कालं द्रुतमियत्कालं मध्यमिति बोधयितुमीदृशैर्हस्तैरङ्गुल्याकुञ्चन-प्रसारणादिक्रियाभिर्नर्तितव्यं गातव्यञ्चेति कालक्रियायाः प्रमाणं 'ताल'श्चपटादिः।[644] तल प्रतिष्ठाकरणयोः। चुरादिः। घञ् (पा० ३।३।१८) ॥ **एकं (कालक्रियामानस्य) ॥**

लयः गीतवाद्यपादादिन्यासानां क्रियाकालयोः साम्यं 'लयः'। लय गतौ।(ख) "एरच्" (पा० ३।३।५६)।[645] "अभिनया-नामपीति" कश्चित् ॥ **एकं (कालक्रियासाम्यस्य) ॥**

ताण्डवम् **ताण्डेति।** ताण्डेन मुनिना प्रोक्तम्। "कलापिवैशम्पाय-नान्तेवासिभ्यश्चे" (पा० ४।३।१०४) ति णिनिः। "आपत्यस्य च तद्धितेऽनाति" (पा० ६।४।१५१) इति यलोपः। ताण्डि नृत्य-शास्त्रं। तदस्यास्तीति "अन्येभ्योऽपि दृश्यत" (वा० ५।२।१०९) इति वः। पृषोदरादित्वादिकारस्याकारः (पा० ६।३।१०९)। 'ताण्डवम्'। "तण्डुना प्रोक्तं ताण्डवम्" इति तु स्वामी। "तडिधातोस्ताण्डवम्" इति तु कौमुदी। "ताण्डवमस्त्रियाम्" इति तु संबन्धः ॥

नटनम् नट अवस्कन्दने। ल्युट् (पा० ३।३।११५)। 'नटनम्'।

नाटचम् भावे ण्यति (पा० ३।१।१२४) 'नाटचम्' ॥

लास्यम् लस श्लेषणक्रीडनयोः। भावे ण्यत् (पा० ३।१।१२४)। 'लास्यम्' ॥

(क) "अन्येभ्योऽपि"––महाभाष्यम्।

643 शीघ्रमध्यानां—B. 644 करपुटादिः—B.; should we read चच्चत्पुटादि ?

(ख) "लीङ् श्लेषणे" seems to be the correct derivation as held by भानु°।

645 We are not sure if it was originally पचाद्यच् (पा० ३।१।१३४)।

नृत्यम् नृती गात्रविक्षेपे। "ऋदुपधाच्चे" (पा० ३।१।११०) ति
(नृत्तम्) क्यप्। 'नृत्यम्'। 'नृत्त'-मिति पाठे भावे क्तः (पा० ३।३।११४)।
नर्तनम् ल्युटि (पा० ३।३।११५) 'नर्तनम्'॥ **षट् नृत्यस्य ॥१८५॥**

तौर्यत्रिकम् नृत्यादिकं तौर्यत्रिकमुच्यते नाटचञ्च तत्। तुरी त्वरायाम्।[646] "ऋहलोर्ण्यत्" (पा० ३।१।१२४)। "हलि चे" (पा० ८।२।७७) ति दीर्घत्वञ्च। 'तूर्यम्' मुरजादि। तत्र भवं 'तौर्यम्' शब्दरूपम्। त्रयोंऽशा अस्य 'त्रिकम्'। "संख्याया अतिशदन्तायाः कन्"(पा० ५।१।२२)। तौर्येण त्रिकं। तथा "तृतीये" (पा० २।१।३०) ति योगविभागात् समासः। "तौर्य च तत् त्रिकं चेति कर्मधारय" इति पञ्जिका।

नाटचम् नटस्येदं 'नाटचम्'। "छन्दोगौक्थिकयाज्ञिकवह्वृचनटात् ञ्यः" (पा० ४।३।१२९)। **द्वे नृत्यगीतवाद्यानां समुदितानाम् ॥१८६क॥**

भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्चेति नर्तकः ॥१८६॥
स्त्रीवेशधारी पुरुषो नाट्योक्तौ गणिकाज्जुका।
भगिनीपतिरावुत्तो भावो विद्वानथावुकः ॥१८७॥
जनको युवराजस्तु कुमारो भर्तृदारकः।
राजा भट्टारको देवस्तत्सुता भर्तृदारिका[647] ॥१८८॥
देवी कृताभिषेकायाम् इतरासु च भट्टिनी।
अब्रह्मण्यमवध्योक्तौ राजश्यालस्तु राष्ट्रियः ॥१८९॥
अम्बा माताथ वाला स्याद् वासूरार्यस्तु मारिषः।
अन्तिका भगिनी ज्येष्ठा निष्ठा-निर्वहणे समे ॥१९०॥
हण्डे हञ्जे हलाह्वानं नीचां चेटीं सखीं प्रति ॥१९१क॥

भ्रेति। पटपुटेति दण्डकपठितस्य कुसिधातोर्भाषणार्थस्य
भ्रकुंसः "एरचि" (पा० ३।३।५६) भ्रुवोः कुंसो भाषणमस्य "बहुव्रीहौ भ्रुकुंसादीनामकारो वक्तव्य" (वा० ६।३।६१) इति कुंस-

646 Pāṇinian धातुपाठ reads तुर त्वरणे।
647 दारका—B.

शब्दस्याकारः।(क) 'भ्रकुंसः'। "भ्रुवौ कुंसति। कर्मण्यणि" (पा० ३।२।१) इति तु कौमुदी। भ्रुकुंसः

"इको ह्रस्वोऽङ्यो गालवस्ये" (पा० ६।३।६१) ति वा ह्रस्वत्वे "भ्रुकुंसभ्रूकुंसौ ऋकारो वे"त्यन्ये। तेन भृकुंसः, भ्रूकुंसः, भ्रुकुंसः। "भ्रूकुंसश्च भृकुंसवत्(ख)" इति शब्दार्णवः। "स्वप्न-हिंसाभ्रुकुंसा" इति सभेदाद् दन्त्यवन्तः॥ **स्त्रीवेषधारी यः पुरुषो नृत्यति तत्र भ्रकुंसादित्रयम् ॥१८६॥** भ्रूकुंसः (भृकुंसः)

नाट्योक्तावित्यधिकारः प्रागङ्गहारात् (नाटच° १९१)॥

गेति। गणिका वेश्या नाटचोक्तौ 'अज्जुका'। अर्ज सर्जने। बाहुलकात् "समिकसेरुकन्" (उ० २।२९)[648] इति उकन् रलोपश्च॥ अज्जुका

नाटचोक्तौ भगिन्याः पतिः 'आवुत्तः'॥ आवुत्तः

विद्वान् पण्डितो 'भावः'। "भवतेश्चोपसंख्यानम्"[649] इति णः॥ भावः

जनकः पिता 'आवुकः'। अव रक्षणे। बाहुलकात् "मृकणिभ्यामूकोकणौ (उ० ४।३९) इत्युकण्। "अत उपधायाः" (पा० ७।२।११६)। वृद्धिः ॥१८७॥ आवुकः

युवराजस्तु 'कुमारः', 'भर्तृदारक'श्च। [भर्तुः] पुत्रो 'भर्तृदारकः'॥ **द्वे युवराजस्य ॥** कुमारः, भर्तृदारकः

राजा 'भट्टारको', 'देव'श्च। वटभट परिभाषणे*। क्विप् (पा० ३।२।१७८)। भट् चासौ तारकश्चेति पृषोदरादित्वात् (पा० ६।३।१०९) टुत्वम्॥ **द्वे राज्ञः ॥** भट्टारकः देवः

तस्य राज्ञः सुता 'भर्तृदारिका'॥ **एकं राजसुतायाः ॥ १८८॥** भर्तृदारिका

(क) The वार्त्तिक in काशिका reads "भ्रूकूसादीनां तु भवत्यव। अपर आह—भ्रूकूसादीनामकारो भवतीति वक्तव्यम्।"
(ख) "भ्रकुंसश्च भ्रुकुंसश्च भ्रूकुंसश्च भृकुंसवत्"—इति शब्दार्णवः—भानु°।
648 तत्त्व reads समि कस उकन्। * भट भृतौ—सर्वा°
649 काशिका under विभाषा ग्रहः (३।१।१४३) adds "भवतेश्चेति वक्तव्यम्"। "भाष्यमते तु प्राप्त्यर्थाच्चुरादिण्यन्तादच्"—भट्टोजि।

देवी कृताभिषेकायां बद्धपट्टायां 'देवी' ॥ **श्रीमहादेव्या वासवदत्तादेरेकम्** ॥

भट्टिनी इतरासु अकृताभिषेकासु राज्ञीमध्यादेकैकासु 'भट्टिनी' पद्मावत्यादिः । **एकम् (अकृताभिषेकाणां राज्ञीनाम्)** ॥

शब्दार्णवे त्वयं विशेषः——

"गणिकानुचरैरज्जुकेति नाम्ना नृपेण सा ॥
युवराजस्तु सर्वेण कुमारो भर्तृदारकः ॥
भट्टारको वा देवो वा वाच्यो भृत्यजनेन सः ॥
ब्राह्मणेन तु नाम्नैव राजन्नित्यृषिभिः स च ॥
वयस्य राजन्निति वा वाच्यो विदूषकेण सः ॥(क)
अभिषिक्ता तु राज्ञापि देवीत्यन्या तु भामिनी ।(ख)
भट्टिनीत्यपरैरन्या नीचैर्गोस्वामिनीति सा ॥" इति ।

"अन्यस्य भट्टिनी भाष्या" इति तु **रत्नकोषः** ॥

अब्रह्मण्यम् **अब्रेति** । वधं नार्हति इत्युक्तौ 'अब्रह्मण्यं' वर्तते । ब्रह्माणमर्हत्यर्थे "दण्डादिभ्यो यत्" (पा० ५।१।६६) । "तत्र साधु" (पा० ४।४।९८) रिति वा यत् । ततो नञ्-समासः । अवध याच्ञार्थमित्येके* ॥ **एकं "वधं नार्हती"ति वचसः** ॥

राष्ट्रियः **राजेत्यादि** । राज्ञः श्यालो 'राष्ट्रियः' राष्ट्रेऽधिकृतः । "राष्ट्रावारपाराद् घखा" (पा० ४।२।९३) विति घः ॥ **एकं राजश्यालस्य** ॥१८९॥

अम्बा माता अम्बा । अम्ब्यते शब्द्यते बालैरिति 'अम्बा' ।(ग) ननु कथं "तातेनाम्बविहीनोऽस्मि", "बालभावेऽहमम्बये" इत्यादावनाटचोक्तावपि अम्बादिप्रयोगः ? तत्र **जातोकादय** आहुः— "नाटचोक्तावज्जुकादय एव प्रयुज्यन्ते न गणिकामात्रादयः इत्ययं नियमः ।" तन्न । "मातः किमसदृशं करुणं वचस्ते" इति **वेणीसंहारादौ** मात्रादीनामपि प्रयोगात् । तस्माद् अम्बादीनां

(क) "वयस्य राजन्निति वा विदूषक इमं वदेत्"—भानु°
(ख) "अभिषिक्ता तु राज्ञासौ देवीत्यन्या तु भोगिनी"—भानु°
* अवध याच्ञायाम्—भानु°
(ग) भिदाद्यङ् (पा० ३।३।१०४)—रघुनाथ

नाटचे प्रायशः प्रयोगाद् विधिरयम् । अज्जुकादीनां तु अन्यत्राप्रयोगान्नियमः फलतीत्येतदेवाह **शब्दार्णवकारः**——

"अथैतेषां रूपकाणामुक्तीर्वक्षाम्यशेषतः ।[650]
कासुचिन्नियमस्तत्र विधिरेव च कासुचित् ॥" इति ॥

(एकं मातुः) ॥

अथेति । बाला कुमारी 'वासूः' । वास्यते प्रीत्या 'वासूः' । वसतेर्ण्यन्तात्[651] ऊः (उ० १।८७) । वासूर्दन्त्या ॥ **एकं (बालायाः)** ॥ वासूः

आरात् पापेभ्यः कर्मभ्यो याति* 'आर्यः' । पृषोदरादिः (पा० ६।३।१०९) । आरणीयो (अरणीयो ?) ऽवगम्यो वा ॥ आर्यः

मर्षणात् सहनात् 'मारिषः' । मूर्धन्यषः । "मारिषः शाकभिद्यार्ये नाटचोक्तौ पुंसि भाषित" इति मूर्धन्यान्ते **रभसात्**, 'मार्ष'श्च । "आर्ये मारिषमार्षका" विति **शब्दार्णवात्** ॥ **एकं सामान्यस्य (मान्यस्य ?) साधोरिति यावत्** ॥ मारिषः मार्षः

ज्येष्ठा भगिनी 'अन्तिका' । "अत्ता माता सैव अत्तिका" इति द्वितकारपाठ——इति **सर्वधरः** । "अन्तिकं निकटे नाटचस्योक्त्या ज्येष्ठस्वसर्यपि" इति **नानार्थकोषदर्शनात्** द्वितकारपाठः प्रामादिक इति **कलिङ्गादयः** । वयं तु—— "अन्तिका चात्तिका तथा"(क) इति **द्विरूपकोषात्** द्वितकारपाठोऽपि इत्याचक्ष्महे ॥ **एकं (ज्येष्ठायाः स्वसुः)** ॥ अन्तिका (अत्तिका)

नियतं स्थानं 'निष्ठा' ॥ निष्ठा

निःशेषेण वहनं समाप्तिः 'निर्वहणम्' ॥(ख) निर्वहणम्

"मुखं प्रतिमुखं चैव गर्भो विमर्श एव च ।
तथा निर्वहणं चेति नाटके[652] पञ्च सन्धयः ॥"

650 अथैषां रूपधाराणाम्——B.
651 B adds here वधूवत् ।
* यातः——रघुनाथ
(क) "अत्तिका चान्तिका तथा"—रघुनाथ ।
(ख) निःशेषेण वहनं प्रस्तुतकथासमाप्तिः । तदुक्तं रत्नकोषे——
"समापनं सदर्थानां प्रस्तुतानां महौजसाम् ।
नानाभावोत्तराणां च भवेन्निर्वहणं तु तत् ॥"—रघुनाथ
652 नाटचे स्युः—B, निर्वहणं चैव——सर्वा° । सर्वा° ascribes it to दत्तिल ।

निर्वहणमित्यत्र रेफरहितो हकारो वकार एव सरेफः। "यान्ति निर्वहणमस्य संसृतिक्लेशनाटकविडम्बनाविधे" (Śiśu, 14/63) रिति **माघे** छन्दोभङ्गात्।

'समे' समार्थे ।। **द्वे पञ्चसन्धिसमाप्तेः** ।। प्रस्तुतकथासमाप्तेरिति यावत्। यथैतदनुवृत्तौ **शब्दार्णवः**—"निर्वहणं तु निष्ठा स्त्री संहारस्तु समापने" इति। अतएव "निर्वहणं रसस्यास्खलनम्" इति केषाञ्चिद्धर्षामर्षः[653] ।।१९०।।

हण्डे **हण्डे इति**। नाटचोक्तौ नीचं प्रत्याह्वानं 'हण्डे' ।।

हञ्जे चेटीं प्रत्याह्वानं 'हञ्जे' ।।

हला सखीनां प्रत्याह्वानं 'हला' ।। त्रयमेवाव्ययम्। यथा—"हला **शकुन्तले**" (Śak. I) इत्यादि। सखीपर्यायो हलाशब्दस्तु टावन्तः। "बाला वासू! सखी हला" इति **स्त्रीकाण्डे वोपालितः** ।। **अधमदासीसखीनामाह्वानस्य क्रमेणैकैकम्** ।। ।।१९१क।।

अङ्गहारोऽङ्गविक्षेपो व्यञ्जकाभिनयौ समौ ।।१९१।।
निर्वृत्ते त्वङ्गसत्त्वाभ्यां द्वे त्रिष्वाङ्गिकसात्त्विके।
शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः ।।१९२।।
बीभत्सरौद्रौ च[654] रसाः शृङ्गारः शुचिरुज्ज्वलः।
उत्साहवर्धनो वीरः कारुण्यं करुणा घृणा ।।१९३।।
कृपा दयानुकम्पा स्यादनुक्रोशोऽप्यथो हसः।
हासो हास्यञ्च बीभत्सं विकृतं त्रिष्विदं द्वयम् ।।१९४।।
विस्मयोऽद्भुतमाश्चर्यं चित्रमप्यथ भैरवम्।
दारुणं भीषणं भीष्मं घोरं भीमं भयानकम् ।।१९५।।
भयङ्करं प्रतिभयं रौद्रं तूग्रममी त्रिषु।
चतुर्दश दरत्रासौ भीतिर्भीः साध्वसं भयम् ।।१९६।।
विकारो मानसो भावोऽनुभावो भावबोधकः।
गर्वोऽभिमानोऽहङ्कारो मानश्चित्तसमुन्नतिः ।।१९७।।

653 हर्षामर्शः—A.
654 बीभत्सरौद्रे—सर्वा°

अनादरः परिभवः परिभावस्तिरस्क्रिया(क)।
रीढावमाननावज्ञा अवहेलमसूक्षणम्[655] ।।१९८।।
मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा साऽपत्रपान्यतः।
क्षान्तिस्तितिक्षाभिध्या तु परस्वविषये स्पृहा[656] ।।१९९।।
अक्षान्तिरीर्ष्याऽसूया तु दोषारोपो गुणेष्वपि।(ख)
वैरं विरोधो विद्वेषो मन्युशोकौ तु शुक् स्त्रियाम् ।।२००।।
पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि।
कोपक्रोधामर्षरोषप्रतिघा रुट्क्रुधौ स्त्रियाम्(ग)।।२०१।।
शुचौ तु चरिते शीलमुन्मादश्चित्तविभ्रमः।
प्रेमा ना प्रियता हार्दं प्रेम स्नेहोऽथ दोहदम् ।।२०२।।
इच्छाकाङ्क्षास्पृहेहा(घ) **तृड् वाञ्छा लिप्सा मनोरथः।**
कामोऽभिलाषस्तर्षश्च स महाँल्लालसा* द्वयोः ।।२०३।।
उपाधिर्ना धर्मचिन्ता पुंस्याधिर्मानसी व्यथा।
स्याच्चिन्ता स्मृतिराध्यानमुत्कण्ठोत्कलिके समे ।।२०४।।

अङ्गेति। अङ्गस्य स्थानात् स्थानान्तरनयनम् 'अङ्गहारः'। "वृश्चिकभ्रमरादि(ङ) - द्वात्रिंशत्प्रकारोऽङ्गुल्यादिविन्यासरूपोऽङ्गहार" इति तु **कौमुदी**। "अङ्गहारस्त्वङ्गहारिर्द्वित्रादिमाम्बिकाम्बिके" ति **शब्दार्णवः** ।। **द्वे अङ्गहारस्य** ।। अङ्गहारः (अङ्गविक्षेपः)

व्यनक्तीति 'व्यञ्जकः' ।। व्यञ्जकः

आभिमुख्यं[657] नीयतेऽर्थोऽनेनेति 'अभिनयः'। वाचिकाङ्गिकाहार्यसात्त्विकभेदाच्चतुर्विधः। **द्वे कृत[क-]क्रोधादिभावाभिव्यञ्जकस्य[658]** ।।१९१।। अभिनयः

अङ्ग(ङ्गैः?)निर्वृत्तम् 'आङ्गिकम्' भ्रुविक्षेपादि ।। आङ्गिकम्

655 ...माननावज्ञावहेलनमसूर्क्षणम्—भानु°; ...वज्ञावहेलन—क्षीर°, सर्वा°। ...सुक्षणम्—सर्वा°
656 विषयस्पृहा—सर्वा°; परस्य विषये स्पृहा—क्षीर°, भानु°; विषयिस्पृहा—मुकुट ?
(क) परीभाव—क्षीर°, सर्वा°, भानु°
(ख) गुणिन्यपि—सर्वा°
(ग) स्त्रियौ—सर्वा°
(घ) इच्छा काङ्क्षा—क्षीर°, सर्वा°
* सोऽत्यर्थं लालसा—क्षीर°, भानु°
(ङ) cf. NŚ. (GOS), IV. 19-27
657 अभिमुखं—B.
658 हृद्गतक्रोधादि—A.

सात्त्विकम् सत्त्वेन निर्वृत्तं 'सात्त्विकम्।' "अध्यात्मादित्वात्" ठञ्,
(सात्त्विकः) (वा० ४।३।६०), "निर्वृत्तेऽक्षद्यूतादिभ्य" (पा० ४।४।१६) इति योगविभागाद्वा। सत्त्वं मनोगुण आश्रयो वा। तेन निर्वृत्तः 'सात्त्विकः'। यदाह––"सत्त्वोत्कटे मनसि ये प्रभवन्ति भावास्ते सात्त्विका" इति।

"स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका गुणाः।"[659]

प्रलयो मूर्च्छा। **अङ्गनिष्पादित-हृ[द्गत]-विक्षेपादि-भावनिष्पादित**[660] **रोमाञ्चादिकयोः [कानां?] पृथक् पृथक्॥**

शृङ्गेति। रत्यादयो भावा अनुक्रियमाणाः सामाजिकै
रसाः रस्यन्त इति 'रसाः'। यदाह––

"विभावैरनुभावैश्च युक्तो वा(क) व्यभिचारिभिः।
आस्वाद्यत्वात् प्रधानत्वात् स्थाय्येव तु रसो भवेत्(ख)॥"

इति। यद्यपि "बीभत्सरौद्रौ वात्सल्यं शान्तश्चेति[661] रसा दश" इति नामनिधानं तथापि "धर्मार्थकामानां शृङ्गारभेदत्वाद् वात्सल्यशान्तयोश्च तच्छरीरत्वात् तद्ग्रहणेनैव ग्रहणम् इति न पृथक् निबद्धा" इति तु कौमुदी। "वत्सलः पुत्रादिस्नेहत्वाद् रत्यात्मकत्वान्नातिरिच्यत एव। शान्तस्त्वलौकिकत्वान्नोक्तः। चशब्दात् संगृहीतस्त्वि"ति तु(ग) सर्वधरादयः। "बीभत्सरौद्रौ" चेति पुंलिङ्गपाठ इह युक्तः। "शृङ्गार वीरबीभत्सहास्यरौद्रभयानकाः" इति शब्दार्णवादौ दर्शनात्॥

शृङ्गारः प्रोज्ज्वलो धृतिहेतुर्भावः 'शृङ्गारः'॥
वीरः दानधर्मयुद्धेषु जीवानपेक्षः साह[स]कारी रसो 'वीरः'॥
अद्भुतः असंभावितमर्त्यान्तरीक्षगमनादिजो विस्मयः ['अद्भुतः']॥

---

659 सात्त्विका मताः—सर्वा° but NŚ. VI. 22 reads—· · ·"सात्त्विकाः स्मृताः।".. "स्वरभेदोऽथ . . . मताः॥" NŚ. (GOS), VII. 94.

660 हृद्गत etc. omitted in B.

(क) युक्तोऽथ—क्षीर°

(ख) रसीभवेत्—क्षीर°

661 शान्तञ्चेति—A, शान्ताश्चेति—B.

(ग) "शान्तस्यालौकिकत्वेन, वत्सलस्य पुत्रादिस्नेहरूपत्वाद् रत्यात्मकत्वेन, न निर्दिष्टौ इति स्वामिमुकुटौ"—शिवदत्त॥

ऋध्यद्राक्षसादिभयजन्यो 'भयानकः'॥ **भयानकः**
घृणाकरपूयरसादिजो 'बीभत्सः'॥ **बीभत्सः**
सर्वाभिभावितो 'रौद्रः'। यथा––रावणचरितादि॥ **रौद्रः**
'करूणहास्यौ' तु सुप्रसिद्धौ॥ **हास्यः, करुणः**
शृङ्गारादीनां प्रत्येकं 'रस' इति नाम। **एकं (रसस्य)॥**

शृङ्गम् उत्तमम् इयर्ति, शृङ्गं कामम् आराति वा 'शृङ्गारः'॥ **शृङ्गारः**

"उज्ज्वलवेशेनौचित्येन च लक्ष्यमेतत्(?)। न तु एतौ **शुचिः** शृङ्गारपर्यायौ" इति तु **भट्टादयः**(क)। "शृङ्गारस्यैव नामत्रय" **उज्ज्वलः** मिति तु **कौमुदी**। तथाच **नानार्थः**––

"शुचिर्दीप्ताग्निशृङ्गार आषाढे शुद्धमन्त्रिणि।
उज्ज्वलो दीप्तिशृङ्गारविशदेषु विकासिनि[662]॥" इति॥

उदिति। उत्साहो वीरस्य स्थायी भावः। एवं 'स्थायी **उत्साहवर्धनः** भावः स्फीततयैव स्वद्यते' इत्यनेन सर्वरसलक्षणम् कटाक्षितम्। **वीरः** **द्वे वीररसस्य॥**

शोकस्थायिभावः करूणो रसो धर्मद्वारेणोक्तः। "कॄ- **कारुण्यम्** वृदारिभ्य उनन्" (उ० ३।५३)। 'करुणः'। रसाभिप्राये **करुणा** पुमान्। भावे स्त्री। "कं सुखं रूणद्धि। मूलविभुजादित्वात् (वा० ३।२।५) के पृषोदरादि" (पा० ६।३।१०९) रित्यन्यः। यदा करुणायोगात् धर्मे वृत्तिस्तदा कारुण्यम्। ब्राह्मणादेराकृतिगणत्वात् (पा० ५।१।१२४) [ष्यञ्]॥

घ्रियन्तेऽनया। घृ सेचने। वाहुलकान्नक् (उ० ३।२)। **घृणा** 'घृणा'। **१६२-१६३॥**

क्रपेः* 'कृपा'। भिदाद्यङि (पा० ३।३।१०४) "क्रपेः **कृपा** संप्रसारणञ्चे" (गण°) ति संप्रसारणम्॥

दयतेऽनया 'दया'। दय रक्षणे। भिदाद्यङः (पा० **दया** ३।३।१०४)॥

(क) "उज्ज्वलो वेशेनौचित्येन च। लक्षणमेतत्। न त्वेतौ शृङ्गारपर्यायौ"—क्षीर°

662 विकाशनी—B.

* क्रप कृपायां गतौ––पा° धा°

अनुकम्पा अनुकम्प्यतेऽनया 'अनुकम्पा'। "गुरोश्चे" (पा० ३।३।१०३) त्यकारः ॥

अनुक्रोशः अनुक्रोशन्ति समदुःखा भवन्त्यनेन 'अनुक्रोशः'। घञ् (पा० ३।३।१२१) ॥ **सप्त करुणस्य ॥**

हसः, हासः, हास्यम् (हासिका) **अथो हसो हासो हास्यं चेति ।** "स्थाय्येव तु रसो भवेद्" इति भावरसयोः पर्यायित्वेन ध्वनति। "स्वनहसोर्वा" (पा० ३।३।६२) इति अप्-घञ्-ण्यतः (पा० ३।३।१८, ३।१।१२४)। धात्वर्थनिर्देशण्वुलपि (वा० ३।३।१०८)। 'हासिका'(क)। "तत्र हासो हसो हास्यं घर्घरं[663] हासिका स्त्रियाम्" इति शब्दार्णवः। **त्रीणि (हास्यस्य) ॥**

बीभत्सम् बीभत्सं विकृतमिति द्वयं त्रिषु। बधेर्निन्दायां सन् (पा० ३।१।६)। बीभत्सा। सा अस्त्यत्र। अर्श आद्यच् (पा० ५।२।१२७)। 'बीभत्सम्' ॥

विकृतम् जुगुप्साप्रभवत्वाद् 'विकृतम्। यदाहुः —

"विष्ठाकामज उद्वेगी क्षोभणो रुधिरादिजः। बीभत्सो द्विविधः" इति। तद्वति त्रिलिङ्गम्। प्रज्ञादित्वाद् (पा० ५।४।३८) 'वैकृतोऽपि'। **(वैकृतः)** "विकृतो वैकृतोऽथाग्रहायण्यामग्रहायणम्" इति **शब्दार्णवात्।** 'द्वय' मित्यनयोः पर्यायितामाह। **द्वे बीभत्सस्य ॥१६४॥**

वीति। प्रागुक्तभावरसयोः पर्यायित्वम्। अद्भुतस्य विस्मयस्थायिभावात्मकत्वात्। **विस्मयः** विपूर्वः स्मिङ् अद्भुतार्थः। 'विस्मयः'। दन्त्यमध्यः। "सात् पदाद्यो" (पा० ८।३।१११) रिति षत्वप्रतिषेधात् ॥

अत् आश्चर्यार्थे अव्ययम्। तस्य भवनम् अद्भुतम्'। **अद्भुतम्** "अदि भुवो डुतच् (उ० ५।१) ॥

आश्चर्यम् आचरणीयम् 'आश्चर्यम्'। "आश्चर्यमनित्य" (पा० ६।१।१४७) इति साधु ॥

चित्रम् चित्रं' पूर्वमुक्तम् (धी० १५०) ॥ **चत्वारि अद्भुतस्य ॥**

663 घर्ग् घरं—A. (क) हसिका—भानु°

'भैरवम्'। भीरोरिदम् (पा० ४।३।१२०) त्रासकृद्[664] 'भैरवम्' ॥ **भैरवम्**

दारयति चित्तम्। "कृवृ" (उ० ३।५३) इति उनन्। 'दारुणम्' ॥ **दारुणम्**

भीषयतेः 'भीषणम्' ॥ **भीषणम्**

बिभ्यत्यस्माद् 'भीष्मम्'। "भियः षुग् वा" (उ० १।१४७) इति मक्सुकौ ॥ **भीष्मम्**

तथा 'भीमम्'। "भीमादयोऽपादान" (पा० ३।४।१४) इति भीष्मभीमौ साधू––इति **सर्वधरः।** **भीमम्**

घूर भ्रमणे। घूरेर्डोरः[665]। 'घोरम्'। घूर भीमार्थे।* अचि वा (पा० ३।१।१३४) 'घोरम्'। "हन्तेर्घुरच्" (उ० ५।६४)[666] इति अच् घुरजादेशश्च। 'घोरम्'––इति **कौमुदी ॥** **घोरम्**

बिभेत्यस्मादिति 'भयानकम्'। "आनकः शीङभियः।" (उ० ३।८२) ॥**१६५॥** **भयानकम्**

भयं करोति 'भयङ्करम्'। "मेघर्तिभयेषु कृञ्" (पा० ३।२।४३) इति खच् ॥ **भयंकरम्**

प्रतिगतं भयेन 'प्रतिभयम्'। प्रादिसमासः ॥ **नव भयङ्करस्य ॥** **प्रतिभयम्**

रुद्रो देवता अस्य 'रौद्रम्' (पा० ४।२।२४) ॥ **रौद्रम्**

"शृङ्गारो विष्णुदेवः स्याद् हासः प्रमथदैवतः।
करुणो यमदेवस्तु स्याद् रौद्रो रुद्रदैवतः ॥" (NŚ. VI. 44) इति भरतः ॥[667]

'उग्रम्'। उक्तं शिवे (स्वर्ग० २७)॥ **द्वे महतः क्रोधस्य ॥** **उग्रम्**

'अमी' अद्भुताद्या उग्रान्ताः 'चतुर्दश' रसे[668] पुंलिङ्गाः। तद्वति त्रिलिङ्गाः। ततः स्त्रियां 'रौद्री'। एवं 'भैरवी'त्यपि ॥

664 त्रासकृतं—B. 665 This could not be traced. * घुर भीमार्थशब्दयोः—सर्वा°

666 तत्त्व° reads "हन्तेरच् घुर च।" "हन्तेरन् घ च"—दशपादी (८।१०४), but this gives घर

667 NŚ (KSS) reads : शृङ्गारो विष्णुदैवत्यो हास्यः प्रमथदैवतः।
रौद्रो रुद्राधिदैवत्यः करुणो यमदैवतः ॥

668 रसे—omitted in B.

दरः **दरेति**। दीर्यतेऽस्माद्[669] 'दरः'। दॄ भये। अप् (पा० ३।३।५७)॥

त्रासः घञि (पा० ३।३।१८) 'त्रासः'॥

भीतिः 'भीतिः' क्तिन्नन्ता (पा० ३।३।९४)॥

भीः [भीति-] साहचर्यात् 'भीः'। स्त्री। संपदादिः (वा० ३।३।१०८)॥

साध्वसम् साधूनस्यति* 'साध्वसम्'। अच् (पा० ३।१।१३४)॥

"अज्विधौ भयादीनामुपसंख्यानं नपुंसके क्तादि-
भयम् निवृत्त्यर्थम्" (वा० ३।३।५६) इत्यच्। 'भयम्'॥

(भिया) भिदाद्यङि (पा० ३।३।१०४) इयङि 'भिया' अपि। "स्यादर्तनमृतीया च गर्हा चाथ भयं भिया। त्रासोत्त्रासौ दरो भीतिरातङ्को(क) भीश्च साध्वसम्" इति शब्दार्णवात्॥ **षड् भयस्य ॥१९६॥**

मनो-'विकारो' रत्यादि'र्भावः'। भावयति करोति वा
भावः रसान् 'भावः'। तथाच **भरतः**——

"नानाभिनयसंबन्धाद्(ख) भावयन्ति रसानिमान्।
यस्मात् तस्मादमी भावा विज्ञेया नाटचयोक्तृभिः[670]॥"
(NŚ. VI. 34)

भावाश्च द्विविधाः——स्थायिनो व्यभिचारिणश्च।[671]

तत्र स्थायिनः——

"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।
जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः"॥
(NŚ. VI. 17)

व्यभिचारिणस्तु——

"निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः।
आलस्यं चैव दैन्यञ्च चिन्ता मोहो धृतिः स्मृतिः॥[672]

669 दीर्यत्यस्माद्—A., B.

* "साधूनस्यति। अच्–इति मुकुटः। तन्न। अणः प्रसङ्गात्। तस्मात् साधूनामसनम्"–भानु°

(क) भीतमातङ्को–भानु°

(ख) सम्बद्धान्–NŚ (GOS).

670 नटयुक्तिभिः—B

671 भावाश्च द्विधा श्चैव स्थायिनो व्यभिचारिणः—A.

672 स्मृतिर्धृतिः (NŚ. KSS. VI. 18).

व्रीडा चपलता हर्ष आवेगो जडता तथा।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च॥
सुप्तं विरोधोऽमर्षश्चाप्यवहित्थमथोग्रता।[673]
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः।
त्रयस्त्रिशदमी भावाः प्रयान्ति रससंस्थितिम्[674]॥"

इति॥ (NŚ. VI. 18-21) **एकं मनोविकारस्य॥**

भावस्य सूचको गुणक्रियादिः 'अनुभावः'। भावान् अनुभावः (भावबोधकः)
अनुभावयतीत्यनुभावो मुखरागादिः। तदुक्तम्——"अनुभाव-स्त्वभिनयः पश्चादर्थप्रकाशनात्"(क) इति॥ **द्वे भावप्रतिपादकस्य रोमाञ्चादेः॥**

व्यभिचार्यादीनाह——**गर्व इति**। गिरतेः 'गर्वः'। "कॄगॄ- गर्वः
शॄदॄभ्यो वः" (उ० १।१५५)। गर्व माने। घञि (पा० ३।३।१८) वा। 'गर्वः'॥

अभि सर्वतो मानः 'अभिमानः'॥ अभिमानः

अहंप्रधानं कारः 'अहङ्कारः' प्रणतियोग्येऽप्यनम्रता।[675] अहंकारः
त्रीणि गर्वस्य॥

मत्समानो नास्तीति मननं 'मानः'॥ मानः

चित्तस्य सम्यग् उन्नतिः ['चित्तसमुन्नतिः']॥ **द्वे प्रणति-** चित्तसमुन्नतिः
योग्यमपि प्रति चित्तोत्कर्षप्रत्ययस्य* ॥१९७॥

आदर इत्यप् (पा० ३।३।५७)। नञ्। 'अनादरः'॥ अनादरः

673 सुप्तं विरोधो. . . .मतिर्व्याधिरथोन्मादः. . . .। (Ibid VI. 20), but the GOS. reads exactly the same as above. B reads—स्वप्न विरोधोऽमर्षश्चाद्य-वहित्थामथोग्रतौ। सुप्ति for सुप्तं—GOS variant.

674 त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः।—Ibid. VI. 21.

(क) अनुभावस्त्वभिनयप्रपञ्चार्थप्रकाशकः—रघुनाथ।

675 This last sentence is omitted in A. अहम् इति करणम्—भानुजि°।

"अवेहि बलवानस्मि शीलवान् बुद्धिसंयुतः।
अहमेवेति करणम् अहंशब्दो निपातितः॥" —रघुनाथ।

* "गर्वादयः पञ्चापि पर्याया इति तु युक्तम्"—भानु°

परिभवः, परिभावः

"परौ भुव" (पा० ३।३।५५) इत्यप्घञ्ोः 'परिभव-परिभावौ' ।।

तिरस्क्रिया

तिरोऽन्तर्धौ । परिभवेऽपि उपचारात् ।[676] अतोऽत्र "तिरोऽन्तर्धा" (पा० १।४।७१) विति गतित्वाभावात् "तिर-सोऽन्यतरस्याम्" (पा० ८।३।४२) इति पक्षे सत्वं नास्तीत्येके। अन्ये त्वाहुः–-"यो येनाभिभूतः स तस्मात् कायवाङ्मनसामन्य-तमेन व्यवधीयत एव इति अत्रापि अन्तर्धिर्दृश्यत–-इति सत्वं वा स्यादेवेति।" भागवृत्तिकृत् तु अत्र "गति" रिति (पा० १।४।६०) नानुवर्तत एव इति। विकत्थनादिः(?)।।

रीढा

रेहणं 'रीढा'। रिहेः क्ते ढत्वष्टुत्वढलोपदीर्घत्वानि (पा० ८।२।३१, ८।४।४१, ८।३।१३, ६।३।१११) इति ।[677] स्त्रीत्वं लोकाश्रयत्वात् ।।

अवमानना, अवज्ञा

'अवमाननावज्ञे' सुगमे ।।

अवहेलम् (हेला, अवहेला)

अवहेलनम् 'अवहेलम्'। हेडृ अनादरे ।[678] घञर्थे कः (वा० ३।३।५८)। डलयोरेकत्रस्मरणम्। हेलावहेले च ।।

असूक्षणम् (असुक्षणम्) (संसुर्क्षणम्)

न सुष्ठु उक्षणम् 'असूक्षणम्' इति लक्षणया अवज्ञा गम्यते। यद्वा धातूनामनेकार्थत्वेन असूनामुक्षणं तापो यत्र तद् 'असूक्षणम्'। दन्त्यसदीर्घमध्यम्। "न विद्यते शोभनः क्षणो यस्मात् तद् 'असुक्षणम्' ।[679] ह्रस्वमध्यमपी"ति पञ्जिका। "सुर्क्ष अनादरे ।[680] ह्रस्वोकारात् परोऽत्र रेफः। सो दन्त्यः। ततः सम्पूर्वाल्ल्युट्। "संसुर्क्षणमनादरे" इति कोषान्तरेऽपी" ति[681] धातुप्रदीपः। "एवं च अकारादित्वम् इह प्रमाद*" इत्याहुः। तन्न। "रीढावज्ञयोषित्यसूक्षणं शणृके(?) तिरस्कार" इति रत्नकोषादावपि प्रयोगदर्शनात्। हड्डचन्द्रस्वरसस्तु

676 Cf. "तिरस्कृत इति परिभूतेऽप्यन्तर्ध्युपचारात्" (वामन, ५।२।११)

677 ढत्वं ष्टुत्वं. . .A.

678 अनर्थके—B.

679 दन्तसदीर्घमध्यम्. . .तद् असुक्षणम्—omitted in B.

680 सूर्क्ष अनादरे रेफवान्—सूभूति। सूर्क्ष आदरे भट्टोजि°

681 त्रिकाण्डं च—A ; त्रिकाण्डी च—B.

* प्रामादिकम्—शिवदत्तः।

अकारादिक एव इति। "एवं चेह पूपापूपवत् नञः प्रकृत्यर्थम्" इति तु कौमुदी ।। **नव परिभवस्य ।।१९८।।**

मन्दाक्षम्

मन्देति। मन्दमक्षमत्र 'मन्दाक्षम्' ।।

ह्रीः

ह्री लज्जायाम्। संपदादित्वात् (वा० ३।३।१०८) क्विप्। 'ह्रीः' ।।

त्रपा

त्रपुष् लज्जायाम्। षित्वादङ (पा० ३।३।१०४)। 'त्रपा' ।।

व्रीडा (व्रीडः)

एवं "गुरोश्च" (पा० ३।३।१०३) इत्यकारे 'व्रीडा'। "व्रीडजाड्यमभजन्मधुपा सा" (Śiśu, 10/18) इति माघः। "गण्डूषगर्जभुजजागरहारकीलज्वालाजटा(क)-रभसवर्तकगर्ध-शृङ्गाः। व्रीडादयश्च वरटश्च वराटकश्च उत्कण्ठवाणकरकाश्च समामयाश्चे"ति स्त्रीपुंलिङ्गकथने[682]रभसात्। "व्रीडोऽक्लीवे त्रपा लज्जा"–-इति ह्रीपर्याये च तेनैवोक्तत्वात् 'व्रीड'श्च ।।

लज्जा

ओलजी ओलस्जी व्रीडे। 'लज्जा'। व्रीडावत् ।। **पञ्च लज्जायाः ।।**

अपत्रपा

सा लज्जा अन्यतः परस्माद् यदि स्यात्, तदा 'अपत्रपा'। "ह्रीर्लज्जापत्रपा व्रीडा" इति रत्नकोषात् ह्रीमात्रे अपत्रपा उक्ता ।। **एकं पित्रादेः पुरतो जातलज्जायाः ।।**[683]

क्षान्तिः

क्षमुषः षित्त्वेऽपि बाहुलकात् क्तिन् (पा० ३।३।९४)। 'क्षान्तिः'।(ख)

तितिक्षा

तिजे"र्गुप्तिज्किद्भ्यो निन्दाक्षमाव्याधिप्रतीकारेष्वि" (पा० ३।१।५, वा०)" ति सन्। 'तितिक्षा' ।। **द्वे क्षमायाः ।।**

अभिध्या

अभिचारेणाभिध्यानम् 'अभिध्या'। कर्मण्यङि (पा० ३।३।१०६)। "अभिध्या वा परस्वे विषयेण चौर्यादिना स्पृहा"[684] इत्येके। दोषचिन्तापूर्वं परस्वलिप्सा इत्यर्थः। "विषय-

(क) झटा—A.

682 पुं omitted in B.

683 हेतुलज्जायाः—B.

(ख) क्षमू सहने. . ."अषितः क्षाम्यतेः क्षान्तिः षितस्तु क्षमतेः क्षमा" इति—भानु°।

684 omitted in B. लिप्सा–भानु° who ascribes it to मुकुट।

प्रार्थनाभिध्या" इति तु स्वामी। परस्वविषये विषयितया[685] स्पृहा विषयिस्पृहाभिध्योच्यते(?)। "विषयस्पृहे"ति पाठे विषयेण चौर्यादिना स्पृहा इत्यर्थः। "जिघृक्षामात्रेऽप्यभिध्येति कश्चिद्" इति तु कौमुदी ॥ **एकं (परद्रव्येच्छायाः) ॥१९९॥**

अक्षान्तिः — **अक्षेति**। पराभ्युदयासहिष्णुता 'अक्षान्तिः' ॥

ईर्ष्या — ईर्ष्यधातोः 'ईर्ष्या'। (पा० ३।३।१०२)। यान्ता दीर्घादिः ॥ **द्वे (पराभ्युदयासहिष्णुतायाः) ॥**

असूया — वैरेण अर्थदानादिषु गुणेष्वपि "दम्भकृत्त्वाद्" इति-रूपदोषारोपणम्'असूया'। "असूया त्वभ्यसूया चे" ति शब्दार्णवः। असूय कण्ड्वादिः। **एकं (गुणेषु दोषाविष्करणस्य) ॥**

वैरम् (विरोधः) (विद्वेषः) — वीरस्य कर्म 'वैरम्'। "वैरमैथुनिकयो" (पा० ४।३।१२५) रिति निर्देशादण्। इत्थमीर्ष्यासूयाद्वेषाणां भेदात् "द्वेषो ना स्यादसूयेर्ष्ये"ति मालाकारो भ्रान्तः ॥ **त्रीणि वैरस्य ॥**

मन्युः — मन्यते"र्मनिजनिदसिभ्यो युच्" (उ० ३।२०)[686]। 'मन्युः' दैन्यार्थः ॥

शोकः — घञि 'शोकः' ॥

शुक् — शुच शोके। संपदादित्वात् (वा० ३।३।१०८) क्विप्। 'शुक्'। चान्ता ॥ **त्रीणि शोकस्य ॥२००॥**

पश्चात्तापः — **पेति**। घञ् (पा० ३।३।१८)। 'पश्चात्तापः' ॥

अनुतापः — एवम् 'अनुतापः' ॥

विप्रतीसारः (विप्रतिसारः) — "उपसर्गस्य घञी" (पा० ६।३।१२२) ति वा दीर्घः। 'विप्रतीसारः'। पक्षे ह्रस्वोऽपि। "प्रापि चेतसि सविप्रतिसारे" (Śiśu, 10/20) इति माघः ॥ **त्रीणि किञ्चित् कृत्वा पश्चात्तापस्य ॥**[687]

कोपः — कोपनं 'कोपः'। भावे घञ् (पा० ३।३।१८) ॥

685 विषयिता—B.

686 यजिमनिशुन्धिदसिजनिभ्यो युच्—भट्टोजि, उज्ज्वल, दशपादी; सर्वा° reads जनिमनिदसिभुजेः क्युः; भानुजि reads—मनिजनिदसिभ्यो युः।

687 खेदस्य—B.

एवं 'क्रोधः'। "क्रोधनोऽमर्षणः कोपी"ति विशेष्यनिघ्ने वक्ष्यमाणत्वात् ॥ — क्रोधः

मृष तितिक्षायाम्। घञि (पा० ३।३।१८) 'अमर्षः'। ह्रस्वादिः। 'रोषः'। "किमप्यमर्षोऽनुनये भृशायते" इति भारविः (८।५४)। "वधूरमर्षाद्" इति माघः (८।३७)। "अन्येषामपी"ति (पा० ६।३।१३७) दीर्घत्वे दीर्घादिरपीति —हड्डचन्द्रः। "निरुद्योगं निरामर्षं निर्वीर्यमरिनन्दनम्" इति विशाखः।[688] — अमर्षः, रोषः, (आमर्षः)

प्रतिहन्यतेऽनेन 'प्रतिघः'। "परौ घ" (पा० ३।३।८४) इति बाहुल्यादप् घत्वञ्च। "प्रतिहन्तीत्यन्यत्रापीति (पा० ३।२।१०१)ति डे 'प्रतिघो' न्यङ्क्वादि (पा० ७।३।५३)"रिति कौमुदी। — प्रतिघः

रुषक्रुधोः क्विपि (वा० ३।२।१०८) टापि "क्रोधो भामः क्रुधा रूषा" इति शब्दार्णवः ॥ **सप्त कोपस्य**[689] **॥२०१॥** — रुट्, क्रुध् (रुषा), (क्रुधा)

शुचाविति। शुचौ शुद्धे इत्यर्थः। "भाषितपुंस्कं पुंवद्" (पा० ७।१।७४) इति पुंस्त्वान्न नुम्। चरित्रमात्रेऽपि 'शीलम्'। "शीलं स्वभावे सद्वृत्त" इति दर्शनात्[690]। शीङो धुक्लक्वलञ्वालनः (उ० ४।३८)। शीलमर्धर्चादिः। (पा० २।४।३१)। शील समाधाने। "इगुपधेति" के (पा० ३।१।१३५) वा। शील उपधारणे। ण्यन्तादेरचि (पा० ३।१।१३४) वा। केवलमपि चरितम्। सुशीले "निष्ठा च शीलं चारित्रं चरित्रं चरितं तथा" इति रत्नकोषात्।[691] — शीलम्

["चरेर्णिच्चे" (उ० ४।१७१) ति इत्रचि[692] 'चारित्रम्'*]॥ **एकम् (शुद्धचरित्रस्य) ॥** — (चारित्रम्)

688 सर्वा° reads विशाखदत्त; भारतम्—रघुनाथ।

689 क्रोधस्य—B. 690 विश्वः—भानु°

691 Here A adds—"अर्तिलूधू" (पा० ३।२।१८४) इति इत्रच् (इत्र ?)।

692 उणादि texts read चरेर्वृत्ते and the suffix is णित्रन् according to तत्त्वबोधिनी।

* The portion within [ ] seems to be not relevant.

उन्मादः घञि (पा० १।३।१८) 'उन्मादः'॥

चित्तविभ्रमः 'चित्तविभ्रमः' चित्तानवस्थितिर्भूताद्यावेशात्॥ **द्वे उन्मादस्य ॥**

प्रेमा (प्रियता) प्रियस्य भावः 'प्रेमा'। नान्तः। इमनिचि (पा० ५।१।१२२) "प्रियस्थिरे" (पा० ६।४।१५७) ति प्रादेशः। 'ना' पुमान्॥

हार्दम् 'हार्दम्' हृदयस्य कर्म। युवादित्वादण् (पा० ५।१।१३०)। "हृदयस्य हृल्लेखे" (पा० ६।३।५०)" त्यादिना हृदादेशः।

प्रेम **प्रेति**। 'प्रेम'। प्रीञो मनिन् (पा० ३।२।७५)। "प्रीतिः प्रेम" इति भट्टः। "प्रेम पश्यति भयान्यपदेऽपि" इति भारविः (६।७०)॥[693]

स्नेहः स्निहेर्घञ्। (पा० ३।३।१८) 'स्नेहः'॥ **पञ्च स्नेहस्य॥**

दोहदम् **अर्थेति**। दोहं पूरणं ददाति 'दोहदम्'। इदं त्विच्छामात्रे विशेषेण तु गर्भिण्या अहेतुजेच्छायां[694] प्रयुज्यते ॥२०२॥

इच्छा इषे"रिच्छे" (पा० ३।३।१०१)" त्यनेन निपातनाद् 'इच्छा' आकाङ्क्षा। "गुरोश्च" (पा० ३।३।१०३) इत्यकारः॥

आकाङ्क्षा आकाङ्क्षापि भिदादेराकृतिगणत्वात् (पा० ३।३।१०४।।)

स्पृहा, ईहा 'स्पृहा', 'ईहा'। आकाङ्क्षेतिवद्दीर्घान्ता॥

तृट् (तृषा) तर्षणं 'तृट्'। ञि तृषा पिपासायाम्। क्विप् (पा० ३।२।१७८)। 'तृट्'। षान्ता। टाबपीत्येके। तेन 'तृषा'पि। "तृषापि न कृशा मम" इति प्रयोगः॥

वाञ्छा 'वाञ्छा'। आकाङ्क्षेतिवत्॥

लिप्सा 'लिप्सा'। "अ प्रत्ययाद्" (पा० ३।३।१०२) इत्यकारः॥

मनोरथः मन एव रथो दूरगाम्यत्र 'मनोरथः'॥

कामः, अभिलाषः, तर्षः 'कामोऽभिलाषस्तर्षः' इति घञन्ताः (पा० ३।३।१८)॥ **द्वादश इच्छायाः॥**

693 Omitted in A., B.

694 गर्भिण्याजन्मृतजेच्छायां—B.

लालसा (लालसः) स तर्षो महान् 'लालसा'। लल ईप्सायामौणादिकोऽसन्।[695] सदन्त्या। 'लालसश्च'। स्त्रीलिङ्गनिर्देश आबन्ततासूचनार्थः॥ **एकं (महतस्तर्षस्य)** ॥२०३॥

उपाधिः **उपाधिरिति**। समीप आधेः, उपपन्न आधिर्वेति 'उपाधिः'॥

धर्मचिन्ता धर्मस्य चिन्ता 'धर्मचिन्ता'॥ **द्वे धर्मचिन्तायाः॥**

आधिः मानसी व्यथा 'आधिः'। आधीयते[696] चिन्ता अनेन। 'आधिः'। किः (पा० ३।३।९२)॥ **एकं मनःपीडायाः॥**

चिन्ता (चिन्तया?) 'चिन्ता'। "चिन्तिपूजी" (पा० ३।३।१०५) त्यादिना अङ। अप्प्रत्यये कार्ये "चिन्तिपूजी" त्यङविधानं गुणाभावार्थम्। तत्सामर्थ्यात् णिलोपाभावोऽपीति "चिन्तया" इत्यपि॥[697]

स्मृतिः 'स्मृतिः'। क्तिन्नन्ता (पा० ३।३।९४)।

आध्यानम् ध्यै चिन्तायाम्। ल्युट् (पा० ३।३।११५)। 'आध्यानम्'। **त्रीणि स्मरणस्य॥**

उत्कण्ठा कठि शोके। उत्पूर्वात् "गुरोश्च" (पा० ३।३।१०३) इत्यकारः। 'उत्कण्ठा'॥

उत्कलिका कलेः "कृञादिभ्यो वुन्" (उ० ५।३५)[698]। 'उत्कलिका'। स्त्रीत्वेनापि साम्यम्॥[699] उत्कण्ठादिद्वयं तु कामादिजस्मृतेः। "चिन्ता तु स्मृतिराध्यानं स्मरणं सस्पृहे पुनः। उत्कण्ठोत्कलिके तस्मिन्नभिध्या तूभयोरपी"ति शब्दार्णवः। "आध्यानमप्युत्कलिकायामि"त्येके[700]। तथाच काशिकायाम् "आध्यानमुत्कण्ठापूर्वकं[701] स्मरणम्" (Kāś. 1.3.46.) इति॥ **(द्वे उत्कण्ठापूर्वकस्मरणस्य)** ॥२०४॥

695 उ० ३।११७ has 'असच्' and in उ० ३।११९ असच् becomes णित्। So मुकुट seems to treat it as a case of बाहुलक and भानुजि supports it while सर्वा° derives it vaguely with अच् added to the form in यङ्लुक् of the root लस कान्तौ। भानुजि supports this derivation also.

696 आधीयन्ते—B.

697 B. omits it; A reads 'चिन्तिया' which is supported by वेदान्ति महादेव and रामकृष्ण दीक्षित। "स्याच्चिन्ता चिन्तिया" त्रिकाण्डशेषः।

698 "कृञादिभ्यः संज्ञायां वुन्" reads तत्त्व°। 699 Omitted in A.

700 उत्कण्ठायाम्—B. 701 पूर्वकं is omitted in the printed texts of काशिका।

उत्साहोऽध्यवसायः स्यात् स वीर्यमतिशक्तिभाक् ।
कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे ॥२०५॥
कुसृतिर्निकृतिः शाठ्यं प्रमादोऽनवधानता ।
कौतूहलं कौतुकञ्च कुतुकञ्च कुतूहलम् ॥२०६॥
स्त्रीणां विलासविव्वोकविभ्रमा ललितं तथा ।
हेला लीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः ॥२०७॥
द्रवकेलिपरीहासाः क्रीड़ा लीला[702] च नर्म च ।
व्याजोऽपदेशो लक्ष्यञ्च क्रीड़ा खेला च कूर्दनम्(क) ॥२०८॥
घर्मो निदाघः स्वेदः स्यात् प्रलयो नष्टचेष्टता ।
अवहित्थाकारगुप्तिः समौ संवेगसंभ्रमौ ॥२०९॥
स्यादाच्छुरितकं हासः सोत्प्रासः स मनाक् स्मितम् ।
मध्यमः स्याद् विहसितं रोमाञ्चो रोमहर्षणम्* ॥२१०॥
क्रन्दितं रुदितं क्रुष्टं जृम्भस्तु त्रिषु जृम्भणम् ।
विप्रलम्भो विसंवादो रिङ्गणस्खलने[703] समे ॥२११॥
स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि ।
तन्द्रिः[704] प्रमीला भ्रकुटिर्भ्रुकुटिर्भ्रूकुटिः स्त्रियः(ख) ॥२१२॥
अदृष्टिः स्यादसौम्येऽक्षिण संसिद्धि-प्रकृती त्विमे ।
स्वरूपञ्च स्वभावश्च निसर्गश्चाऽथ वेपथुः ॥२१३॥
कम्पोऽथ क्षण उद्धर्षो मह उद्धव उत्सवः ॥२१४क॥

॥०॥ इति नाट्यवर्गः ॥०॥

॥१॥ इति स्वर्गवर्गः ॥१॥

उत्साहः, अध्यवसायः उत्साह इति । 'उत्साहाध्यवसायौ' घञन्तौ (पा० ३।३।१८) । **द्वे उत्साहस्य ॥**

वीर्यम् 'स' उत्साहः 'प्रकृष्टशक्तिभाक्' 'वीर्यम्' वीरे साधु।

702 खेला—भानु°
* लोमहर्षणम्—रघुनाथ ।
704 तन्द्री—क्षीर°, भानु°, रघुनाथ ।
(क) कूर्दने—सर्वा°
703 रिङ्गनं स्खलनं—सर्वा°, क्षीर° भानु°
(ख) स्त्रियाम्—भानु° ।

"तत्र साधुः" (पा० ४।४।९८) इति यत् । "अतिशयशक्ति **(वीर्या)**
वीर्या" इति **त्वमरमालायां** स्त्रीत्वम्(a) ॥ **एकमतिशयिताध्यवसायस्य ॥**

के मूर्ध्नि पट इव आच्छादकः 'कपटः' । कं ब्रह्माणमपि **कपटः**
पटति गच्छति(b) व्याप्नोति [इति वा ।] ॥

विशेषेणाजन्ति क्षिपन्त्यनेन । अज गतिक्षेपणयोः ।
"हलश्चे" (पा० ३।३।१२१)ति घञि 'व्याजः' ॥ **व्याजः**

एवं दभ्यतेऽनेन 'दम्भः' । दन्भु दम्भे । घञ् (पा० **दम्भः**
३।३।१८) ॥

उपधीयते आरोप्यते स्फटिके जवाराग इवानेन । "उप-
सर्गे घोः किः" (पा० ३।३।९२) । 'उपधिः ॥' **उपधिः**

छाद्यतेऽनेन मनिनि रूपं 'छद्म' । नान्तम् । छादेर्मनिन् **छद्म**
(पा० ३।२।७५) । "इस्मन्त्रन्क्विषु च" (पा० ६।४।९७)
इति ह्रस्वः ॥

कितवस्य कर्म 'कैतवम्' । युवादित्वादण् (पा० **कैतवम्**
५।१।१३०) ॥२०५॥

कुत्सिता सृतिर्गतिः[705] । 'कुसृतिः' ॥ **कुसृतिः**

निकृष्टा कृति 'निकृतिः' । हिंसार्था । "पराभीष्टे **निकृतिः**
निकृन्तती" ति कृतेर्निपूर्वात् "इक् कृष्यादिभ्य" (वा०
३।३।१०८) इतीक् ॥

शठ कैतवे । अच् (पा० ३।१।१३४) । तस्य कर्म **शाठ्यम्**
(पा० ५।१।१२४) 'शाठ्यम्' ॥ **नव छद्मनः** । "कुसृत्यादि-
त्रिकं तु चित्तकौटिल्यस्य" इत्यन्ये ।" "कपटादिषट्कं वञ्चना-
फलम् । कुसृत्यादित्रिकं तु हिंसार्थम् इति भेद" इति तु **सर्वानन्दः*
पञ्जिकाकारश्च ॥**

प्रेति । 'प्रमादः' । भावे घञ् (पा० ३।३।१८) ॥ **प्रमादः**

(a) "वीर्यं वीर्यातिशक्तिता इति रत्नकोषः"—रघुनाथ
(b) मोहयति—सर्वा°
705 गतिर्हिंसार्था—A, B.
* Not found in the printed text.

अनवधानता

'अनवधानते' ति बहुव्रीहेस्तल् (पा० ५।१।११९)। अतोऽनवधानं च वाचकम् ।। **द्वे अविमृष्टकृत्यस्य ।।**

कौतूहलम् (कुतूहलम्)

काविति। कुत्सितं तूलयति। अच् (पा० ३।१।१३४)। पृषोदरादित्वाद् (पा० ६।३।१०९) वर्णागमो हकारः। 'कुतूहलम्'।। प्रज्ञाद्यणि' (पा० ५।४।३८) 'कौतूहलम्'।।

कौतुकम् (कुतुकम्)

तुज हिंसायाम्। कुं तुजति। "मूलविभुजेति" (वा० ३।२।५) कः। न्यङ्क्वादित्वात् (पा० ७।३।५३) कुत्वम्। 'कुतुकम्'।। प्रज्ञाद्यणि (पा० ५।४।३८) 'कौतुकम्'। **"चत्वार्यपूर्ववस्तुदिदृक्षाद्यतिशयस्य"** इति **सूभूतिः।** **"फलनिरपेक्षचिकीर्षितस्य"** इति केचित् ।।२०६।।

हावः

स्त्रीणामिति। 'शृङ्गारभावो' रतिः। तज्जाः स्त्रीणां चिन्ता विलासादिका 'हाव'शब्देनोच्यन्ते। हूयन्ते रागिणोऽत्र। हु हवने[706]। बाहुलकादधिकरणे घञ् (पा० ३।३।१८)। यदाह भरत :—

"अलङ्काराश्च नाट्यज्ञैर्ज्ञेया भावरसाश्रयाः।[707]
यौवनेष्वधिका[708] स्त्रीणां विकारा वक्त्रगात्रजा ।।
(NŚ. KSS. 24.4.; GOS., 22.4)
देहात्मकं भवेत् सत्त्वं सत्त्वाद् भावः समुत्थित ।
भावात् समुत्थितो हावो हावाद्धेला समुत्थिता ।"
(Ibid, 24.7.) (GOS. 22.6)

तथाच—"हावः शृङ्गारभावाप्तौ रम्योक्तिस्मितवीक्षितम्। शृङ्गारप्रौढिमा हेला"—इति ।[709]

विलासः

विपूर्वाल्लसेर्घञ् (पा० ३।३।१८)। 'विलासः'। तत्र प्रियसमीपगमने यः स्थानासनगमनविलोकितेषु विकारोऽकस्माच्च क्रोधस्मितचमत्कारमुखविक्लवनं स विलासः ।।

706 हु आह्वाने—B.
707 अलंकारास्तु. . .नाट्यरसाश्रयाः—KSS.
708 यौवनेऽभ्यधिका—भानु°, NŚ(GOS); यौवने ह्यधिका—KSS.
709 हेवाको यौवने हि यः—क्षीर° gives us the rest.

विव्वोकः

वा गतौ। विवानं विवुः गतिविशेषः। "अपष्ट्वादय" इति[710] कुः। उच्यते समवैत्यत्र "हलश्चे" ति (पा० ३।३।१२१) घञ्। 'विव्वोकः'। विवोः ओकः स्थानं 'विव्वोकः' अभिमतवस्तुप्राप्तावपि गर्वादनादरः। सापराधस्य च[711] स्रक्चन्दनादिना सञ्जसनं[712] ताडनं च 'विव्वोकः' ।।

विभ्रमः

विभ्रान्ति'र्विभ्रमः'। घञ् (पा० ३।३।१८)। मदरागहर्षजनितो विपर्यासो विभ्रमः। यथा—अनिमित्तमासनादुत्थाय अन्यत्र गमनम्। प्रियारब्धकथामाक्षिप्य सख्या सहालापनम्। मुधैव हसितक्रोधौ। पुष्पादीनां याञ्चा, सहसैव तत्परित्यागः। वस्त्राभरणमाल्यानामकारणतः खण्डनं माननं* चेति। "योषितां यौवनजो विकारो विभ्रम" इत्येके ।।

ललितम्

लल ईप्सायां, लड विलासे वा। भावे क्तः (पा० ३।३।११४)। डलयोरेकत्वम्। 'ललितम्'। सुकुमारविधानेन भ्रुनेत्रादिक्रियासचिवकरचरणाङ्गन्यासो ललितम्। तथाच—विकारो विभ्रम[713]श्चरणनिपातझणज्झणन्नूपुरमसृणं संचरणं[714], रेखाविशेषस्थितत्रिवलिभङ्गसंस्थानसमुल्लसितभुजमुरःस्थलप्रसारणाद् द्विगुणपृथक्कृतस्तनस्तवकं स्कन्धासक्तैककुण्डलमुल्लसितभ्रु साचीकृतं विलोकितमिति[715]। "प्रियं प्रति भावाविष्कृतं ललितम्" इत्यन्ये ।।

हेला

हिल हावकरणे। अच् (पा० ३।१।१३४), टाप्। 'हेला'। सुरते प्रौढेच्छा हेला ।।

लीला

लयो 'लीला'। लीङ् श्लेषणे। पृषोदरादिः (पा० ६।३।१०९)। अलब्धप्रियसमागमया स्वचित्तविनोदार्थं प्रियस्य या वेशगतिदृष्टि-[716]हसितभाषितैरनुकृतिः क्रियते सा लीला ।।

710 This is undoubtedly a scribal error for मृगय्वादयश्च (उ० १।३८)। सर्वा° reads विब्बोकः with 'ब' instead of 'व'।
711 Omitted in B.
712 सिञ्जननं—B, संयमनं—C.
713 Omitted in B.
* मननं—शिवदत्त
714 संचरणे—C.
715 . . .पृथुकृतं स्तनस्तवकं. . .विलोलितम्।—शिवदत्त
716 C reads वेष and omits दृष्टि।

'अमी' इति शब्दः प्रकारे। तेन एवंप्रकाराः विच्छित्त्यादयोगृह्यन्ते। ताश्च उक्ता नाटकरत्नकोषे--

"लीला विलासो विच्छित्तिर्विभ्रमः किलकिञ्चितम्।
मोट्टायितं कुट्टमितं विब्वोको[717]ललितं तथा॥
विकृतं[718] चेति विज्ञेयाः स्त्रीणां* चेष्टाः स्वभावजाः।"
(Nlrk. ll 2600ff)

आभरणविलेपनादीनां कुतश्चित् प्रियापराधादीर्ष्यया
(विच्छित्तिः) अनादरेण त्यक्तानां सखीनां प्रयत्नाद् धारणं विच्छित्तिः। "प्रियेण दत्तं प्रीतिनिबन्धनं स्वल्पमपि भूषणं विच्छित्ति"रित्यन्ये। विच्छित्तिश्च विशिष्टा छित्तिः। भङ्गीरित्यर्थः।

(किलकिञ्चितम्) किलेति व्याजेन किं नाम नासञ्जितमत्र इति 'किलकिञ्चितम्'। पृषोदरादिः (पा० ६।३।१०९)। इष्टजनदर्शने हर्षवशात्[719] शुष्करुदितहसितत्रसितक्रोधश्रमाभिलापानां संकरकरणं किलकिञ्चितम्॥

मोट्टनं मोट्टः। घञ् (पा० ३।३।१८)। लोहितादिक्यषन्ताद् (पा० ३।१।१३) भावे क्तः (पा० ३।३।११४)।
(मोट्टायितम्) 'मोट्टायितम्'। प्रियकथासु साङ्गभङ्गजृम्भणं कर्णकण्डूयनञ्च मोट्टायितम्॥

कुट्टनं कुट्टः। घञ् (पा० ३।३।१८)। तेन निर्वृत्तम्। भावप्रत्ययान्तादिमप् (वा० ४।४।२०)। कुट्टिमम्। ततो ण्यन्ताद् (पा० ३।१।२६) भावे क्तः (पा० ३।३।११४)।
(कुट्टमितम्) 'कुट्टमितम्'। पृषोदरादिः (पा० ६।३।१०९)। सुरते सुगाढपरिपीडने केशस्तनादिग्रहणे च हर्षात् सुखेऽपि दुःखाविष्क्रिया दुःखेऽपि सुखाविष्क्रिया 'कुट्टमितम्'॥

शेषो **भरतशास्त्राद्** बोध्यः(क)। इह तु ग्रन्थगौरवभयान्न लिखितः[720] ॥२०७॥

717 विब्वोकं—A, B.
718 NŚ(KSS) reads विहृतं, सर्वा° reads विकृतं। Nlrk. shows विकृतं; C takes विहृतं।
719 इष्टजनदर्शनवशात्—B.
* "विहृतं चेति मन्तव्या दश स्त्रीणां स्वभावजाः"—भानु°
(क) Vide NŚ. GOS., 22. 12ff.
720 C adds—अवसरागतं वचनं व्याजादिना हृतं 'विहृतम्'।

द्रवेति। द्रवति हृदयमनेन 'द्रवः'। अप् (पा० ३।३।५७)॥ **द्रवः**

किलन्त्यनेन 'केलिः'। किल क्रीडायां, केलृ चलने वा। **केलिः** "सर्वधातुभ्य इन्" (उ० ४।११७) इति इन्। "केली"ति **(केली)** स्त्रियामपि। "केलीषु तद् गानगुणान्निशम्य"(क) इति **नैषधात्** (३।२७)॥

परिहसन्त्यनेन। "हलश्चे"ति (पा० ३।३।१२१) **परीहासः** घञ्। "उपसर्गस्ये" (पा० ६।३।१२२)ति वा दीर्घः। **(परिहासः)** 'परीहासः'॥

क्रीडनं 'क्रीडा' इति "गुरोश्च" (पा० ३।३।१०३) **क्रीडा** इत्यकारे टापि॥

'लीला' प्रागुक्ता (नाट्य° २०७)॥[721] **लीला**

नॄ नये। "सर्वधातुभ्यो मनिन्" (उ० ४।१४४)। 'नर्म'॥ **नर्म**

षट् परिहासस्य॥ "क्रीडामात्रस्ये" त्यन्ये॥

व्येति। 'व्याज' उक्तः (नाट्य° २०५)। व्याजोऽत्र **व्याजः** स्वरूपाच्छादनम्। यथा--"ध्यानव्याजमुपेत्य चिन्तयसि काम्" इति॥

अपदिश्यते 'अपदेशः'॥ अतद्रूपस्य ताद्रूप्यं क्रीडाद्यर्थ- **अपदेशः** वञ्चनयेत्यतः पूर्वोक्तो व्याजः परद्रोहफलः। तथाच पञ्जिका—

"कपटार्थो व्याजः परद्रोहफलः। अपदेशार्थस्तु अन्यदुद्दिश्यान्यार्थमनुष्ठानम्। यथा जलक्रीडामपदिश्यान्यार्थं यातीति तदिव"॥

लक्ष्यते 'लक्ष्यम्'। ण्यदन्तं (पा० ३।१।१२४), निर्य- **लक्ष्यम् (लक्षं)** कारञ्च (पा० ३।३।१८)। "संख्यायां च(ख) न ना लक्षं क्लीवं व्याजशरव्ययो"रिति मूर्धन्यान्तेषु रभसः॥ 'छलछद्मनिभा'- **(छलम्, छद्म, निभम्)** दयोऽप्यत्रोपचारात्। **त्रीणि (स्वरूपाच्छादनस्य)॥**

क्रीडेति। क्रीडावत् 'खेला' (नाट्य° २०८)॥ **क्रीडा, खेला**

(क) ज्ञानगुणान्—A., B.; निपीय instead of निशम्य—जीवानन्द's ed.
721 मुकुटस्तु खेला इत्यस्य स्थाने 'लीला' इति पठति।—भानु°।
(ख) संख्यायां तु—रघुनाथः।

कूर्दनम्
(कुर्दनम्)

कुर्द क्रीडायाम्। ल्युट् (पा० ३।३।११५)।। "र्वोरु-पधाया" (पा० ८।२।७६) इति दीर्घः।"* "कुर्दादीनां न भवति। "स्फुर्जेति" लिङ्गा"दिति **धर्मदासः**। "स्फुर्जेति दीर्घानुच्चारणात् धातोः "र्वो"रिति विधेरनित्यत्वम्" इति **पूर्णचन्द्रः**। "अपरे तु दीर्घमिच्छन्ती"ति **सुभूतिः**। "कुर्दनम्" इत्येके। "दीर्घा-भावस्तु चिन्त्यः" इति तु **स्वामी**।। **त्रीणि बालानां कन्दुकादि-खेलायाः** ।।२०८।।

घर्मः

घर्म इति। घरत्यङ्गमनेन इति। घृ क्षरणदीप्त्योरित्यतः "घर्म ग्रीष्मा" (उ० १।१४८) विति मकि इति निपातितः ।।[722]

निदाघः

निदह्यतेऽनेन। घञि (पा० ३।३।१२१) 'निदाघः'। न्यङ्क्वादिः (पा० ७।३।५३) ।।

स्वेदः
(प्रस्वेदः)

स्विद्यन्तेऽनेन अङ्गानि। 'स्वेदः'। 'प्रस्वेदो'ऽप्यत्र।। **त्रीण्यङ्गजलस्य** ।।

प्रलयः
नष्टचेष्टता

प्रलय इति। प्रलीयतेऽनेन। "एरच्" (पा० ३।३।५६) प्रलयः सात्त्विको भावो मूर्च्छेत्यर्थः। हर्षशोकादिभिरशेष-चेष्टानाश इत्यर्थः।। **द्वे मूर्च्छायाः** ।।

अवहित्था
(आकारगुप्तिः)
(अवहित्थम्)

अवहित्थेत्यादि। अङ्गविकृतस्य रोमाञ्चादेराच्छादनाद-बहिःस्थितत्वम् 'अवहित्था'।[723] ["डीङ् इति धातोरवपूर्वात् "यूथादय" इति थक् हिदादेशश्च" इति सुभूतिः।[724] "अवहित्थ-मथोग्रता" इति भरतात् क्लीवमपि।। **द्वे आकाररञ्जनस्य**।।(क)

772 उ० १।१४८, १।१४९ घर्मः, ग्रीष्मः—भट्टोजि। भानुजि has rightly pointed out that घृ सेके gives घरति and not घृ क्षरणदीप्त्योः which being a root of जुहोत्यादि class gives जिघर्ति।

723 The text beginning right from here up to एवं संभ्रमोऽपि omitted in B.

724 The text is corrupt here. A reads—"स्त्रीति तोरपूर्वात्" which gives no sense. सर्वा° reads—डीङ विहायसा गतौ। अवपूर्वात् "पृथादय" इति क्थन् हिद्भावश्च। ततष्टाप्।" But the rule referred to could not be found. सुभूति's "यूथादयः" also could not be traced. But we have a rule "तिथपृष्ठगूथयूथप्रोथाः" (उ० २।१२) for the suffix थक्।

(क) आकारगोपनस्य—भानु०।

* "उपधायां च" (पा० ८।२।७८)—सर्वा°

समाविति तु भयादिना सम्यग् विजन्ते चलन्त्यनेन। घञि (पा० ३।३।१८) 'संवेगः'।। **संवेगः**

एवं 'संभ्रमो'ऽपि]।। **द्वे आश्चर्यपरचक्रादिदर्शनात् सत्त्वरत्वस्य** ।।२०९।। **संभ्रमः**

आच्छुरितकम्

स्यादिति। ऊर्ध्वं प्रकर्षेणासनं गमन'मुत्प्रास' आधिक्यम्। अस गतिदीप्त्यादानेषु। घञ् (पा०३।३।१८)। तत्सहितः सोत्-प्रासोऽधिको महान् हास 'आच्छुरितकम्'। छुर छेदने। भावे क्तः (पा० ३।३।११४)। ततः स्वार्थे कन् (पा० ५।३।८७)। आ समन्तादवच्छिन्नमित्यर्थः।। **उपहासादिप्रयुक्तस्य सशब्दहासस्य एकम्** ।।

स्मितम्

'स' हासो 'मनाक्' अल्पः 'स्मितं' स्यात्।

"ईषद्विकसितैर्दन्तैः[725] कटाक्षैः सौष्ठवान्वितैः।
अलक्षितद्विजद्वार[726]मुत्तमानां स्मितं भवेत्।।" **एकं (स्मितस्य)** ।।

विहसितम्

मध्यममिति। स एव हासो मध्यमो नात्युच्चैर्नातिनीचैः सन् 'विहसितं' स्यात्।

"आकुञ्चितकपोलाक्षं सस्वनं निस्वनं तथा।
प्रस्तावोत्थं सानुरागमाहुर्विहसितं वुधाः"।।[727] **एकं (मध्यमहासस्य)** ।।

रोमाञ्चः

रोम्णामञ्चनं 'रोमाञ्चः'। घञ् (पा० ३।३।१८)। "न क्वादे" (पा० ७।३।५९) रिति योगविभागात् "चजो"रिति (पा० ७।३।५२) न कुत्वम् इति भाषावृत्तिः।।[728]

रोमहर्षणम्

रोमाणि हृष्यन्त्यनेनेति 'रोमहर्षणम्'। पुलक-कण्टक-रोमविक्रिया-रोमोद्गमाश्चात्रैव।। **द्वे रोमोद्गमस्य** ।।२१०।।

क्रन्दितम् (रुदितम्)
(क्रुष्टम्)

'क्रन्दित'मिति। भावक्तान्तं (पा० ३।३।१४४)।। त्रीणि रोदनस्य ।।

725 गण्डैः—सर्वा°, NŚ.

726 द्विजं धीरम्—सर्वा°। सर्वा's reading here tallies with that of the NŚ. KSS. VI. 54. भानु° follows मुकुट।

727 विस्वनं—A. सर्वा° following NŚ. VI. 56 reads आकुञ्चिताक्षिगण्डं यत् सस्वनं मधुरं तथा। कालागतं सास्यरागं तद् वै विहसितं भवेत्।। भानु° follows मुकुट।

728 भागवृत्तिः—B.

जृम्भः (जृम्भा) (जृम्भम्?) जृम्भणम् — 'जृम्भो' मुखादिविकासः। घञ् (पा० ३।३।१८)। "त्रिष्वि" ति। अप्रत्यये (पा० ३।३।१०३) तु 'जृम्भा'। स्त्री। 'जृम्भं' तु अज्विधौ भयादि (वा० ३।३।५६) पाठात्[729] [भयादिष्वपाठात् नेष्टम् ?]॥ 'जृम्भणम्'। ल्युट्॥ **द्वे हाम्बीति ख्यातायाः ॥**[730]

विप्रलम्भः — **वीति।** विशेषेण प्रलम्भनं विप्रलम्भः। घञ् (पा० ३।३।१८)॥

विसंवादः — एवं विसंवादोऽपि॥ **द्वे मिथ्याख्यानवचनस्य**(क) **इति यावत्। "अङ्गीकृतासम्पादनस्य" इति तु सर्वानन्दः** (?)[731] [स्वामी]॥

रिङ्गणम् — रिगिलिगि दण्डकात् ल्युटि (पा० ३।३।११५) 'रिङ्गणम्'॥

स्खलनम् — एवं 'स्खलनम्'। स्खल संचलने। "द्वे धर्मादिश्चलनस्य" इति **सर्वानन्दः** (?)[732] [स्वामी]। "बालानां हस्तपादाभ्यां चलनं 'रिङ्गणम्'। 'स्खलन'न्तु पिच्छिलादौ पतनम् इति यद्यपि भेदस्तथाप्यभेदोपचारेण 'समे' इत्युक्तम्" इति **पञ्जिका ॥१११॥**

निद्रा — **स्यादिति।** नियतं द्रान्तीन्द्रियाण्यस्याम्। द्रा कुत्सायां गतावित्यत "आतश्चोपसर्गे" (पा० ३।३।१०६) इत्यङ। 'निद्रा'॥

शयनम् — शीङो भावे ल्युट् (पा० ३।३।११५)। 'शयनम्'॥

स्वापः — स्वपेर्घञि (पा० ३।३।१८) 'स्वापः'॥

स्वप्नः — स्वपनं 'स्वप्नः'। "स्वपो नन्" (पा० ३।३।९१)॥

729 क्षीर° reads—"क्लीवत्वं तु अज्विधौ भयादिषु अदर्शनात् नेष्टम्।" B. reads भयादिष्वपाठात्। So, some word like 'नेष्टम्' has been lost due to scribal error and भानु° takes this truncated reading as original.

730 हायीति—B, हाम्भीति—सर्वा°

(क) "मिथ्याख्यानवञ्चनायाम्" इति रायः—रघुनाथ।

731 Not found in the printed text which reads मिथ्याफलाख्यान in its place. It should be क्षौर° who gives अङ्गीकृतासम्पादनं

732 सर्वा° give पिच्छिलादौ स्खलने while क्षीर° gives धर्मादिश्चलनम्।

संवेशः (सुप्तिः) — संविशन्तीन्द्रियाण्यत्र 'संवेशः'॥ "सुप्ति" रप्यत्र। "करोति सुप्तिर्जनदर्शनातिथिम्" इति **नैषधः** (१।३९)॥ **पञ्च निद्राया निद्रागतभ्रान्तचित्तस्यापि ॥**

तन्द्रिः (तन्द्री) (तन्द्रीः) (तन्द्रा) — **तन्द्रिरिति।** इन्द्रियाणां तननं द्रात्यस्याम्। तन्द्रधातोः सौत्रात् मूर्च्छार्थात् "तन्द्रेरिदीता"[733] विति ह्रस्वेकारप्रत्यये 'तन्द्रिः'। "विभज्य नक्तन्दिवमस्ततन्द्रिणा" (Kirat, I. 9.) इति **भारविः।** ततो वा ङीषि दीर्घेकारप्रत्यये लक्ष्मीशब्दवच्च 'तन्द्रीः'। "तामेकतस्तव बिभर्ति गुरुर्वितन्द्री" (Raghu, V. 66) रिति **रघुदर्शनात् ।।**[734] "स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्" (पा० ३।२।१५८) [इति] **पाणिनिदर्शनात्** "तन्द्रा" इत्यपि। एवं तन्द्रिस्तन्द्री तन्द्रीस्तन्द्रा इति रूपचतुष्टयम् ।।[735]

प्रमीला — प्रमीलन्ति इन्द्रियाण्यस्यां। "गुरोश्च" (पा० ३।३।१०३) इत्यकारे टापि 'प्रमीला'॥ **द्वे अत्यन्तश्रमादिना सर्वेन्द्रियाप्रभुत्वस्य ॥ "आलस्यस्य" इत्यन्ये ॥**

भ्रकुटिः, भ्रुकुटिः, भ्रूकुटिः (भृकुटिः) — कुट कौटिल्ये। इगुपधात् कित् (उ० ४।११९) [इतीन्]। भ्रुवोः कुटिरित्येवं भ्रकुंसवत् त्रैरूप्यम्। पृषोदरादित्वाद् (पा० ६।३।१०९) ऋकारे "भृकुटी" त्यपि। एवं रूपचतुष्कम्। केचित्तु एतद् "अदृष्टिः स्याद्" इत्यनेन संबध्नन्ति। तथाच "भ्रकुटिर्दृगसौम्या स्याद्" इति॥ **त्रीणि क्रोधादिना ललाटसंकोचनस्य॥ २१२॥**

अदृष्टिः — **अदृष्टिरिति।** विरुद्धा दृष्टि'रदृष्टिः'। **असौम्य इति।** सोमदेवताकत्वात् 'सौम्यं' सुन्दरम्। न सौम्यम् 'असौम्यं' क्रूरम् ।।[736] **एकं क्रूराया दृष्टेः ।।**

733 This rule cannot be pāṇinian nor it can be traced in उणादि। सर्वा° derives it with क्रिन् by the rule "वङ्क्रयादयश्च' (उ० ४।६६) and so does उज्ज्वल°। मल्लिनाथ follows suit. दशपादी (१।७९) has तनोतेर्द्रिः। तन्द्रिः संख्या।

734 मल्लि° reads—"गुर्र्विनिद्रः।

735 "चतुष्कम्—A. "तन्द्रिस्तन्द्रीस्तन्द्रा' इति द्विरूपकोषाच्च—भानु°; तन्द्री तन्द्रिश्च तन्द्रायामिति द्विरूपकोशः—तत्त्वबोधिनी।

736 omitted in B.

(संसिद्धिः, प्रकृतिः) **इमे इति**। द्वयोः स्त्रीत्वाख्यानायोक्तम्। क्लीवत्व-निरासस्तु रूपभेदादेव।

स्वरूपम् स्वं रूपं 'स्वरूपम्'॥

स्वभावः, निसर्गः स्वो भावः 'स्वभावः'। स्वभावो 'निसर्गः'॥ **पञ्च स्वभावस्य॥**

वेपथुः **अथेति**। टु वेपृ कम्पने। "ट्वितोऽथुच्" (पा० ३।३।८९)। ['वेपथुः'] ॥२१३॥

कम्पः 'कम्पः'। भावे घञि (पा० ३।३।१८) ॥ **द्वे कम्पस्य॥**

क्षणः **अथेति**। क्षणोति दुःखम् इति। क्षणु हिंसायाम्। पचाद्यच् (पा० ३।१।१३४)॥

उद्धर्षः उद्धर्ष इत्यपि अजन्तः (पा० ३।१।१३४)। उद्गतो हर्षो यत्रेति वा 'उद्धर्षः'॥

महः (महस्) मह्यते पूज्यतेऽनेनेति "पुंसी" (पा० ३।३।११८) ति घः। 'महो'ऽदन्तः। "महमसाविति बन्धुतयोदितै" (Śiśu, 6/19) रिति **माघात्**। सान्तत्वं च "महस्तूत्सव-तेजसो" रित्यनेन अनेकार्थे वक्ष्यते॥

उद्धवः उद्धुनोति दुःखमिति 'उद्धवः'॥

उत्सवः उत्सूते सुखम् इति 'उत्सवः'। पचाद्यजन्तौ (पा० ३।१।१३४)॥ **पञ्च उत्सवस्य ॥२१४क॥**

॥०॥ नाट्यवर्गविवरणम् ॥०॥

स्वर्गप्रधानो वर्गः 'स्वर्गवर्गः'। एवं सर्वत्र वर्गसमाप्तौ बोद्धव्यमिति ॥[737]

॥१॥ स्वर्गवर्गः समाप्तः ॥१॥

737 omitted in A.

प्रथमे काण्डे

२। पातालवर्गः॥

८। पातालवर्गः।

अधोभुवन-पाताल-बलिसद्म-रसातलम्[738] ॥२१४॥
नागलोकोऽथ कुहरं शुषिरं विवरं विलम्।
छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा शुषिः ॥२१५॥
गर्तावटौ भुवि श्वभ्रे सरन्ध्रे शुषिरं(क) त्रिषु।
अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः ॥२१६॥
ध्वान्ते गाढेऽन्धतमसं क्षीणेऽवतमसं तमः ॥२१७क॥

॥०॥ इति पातालवर्गः ॥०॥

९। भोगिवर्गः[739]

विष्वक् सन्तमसं, नागाः काद्रवेयास्तदीश्वराः ॥२१७॥
शेषोऽनन्तो वासुकिस्तु सर्पराजोऽथ गोनसे।
तिलित्सः स्यादजगरे शयुर्वाहस इत्युभौ ॥२१८॥
अलगर्धो[740] जलव्यालः समौ राजिलडुण्डुभौ।
मालुधानो मातुलाहिर्निर्मुक्तो मुक्तकञ्चुकः ॥२१९॥
सर्पः पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजङ्गमः।
आशीविषो विषधरश्चक्री व्याडः[741] सरीसृपः ॥२२०॥
कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी।
दर्वीकरो दीर्घपृष्ठो दन्दशूको विलेशयः ॥१२१॥

738 अधोभुवनं पातालं वलिसद्म रसातलम्—some mss.
739 क्षीर°, सर्वा°, भानु° and others combine the two under the caption पातालभोगिवर्ग।
(क) Also सुषिरं—क्षीर°
740 अलगर्दो—भानु°, क्षीर° (ed. H. D. Sharma).
741 व्यालः—भानु°, क्षीर°

उरगः पन्नगो भोगी जिह्मगः पवनाशनः ।*
त्रिष्याहेयं विषास्थ्यादि स्फटायां तु फणा द्वयोः ॥२२२॥
समौ कञ्चुकनिर्मोकौ क्ष्वेडस्तु गरलं विषम् ।
पुंसि क्लीवे च काकोलकालकूटहलाहलाः ॥२२३॥
सारोष्ट्रिकः[742] शौक्लिकेयो ब्रह्मपुत्रः प्रदीपनः ।
दारदो वत्सनाभश्च विषभेदा अमी नव ॥२२४॥
विषवैद्यो जाङ्गुलिको व्यालग्राह्यहितुण्डिकः[743]॥२२५क॥

॥०॥ इति भोगिवर्गः ॥०॥

॥०॥ (पातालभोगिवर्गः) ॥०॥

अधोभुवनम् (अधः) — **अधोभुवनेति**। अधश्च तद् भुवनं चेति 'अधोभुवनम्'। "अधोऽव्ययं स्यात् पाताले" इति **त्रिकाण्डशेषात्** अधोऽपि ॥

पातालम् — पतन्त्यत्र पापाद् इति "पतिचण्डिभ्यामालञ्" (उ० १।११६) 'पातालम्' ॥

बलिसद्म — बलेः सद्म गृहं 'बलिसद्म' ॥

रसातलम् — रसायाः पृथ्व्या[744]स्तलमधः 'रसातलम्' ॥२१४॥

नागलोकः (अधोलोकः) (फणिभवनम्) — नागानां लोको भुवनं 'नागलोकः' ॥ अधोलोक-फणिभुवनादयोऽप्यत्र ॥ **पञ्च पातालस्य** ॥

कुहरम् — **अथेति**। कुं महीं हरति इति "हरतेरनुद्यमनेऽच्" (पा० ३।२।६)। 'कुहरम्' ॥ कुह विस्मापने।[745] इगुपधत्वात् कः (पा० ३।१।१३५)। कुहः। तं राति ग्रहणं करोति "आतोऽनुपसर्गे" (पा० ३।२।३) इति को वा ॥

* Southern mss. add here—
लेलिहानो द्विरसनो गोकर्णः कञ्चुकी तथा ।
कुम्भीनसः फणधरो हरिर्भोगधरस्तथा ॥
अहेः शरीरं भोगः स्यादाशीरप्यहिदंष्ट्रिका ।

742 others read सौराष्ट्रिकः। 743 जाङ्गलिको—सर्वा°; आहितुण्डिकः—भानु°।
744 पृथिव्याः—B. 745 विस्मायने—A.

शुष्यत्यनेन। शुषे "रिषिमदी" (उ० १।५२) त्यादिना बाहुलकात् किरच्। तालव्यादिमूर्धन्यमध्यम्। 'शुषिरम्'। शुषे "रिगुपधात्कित्" (उ० ४।११६)। शुषिः। "ऊषशुषी" (पा० ५।२।१०७) ति र इति वा (क)। वाच्यलिङ्गम् ॥ — शुषिरम्

विवृणोतीति पचाद्यचि (पा० ३।१।१३४) 'विवरम्'। विगतो वरो वारणम् अत इति वा ॥ — विवरम्

विलति भिनत्ति विदारयति। विल भेदने। इगुपधत्वात् कः (पा० ३।१।१३५)। 'विलम्' ॥ — विलम्

छिद्र भेदने। अतश्चौरादिकादेरचि (पा० ३।१।१३४) 'छिद्रम्'। छिद्यतेः शुभ्रवद् रकि (उ० २।१३) इति वा ॥ — छिद्रम्

निश्चयेन व्यथनं भयं यत्र इति। व्यथ भयचलनयोः। अधिकरणे ल्युट् (पा० ३।३।११७) 'निर्व्यथनं'। "निश्चलमाकाशमत्र इति निर्व्यथनम्" इति तु **कलिङ्गः**। — निर्व्यथनम्

रोचते प्रकाशते। घः (पा० ३।३।११८), कुत्वम् (पा० ७।३।५२)। " 'रोक'मिति "लोकाश्रयत्वाल्लिङ्गस्ये" ति क्लीवत्वम्" इति **सुभूतिः**। 'विरोकञ्च'। "नासाविरोकपवनाकुलितं तनीय" (Śiśu, 5/54)[746] इति **माघः** ॥ — रोकम् (विरोकम्)

रन्धयति हिंसयति। रध हिंसाराद्ध्योः। "स्फायितञ्ची" (उ० २।१३) त्यादिना बाहुलकात् रकि 'रन्ध्रम्'। रणति रन्ध्रमिति **स्वामी**। पृषोदरादि (पा० ६।३।१०९)। "रमन्ते अत्र शुम्भादय इति रक्, धुक् चागम" इति **सर्वधरः** ॥ — रन्ध्रम्

शोभनमभ्रमाकाशमत्र इति श्वभ्रम्। शोभनवाची शुभ्रशब्दस्तालव्योऽपि। तथाच उणादिसूत्रम् ["स्फायितञ्चिवञ्चिशकि..शीङ्हसिसिधिशुभिभ्यो रक्" (उ० २।१३)?[747]]। अन्ये तु श्वभ्र गत्यामित्यतोऽचा (पा० ३।१।१३४) श्वभ्रं साधयन्ति। श्वानं विभर्ति। मूलविभुजादित्वात् क-(वा० ३।२।५) प्रत्यये — श्वभ्रम् (स्वभ्रम्)

(क) The सूत्र reads "ऊषसुषि" and not शुषि। भानु° blindly follows मुकुट।
746 मल्लि° reads—"नासाविरोकपवनोल्लसितम्"।
747 The rule referred to is not available in the mss. भट्टोजि under "न रपर" etc. under उणादि gives शुभ्रम् as an example of उ० २।१३

श्वभ्रमित्यन्ये ।। "श्वभ्रकश्मीरशिल्पम्"* - **इत्यूष्मविवेकात्** तालव्यादि। "सुष्ठु अभ्रं दन्त्याद्यपी"ति **पञ्जिका ।।**

वपा

उप्यतेऽत्र। वपेर्भिदादिपाठादङि (पा० ३।३।१०४) 'वपा' ।।

शुषिः (शुषी) (सुषिः)

शुष्यत्यनया। शुषे"रिगुपधात् कित्" (उ० ४।११६)। 'शुषिः'। वपासाहचर्यात् शुषिः स्त्री। कृदिकारात् ङीषि (वा० ४।१।४५) 'शुषी'। दन्त्यादिरप्ययं शब्दः। "विवराभिधायिनि शुषिरादौ शास्त्रेषु दन्त्यतालव्यौ"**इत्यूष्मविवेकात् ।। एकादश विवरमात्रस्य ।।२१५।।**

गर्तः (गर्ता)

गर्तेति। गिरति पतद्द्रव्यम्। गिरतेः "हसिमृग्रिण्" (उ० ३।८६) इत्यादिना तनि 'गर्तः'। "गर्ता" स्त्रियां टाबन्ताऽपि (पा० ४।१।५)। "शरटकृसरवर्तकगर्तश्रृङ्गा" इति[748] स्त्रीपुंसप्रकरणे **रभसात् ।।**

अवटः (अवटिः)

अवन्त्यस्मात्। अव रक्षणे। "शकादिभ्योऽटन्" (उ० ४।८१)। 'अवटः'। ह्रस्वादिः। "अवटिः"। इदन्तोऽपि। "दर्भेऽपि पवित्रमवटिरवटेऽपी"ति **हलायुधः ।।**

'भुवि' भूमौ यत् 'श्वभ्र' छिद्रं वर्तते तत्र। **द्वे भूरन्ध्रस्य ।।**

शुषिरम्

सरन्ध्रे वंशादौ वस्तुनि 'शुषिरम्'। "ऊषशुषिमुष्के" (पा० ५।२।१०७) त्यादिना रः।(क) त्रिषु ।। **एकं (सरन्ध्रस्य) ।।**

अन्धकारः

अन्धकार इति। अन्ध दृष्ट्युपघाते। चुरादिः। अन्धनम् अन्धः। तं करोति। "कर्मण्यणि" (पा० ३।२।१) 'अन्धकारः'। "अस्त्रियाम्" ।।

ध्वान्तम्

चौरादिनिवारणाय प्रहरिकाणां ध्वननमत्र [इति] 'ध्वान्तम्'। "क्षुब्धस्वान्ते" (पा० ७।२।१८) त्यादिना निपातितम्।

तमो मोहोऽस्त्यत्र। धर्मप्राधान्यात् तु तमः इव तमः।

* "कुशलकुलिशशुभ्रश्वभ्रकाश्मीरशिल्पम्" इति तालव्ये ऊष्मभेदः—रघुनाथ

748 वर्तक is omitted in भानु°'s citation. "गण्डूषगर्जभुजजागरहारकीलज्वालाः शरटकृसरवर्तकगर्तशृङ्गाः" इति स्त्रीपुंसप्रकरणे रभसः—रघुनाथ।

(क) भानु° follows मुकुट but Pāṇinian सूत्रपाठ reads "ऊषसुषि" with 'स'।

तद्-योगात् 'तमिस्रम्'। "ज्योत्स्नातमिस्रे" (पा० ५।२।११४) त्यादिना निपातितम्। "सूत्रे लिङ्गवचनमतन्त्रम्" इति क्लीवत्वम् ।। — तमिस्रम्

तिम्यतीति 'तिमिरम्'। शुषिरवत्। ताम्यत्यत्र। तमु ग्लानौ। "उपधाया इच्चे" (?) ति किरचि (उ० १।५२) इत्वे च तिमिरम् इत्यन्यः(क) ।। — तिमिरम्

ताम्यत्यनेन। असुन् (उ० ४।१८८)। 'तमः'। सान्तम्। "तमसं तु निशाचर्मे" ति **त्रिकाण्डशेषात्** "तमसम्" अदन्तमपि (उ० ३।११७) ।। **पञ्च अन्धकारस्य ।।२१६।।** — तमः (तमसम्)

ध्वान्त इति। 'गाढे' अतिशयितान्धकारे अन्धयतीत्यन्धम्। अन्धं च तत् तमश्चेति। "अवसमन्धेभ्यस्तमस" (पा० ५।४।७९) इति अचि 'अन्धतमसम्'। "अन्येषामपी" (पा० ६।३।१३७) ति दीर्घत्वे "अन्धातमस"मपि इति **शाकटायनी भाषावृत्तिरिति[749] नन्दिशबरस्वामिनौ ।। एकं महान्धकारस्य ।।** — अन्धतमसम् (अन्धातमसम्)

क्षीणे तु ध्वान्ते अवहीनं विरलं तमोऽवतमसम्'। पूर्ववदच् (पा० ५।४।७९) ।। **एकं (विरलान्धकारस्य) ।।** — अवतमसम्

वीति। 'विष्वक्' सर्वतोविसारि तमः 'सन्तमसम्'। पूर्ववदच् (पा० ५।४।७९) ।। **एकं व्यापकतमसः ।।(२१७क)।।** — सन्तमसम्

।।०।। पातालवर्गविवरणम् ।।०।।

६। अथ भोगिवर्गः

नागा इत्यादि। नगे गिरौ चन्दनादितरौ वा भवा विद्यमानाः। शेषे अण् (पा० ४।२।९२)। 'नागाः'। न गच्छन्ति अगाः। न अगा 'नागाः'। निषेधवाचिना नशब्देन — नागाः

(क) cf. "तिम्यति तेमयतीति वा तिमिरम् '—दशपादी (८।२६)

749 शाकटायनीयवृत्ति—B.

"सुप्सुपे" ति (पा० २।१।४) समासः। अनञ्‌त्वान्न नलोप (पा० ६।३।७३) इति वा ॥

ऊङन्तात् कद्रूशब्दात् कश्यपस्त्रीवचनात् शुभ्रादि-(पा० ४।१।१२३) ढकि "ढे लोपोऽकद्र्वाः" (पा० ६।४।१४७) इति

काद्रवेयाः टिलोपाभावे "ओर्गुणे" (पा० ६।४।१४६) 'काद्रवेयाः' ॥ **नराकारस्य फणलाङ्गुलवतो नागस्य द्वे ॥२१७॥**

कल्पान्ते विशिनष्टि अवतिष्ठते। शिष्लृ विशेषणे।

शेषः पचाद्यच् (पा० ३।१।१३४)। 'शेषः' ॥

अनन्तः देवैरप्यस्यान्तो नोपलब्ध इति 'अनन्तः' ॥ **द्वे नागराजस्य ॥**

वसु रत्नं मस्तकेऽस्य 'वसुकः'। अपत्ये इञि (पा०

वासुकिः ४।१।९५) 'वासुकिः' ॥

सर्पराजः 'सर्पराजः'। टच् (पा० ५।४।९१) ॥ अन्ये च तक्षक-कर्कोटक[750]-शङ्ख-कुलिक-पद्म-महापद्मेत्यादयो नागराजाः स्युः। इह यद्यपि शेषवासुक्योर्भेदस्तथापि गतानुगतिकतया कवयोऽभेदेन प्रयुञ्जते। यथा—"स्वमिव भुजङ्गविशेषं व्युपधाय[751] स्वपिति यो भुजङ्गविशेषम्" इति **वृन्दावनम्**। "वलयायितशेषशायिनः सखितामादित पीतवासस" इति **नैषधे** (२।१०१) ॥ **द्वे वासुकेः ॥**

गोनसः **अथेति**। गोरिव नासिका अस्य "अञ् नासिकायाः"

(गोनासः) (पा० ५।४।११८) इत्यादिना अच्, नसादेशश्च। "गोनास-गोनसा"[752] विति **त्रिकाण्डशेषः**। "गोनासाय नियोजितागदरजाः"[753] इति **राजशेखरः ॥**

तिलित्सः तिलनं 'तिलिः'। "इक् कृष्यादिभ्य" (वा० ३।३।१०८) इतीक्। तिलिं गतिं स्यति। "सुपी" (पा० ३।२।४) ति कः। पृषोदरादिः (पा० ६।३।१०९)। तिलति स्निग्धो भवति स्निग्धभूयिष्ठत्वात्। तिल स्नेहने। "तिल इदुक् चे"[754] ति

750 कर्कोट—B. 751 व्यवधाय—A.
752 A. adds—गोनासश्च गोनासगोनसौ। 753 गजमादितरसा—B.
754 This rule could not be traced in any printed edition of उणादिसूत्रs.

सप्रत्यय इदुगागमश्च। 'तिलित्सः'। सदन्त्यः॥ **द्वे रोटविशेषस्य ॥**[755] "गोनसीमण्डलीवोड" इति तु **विक्रमादित्यः ॥** [**द्वे सर्पविशेषस्य**] (क) ॥

अजं छागमपि गिरति। पचाद्यचि (पा० ३।१।१३४)। **अजगरः**
'अजगरः'। वृत्तौ गतार्थत्वाद् 'अपि'शब्दाप्रयोगः ॥

सदा शेत इति "भूमृशीतॄचरित्सरी" (उ० १।७) **शयुः**
त्यादिना उः। 'शयुः' ॥

वहति विषहरीमिति "वहियुभ्यां णिद्" (उ० ३।११९)
इत्यसच्। णित्वाद् वृद्धिः। 'वाहसः'। दन्त्यान्तः। "वाहं गति **वाहसः**
स्यती" ति **स्वामी ॥ त्रीण्यजगरस्य ॥२१८॥**

अलेति। न भूमौ लगति। नञि क्विप् (पा० ३।२।१७८)। अलक्। अलक् अर्धमस्य। फणधारणे पूर्वार्धस्य
भूमेरुत्थितत्वात्। 'अलगर्धः'। अलं गृध्यतीति वा। पचाद्यचि **अलगर्धः**
(पा० ३।१।१३४) पृषोदरादित्वान् (पा० ६।३।१०९) मलोपः। "गृध्यति गर्धः। अच् (पा० ३।१।१३४)। अरः शीघ्रश्चासौ गर्धश्चेति। रलयोरेकत्र स्मरणात्"—इति तु **भट्टः** (?) [सर्वानन्दः]।[756] "अलीव गर्धती" ति तु **स्वामी ॥**[757]

जलस्थत्वाद् 'जलव्यालः' ॥ **द्वे अलाध इति ख्यातस्य ॥** **जलव्यालः**

राजी रेखा पृष्ठे अस्यास्ति। सिध्मादित्वाल्लचि (पा० ५।२।९७) 'राजिलः'। राजतेः "सलिकल्यनी" ति (उ०
१।५५) बाहुलकादतोऽपीलचि 'राजिल' इति वा ॥ **राजिलः**

डुडितुडि निमज्जने। घञि (पा० ३।३।१८) डुण्डः **डुण्डुभः**
मज्जनम्। तेन भाति। "आतोऽनुपसर्गे कः" (पा० ३।२।३)। **(डुण्डुभः)**
"कर्तृकरणे कृते" (पा० २।१।३२) ति समासः। पृषोदरादित्वात् (पा० ६।३।१०९) डुण्डशब्दस्याकारस्योकारे 'डुण्डुभ' इति।

755 Is it a misreading for वोड? रोटा is the name of a kind of fish popular in East Bengal. (क) adds भानु°।
756 Actually it is from सर्वा°।
757 Printed texts read "अलीव गर्दति इति अलिगर्द इत्येके।"

तवर्गतृतीयादिश्च ।[758] अतएव "दोडो दोलश्चे" ति **शाब्दिकनरसिंहः ॥ द्वे "धोण्ट" इति ख्यातस्य ॥**

मेति । "त्रो रश्च लः" (उ० १।५) इति बाहुलकात्
मालुधानः म्रियतेरप्युण् भावे । मरणं मालुः । तद् धयति । धेट पाने । नन्द्यादित्वाल्ल्युः (पा० ३।१।१३४) । 'मालुधानः' । "मालैर्धीयते पुष्यते पृषोदरादित्वादुकार" (पा० ६।३।१०९)—इत्यन्यः । "मालुरोषधिस्तत्र धानमस्ये"ति तु **स्वामी** ॥

मातुलाहिः मातुलो नामाहि'र्मातुलाहिः' । "मालुधानश्चित्रसर्पे महापद्मे च दृश्यत" **इत्युत्पलिनी ॥ द्वे "मालुश्रा" इति ख्यातस्य ॥**

निर्मुक्तः कञ्चुकोऽर्थात् देहत्वक् निर्मोकः । तेन निःशेषेण मुक्तः । मुचेः कर्मकर्तृविषयत्वात् कर्तरि क्ते (पा० ३।४।७२) 'निर्मुक्तः' ॥

मुक्तकञ्चुकः मुक्तः कञ्चुकोऽनेन । ['मुक्तकञ्चुकः' ।।] **द्वे त्यक्तत्वचः सर्पस्य** ।।२१९।।

सर्पः **'सर्प' इति** । सर्पति 'सर्पः' । सृपेरच् (पा० ३।१।१३४) । "भूमिं स्पृशता देहेन सर्पणं गमनं सर्पः । तद्योगात् सर्प" इति
(सर्पी) तु **कलिङ्गः** । स्त्रियां जातित्वात् ङीष् (पा० ४।१।६३) । 'सर्पी' ।।

पर्दते कुत्सितं शब्दं करोति । पर्द कुत्सिते शब्दे ।
पृदाकुः "पर्देर्नित् संप्रसारणमल्लोपश्चे" ति (उ० ३।८०) काकुप्रत्यये 'पृदाकुः'—इति **सर्वानन्दः** । पिपर्ति स्वं पवनेन "पिपर्तेर्दाकुर्ह्रस्वश्चे"[759] ति दाकु-ह्रस्वयोः 'पृदाकु'—रिति **पञ्जिका** ।

भुज कौटिल्ये । भुजति । इगुपधात् कः (पा० ३।१।१३५) । भुजः कुटिलः सन् गच्छति, भुजन् कुटिलीभवन् गच्छति वा । पृषोदरादित्वात् (पा० ६।३।१०९) तलोपः ।

758 तृतीयादिः—B.; तृतीयादिरपि—भानु° ।

759 भट्टोजि has no such suffix as दाकु and shows no such rule as quoted above. He derives सृदाकु with the suffix काकु and दुक् आगम । See rule (उ० ३।७८) while दशपादी (१।१५१) has सृमाकू with मुक् ।

'भुजगः' । डप्रकरणे "अन्यत्रापि दृश्यत" (पा० ३।२।१०१) **भुजगः**
इति डः ।।[760]

एवं गमेः "खच् डिद् वा वक्तव्य" (वा० ३।२।३८)
इति खचि डित्त्वात् टिलोपे 'भुजङ्गः' ।। **भुजङ्गः**

आहन्तीति 'अहिः' । इदन्तः । "आङिश्रिहनिभ्यां **अहिः**
ह्रस्वश्च (उ० ४।१३७) इतीण् ।* स च [डित्,] आकारह्रस्वः ।।

"गमश्चे"ति (पा० ३।२।४७) खचि 'भुजङ्गमः' । **भुजङ्गमः**
एवं भुजगो भुजङ्गो भुजङ्गम इति त्रैरूप्यम् ।।

आशीः सर्पदंष्ट्रा । तालव्यमध्या । तत्र विषं यस्य ।
पृषोदरादित्वाद् (पा० ६।३।१०९) दीर्घसलोपयोः 'आशी- **आशीविषः**
विषः' । ईकारान्तेन आशीशब्देन वा समासः । "आशीमिव कलामिन्दो" रिति **राजशेखरः**(क) । "आशीस्तालुगता दंष्ट्रा तया दष्टो न जीवती" ति च ।।(ख)

विषं धरति । शक्तिधरवत् । 'विषधरः' ।। **विषधरः**

शिरसि चक्रयोगात् 'चक्री' । नान्तः ।। **चक्री**

विशेषेण आलाति । ला आदाने । "आतश्चे" (पा० **व्याडः**
३।१।१३६) ति कः । डलयोरेकत्रस्मरणात् । विशेषेण **(व्यालः)**
आ समन्तादडति । अड उद्यमे । अचि (पा० ३।१।१३४) 'व्याडः' । लान्तोऽपि ।।

कुटिलं सर्पति । सृपेर्यङन्तादचि (पा० ३।१।१३४)
यङो लुकि (पा० २।४।७४) 'सरीसृपः' । द्विदन्त्यः । "संसार- **सरीसृपः**
सारससरीसृपसस्यसास्ना" इति द्विदन्त्ये **ऊष्मविवेकात्** ।। २२०।।

"आसीनस्य कुण्डलमिव वपुरस्यास्तीति 'कुण्डली' " इति **कुण्डली**
पूर्वे ।[761] वयन्तु कुण्डलमनुकरोतीति कुण्डलशब्दात् प्रातिपदिकाद्धात्वर्थणिजन्तात् घञर्थे के (वा० ३।३।५८)

760 Actually the rule is "अन्येष्वपि दृश्यते ।"

* इञ्—जीवानन्द's ed.

(क) रघुनाथ ascribes it to हरविलास ।

(ख) . . .विद्धो न जीवति—भानु°, क्षीर°

761 cf. सर्वा° ।

'कुण्डलं' कुण्डलनं कुण्डलानुकरणम् । तद्योगादिनिः (पा० ५।२।११५)। 'कुण्डली' ति ब्रूमहे ॥

गूढपात्
(गूढपदः)

गूढा अलक्ष्याः पादा अस्य । पृषोदरादित्वादकारलोपे (पा० ६।३।१०९) 'गूढपात्' । दान्तः । "पादस्य लोप" (पा० ५।४।१३८) इतीह नास्ति । तत्रोपमानादित्यनुवृत्तेः । शसादावचादौ पदादेशे (पा० ६।१।६३) गूढपद इत्यादि रूपम् । "प्रथमैकवचनेऽपि 'गूढपद' इत्यपि"––इति **कौमुदी** । सर्पविषये" पादानामपि विज्ञेया[762] द्वे शते द्वे च विंशती" **त्यागमात्** सपादत्वम् ॥

चक्षुःश्रवाः
(गोकर्णः)

चक्षुरेव श्रवः कर्णोऽस्य 'चक्षुःश्रवाः' । सान्तः ॥ अतएव "गोकर्णो" ऽपि ॥

काकोदरः

काकोदरमिवोदरमस्य ।[763] कु ईषदकति कुटिलं गच्छति । अक अग कुटिलायां गतौ । अच् (पा० ३।१।१३४) । "ईषदर्थे चे" (पा० ६।३।१०५) ति कादेशः । काकम् । काकम् ईषत्कुटिलगतिमदुदरमस्य[764] वा । ['काकोदरः'] ॥

फणी

अतिशयिता फणास्यास्ति । व्रीह्यादित्वादिनिः । (पा० ५।२।११६) । 'फणी' ॥

दर्वीकरः

दर्व्याकारत्वात् फणैव [दर्विः]। "कृदिकारादक्तिन्नि" (वा० ४।१।४५) ति ङीषि दर्वी। तां करोति जनयति 'दर्वीकरः'। "कृञो हेत्वि" (पा० ३।२।२०) त्यादिना टः।

दीर्घपृष्ठः

आ पुच्छायतत्वाद् दीर्घं पृष्ठमस्य 'दीर्घपृष्ठः' ॥

दन्दशूकः

दंशे "लुंपसदे" (पा० ३।१।२४) त्यादि यङन्ताद् "यज जपे" (पा० ३।२।१६६) त्यूकः । "यस्य हल" (पा० ६।४।४९) इति यलोपः । कुत्सितदंशनशीलो 'दन्दशूकः' ॥

विलेशयः

विले शेते । "अधिकरणे शेते" (पा० ३।२।१५) रित्यचि "शयवासे" (पा० ६।३।१८) त्यादिना अलुकि 'विलेशयः' ॥२२१॥

उरगः

उरसा गच्छति । ड प्रत्यये सलोपे (वा० ३।२।४८)

762 विज्ञेये—भानु° ।
763 उदरोऽस्य—B.
764 वक्रिमगतिमत्—B.

'उरगः' । "खच् । "उरसश्च उरभावो वक्तव्य" इति उरङ्गमः" **(उरङ्गमः)**
––इति **पारायणम्** ॥

पन्नगः

पन्नः पतितो गच्छति, पन्नं यथा स्यात् तथा गच्छति वा । "सर्वत्रपन्नयोरुपसंख्यानम्" (वा० ३।२।४८) इति डः । "पद्भ्यां न गच्छति 'पन्नगः' । पृषोदरादिः (पा० ६।३।१०९)" ––इति **कौमुदी** ॥

भोगी

भोगः फणा कायश्च । तद्योगाद् 'भोगी' ॥

जिह्मगः

जिह्मं कुटिलं गच्छति 'जिह्मगः' । भुजगवत् ॥

पवनाशनः
(दृष्टिविषः)
(कुम्भीनसः)

पवनमश्नाति । नन्द्यादित्वाल्ल्युः (पा० ३।१।१३४) । 'पवनाशनः' ॥ 'दृष्टिविषकुम्भीनसा'वप्यत्र ॥ **पञ्चविंशतिः सर्पस्य** ॥

आहेयम्
(आहेयी)

त्रिष्विति । अहेर्विषास्थ्यादि 'आहेयम्' । त्रिषु । अहौ भवम् इत्यर्थे "दृतिकुक्षी" (पा० ४।३।५६) त्यादिना ढञ् । स्त्रियाम् "आहेयी" । 'विषादी'त्यादिना कञ्चुकादिग्रहः ॥ **एकमहेर्विषास्थ्यादेः** ॥

स्फटा
(फटा)

स्फुटस्फट विकसने । चौरादिकात् पचाद्यचि (पा० ३।१।१३४) 'स्फटा' । फयुक्तसादिः । "पृषोदरादित्वात् (पा० ६।३।१०९) सलोपे फकारादिरपीति" ति **स्वामी** । "फटेत्यपि क्वचित् पाठः"––इति **भट्टः** ।[765]

फणा

फणति 'फणा' । फणगतौ । "द्वयो" रित्यनेन स्फटाया अपि संबन्धः इति **स्वामी** ॥ **द्वे फणायाः** ॥२२२॥

कञ्चुकः

समाविति । कञ्चते । कचि दीप्तिबन्धनयोः । "पुंसी" (पा० ३।३।११८) ति घः । "समि कसेः" (उ० २।२९) इत्यादिना बाहुल्यादतोऽप्युकन् । 'कञ्चुकः' ॥

निर्मोकः

निश्चयेन मुच्यते । कर्मणि घञ् (पा० ३।३।१९) 'निर्मोकः' ॥ **द्वे सर्पत्वचः** ॥

765 Printed editions of क्षीर° read—"फटेत्येके ।" They read "स्फटन्ति विशीर्यतेऽनया स्फटा । द्वयोर्वर्तमानायां स्फटायां फणापि द्वयोः । The passage ascribed to स्वामी by मुकुट is not from क्षीर° । It appears that भट्ट here is not identical with स्वामी° ।

क्षिवद्यन्ति प्राणान् मुञ्चन्ति अनेन । ञि क्षिवदा स्नेहनमोचनयोः । "पुंसी" (पा० ३।३।११८) ति घः । पृषोदरादित्वात् (पा० ६।३।१०९) दस्य डः । 'क्ष्वेडः' ।।

क्ष्वेडः

गिरति । गॄ निगरणे । पृषोदरादित्वात् (पा० ६।३।१०९) कलचि (उ० १।१०८)[766] बाहुलकाद् गुणे 'गरलम्' ।।

गरलम्

वेवेष्टि असृक्पथोपगतं कायम् । विष्लृ व्याप्तौ, विष विप्रयोगे वा । "इगुपधज्ञे"ति (पा० ३।१।१३५) के 'विषम्' ।' मूर्धन्यान्तम् । "गरले विषमम्भसि च स्त्रियामतिविषायाम्" इति **ऊष्मविवेकात्** । "पुंसि क्लीवे च" इति विषसन्निधावुक्तेर्विषमपि पुंसि क्लीवे च––इति **भट्टः**[767] **पञ्जिका च ।। त्रीणि विषस्य ।।**

विषम्

पुंसीति । काकोलो द्रोणकाकस्तद्वत् कृष्णवर्णत्वात् 'काकोलः' । ईषत् कोलति संस्त्यायति । "ईषदर्थे चे" (पा० ६।३।१०५) ति कादेशे 'काकोल' इति वा ।।

काकोलः

कालं यममपि कूटयतीति । कूट परिदाहे । चुरादिः । "कर्मण्यणि" (पा० ३।२।१) 'कालकूटः' । कालस्य मृत्योः कूटो राशिरिव 'कालकूटम्' इति तु **पञ्जिका** ।

कालकूटः

हलमिव आ समन्तात् हलति । आङ्पूर्वो हल विलेखने । पचाद्यच् (पा० ३।१।१३४) । 'हलाहलः' । केवलहलधातोर्हलपूर्वादचि (पा० ३।१।१३४) प्रज्ञाद्यणि (पा० ५।४।३८) 'हालहलो'ऽपीति त्रैरूप्यम् ।[768] तथाच––"हालाहलं हालहलं वदन्त्यपि हलाहलम्" इति **द्विरूपकोषः** । "गोनासगोनसौ हालाहलं हालहलं विषम्" इति **त्रिकाण्डशेषः** । काकोलादयस्त्रयः पुंसि क्लीवे च वर्तन्त इत्यर्थः ।।२२३।।

हलाहलः
(हालाहलः)
(हालहलः)

766 भट्टोजि has कल instead of कलच् ।

767 भट्ट here appears to be a different authority than क्षीर° । क्षीर°'s text has nothing like this.

768 There is nothing to show the three forms in the text and undoubtedly the scribes omitted some portion of the text through inadvertence. cf. हाला इव हलतीति 'हालाहलम्—क्षीर°, भानु°

सारोष्ट्रो देशभेदः । तत्र भव इति अध्यात्मादित्वात् ठञि (वा० ४।३।६०) 'सारोष्ट्रिकः' । दन्त्यादिः । "सुराष्ट्रशब्दात् सौराष्ट्रिक" इति तु **स्वामी** ।।

सारोष्ट्रिकः
(सौराष्ट्रिकः)

शुक्लिदेशे भवः । "दृतिकुक्षी" (पा० ४।३।५६) ति योगविभागात् ठञि 'शौक्लिकेयः' । तालव्यादिः ।।

शौक्लिकेयः

ब्रह्मणः पुत्रो 'ब्रह्मपुत्रः' । तथाच **याज्ञवल्क्यः**––"त्वं विष ब्रह्मणः पुत्र" (II. 110) इति ।।

ब्रह्मपुत्रः

प्रकर्षेण दीपयति । दीपी दीप्तौ । नन्द्यादित्वाल्ल्युः (पा० ३।१।१३४) । 'प्रदीपनः' । तदुक्तम्––"ब्रह्मपुत्रस्तु कपिलो मलयाद्रिभवः खरः । प्रदीपनस्तु दहनो रक्तवर्णोऽञ्जनाद्रिज" इति ।

प्रदीपनः

दरददेशे भवो 'दारदः' ।।

दारदः

प्रायेण वत्सान् नभ्नाति हिनस्तीति । णभ हिंसायाम् । कर्मण्यणि (पा० ३।२।१), वत्सस्य नाभिरिव [नाभिरस्य] "अच् प्रत्यन्ववपूर्वादि" (पा० ५।४।७५) ति योगविभागादचि वा 'वत्सनाभः' । अयं च सिन्दुवारपत्रसदृशपत्रः ।* **एते च षट् रूपभेदात् पुंसि** । एषां स्वरूपाणि ग्रन्थविस्तरभयात् न उक्तानि ।। **नवैतानि स्थावरविषभेदस्य प्रत्येकम् ।।२२४।।**

वत्सनाभः

विषेति । विषविद्यामधीते वेत्ति वा "तदधीत" (पा० ४।२।५९) इत्यणि "उत्तरपदस्य" (पा० ७।३।१०) इत्यस्य लक्षणत्वादप्युत्तरपदवृद्धिः । 'विषवैद्यः' ।।

विषवैद्यः

जाङ्गुलं विषम् । तद्योगाद् ग्रन्थोऽपि तथा । तदधीते तद्वेत्त्यर्थे (पा० ४।२।५९) वसन्तादित्वाद् (पा० ४।२।६३) उक्थादित्वाद्वा (पा० ४।२।६०) ठकि 'जाङ्गुलिकः' । चवर्ग्यादिः । जाङ्गुली विषविद्या विषघ्नो मन्त्रः । यथा–– "परीक्षितं समश्नीयाज्जाङ्गुलीभिर्भिषग्वृतः" इति । तां वेत्त्यधीते वा । पूर्ववट् ठक् । तया दीव्यतीति "तेन दीव्यती" (पा० ४।४।२) त्यादिना ठगिति तु **पञ्जिका ।। द्वे गारुडिकस्य ।।**

जाङ्गुलिकः

* सिन्धुवारपत्रसदृशः––रघुनाथ ।

व्यालं गृह्णाति । "नन्दिग्रही" (पा० ३।१।१३४)
व्यालग्राही त्यादिना णिनिः । 'व्यालग्राही' ।।

अहेः सर्पस्य तुण्डं मुखम् । तेन दीव्यतीत्यर्थे "तेन दीव्यती"
अहितुण्डिकः (पा० ४।४।२) त्यादिना ठकि संज्ञापूर्वकत्वाद्वृद्ध्यभावे, योध-
(आहितुण्डिकः) यतोऽहेस्तुण्डमस्यायत्तत्वेनास्तीति" अत इनिठना" (पा० ५।२।११५) विति ठनि वा अहितुण्डिको ह्रस्वादिः । तथाच––"व्यालग्राहोऽहितुण्डिक" इत्य**मरमाला** । "करोति कं निर्विषमाहितुण्डिक" इति दर्शनाद्दीर्घादिरपीति **सर्वानन्दः**[769] (?) [**सर्वधरः**] । द्विरूपकोषेऽपि ह्रस्वदीर्घादी ।। **द्वे भिक्षार्थं सर्पखेलकस्य** ।।(२२५क)।।

।।०।। **भोगिवर्गविवरणम्** ।।०।।

।।०।। **पातालभोगिवर्गविवरणम्** ।।०।।

१० । नरकवर्गः ।

स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम् ।।२२५।।
तद्भेदास्तपनावीचिमहारौरवरौरवाः ।
संघातः[770] कालसूत्रञ्चेत्याद्याः सत्त्वास्तु नारकाः ।।
२२६।।
प्रेता वैतरणी सिन्धुः स्यादलक्ष्मीस्तु निर्ऋतिः ।*
विष्टिराजूः कारणा तु यातना तीव्रवेदना ।।२२७।।
पीडा बाधा व्यथा दुष्ख[771]ममानस्यं[772] प्रसूतिजम् ।
स्यात् कष्टं कृच्छ्रमाभीलं त्रिष्वेषां भेद्यगामि यत् ।।२२८।।

।।०।। **इति नरकवर्गः** ।।०।।

769 This could not be traced in the printed edition of सर्वा° ।
770 संहारः—भानु°, क्षीर°
771 दुःख––others
772 आमनस्यं—क्षीर°, भानु° ।
* अलक्ष्मीर्निर्ऋतिः समे—सर्वा°

नरक एव 'नारकः' । प्रज्ञाद्यणि (पा० ५।४।३८) **नारकः**
"अन्येषामपि दृश्यत" (पा० ६।३।१३७) इति दीर्घत्वे नारकः ।।

नरतीति । नॄ नये । "कृञादिभ्यः संज्ञायां वुन्" (उ० ५।३५)। 'नरकः' । "नराः कायन्त्यत्र । मूलविभुजादि- **नरकः**
त्वात् के (वा० ३।२।५) नरक" इति तु **स्वामी** ।।

निर्गतोऽयाच्छुभावहविधेः 'निरयः' ।। **निरयः**

दुःखेन गतिरस्यां 'दुर्गतिः' । स्त्री ।। **चत्वारि नरकस्य** ।। **दुर्गतिः**
२२५।।

'तद्भेदाः' नरकभेदाः । तपतीति 'तपनः' । नन्द्यादिः **तपनः**
(३।१।१३४) ।।

"वीचिः स्वल्पतरङ्गे स्यादवकाशे सुखेऽपि च" इति
विश्वः । नास्ति वीचिः सुखमत्र 'अवीचिः' । ह्रस्वादिः । **अवीचिः**
पुंलिङ्गस्तपनादिसाहचर्यात् । "अवीचिं गाहन्ते हुतवहशिखापूरितमपी"ति **शिल्पलेख**––इति **सर्वधरः**, **स्वामी***, **पञ्जिका** च ।।

महान् रौद्रो रवोऽत्र 'महारौरवः' । पृषोदरादिः (पा० **महारौरवः**
६।३।१०९) ।।

एवं रौद्रो रवोऽत्र 'रौरवः' ।। **रौरवः**

संघातयन्त्यत्र 'संघातो' हननमत्र वा 'संघातः' । कवर्ग- **संघातः**
मध्यः । 'संहार' इति चेत्यन्ये ।। **(संहारः)**

कलयन्त्यनेन । कल संख्याने । ण्यन्तादेरच् (पा०
३।३।५६) । कालश्च तत् सूत्रञ्चेति 'कालसूत्रम्' । काल- **कालसूत्रम्**
सूत्रेण संसूत्र्य क्रकचेन दारुवत् पाट्यन्ते यत्र तत् 'कालसूत्रम्' । "कालान्ययोमयाणि सूत्राण्यत्र" इति तु **स्वामी** ।। आद्येन प्रसर्जन-प्रकल्पन-शाल्मली-तप्तवालुक-प्रतापनासिपत्रादीनां ग्रहणम्(क) ।। **नरकभेदानां पृथक् पृथक्** ।।

'नरकस्थाः सत्त्वाः' जन्तवः । शेषेऽण् (पा० ४।२।९२) भवार्थे (पा० ४।३।५३) वा । 'नारकाः' ।।२२६।।

* Found in सर्वा° and not in क्षीर°
(क) "असिपत्रवनं घोरं कृमिभक्ष्यो हिमोत्कटः" इत्यादिः—रघुनाथ ।

प्रेताः

प्रकर्षेण इता गताः 'प्रेताः' ।। **एकं नरकस्थ-प्राणिनाम् ।।**[773]

वैतरणी (वैतरणिः)

विरुद्धं तरणं वितरणम् । तद् यस्या अस्ति । ज्योत्स्नादित्वादणि (वा० ५।२।११४) 'वैतरणी' । "वितरणेन दानेन तीर्यते" । "शेष" (पा० ४।२।९२) इत्यणि वैतरणी" त्यन्ये । "वितरणौ विसूर्ये पाताले भवा । अण् (पा० ४।३।५३) । वैतरणी ।" वितरणिर्विनौका । ततः "प्रज्ञाद्यणी"ति तु (पा० ५।४।३८) **स्वामी** ।[774] **रामदासेन** तु 'वैतरणि'रिति ह्रस्वाव्युत्पन्न एव शब्दो दर्शितः ।।

'सिन्धु'र्नदी । तथाच **त्रिकाण्डशेषः**—–नारका जन्तवः प्रेता नदी वैतरणिः[775] स्मृता" इति ।। **एकं नरकनद्याः ।।**

अलक्ष्मीः

स्यादिति । विरुद्धा लक्ष्मीः 'अलक्ष्मीः' ।।

निऋर्तिः

निश्चितमर्यते । कर्मणि क्तिन् (पा० ३।३।९४) । 'निर्ऋतिः' । "निश्चिता ऋतिः पीडा अत्र 'निर्ऋतिः' " इति तु **पञ्जिका** । "ऋतिर्गतौ घृणायाञ्च स्पर्धायाञ्च शुभेऽपि च" इति **रभसः** । निर्गता ऋतेः शुभात् 'निर्ऋति' रिति वा ।। **द्वे इहालक्ष्म्याः ।।**

विष्टिः

विष्टिरिति । वेतनेन विमुच्यतेऽनेन ।[776] विष्लृ विप्रयोगे । करणे क्तिन् (वा० ३।३।९४) । 'विष्टिः' ।।

आजूः (आजूर्)

आजायते । आङ्पूर्वाज्जनेः "भ्रमेश्च डूः" (उ० २।६८) इति बाहुलकादतोऽपि डूः । 'आजूः' । दीर्घान्ता । आङि जुरी जीर्णे इत्यतः "क्विब्वची" (वा० ३।२।१७८) ति क्विप् । 'आजू' रेफान्तापि—–**पञ्जिका स्वामी*** च । द्वे स्त्रियौ । **द्वे वेतनेन विना कर्मकरणे "वेच" इति ख्याते ।**(क) **भट्टस्वामिनि**—–

773 भानुजि reads द्वे । शिवदत्त supports—मुकुट ।

774 ततः प्रज्ञाद्यणि etc. not found in the printed editions of क्षीर° ।

775 Variant वैतरणी ।

776 वियुज्यते—B. विष्यते (वियुज्यते)—इति रायः—रघुनाथ ।

* Not found in क्षीर°

(क) "द्वे निर्मूल्यकर्मकरणे—इति मुकुटः"—भानु° ।

"हठादभृतिकः क्लेशो विष्टिराजूश्च (कीर्त्यते)" इति जातरूपः ।[777] दुःखहेतुत्वादस्य[778] दुःखप्रकरणे निबन्धः । "**भद्रनाम्नः** करणस्य एते द्वे" इत्येके ।।

कारणा

कृञ् हिंसायाम् । यत निकारोपस्कारयोः । इत्येताभ्यां ण्यन्ताभ्यां "ण्यासे"ति (पा० ३।३।१०७) युचि 'कारणा', 'यातना' च ।।

यातना

तीव्रवेदना

विद वेदनाख्याननिवासनेष्वित्येतस्य पूर्ववद् युचि (पा० ३।३।१०७) 'तीव्रवेदना' । अर्थकथनमेतदित्येके । तन्मते द्वे नाम्नी ।। **त्रीणि गाढवेदनायाः ।।२२७।।**

पीडा

पीडनं 'पीडा' । पीड अवगाहने इत्यतश्चौरादिकाद् युचि (पा० ३।३।१०७) प्राप्ते भिदादिपाठात् (पा० ३।३।१०४) अङ्।।

बाधा (आबाधा)

बाधेति । बाधृ विलोडने । "गुरोश्च हल" (पा० ३।३।१०३) इत्यकारः । आङ्पूर्वोऽपि दृश्यते । "आबाधा वेदना दुःखम्" इति **हलायुधः ।।**

व्यथा

व्यथते । "घटादयः षितः" (गण०) इति षित्त्वातिदेशात् "षिद्भिदादिभ्योऽङ्" (पा० ३।३।१०४) । 'व्यथा' ।।

दुष्खम् (दुःखम्)

दुर्निन्दितं खनतीति "अन्येभ्योऽपि दृश्यत" (वा० ३।२।१०१) इति डः । "इदुपधस्ये"ति षत्वम्" (पा० ८।३।४१)—–इति **धातुपारायणम् । जिनेन्द्रवुद्धिस्तु** "षात् पदान्ताद्" (पा० ८।४।३५) इत्यत्र दुष्खेन दुष्खानामित्यत्र णत्वप्रतिषेधम् आह । "सुखदुःख तत्क्रियायामिति चौरादिकात् पचाद्यचि (पा० ३।१।१३४) वा सविसर्गदुःखम्" इति तु **चान्द्राः कालापाश्च** । "काले तडिल्लताजालमेघमण्डलमण्डिते । कान्तः सर्वगुणोपेतो बालेन्दुः खे न लभ्यते" इति प्रयोगश्च दृश्यते ।।*

777 चेति कीर्त्यते इति कोषान्तरात्—C. This tends to show that भट्टस्वामी is a different authority other than क्षीर° though भट्ट sometimes seems to be identical with क्षीर° ।

778 दुष्ठु हेतुत्वाद्—A.

* रघुनाथ ascribes it to रुद्रदास । It is according him an illustration of बिन्दुच्युतकालङ्कार which is defined as follows : "अन्योऽप्यर्थः स्फुटो यत्र मात्रादिषु च्युतेष्वपि । प्रतीयते विदुस्तज्ज्ञास्तन्मात्राच्युतकादिकम् ।।"

मानसाय हितं मानसे साधु वा । उगवादिभ्यो यत् (पा० ५।१।२)। मानस्यम्। न मानस्यम् 'अमानस्यम्' इति ह्रस्वादि। "प्रसूतिजममानस्यं कृच्छ्रं कष्टं कलाकलम्" इति **वाचस्पतिः**। "अन्येषामपी" (पा० ६।३।१३७) ति दीर्घत्वे "आमानस्यं" द्विदीर्घमपी" ति––**सुभूतिः** ।। — **अमानस्यम्** (**आमानस्यम्**)

प्रसूतिजम् — प्रसूतेरुत्पत्तेर्जातं 'प्रसूतिजम्'। पूर्ववड् डः (पा० ३।२।९८) ।।

कष्टम् — 'कष्ट' मिति। कषति। कष हिंसायाम्। क्तः (पा० ३।२।१०२)। "कृच्छ्रगहनयोः कष" (पा० ७।२।२२) इतीडभावः ।।

कृच्छ्रम् — कृन्ततीति। कृती छेदने। "कृतेश्छः क्रू चे"(क) उ० २।२१) ति रक् छश्चान्तादेशः। 'कृच्छ्रम्'।

आभीलम् — इल स्वप्ने अभिपूर्वः।(ख) "इगुपधे"ति (पा० ३।१।१३५) कः। "अन्येषामपी" (पा० ६।३।१३७) ति दीर्घः। 'आभीलम्'––इति **सर्वधरः**। "आ समन्ताद्भियं लाति इत्याभीलम्"––इति तु **स्वामी**। 'एषां' मध्ये यद् 'भेद्यगामि' द्रव्यगामि तत् 'त्रिपु'। कष्टा सेवा। कष्टोऽग्निः। कष्टं व्याकरणम् ।। **नव दुःखस्य ।।२२८।।**

।।०।। नरकवर्गविवरणम् ।।०।।

११। वारिवर्गः।

समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः।
उदन्वान् उदधिः सिन्धुः सरस्वान् सागरोऽर्णवः ।।२२९।।
रत्नाकरो जलनिधिर्यादःपतिरपांपतिः।
तस्य प्रभेदाः क्षीरोदी लवणोदस्तथापरे ।।२३०।।

(क) "कृतेश्छक्रू च"—उज्ज्वलदत्तः।
(ख) इल स्वप्नक्षेपणयोः—पा° धा°।

आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् ।।
पयः कीलालममृतं जीवनं भुवनं वनम् ।।२३१।।
कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम्।
अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुसम्बरम्[779] ।।२३२।।
मेघपुष्पं घनरसस्त्रिषु द्वे आप्यमम्मयम्।
भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिरथोर्मिषु ।।२३३।।
महत्सूल्लोलकल्लोलौ स्यादवर्तोऽम्भसां भ्रमः।
पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियः ।।२३४।।
वक्राणि[780] पुटभेदाः स्युर्भ्रमाश्च जलनिर्गमाः।
कूलं रोधश्च तीरञ्च प्रतीरञ्च तटं त्रिषु ।।२३५।।
पाराऽवारे पराऽर्वाची तीरे पात्रं तदन्तरम्।
द्वीपोऽस्त्रियामन्तरीपं यदन्तर्वारिणस्तटम् ।।२३६।।
तोयोत्थितं तत् पुलिनं सैकतं सिकतामयम्।
निषद्वरस्तु जम्बालः पङ्कोऽस्त्री शादकर्दमौ ।।२३७।।
जलोच्छ्वासाः परीवाहाः कूपकास्तु विदारकाः।
नाव्यं त्रिलिङ्गं नौतार्ये स्त्रियां नौस्तरणिस्तरिः ।।२३८।।
उडुपं तु प्लवः कोलः स्रोतोऽम्बुसरणं स्वतः।
आतरस्तरपण्यं स्याद् द्रोणी काष्ठाम्बुवाहिनी ।।२३९।।

चन्द्रोदये आपः सम्यगुन्दन्ति क्लिन्दन्त्यत्र। उन्दी क्लेदने। "स्फायितञ्ची" (उ० २।१३) ति रक्। 'समुद्रः'। उक्तं च **वायुपुराणे**––"अपां चैव समुन्नेन* स समुद्र इति स्मृतः" इति। "मुद्रा मर्यादा। तया सह वर्तत" इति तु **पञ्जिका**। "सम्यगुद्गतो रोऽग्निरत्र" इति **कौमुदी**। मुदं रान्ति ददति कप्रत्यये (पा० ३।२।३) मुद्राणि रत्नादीनि। तैः सह वर्तत इति वा ।। — **समुद्रः**

आपो धीयन्तेऽत्र। "कर्मण्यधिकरणे चे" (पा० ३।३।९३) ति किः। 'अब्धिः' ।। — **अब्धिः**

779 शम्बरम्—others
780 चक्राणि—क्षीर°
* समुन्देन—A. B.

अकूपारः **(अकूवारः)**

अकुत्सितं पारमस्य 'अकूपारः'। "अन्येषामपी" (पा० ६।३।१३७) ति दीर्घः। "न कुं पृथ्वीं पिपर्ति पूरयति मर्यादापालनादिति अकूपार" इति तु स्वामी। 'अविद्यमाना कुः पृथ्वी पारेऽस्य" इत्यन्ये। न कुं पृथ्वीं वृणोति। अणि (पा० ३।२।१) पूर्ववद् दीर्घे "अकूवार" इत्यन्ये ।।

पारावारः **(पारापारः)**

पारमावृणोति। कर्मण्यणि (पा० ३।२।१) 'पारावारः'। पाराऽवारावस्य स्त इत्यचि (पा० ५।२।१२७) वा। पारमपां राति न दत्त इति पृषोदरादित्वे (पा० ६।३।१०६) 'पारापारः'। पवर्ग्यादिमध्यः। तथाच **हरिप्रबोधे** सन्दष्टयमकम्––सतमाः सतमालतया पारापारायतः सदावोऽदावः। लोकालोकानुकृतिः सह्यः स ह्ययमनभ्रकूटैः कूटै"(क) रिति **सर्वानन्दः पञ्जिका च**। पारमपारमस्य 'पारापार' इत्यन्ये ।।

सरित्पतिः

सरितां नदीनां पतिः 'सरित्पतिः' ।।

उदन्वान्

उदकानि सन्त्यत्र "उदन्वानुदधौ चे" (पा० ८।२।१३) ति निपातनाद् 'उदन्वान्'। तान्तः ।।

उदधिः

उदकानि धीयन्तेऽत्र इति पूर्ववत् किः (पा० ३।३।९३)। "पेषंवासवाहनधिषु च" (पा० ६।३।५८) इति उदकस्य उदादेशः। "संज्ञायामप्युदादेश उदधिर्घट इत्याद्यपि" इति भट्टः ।।[781]

सिन्धुः

स्यन्दन्ते आपोऽत्रेति "स्यन्देः संप्रसारणं धश्चे" (उ० १।१२) ति उप्रत्यये 'सिन्धुः'।

सरस्वान्

"सरो नीडे तडागे च" इति **रुद्रः**। तद्योगाद् भूम्नि मतुप् (पा० ५।२।९४)। "तसौ मत्वर्थे" (पा० १।४।१९) इति भसंज्ञा। न पदकार्यम्। 'सरस्वान्' ।।

(क) . . .पारापारास्तः सदारोदारः. . .—शिवदत्तः।

781 This cannot be traced in क्षीर°। Probably this is from भट्टस्वामी। See ante., f. n. 777.

सागरः

गर्भस्थे तु एतन्मात्रे सपत्न्या गरो दत्तः। ततो गरेण सह सद्योजातत्वात् सगरः। सगरेणावतारितत्वात् "तस्येद" (पा० ४।३।१२०) मित्यण्। 'सागरः'। "क्षीरोदादिष्वपि उपमासागर इति व्यपदेश" इति तु भट्टः ।।[782]

अर्णवः

अर्णांसि अत्र सन्तीति। "अर्णसो लोपश्चे" (वा० ५।२।१०९) ति वः सलोपश्च। 'अर्णवः' ।।२२९।।

रत्नाकरः

रत्नानामाकर उत्पत्तिस्थानं 'रत्नाकरः' ।।

जलनिधिः

जलनिधिरुदधिवत्। पर्यायग्रहणात् 'जलधिपयोधिपयोनिध्यादयः'। जलनिधेश्चान्योपसर्गनिवृत्त्यर्थमुपादानम् ।।

यादःपतिः

यादसां जलजन्तूनां पतिः 'यादःपतिः' ।।

अपांपतिः

'अपां पतिः'। बहुलग्रहणात् (पा० ६।३।१४) षष्ठ्या अलुक्। "वाक्येनैव नाम" इति **सर्वधरः**।। 'मकरालयवारिराशिगङ्गाधरोर्मिमालीन्दुजनकादयो'ऽप्यत्रैव ।। **पञ्चदश समुद्रस्य** ।।

क्षीरोदः

तस्येति। 'तस्य' समुद्रस्य 'प्रभेदाः' प्रकाराः। "उत्तरपदस्य च" (वा० ६।३।५७) इत्युदादेशे 'क्षीरोदः' ।।

लवणोदः

एवं 'लवणोदः' ।।

'तथापर' इति। 'तथा'शब्दः समुच्चये प्रकारे वा। 'अपर' इति सप्त।[783] तदुक्तम्––

"क्षीरोदेक्षुरसोदश्च सुरोदश्च घृतोदधिः।
दध्युदः क्षीरपूर्णश्च स्वादूदः सप्तमः स्मृतः ।।" इति।

समुद्रविशेषाणां पृथक् पृथक् ।।२३०।।

आपः **(आपस्)**

आप इति। आप्नुवन्ति व्याप्नुवन्तीति "आप्नोतेर्ह्रस्वश्चे" (उ० २।५८) ति क्विप् ह्रस्वत्वं च। क्विपि (?)* "अप्त्रा"दि (पा० ६।४।११)-सूत्रेण दीर्घः। 'आपः'। स्त्रियां बहुत्वे 'अप्'-शब्दः। आप्नोतेरसुनि (उ० ४।२०७) 'आपः'। क्लीवं सान्तं च। "आपोभिर्मार्जनं कृत्वा।"(क)

782 Not to be found in क्षीर°।

783 पञ्च—A. "लवणेक्षुसुरासर्पिर्दधिदुग्धजलान्तका"––रघुनाथ।

(क) कुर्यात्—रघुनाथ। * जसि ?

इति **स्मृतेः**। "कबन्धमुदकमापोनीरवार्वारिनारं" क्लीवमपि **संसारावर्तादिः** ।।(क)

वार्

निम्नोन्नतं वारयतीति वृञो ण्यन्तात् क्विप् (पा० ३।२।१७८)। 'वाः'। रेफान्तम्। "परेण साहचर्यात् क्लीव"मिति **कौमुद्यादयः**। रूपं च--"वाः, वारी, वारि" इति। प्रयोगश्च --"वारि पतन्ति नदन्ति मयूरा" इति **घटकर्परः**।(ख) पूर्वेण साहचर्यात्(ग) स्त्रीत्वं वार--इति तु **कलिङ्गः**। "पूर्वोत्तर-साहचर्यात् स्त्रीक्लीवयोर्वार्" इति(घ) तु पञ्जिका ।।

वारि

निम्नोन्नतं वारयति। वृञो ण्यन्तात् "वसिवपियजि-राजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ्" (उ० ४।१२४)। 'वारि'। क्लीवम् ।।

सलति निम्नमिति। सल गतौ। "सलिकली" (उ० १।५५) त्यादिना इलचि 'सलिलम्'। अनिलवत् (स्वर्ग० ५)।।

सलिलम् **(सरिलम्)** **(सलिरम्)**

सलिलं दन्त्यादि। रलयोरेकत्रस्मरणात् "सरिलं सलिरं सलिलम्" इति **वाचस्पतिः** ।।

कमलम्

काम्यत इति। कमु कान्तौ। वृषादित्वात् (उ० १।१०८) कलच्। 'कमलम्'। कमलमित्यखण्डमेव जलनाम। [न] तु "कम् अल"मिति द्वे नाम्नी। "कमला श्रीर्जलं पद्मं कमलं कमलो मृग" इति **धरण्यादिदर्शनात्** ।।

जलम् **(जडम्)**

जलयति अन्तर्गतं वस्तु अपवारयति। जल अप-वारणे।[784] चुरादिः। ततः पचाद्यचि (पा० ३।१।१३४) 'जलम्'--इति **सर्वानन्दः**। "जडत्वात् 'जलम्'। डलयोरै-क्यात् लत्वम्" इति तु **कलिङ्गः**। 'जडं' च। "स जडात्मा-पटुर्भवान्" (KA. II. 185) इति **दण्डी** ।।

पयः

पीयत इति "पीयतेरच्च" (उ० ४।१८८) इत्यसुनि।[785] पीङोऽसुनि वा 'पयः' ।।

(क) "उदकापः पयोऽम्बूनि नीरवार्वारिसम्बर मिति संसारावर्ते क्लीवत्वम्"—रघुनाथ।
(ख) पूर्वंघटकर्परः—शिवदत्तः।
(ग) पूर्वसाहचर्यात्—शिवदत्तः।
(घ) वारिति तु—A.
784 जल धान्ये—सर्वा°।
785 This rule is not found in उणादि। दशपादी (६।५०) has "पिबतेरि च"

कीलालम्

कील्यत इति। कील बन्धे। "तमिविशिबिडि" (उ० १।११७) इत्यादिना कालन्। बाहुलकात् कीलेरपि। 'कीलालम्' ।।

अमृतम्

'अमृतम्' उक्तम् ।।

जीवनम्

जीव्यतेऽनेनेति करणे ल्युट्। (पा० ३।३।११६)। 'जीवनम्' ।।

भुवनम्

भवत्यस्मादिति "भूसूधूभ्रस्जिभ्यश्छन्दसी" (उ० २।८०) ति बाहुलकाद् भाषायामपि क्युनि 'भुवनम्' ।।

वनम्

वनति संभजते। वन संभक्तौ। पचाद्यच् (पा० ३।१।१३४)। 'वनम्'। वन्यत इति वनु याचने। भुवनवद् बाहुलकात् क्युनि (उ० २।८०) "अनुदात्तोपदेशे" (पा० ६।४।३७) त्यादिना नलोपे 'वनम्' इति **उज्ज्वलदत्तः** ।। २३१।।

कबन्धम् **(कमन्धम्)**

कं शरीरं बध्नाति इति "कर्मण्यण्" (पा० ३।२।१)। 'कबन्धम्'। **वासवदत्तायाम्**--"समरसरसि नृत्यत्कबन्धे", **माघे** च--"चलितोद्धतकबन्धसंपद"[786] (Śisu, 16/67) इति प्रयोगात् कबन्धमित्यखण्डं नाम। "कम् अन्ध" मिति नाम-द्वयम् इत्येके।(क) मकारमध्यं 'कमन्ध' मित्यपरे ।।

उदकम्

उनत्तीति(ख) 'उदकम्' (उ० २।३९) इति उणादि-निपातनम्। उदकसमानार्थ उदशब्दोऽस्ति।(ग) तथाच-- "प्रसन्नोदम्"--इति असंज्ञायामपि उदशब्दः प्रयुज्यते--इति **कज्जटः** (पा० ६।३।५७) ।।[787]

पाथः

पीयत इति "उदके थुक् च" (उ० ४।२०३) इत्यसुन्।[788] 'पाथः' ।।

786 Mss. read चलितोद्धत but मल्लिनाथ reads चलितोर्ध्वं।
(क) रघुनाथ ascribes it to सुभूति।
(ख) "यत्तु उन्दति इति विगृहीतवन्तौ स्वामिमुकुटौ"—भानु°।
(ग) रघुनाथ ascribes it to सुभूति।
787 अप्रसन्नोदं प्रसन्नोदमित्यसंज्ञायामपि प्रयोगाद् उदशब्दोऽप्यस्तीति—सुभूः—रघुनाथ। तथाच असंज्ञायामसन्नोदं प्रसन्नोदमिति कज्जटः—A.
788 "उदके थुट् च"—भट्टोजि, उज्ज्वल°, दशपादी।

पुष्करम् 'पुष्करम्'। मेघे* उक्तम् (व्योम° ६७)॥

सर्वतोमुखम् समविषमचलनात् सर्वतो मुखान्यस्येति 'सर्वतोमुखम्'॥

अमति। अम गतौ। "अमेर्भुक् च" (उ० ४।२१२)
अम्भः इत्यसुन् भुगागमश्च। 'अम्भः'॥[789]

ऋच्छतीति। ऋसृ गतौ। "उदके नुट् च" (उ०
अर्णः ४।१९६) इत्यसुन् नुडागमश्च। 'अर्णः'॥

तायते पालयतीति। तायृधातोः पचाद्यचि (पा०
३।१।१३४) पृषोदरादित्वादोकारे सति (पा० ६।३।१०९)
तोयम् 'तोयम्'॥

पीयत इति पिबतेरनीयर् (पा० ३।१।९६)।
पानीयम् 'पानीयम्'॥

नीर्ते। ईर गतौ। निपूर्वाद् "इगुपधे"ति (पा०
३।१।१३५) के, नीयतेः "स्फायी" (उ० २।१३) ति रकि
नीरम् वा 'नीरम्'। निम्नम् ईर्ते इति वा 'नीरम्'। पृषोदरादिर्वा
(पा० ६।३।१०९)। "निसर्गत उद्गतो रोऽग्निरस्मादिति
वा। "ढ्रलोपे" (पा० ६।३।१११) इति दीर्घेण नीरम्"
इति तु **स्वामी**॥[790]

क्षयति। क्षि निवासगत्योः। "शुसिक्षिमीनां दीर्घश्चे"
(उ० २।२५) ति रक् (?) [क्रन्], दीर्घत्वं च।[791]
क्षीरम् 'क्षीरम्'॥

अम्बते। रवि-लवि-अवि स्रंसने। "भृमृशीतृचरित्सरी"
अम्बु (उ० १।७) त्यादिना बाहुलकादतोऽप्युः। 'अम्बु'॥

सम्बतीति। संब संवरणे। शंब च। आभ्यां "ऋच्छेररन्"

---

789 In उणादि we have "अमेर्हुक् च" which gives अंहः and not अम्भः। So, सर्वा° derives अम्भः from the root आप् with असुन् by the rule 'उदके नुम्-भौ च" (उ० ४।२०९) and भानु° follows him.

790 Not found in क्षीर°s printed ed.

791 भट्टोजि has शुसिचिमीनां (मिञां) दीर्घश्च। The suffix is क्रन् and not रक्। उज्ज्वल° derives 'क्षीर' with ईरन् by the rule "घसेः किच्च" (४।३४) from the root घस् (=अद्)। cf. दशपादी (८।७६)। * व्योम्नि ?

(उ० ३।१३१) इति बाहुलकादरन्।[792] 'संवरम्'। दन्त्यादिः। **सम्बरम्**
तालव्यादि च इति **सर्वधरः पञ्जिकाच**॥२३२॥ **(शम्बरम्)**

मेघात् पुष्यति। पुष्प विकसने। पचाद्यच् (पा०
३।१।१३४)। मेघस्य पुष्पमिवेति वा 'मेघपुष्पम्'॥ **मेघपुष्पम्**

घनस्य रसः 'घनरसः'। "पुंस्त्वं प्रमादादि"ति **कलिङ्गः**। **घनरसः**
तथाच—"अप्स्वपि शम्बरपिप्पलकुशकमलकाण्डविषवनपयांसि।
घनरसमम्बु क्षीरं घृतममृतं जीवनं भुवनम्" इति **रत्नकोषः**।
तदयुक्तम्। "पुंलिङ्गः स्याद् घनरसः सान्द्रनिर्यासनीरयो"
रिति **रभसात्**, "अम्भोर्णस्तोयनीरं च नारं घनरसः पुमान्"
इति **शब्दार्णवाच्च**। **'इरा-शर-उडु-कृपीट-कन्दराद्या'श्चात्रैव**॥
सप्तविंशतिर्जलस्य॥

त्रीति। 'आप्यम्' इति साधने लक्षणाभावः। **चन्द्र-** **आप्यम्**
गोमी तु "आप्यञ्चे"ति विकारवयवयोर्यञा (चा० ३।३।१२३) **(आप्या)**
निपातितवान्। **पाणिनितन्त्रे** तु "तद्धिता" (पा० ४।१।७६)
इति बहुवचनमनुक्ततद्धितग्रहणार्थमिति तयोरेवार्थयोर्यञि
'आप्यम्'।[793] तथाच प्रयोगः—"वर्षद्भिरनिशं मेघैर्जगदाप्यमि-
वाभवत्" इति **स्वामी**।[794] स्त्रियाम् 'आप्या'॥

'अम्मय'मिति "नित्यमेकाच" (वा० ४।३।१४४) इति **अम्मयम्**
मयट्।* यदा "समूहवच्चे"ति (पा० ५।४।२२) मयट्, तदा **(अम्मयी)**
जलबहुलेऽपि वर्तते। स्त्रियाम् 'अम्मयी'। शरादित्वान्मयटि
(पा० ४।३।१४४) तु **कलिङ्गः**॥ **द्वे जलविकारस्य**
फेनादेः।

भङ्ग इति। भज्यते कूलमनेन। भञ्जो आमर्दने। घञि **भङ्गः**
(पा० ३।३।१९) कुत्वे (पा० ७।३।५२) 'भङ्गः'॥

---

792 भट्टोजि reads "ऋच्छेररः"। The suffix is अर and not अरन्। दशपादी (८।६१) however has अरन्। cf. "अरन्निति प्रमाद" इति पारायणीयम्—उज्ज्वल°

793 cf. कथं तर्हि "आप्यमम्मयम्" इति? तस्येदम्" (४।३।१२०) इत्यण्णन्तात् स्वार्थे ष्यञ्।—भट्टोजि on पा° ४।३।१४४।

794 Not found in the printed ed.

* "एकाचो नित्यम्" —भट्टोजि°, काशिका।

तरङ्गः तरत्यूर्ध्वं तिर्यक् प्लवते 'तरङ्गः'। तॄ प्लवनतरणयोः।
"**तरत्यादिभ्यश्च**"[795] (उ० १।११९) इत्यङ्गच् ॥

ऋच्छति ऊर्ध्वं तिर्यक् च। ऋ गतौ। "अर्तेरूच् च"
ऊर्मिः (उ० ४।४४) इति मिप्रत्ययः धातोरूकारश्च इति 'ऊर्मिः'।
दीर्घादिः। "ऊर्मिर्वा स्त्रियाम्" इति योजना। तथाच **वामनः**––
पुंलिङ्गस्त्रीलिङ्गयोर्वीचि[796]-मणियष्टिमुष्टयोऽशनित्रुटिशमिपाट-
लिशाल्मलितरणिश्रेण्यूर्मयो वस्तिश्चे"ति ॥

वीचिरिति। वा गतिगन्धनयोः। "वातेः किदि"
तीचिः,[797] कित्वादाकारलोपे 'वीचिः'। "विस्मयं चिनोतीति
वीचिः (वीची) 'वीचिः'। पृषोदरादि" (पा० ६।३।१०९) रित्यन्ये।
"स्त्रिया"मिति "ऊर्मिर्वा" इत्यनेन "वीचि"रित्यनेनापि
काकाक्षिवत् संबध्यते। तेन "वीचिर्नित्यं स्त्री" ति **स्वामी।**
पञ्जिकादौ तु "वा स्त्रिया" मिति ऊर्मिवीचिभ्यां संबध्यते।
तेनोर्मिः वीचिः स्त्रियां पुंसि [च] वर्तते। "कृदिकारादि"
(वा० ४।१।४५) ति ङीषि "वीची" च। 'लहरिर्लहरी'
चात्रैव ॥ **चत्वारि स्वल्पतरङ्गस्य** ॥२३३॥

अर्थेति। रोडयति उन्मादयति जलम्। उत्पूर्वात्
रोडृलोडृ उन्मादने इत्यतः पचाद्यच् (पा० ३।१।१३४)।
उल्लोलः डलयोरेकत्रस्मरणात् लत्वम्। 'उल्लोलः'। "लोलयतीति
लोलः। पचाद्यचि (पा० ३।१।१३४) उद्गतश्चासौ
लोलश्चेति उल्लोल" इति **स्वामी** ॥[798]

कल्ल उल्लोल[799]-शब्दे। बाहुलकात् अतोऽप्योलच् (उ०
कल्लोलः १।६७)। 'कल्लोलः' ॥ **द्वे महातरङ्गस्य** ॥

795 त्रादिभ्यश्च—A. 796 मरीचि—B.

797 The सूत्र could not be traced in printed उणादि। भानु° derives it by the rule "वेञो डिच्च" (उ० ४।७२)।

798 क्षीर° derives—ऊर्ध्वं लोलयति। The derivation ascribed to स्वामी by मुकुट is rather curious. भानु° points out that this cannot be from क्षीर°। Does मुकुट wrongly ascribe it to स्वामी ? Does it belong to भट्टस्वामी ? Is it due to the fact that in क्षीर°'s text available to मुकुट it read as we have it in the above quotation ? 799 अव्यक्ते शब्दे—धातुपाठः।

चक्रवदपां भ्रम 'आवर्तः'। आङ्पूर्वाद् वृतेर्भावे घञ् आवर्तः
(पा० ३।३।१८) ॥ **एकं चक्राकारभ्रमणस्य** ॥

पृषेति। पर्षति सिञ्चति। पृषुवृषु सेचने। "पृषद्- पृषत्
बृहन्महज्जगच्छतृवदतिदेशश्च" (उ० २।८४)[800]। ['पृषत्]'
"पृषन्तीति बहुत्वं तान्तत्वाभिव्यक्तये। तदनुरोधादुत्तरत्रापी"
ति **स्वाम्यादयः।** न तु बहुवचनमतन्त्रम्। "पृषन्मृगे पुमान्
बिन्दौ न द्वयोः पृषतोऽपि ने"ति मेदिनीकारादिदर्शनात्।
"पृषन्तिबिन्दुपृषता" इति त्रिभिर्द्वन्द्व" इत्यन्ये। तथाच–– (पृषन्तिः)
"पयःपृषन्तिभिः स्पृष्टा वान्ति वाताः शनैः शनै" रिति
जाम्बवतीविजयकाव्यम् ॥[801]

"शॄस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्चे" ति
(उ० १।११) चकाराद् बिदि अवयवे अतोऽपि उः। बिन्दुः
'बिन्दुः' ॥

पृषता इति। पृषुवृषु सेचने। "पृषिरञ्जिभ्यां किद्" पृषताः
(उ० ३।१११) इत्यतच् किच्च। बिन्दवश्च पृषताश्चेति
'बिन्दुपृषताः' ॥

विप्रुष इति। प्रुषुप्लुषु स्नेहसेचनपूरणेषु।[802] संपदादि- विप्रुषः
त्वात् क्विप् (वा० ३।३।१०८)। बहुवचनं पूर्वानुरोधात्।
षान्तत्वाभिव्यक्तये वा ॥ **चत्वारि जलकणस्य। अन्यकणे**
तु उपचारात् ॥२३४॥

वेति। वञ्चति कुटिलीभवति। वञ्चु कौटिल्ये।
"स्फायितञ्ची"ति रक् (उ० २।१३)। "न्यङ्क्वादीनाञ्चे"
(पा० ७।३।५३) ति कुत्वम्। 'वक्राणि' ॥ वक्राणि

पुटं संश्लिष्टं भिन्दन्तीति 'पुटभेदाः'। पुट संश्लेषणे। पुटभेदाः
"कर्मण्यण्" (पा० ३।२।१) ॥ **द्वे नद्या "वाँक" इति ख्यातस्य** ॥

भ्रमेति। भ्रमन्ति जलान्यनेनेति घञि (पा० ३।३।१२१)
घे वा (पा० ३।३।११८) 'भ्रमः' ॥ भ्रमः

800 भट्टोजि reads—"वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च।"

801 रघुनाथ adds पृषन्तिरिदन्तोऽपि। जाम्ब. . . वाक्यम्—B.

802 पृषप्लषस्नेहनपूरणेषु—B.

जलनिर्गमाः

जलानि निर्गच्छन्त्येभिरिति "ग्रहवृदृ" (पा० ३।३।५८) इत्यादिना अप्। 'जलनिर्गमाः'। "सर्वत्र बहुत्वमफलं पूर्वानुरोधात् कृत"मिति पञ्जिका ।। **द्वे प्राकारे गृहादिभित्तौ च जलनिःसरणजालकस्य** ।।(क) तथाच **माघः**––"पूगकृतानि यत्र भ्रमागतैरम्बुभिरम्बुराशि"रिति (Śiśu 3/38) ।।

कूलम्

कूलमिति। कूलयतीति। कूल संवरणे। पचाद्यच् (पा० ३।१।१३४)। 'कूलम्' ।।

रोधस् (रोधः)

रुणद्धीति। असुनि (उ० ४।१८८) [सान्तः] 'रोधः'। अदन्तोऽपि। "रोधः प्रोक्तश्च रोधसी"ति **संसारावर्तात्** ।।

तीरम्

तीर्यते तरणकर्म समाप्यतेऽनेनात्र वा। पारतीर कर्मसमाप्तौ। चुरादिण्यन्ताद् "एरच्" (पा० ३।३।५६)। 'तीरम्' ।।

प्रतीरम्

'प्रतीरम्' इत्यन्योपसर्गनिवृत्त्यर्थम् ।।

तटम्

तटति उच्छ्रायं गच्छति। तट उच्छ्राये। पचाद्यच् (पा० ३।१।१३४)। 'तटम्'। 'त्रिष्वि'ति। स्त्रियां तटी, पुंसि तटः ।। **पञ्च कूलस्य ।।२३५।।**

पारम्

पारेति। परं तीरं 'पारम्' ।।

पार्यते क्रिया समाप्यतेऽत्र। पारतीर कर्मसमाप्तौ। चुरादित्वाद् "एरचि" (पा० ३।३।५६) 'पारम्' ।।

अवारम्

अर्वाक् तीरम् 'अवारम्'। अवार्यते गम्यत इदम्। अवपूर्वादर्तेर्घञि (पा० ३।३।१९) 'अवारम्'। "अर्धर्चादित्वाद् (पा० २।४।३१) द्वावपि अस्त्रियाम्" इति **स्वामी** ।[803] **यथाक्रमं परकूलावरकूलयोर्द्वे** ।।

पात्रम्

तयोः पारावारयोरन्तरं मध्यं 'पात्रम्'। पिबन्त्यत्रेति। पा पाने। "सर्वधातुभ्यः ष्ट्रन्" (उ० ४।१५८)। "दीर्घादाचार्याणाम्" (पा० ८।४।५२) इति द्वित्वनिषेधः ।[804]

(क) · · ·जालके। यथा माघे · · ·इति मुकुटः—शिवदत्तः। क्षीर° reads चक्राणि पुटभेदाश्च and makes the four synonymous.

803 Not traced in the printed ed.

804 दीर्घनिषेधः—A.

पान्त्यस्मात्। पातेः ष्ट्रनि (उ० ४।१५८) वा ।। **एकं (पारावारयोरन्तरस्य)** ।।

द्वीपः

द्वीप इति। 'वारिणोऽन्त'र्मध्ये 'यत् तटं' स्थानं तत्। द्विः[805] गता आपोऽस्मिन्निति (पा० ६।३।९७) 'द्वीपः' ।।

अन्तरीपम्

अन्तर्गता आपोऽस्मिन्निति 'अन्तरीपम्' ।। "ऋक्पू" (पा० ५।४।७४) रित्यादिना अच् समासान्तः। "द्व्यन्तरुपसर्गेभ्योऽप ईदि"ति (पा० ६।३।९७) अप्-शब्दस्यादेरीत्वेन च साधिते "अस्त्रियामि"ति काकाक्षिवत् द्वाभ्यां सम्बन्धः। "अन्तरीपेणैवेति केचिद्" इति **स्वामी** ।।[806] **द्वे वारिमध्यस्थलस्य ।।२३६।।**

पुलिनम्

"'तत्' क्षणतोयमुक्तं द्वीपं" पुलिनम् इति **सुभूतिः**। 'तत्' तटं क्रमेणोत्थितं 'पुलिनम्' ––इति तु **स्वामी**। पुलति महत्त्वं याति। पुल महत्त्वे। "वृजेः किच्चे" (उ० २।४७) ति चकारात् इनन्"[807] इति **स्वामी** ।[808] "बहुलमन्यत्रापीति (उ० २।४९) इनच् किच्च" इति तु **सर्वधरः** ।* **त्रिकाण्डशेषे** तु "पुलिनं द्वीपमुच्यते" इत्युक्तम् ।। **एकं जलादचिरोत्थितस्य तटस्य** ।। "जलमध्यस्थ-उच्छ्रित तटस्य"––इति तु **पञ्जिका** ।।

सैकतम्

'केन' जलेन सिता बद्धा। पृषोदरादित्वाद् (पा० ६।३।१०९) वर्णविपर्ययादिः। ततष्टाप् (पा० ४।१।४)। 'सिकता'––इति **धातुप्रदीपः**। ततः "सिकताशर्कराभ्याञ्च" (पा० ५।२।१०४) इति मत्वर्थीयोऽण्। "तदस्मिन्नस्तीति देशे तन्नाम्नीत्यर्थे (पा० ४।२।६७) "संकलादिभ्यश्च" (पा० ४।२।७५) इत्यञापि 'सैकत'मिति सिध्यती"ति **कलिङ्गः**।

805 द्वाभ्यां—A.

806 Not found in क्षीर°'s text.

807 इनच्––उज्ज्वल°, भट्टोजि।

808 Not found in क्षीर°'s text.

* "तलिपुलिभ्यां च" (उ० २।५३) इतीनन्—भानु°। मुकुट derives नलिनी with इनन् in analogy of पुलिन।

"मयड् वैतयोर्भाषायाम्" (पा० ४।३।१४३) इत्यादिना
सिकतामयम् मयटि प्रत्यये सति 'सिकतामयम्' ।। **द्वे वालुकामयतटस्य ।।**
निषद्वरः **निषेति ।** निषीदन्ति मज्जन्ति प्राणिनोऽत्र इति ।
षद्लृ विसरणगत्यवसादनेषु । "नौ सदेः (ष्वरज्)" (उ०
२।१२४) इति ष्वरच्प्रत्ययः । "सदिरप्रते" (पा० ८।३।६६)
रिति षत्वम् । 'निषद्वरः' ।।

जलेन वलत इति 'जम्बालः' । "कर्मण्यण्" (पा०
३।२।१) । "पृषोदरादि" (पा० ६।३।१०९) रिति **स्वामी** ।[809]
जमति ग्रसते धूलिम् । चमुछमुजमुझमु अदने । "शीङो धुक्-
लक्वलञ्वालनः" (उ० ४।३८) इति बाहुलकादतोऽपि
जम्बालः वालन् । 'जम्बालः' (?)"––इति **सर्वधरः*** ।

पंच्यते आश्रयभूमिरनेन इति । पचि विस्तारे ।
पङ्कः घञ् (पा० ३।३।१९) । 'पङ्कः' ।।

शीयते छिन्नो भवति [अनेन] । शद्लृ शातने ।
"ज्वलितिकसन्तेभ्यो ण" (पा० ३।१।१४०) इति णः ।
शादः 'शादः' । "श्यति तनूकरोति पादौ । "शाशपिभ्यां ददना"-
विति (उ० ४।९७) दप्रत्यये शाद"––इति तु **स्वामी** ।[810]
"शाद-शाड्वल-पलाश-शालय" **इत्यूष्मविवेकात्** शादस्ताल-
व्यादिः ।।

कर्दति कुत्सितं शब्दं करोति । कर्द कुत्सिते शब्दे ।
कर्दमः "कलिकर्द्योरम" (उ० ४।८४) इत्यमः । 'कर्दमः' । **पञ्च
कर्दमस्य ।।२३७।।**

उत्पूर्वश्वस प्राणने । घञि (पा० ३।३।१२१)
जलोच्छ्वासः 'उच्छ्वासः' । जलस्य उच्छ्वासः 'जलोच्छ्वासः' ।।

परिवहन्त्यनेन, परिवहनं वा । परिपूर्वाद् वहेः करणे
(पा० ३।३।१२१) भावे वा घञि (पा० ३।३।१८)
"उपसर्गस्य" (पा० ६।३।१२२) इत्यादिना वा दीर्घः ।
परीवाहः 'परीवाहः' । 'परिवाहो'ऽपि । "परिवाहो जगतः करोति

809 Not traced in क्षीर°'s text.
810 H. D. Sharma has no such text of क्षीर°।
* राय° seems to read जंवालः

किम्" (Śisu 16/51) इति **माघः** ।(क) "बहुत्वमतन्त्रम्" (परिवाहः)
इति **पञ्जिका ।।** "द्वे अभ्युपचयात् जलाशयेष्वसम्मित-[811]
समधिकजलस्योपायैर्निष्कासनस्य" इति स्वामी ।[812] "जलाशयं
परिपूर्य समधिकजलस्य सर्वतो वहनम्" इति कोक्कटः ।
"जलोत्थितस्य भूस्तुकस्य [भूपयोग्यवस्तुनः ?"] इति तु
कौमुदी ।* तत्र स्वामिमते––"उपार्जितानामर्थानां त्याग एव
हि रक्षणम् । तडागोदरसंस्थानां परीवाह इवाम्भसाम्"
(पञ्चतन्त्र, १।३)––इति प्रयोगः । कोक्कटमते तु लिखित-
माघोक्तिरेव प्रयोग इति ।।

कुत्सिता विवराः 'कूपका' इति सर्वधरः ।।[813] कूपकाः
कूपा इव वारि दारयन्तीति 'विदारका.' ।। "**द्वे** विदारकाः
शुष्कनद्यादौ जलावस्थानाय गर्तस्य" इति सर्वधरः । "तथा
जलस्थितस्य तरुशिलादेः स्रोतोद्वैधकारिण" इति कोक्कटा-
दयः ।[814] तथाच धरणिः––"कूपको जलतरङ्गसङ्गतप्रस्तरा-
दिषु च नौगुणद्रुमे" इति ।।

नेति । नावा तार्यम् इत्यर्थे "नौवयोधर्म" (पा०
४।४।९१) त्यादिना यत् । "वान्तो यि" (पा० ६।१।७९)
इत्यवादेशः । 'नाव्यम्' । स्त्रियां 'नाव्या' । पुंसि 'नाव्यः' । नाव्यम्
एकं नौगम्यदेशस्य ।।

नुद्यतेऽसाविति 'नौः' । णुद प्रेरणे । "ग्लानुदिभ्यां डौ" नौः
(उ० २।६४) रिति डौः । "टे" (पा० ६।४।१४३)
रित्युद्भागलोपः ।।

तरन्त्यनया । अशनिवदनिः (उ० २।१०३) (स्वर्ग° ४२) ।
'तरणिः' । "कृदिकाराद्" (ग० ४।१।४५) इति ङीषि तरणिः
'तरणी' च ।। (तरणी)

(क) पक्षे दीर्घाभावे––"परिवाहो जगतः करोति किम्" इति माघः ।—शिवदत्त ।
811 असम्मतः––A.
812 Not found in the printed ed.
* cf. "परीवाहो जलोच्छ्वासे महीभृद्योग्यवस्तुनि"—मेदिनिः ।
813 कूपाराः—A., ह्रदाः—B., "कुसिता विदाराः । कुत्सायां कः (पा० ५।३।७४)"—
भानु° ।
814 cf. "जलस्थे स्रोतोद्वैधकारिणि शिलादौ"—सर्वा° ।

तरन्त्यनया इति तरतेर्धातोः "अच इः" (उ० ४।१३८)। 'तरिः'। पूर्ववद् ङीषि (ग० ४।१।४५) 'तरी' च। "तरीषु तत्रत्यमफल्गु भाण्डम्" इति माघः (३।७६)॥ **त्रीणि नौकायाः॥२३८॥**

तरिः (तरी)

उडुपम् (उडुपः)

उडुर्जलम्। तथाच जलहस्तिनी[815]त्यर्थे "उडुकरिणी-सहस्रमन्तम्"[816] इति हरिप्रबोधः। "उडव आप"[817] इति भिक्षाकरगुप्तश्च। उडुनि जले, उडुनो जलाद् वा पाति इति (पा० ३।२।४) 'उडुपो' ह्रस्वादिर्ह्रमध्यश्च। "उडुपश्चन्द्रभेलयो" इति धरणिश्चन्द्रगोमी च।[818] अतः पुंस्यपि। "ऊदनोर्देशे" (पा० ६।३।९८) इति दीर्घकरणम् अनोरन्यतोऽपि यथा स्यात्। तेन "उत्तारयत्यप्सु इति उदुपपदादप्शब्दस्याकारस्योत्वे नैरुक्ते वर्णविकारे 'उडुप' इत्यपि"— इति उज्ज्वलदत्तः॥(क)

प्लवः

प्लवत(ख) इति 'प्लवः'। मेवृ प्लवगतौ (?)।[819] पचाद्यच् (पा० ३।१।१३४)। प्लवन्ते अनेन। "ऋदोरप्" (पा० ३।३।५७) वा॥

कोलः

कोलति घनीभवति। कुल संस्त्याने। "ज्वलिति' (पा० ३।१।१४०) इति णः। 'कोलः'। **त्रीणि भेलकस्य॥**

स्रोतः

'स्वतः' स्वेन आत्मना स्वयम् 'अम्बुनः' 'सरणं' गमनं 'स्रोतः'। स्वत इति स्वशब्दात् तृतीयान्ताद् "इतराभ्योऽपि

815 "तथाच जल"—omitted in B.

816 उडुहस्तिनीसहस्रवर्णम्—A. cf. "ददृशुश्चिरमुडुकरिणीसहस्रमन्तं सुधामदं सकलम्" इत्यत्र हरिप्रबोधे—सर्वा°।

817 उडुपमाप—B., "कीर्तिमतालंकारप्रणीतटीकायाम् "उडव आप" इति व्याख्यातम्"— सर्वा°।

818 "उडुपो हेलचन्द्रयोः" इति चन्द्रगोमी—सर्वा°।

(क) उज्ज्वल° under "आप्नोतेर्ह्रस्वश्च" (उ० २।५८) reads—"अद्भ्य उत्तारकः उदपः [उडुपः ?] प्लवः। "ऊदनोर्देशे" (पा० ६।३।९८) इति दीर्घनिर्देशादन्यत्रापि भवतीति "इको ह्रस्वोऽङ्यो गालवस्य" (पा० ६।३।६१) इत्यत्र भागवृत्तिः।"

(ख) प्लवतीति—A., B.

819 वेवृ प्लवगतौ—सर्वा°। The root here appears to be प्लुङ गतौ as suggested by भानु°। प्लु गतौ—C.

दृश्यन्त" (पा० ५।३।१४) इति तसिल्। स्रवतीति। स्रु गतौ। "स्रुरीभ्यां तुट् च" (उ० ४।२०१) इति असुन्। तुडागमः। 'स्रोतः'। दन्त्यसादि। "स्रोतःसद्यःसकलसलिलं सिह्लकं सृक्कसूनम्"(क) इति दन्त्यादिषूष्मविवेकात्॥ **एकं वेगेन जलवहनस्य॥**

आतरः (आतारः) (अनुतरः)

आ तरन्त्यनेनेति "ऋदोरप्" (पा० ३।३।५७)। 'आतरः'। 'आतारानुतरा'*वप्यत्र। "आतरस्तरपण्यं स्यादनुतरमन्वगमन्वक्षम्"[820] इति वोपालितः॥

तरपण्यम्

तरणं तरः। तरस्य पण्यं मूल्यं 'तरपण्यम्'॥ **द्वे नद्यादितरणे देयस्य कपर्दकादेः॥**

द्रोणी (द्रोणिः) (द्रुणिः) (द्रुणी)

द्रवतीति। द्रु गतौ। "वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नि"(ख) (उ० ४।५१) रिति निः। "कृदिकाराद्" (ग० ४।१।४५) इति ङीषि 'द्रोणी', 'द्रोणि'श्च। अतएव "मरकतमणिद्रोणि-सरला" इति पूर्वकविप्रयोगः। 'द्रुणि'श्च। द्रुणति। द्रुण हिंसाकौटिल्ये। "उगुपधात् कित्" (उ० ४।११९)। 'द्रुणिः'। ङीषि 'द्रुणी' च। "द्रुणी काष्ठाम्बुसेचनी द्रुणिश्च" इति रूपरत्नाकरः॥

काष्ठाम्बुवाहिनी

पुनः पुनरम्बु वहति 'अम्बुवाहिनी'। काष्ठघटिता अम्बुवाहिनी ['काष्ठाम्बुवाहिनी']। काष्ठ-(ग) मित्युपलक्षणम्। शिलामय्या अपि ग्रहणम्॥ **द्वे काष्ठादिकृतच्छिन्नाग्रनौकाकृत्यम्बुसेचन्याः॥ २३९॥**

सांयात्रिकः पोतवणिक् कर्णधारस्तु नाविकः।
नियामकाः पोतवाहाः कूपको गुणवृक्षकः॥२४०॥

(क) · · · सृक्कसूना—"तालव्यादिरपीति महेश्वरः"—रघुनाथ

* "आतारानुत्तरावप्यत्र" इति मुकुटः—शिवदत्त।

820 आतारावनुतरा—A.; भानुजि reads—आतरस्तरपण्यं स्यादनुत्तरम्—इति वोपालितः, but मुकुट seems to read अनुतर instead of अनुत्तर।

(ख) उणादि सूत्रs read 'नित्'।

(ग) काष्ठेत्युपलक्षणम्—A., B.

नौकादण्डः क्षिपणिः[821] स्यादरित्रं केनिपातकः ।
अभ्रिः स्त्री काष्ठकुद्दालः सेकपात्रन्तु सेचनम्[822] ॥२४१॥
त्रिष्वागाधात् प्रसन्नोऽच्छः कलुषोऽनच्छ आविलः ।
निम्नं गभीरं गम्भीरमुत्तानं तद्विपर्यये ॥२४२॥
अगाधमतलस्पर्शं* कैवर्ते दाशधीवरौ[823] ।
[आनायः पुंसि जालं स्यात् सणसूत्रं पवित्रकम्[824]]॥ २४३॥]
मत्स्यधानी[1] कुवेणी स्याद् बडिशं[2] मत्स्यवेधनम् ॥ २४४क।

सांयात्रिकः संपूर्वाद् यातेः ष्ट्रनि (उ० ४।१५८) अजादिपाठात् (पा० ४।१।४) टाप्। संयात्रा द्वीपान्तरगमनम्। तथाच—"संपूर्वस्य यातेर्द्वीपान्तरगमने वृत्ति" रिति चाणक्यटीका—इति कलिङ्गः। "तदस्य प्रयोजनम्" (पा० ५।१।१०९) इति ठञ्। 'सांयात्रिकः'। "सम्यग् यात्रा संयात्रा। "तया व्यवहरती"ति ठक्"—इति पञ्जिका ॥

पोतवणिक् पोतेन वहित्रेण उपलक्षितो वणिक् 'पोतवणिक्'। जान्तः ॥ **द्वे वहित्रगामिनो वणिगजनस्य ॥**

कर्णधारः कर्णोऽरित्रं पोतश्चेति। तं धरति "कर्मण्यणि" (पा० ३।२।१), वा कर्णप्रायं वृहन्तं केनिपातकं(क) धरतीति 'कर्णधारः' ॥

नाविकः नावा तरति 'नाविकः'। नौ द्व्यचष्ठन्" (पा० ४।४।७)॥ **द्वे कर्णधारस्य ॥**

821 क्षिपणी—भानु°; क्षेपणि—RNC., माधवी; क्षेपणी—क्षीर°, सर्वा°।
822 After this क्षीर° and some others add—"क्लीबेऽर्धनावं नावोऽर्धेऽतीतनौकेऽतिनु त्रिषु।" but सर्वा° and मुकुट omit this hemistich.
823 दास—रुद्र, रभस and some others. * . . .स्पर्शे—भानु°
824 क्षीर° omits this line and राय° holds that though it is an interpolation, some of his predecessors take it for genuine.
(१) मत्स्याधानी—भानु°, क्षीर°
(क) केनिपातितं—A. (२) बलिशम्—भानु°।

नियामकाः **नियामका** इति। नियमयन्ति नियच्छन्तीति वा पोतं 'नियामकाः'। निपूर्वाद् यमेर्ण्वुल् (पा० ३।१।१३३) ॥

पोतवाहाः पोतं वहित्रं वाहयन्तीति 'पोतवाहाः'। "कर्मण्यण्" (पा० ३।२।१) ॥ **"द्वे गुणवृक्षोपरिस्थितस्य निजिराख्यातस्य" इति कोक्कटादयः ॥" "वहित्रवाहकस्य" इति सर्वानन्दः ॥ "वहित्रनाविकस्य" इति पञ्जिका ॥**

कूपकः कूपे कूपाकृत्याधारगर्ते कायति। "सुपी" (पा० ३।२।४) ति कः। 'कूपकः'।

गुणवृक्षकः गुणानां रज्जूनां वृक्ष इव। इवार्थे कन्। (पा० ५।३।९६)। 'गुणवृक्षकः' ॥ **द्वे गुणघरा इति ख्यातस्य ॥** २४०॥

नौकादण्डः नौकायां दण्डो(क) 'नौकादण्डः' ॥

क्षिपणिः (क्षेपणिः) (क्षेपणी) (क्षिपणी) क्षिप्यतेऽनया इति। "क्षिपेः किच्च"। (उ० २।१०८) [अनिः।] 'क्षिपणिः'। "आतिदेशिककार्यानित्यत्वाद्(ख)गुणाभावाभावे 'क्षेपणिः'। "कृदिकारादि" (ग० ४।१।४५) ति ङीषि 'क्षिपणी' 'क्षेपणी' च" इति **माधवी ॥ द्वे चहडी[825] इति ख्यातस्य ॥**

अरित्रम् ऋ गतौ। ऋच्छत्यनेनेति "अर्तिलूधूसूखने" (पा० ३।२।१८४)ति करणे इत्रः। 'अरित्रम्' ॥

केनिपातकः के जले निपात्यते। कर्मणि घञि (पा० ३।३।१९) केनिपातः। "संज्ञायाम्" (पा० २।१।४४) इति समासः। "तत्पुरुषे कृती" (पा० ६।३।१४) त्यलुक्। के निपातोऽस्येति वा। "हलदन्तात् सप्तम्याः संज्ञायाम्" (पा० ६।३।९) इत्यलुक्। पूर्वत्र स्वार्थे (पा० ५।३।८७) कः। परत्र "शेषाद् विभाषे"ति (पा० ५।४।१५४) कप्। **द्वे केडुआल**(ग) **इति ख्यातस्य ॥**

अभ्रिः (अभ्री) **अभ्रिरिति॥** अभ्रति नौकायां गच्छतीति "सर्वधातुभ्य इन्" (उ० ४।११७) इति इन्। 'अभ्रिः'। "कृदिकारादि" (ग० ४।१।४५)"ति ङीषि 'अभ्री' ॥

825 चहुड—B., चौड—RNC. (क) नोकाया दण्डः—भानु°।
(ख) · · ·कार्यस्यानित्यत्वाद्—शिवदत्त। (ग) 'केयूराल' इति भरतः—RNC.

कुं पृथिवीमुद्दालयतीति कर्मण्यणि (पा० ३।२।१) शकन्ध्वादिः (वा० ६।१।९४)। काष्ठस्य कुद्दालः 'काष्ठकुद्दालः'।। **द्वे वहित्रादेर्मलापनयनार्थं काष्ठघटितकुद्दालस्य ।।** — **काष्ठकुद्दालः**

सेकपात्रम् — सेकाय सेकस्य वा पात्रं 'सेकपात्रम्' ।।

सेचनम् — सिञ्चत्यनेन नौजलं 'सेचनम्'। करणे ल्युट् (पा० ३।३।११७) ।। **द्वे सेयती(क) इति ख्यातायाः ।।२४१।।**

'आ अगाधात्' अगाधपर्यायमभिव्याप्य। अभिविधावाङ्। वक्ष्यमाणाः 'प्रसन्नादयः' त्रिषु। प्रसादं गतः 'प्रसन्नः'। षद्लृ विसरणादौ। प्रपूर्वात् क्तः (पा० ३।४।७२) ।। — **प्रसन्नः**

अच्छः — छो छेदने। न छाति दृष्टिमिति "सुपी" (पा०३।२।४) ति कः। 'अच्छः'।। **द्वे निर्मलस्य ।।**

कलुषः — 'कलुषः' प्रागुक्तः (कालवर्गः १२६) ।।

अनच्छः — न अच्छः 'अनच्छः'।।

आ समन्ताद् विलति भिनत्ति दृष्टिरस्मिन्। विल भेदने। आङ् पूर्वाद् "इगुपधे" (पा० ३।१।१३५) ति कः। 'आविलः' **त्रयमाविलस्य ।।** — **आविलः**

निम्नमिति। निकृष्टो म्नोऽभ्यासः सलिलस्यात्रेति। म्ना अभ्यासे। घञर्थे कः (वा० ३।३।५८)। 'निम्नम्' ।। — **निम्नम्**

जलजन्तवो गच्छन्त्यत्र। गाङ गतौ। गम्लृ सृप्लृ गतौ। अनयो "गंम्भीरादयश्च" इति यथाक्रमं "गभीरगम्भीरौ" (उ० ४।३५)[826] निपातितौ।। **त्रयं गम्भीरस्य ।।** — **गभीरम्**, **गम्भीरम्**

उत्तानम् — 'तद्विपर्यये' अनिम्ने 'उत्तानम्'। उद्गतस्तानो विस्तारोऽस्य। 'उत्तानम्'। **एकं निम्नविपर्ययस्य ।।२४२।।**

नास्ति गाधः प्रतिष्ठा प्रकर्षस्थितिरत्र। गाधृ प्रतिष्ठालिप्सयोः। "नञोऽस्त्यर्थानाम्" (वा० २।२।२४) इति समासे 'अगाधम्'। — **अगाधम्**

(क) सेयुती—RNC.

826 The rule "गम्भीरादयश्च" cannot be traced in any उणादि text. Curiously however भानु° too refers to this rule. cf. "गम्भीरादयश्च" इति गभीरगम्भीरौ इति वा निपातितौ—भानु°।

अविद्यमानस्तलोऽधःस्पर्शोऽत्र। अगाधार्थतया 'अतलस्पर्शम्' अपि त्रिषु। "विवरणमिदं, न नाम—इति केचिद्" इति सर्वधरः।[827] **द्वे अतिनिम्नस्य ।।** — **अतलस्पर्शम्**

के पानीये वर्तो वर्तनं जीविका अस्येति "हलदन्ताद्" (पा० ६।३।९) इत्यलुक्। ततः स्वार्थे अण्। के जले वर्तन्ते केवर्ता मत्स्यास्तान् बध्नाति। "शेष" (पा० ४।२।९२) इत्यणि वा 'कैवर्तः'।[828] पृषोदरादिः (पा० ६।३।१०९)। कस्य जलस्य ईर्लक्ष्मीः सम्पत्तिस्तया वर्तो वर्तनमस्येति स्वार्थे अणि 'कैवर्त' इति तु सर्वानन्दः।। — **कैवर्तः**

दशति मत्स्यान् इति "दंशेष्टटनौ न आ च" (उ० ५।१०)[829] इति टटनौ नकारस्यात्वं च। 'दाशः'—इति स्वामी। दाश्यते दीयते मत्स्यमूल्यम् अस्मै। दाशृ दाने। घञि वा (पा० ३।३।१८) 'दाशः'। तालव्यान्तः। "शालो झषे धीवर एव दाश" इति शभेदात्। "कैवर्तभृत्ययोर्दासो दासी बाला च चेटका"[830] इति दन्त्यान्ते रुद्रात् दन्त्यान्तता च। तथाच—"ऋत्विजि दाशस्तालव्यो धीवर एवान्तदन्त्य" इत्यूष्मविवेकात् ।। — **दाशः** (**दासः**)

दधाति मत्स्यान् इति "छित्वरछत्वरधीवरपीवरमीवर" (उ० ३।१) इत्यादिना ष्वरच्प्रत्ययेन[831]धाञो 'धीवरो' निपातितः। षित्त्वात्[832] स्त्रियां ङीषि (पा० ४।१।४१) 'धीवरी' ति।। **त्रीणि कैवर्तस्य ।।** — **धीवरः** (**धीवरी**)

इह "आनाय" इत्यादिः क्वचित् पाठः। स्वाम्याद्युपेक्षितोऽप्यन्यैरादृत इति विव्रियते।

आनयन्ति मत्स्यादिकमनेनेति घञि 'आनायः'। "जालमानाय" (पा० ३।३।१२४) इति निपातितम् ।। — **आनायः**

827 सर्वानन्दः—A. 828 मत्स्याः · · · कैवर्तः—omitted in B

829 In printed उणादिसूत्र's the rule—दंसेष्टटनौ न आ च is connected with the roots दसि दंशनदर्शनयोः and दसि सेवने। The rule applicable here is "दंशेश्च" (उ० ५।११) and not the rule quoted above.

830 चेटिका—A., C. "वाशा च चेटिका"—सर्वा°; "बाणा च चेटिका"—भानु°।

831 ट्वरन्—B., C. 832 टित्त्वात्—B., C.

जालम्

जलेन सम्बध्यते'।। शेषे अण् (पा० ४।२।६२)। 'जालम्'।। **द्वे जालस्य ।।**

सणसूत्रम्
(शणसूत्रम्)

षणु दाने। "धात्वादे" (पा० ६।१।६४) रिति सत्वम्। सणो दन्त्यादिः। तस्य सूत्रं 'सणसूत्रम्'—इति सर्वधरः। "तालव्यादिरपि" इति पञ्जिका।

पवित्रकम्

"कार्पासशणोर्णाभिर्ब्रह्मक्षत्रविशां पवित्रकाणि भवभवन्ती"ति स्मृतिवचनात्* 'पवित्रकम्' अपि तदुच्यते। **द्वे सणसूत्रस्य ।।**[833]**२४३।।**

मत्स्यधानी

मेति। मत्स्या धीयन्ते धार्यन्तेऽस्याम् इत्यधिकरणे ल्युटि (पा० ३।३।११७) ङीप् (पा० ४।१।१५)। 'मत्स्यधानी'।।

कुवेणी

प्रविश्य निर्गमाभावात् कुसितं वेणन्ते मत्स्या अस्यामिति। वेणृ गतौ। घञ् (पा० ३।३।१२१)। गौरादिङीषि (पा० ४।१।४१) कृष्यादि इकारे (वा० ३।३।१०८) "कृदिकारादि" ति (४।१।४५) ङीषि 'कुवेणी'।। **द्वे खारणी**[834] **इति ख्यातायाः ।।**

वडिशम्
(वडिशा)
(वडिशी)

बडि वटिकां ग्रथितामिषं श्यति, बलिनो मत्स्यान् श्यतीति वा डलयोरैक्यात्। शो तनूकरणे। आतोऽनुपसर्गे कः (पा० ३।२।३)। 'बडिशम्'।। "स्त्रियां बडिशापचये (तु) बडिशी"ति **माधवी**(क) ।।

मत्स्यवेधनम्
(मत्स्यवेधनी)

मत्स्या विध्यन्तेऽनेनेति। विध विधाने। करणे ल्युट् (पा० ३।३।११७)। धातूनामनेकार्थत्वाद्विधेर्भेदनार्थतायां 'मत्स्यवेधनम्'।। द्वे स्त्रियामिति 'वडिशी' 'मत्स्यवेधनी'ति पञ्जिका कौमुद्यादयश्च।। **द्वे वडिशीति ख्यातस्य ।। २४४ क।।**

पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः ।।२४४।।
विसारः शकली चाथ गडकः शकुलार्भकः

---

* cf. मनु° (२।४४)
834 खारइ—B., खारयी—C.
833 सणसूत्रमात्रस्य—A.
(क) cf. भानु°

सहस्रदंष्ट्रः पाठीन उलूपी शिशुकः समौ ।।२४५।।
नलमीनश्चिलिचिमः प्रोष्ठी तु शफरी द्वयोः ।
क्षुद्राण्डमत्स्यसङ्घातः पोताधानमथो झषाः ।।२४६ ।।
रोहितो मद्गुरः शालो राजीवः शकुलस्तिमिः ।
तिमिङ्गिलादयश्चाथ यादांसि जलजन्तवः ।।२४७।।
तद्भेदाः शिशुमारोद्रशङ्कवो मकरादयः ।
स्यात् कुलीरः कर्कटकः कूर्मे कमठकच्छपौ ।।२४८।।
ग्राहोऽवहारो नक्रस्तु कुम्भीरोऽथ महीलता ।
गण्डूपदः किञ्चुलुको निहाका गोधिका समे ।।२४९।।
रक्तपा तु जलौकायां स्त्रियां भूम्नि जलौकसः ।
मुक्तास्फोटः स्त्रियां शुक्तिः शङ्खः स्यात्-
कम्बुरस्त्रियौ(क) **।।२५०।।**
क्षुद्रशङ्खाः शङ्खनखाः(ख) **शम्बूका जलशुक्तयः ।**
भेके मण्डूकवर्षाभूशालूर[1]**-प्लवदर्दुराः ।।२५१।।**
शिली गण्डूपदी भेकी वर्षाभूः* कमठी दुलिः ।
मद्गुरस्य प्रिया शृङ्गी दुर्नामा दीर्घकोषिका(ग)**।।२५२।।**
जलाशया जलाधारा[2] **स्तत्रागाधजलो ह्रदः ।**
आहावस्तु निपानं स्यादुपकूपजलाशये ।।२५३।।
पुंस्येवान्धुः प्रहिः(घ) **कूप उदपानन्तु पुंसि वा ।**
नेमिस्त्रिकाऽस्य वीनाहो मुखबन्धनमस्य यत् ।।२५४।।
पुष्करिण्यान्तु खातं स्यादखातं देवखातकम् ।।२५५क ।।

पृथुरोमा

पृथ्विति। मुखप्रदेशे पृथूनि महान्ति रोमाण्येषामिति 'पृथुरोमाणो' वोदालाद्याः। "मत्स्यत्वाविशेषादलोमकेऽपि वृत्तिरस्ये"ति कलिङ्गः। "पृथु रोम वल्कलमस्ये"ति सर्वधरः।।

(क) अस्त्रियाम्—क्षीर°, रघुनाथ
(ख) शङ्खनकाः—भानु°, RNC.
(ग) दीर्घकोशिका—भानु°
(१) सालूर—सर्वा°
(घ) ...वान्धुप्रही—रघुनाथ
* वर्षाभ्वी—क्षीर°, वर्षाभ्वी, वर्षाभूः—भरत; वर्षाभूः—राय°, भानु°
(२) जलाशयो जलाधारः—सर्वा°

झषः
झषशषमषरुष हिंसार्थाः[835]। झषेर्दण्डकाद् गत्यर्थाद्वा[836] झष्यत इति "पुंसि" (पा० ३।३।११८) इति घः। 'झषः'। "पाणिनिप्रत्याहार इव महाप्राणसमाश्लिष्टो झषालिङ्गितश्च समुद्र" **इत्याश्चर्यमञ्जरी**। अतो मूर्धन्यान्तः ॥

मत्स्यः (मत्सी)
माद्यन्त्यनेनेति। मदी हर्षे। "ऋतन्यञ्जि" (उ० ४।२) इत्यादिना स्यन्। 'मत्स्यः'। स्त्रियां "षिद्गौर" (पा० ४।४।४१) इत्यादिना ङीषि[837] "सूर्यतिष्ये" (पा० ६।४।१४९) त्यादिना "मत्स्यस्य ङ्यामेवे"ति (वा० ६।४।१४९) यलोपे "मत्सी" ॥

मीनः
मीयते हिंस्यते। मीञ् हिंसायाम्। "फेनमीना" विति (उ० ३।३) विति निपातनात् नक्।[838] 'मीनः' ॥

वैसारिणः
विचित्रं सरन्तीति। सृ गतौ। ग्रह्यादित्वात् (पा० ३।१।१३४) णिनिः। 'विसारी'। "विसारिणो मत्स्ये" (पा० ५।४।१६) इति स्वार्थे अण्। "इनण्यनपत्य" (पा० ६।४।१६४) इति प्रकृतिवद्भावात् "नस्तद्धित" (पा० ६।४।१४४) इति न टिलोपः। 'वैसारिणः' ॥

अण्डजः
अण्डाज्जातः 'अण्डजः' ॥२४४॥

विसारः
विशेषण सरतीति सरते"र्व्याधिमत्स्यबलेष्वि" (वा० ३।३।७) ति घञ्। 'विसारः'।

शकली
शकलं शल्कम्। तद्योगात् 'शकली'। मत्स्यत्वाविशेषात् अशकलिनोऽपि मत्स्याः। "अत इनिठना" (पा० ५।२।११५) विति इनिः। तालव्यादिः। "शकलं वल्कलेऽर्धे च" इति तालव्यादा**वजयकोषात्** ॥ **अष्टौ मत्स्यस्य** ॥

गडकः
गडतीति। गड सेचने। "क्वुन् शिल्पिसंज्ञयो" (उ० २।३२) रिति क्वुनि 'गडकः'।

शकुलार्भकः
शकुलस्यार्भक इव शिशुरिव। तदाकृतित्वात्। 'शकुलार्भकः' ॥ **द्वे गडकस्य** ॥

---

835 हिंसायाम्—B.
836 अत्यर्थाद् वा—B.
837 हयगवयेत्यादिना—B.
838 नुक्—B., C.

सहस्रदंष्ट्रः
सेति। सहस्रं द्रंष्ट्रा अस्येति 'सहस्रदंष्ट्रः'। इह तु किञ्चिदाकृतिसादृश्यात् वदालशब्दस्य साम्याद् वा पर्यायिपाठः ॥

पाठीनः
पाठिं पृष्ठं नमयतीति णमेः "अन्येभ्योऽपि दृश्यत" (पा० ३।२।१०१) इति डः। "अन्येषामपी" (पा० ६।३।१३७) ति दीर्घः। 'पाठीनः'। **द्वे वदालस्य** ॥ "केचित्तु चित्रवदालं पाठीनमाहु" रिति **स्वामी** ॥[839]

उलूपी
ऊर्ध्वं लुम्पति भ्राम्यतीति। लुप्लृ छेदने। उत्पूर्वात् "आवश्यके णिनिः" (पा० ३।३।१७०)। पृषोदरादित्वात् (पा० ६।३।१०९) तलोपदीर्घौ। 'उलूपी' ॥

शिशुकः (शिशुमारः) **चुलूपी**
चापल्यात्[840]शिशुरिव 'शिशुकः' ॥ **द्वे गडुआलस्येति**[841] **सोमनन्दी पञ्जिका च**। **कलिङ्ग-जातरूपौ** तु—"शिशुमाराकृतिर्मत्स्यभेद उलूपी। **त्रिकाण्डे तु**—"चुलूपी शिशुकः स्मृतः" इति पाठः। स च शिशुमार एवोच्यते। **रत्नकोषादौ** च "शिशुमारे चुलूपी स्या"दित्युक्तम्"—इत्याहतुः। "**शोशु**[842] इति ख्यातस्य मत्स्यविशेषस्य" इति तु **कोक्कटादयः** ॥२४५॥

नलमीनः (तलमीनः)
प्रायेण नलवने तिष्ठतीति 'नलमीनः'। तलचारित्वात् 'तलमीन' इत्येके पठन्ति ॥

चिलिचिमः
चिल विलसने। "चिले रिच् चुगि"ति मः। कित इच् चुगागमश्च[843]। 'चिलिचिमः'। "इकारत्रयवानदन्तश्चिलिचिम" इति **पञ्जिकादयः**। "तथाच **रत्नमालायाम्**—

---

839 Not found in the printed ed. of क्षीर°। cf. चित्रवदाल-विशेषः पाठीन इति केचित्—सर्वा°। वादाल—क्षीर°
840 चाञ्चल्यात्—B., C.
841 उण्डुआलस्य—A.
842 शों॑श—C., शोंशु—भानु°।
843 चिले चिवुग्—A.; the rule, however, could not be traced. "चीयते जीयते च चिलिचिमः"—क्षीर°; "चिल विलसने। "इगुपधात् कित्" (उ० ४।११९) वीप्सायां द्वित्वम्। चिलिं चिलिं विलासं मिमीते। माङ माने। "आतोऽनुपसर्गे" (पा० ३।२।३) इति कः। पृषोदरादिः (पा० ६।३।१०९)। त्रीकारोऽदन्तः।" —भानु°।

"नलमीनश्चिलिचिमो बृहन्मीनोऽब्धिजस्तिमि"रित्यदन्तो दृश्यत" इति आहुः। **सर्वधरस्तु** "लक्ष्मणा सारसी क्रौञ्ची नलमीनश्चिलीचिमि" रिति **बोपालितदर्शनात्** चतुरिकारवान्मध्यदीर्घ इदन्त इति मन्यते। "उभयमपि भवती" ति तु कौमुदी ॥ **"द्वे वल्लीगतस्ये"ति स्वामी-सर्वधर-कोक्कटादयः। "चलदङ्गस्य"** इत्येके। **"बृहदिञ्चलस्य"** इत्यपरे ॥

(चिलीचिमिः)

प्रोष्ठी
(प्रोष्ठः)

प्रकृष्ट ओष्ठोऽस्याः 'प्रोष्ठी'। "ओत्वोष्ठयोः [समासे] वा" (वा० ६।१।९४) इति पररूपत्वम्। "नासिकोदरौष्ठ (पा० ४।१।५५) इत्यादिना ङीषि। प्रकर्षेणोषति दहति पित्तकारित्वात् "उषिकुषी" (उ० २।४) त्यादिना थन्। गुणः। "एङि पररूपम्" (पा० ६।१।९४)। "जाते" (पा० ४।१।६३) रिति ङीष् वा। 'प्रोष्ठी'। "द्वयो" रित्यनेनास्याप्यभिसंबन्धात् "प्रोष्ठश्च"––इति **पञ्जिका।**

शफरी
(शफरः)

शयाना स्फुरति पार्श्वेन गच्छतीति पृषोदरादिः (पा० ६।३।१०९)। गौरादिङीषि (पा० ४।१।४१) 'शफरी'। तालव्यादिः। "शोणितशफरीशय्याशकटशिले"[844] ति **ऊष्मभेदात्।** 'शफर'श्च ॥ **द्वे पुण्ठीति ख्यातायाः ॥**

पोताधानम्

क्षुद्रेति। अण्डादचिरनिर्गता मत्स्या 'अण्डमत्स्याः'। क्षुद्राश्च ते अण्डमत्स्याश्च इति क्षुद्राण्डमत्स्याः। तेषां सङ्घातः[845] 'पोताधानम्'। पोता आधीयन्तेऽत्रेति। आङ्पूर्वाद् धाञोऽधिकरणे ल्युट् (पा० ३।३।११७) ॥ **(एकं)** (क) **पोहान इति ख्यातस्य ॥**

'अथो झषा' झषविशेषा उच्यन्ते ॥२४६॥

रोहितः

'रोहितो' लोहित (धीवर्ग° १४८) उक्तः। उणादौ तु "हसृरुहियुषिभ्य इतिः" (उ० १।९९) इतीतिप्रत्ययेन

844 B. add शिलाशरणशतपथ।
845 संहतिः––B.
(क) द्वे–भानु°

"रोहिन्मत्स्यविशेष"* इत्युक्तम्। तन्मते "जात्याख्यायाम्" (पा० १।२।५८) इति जातावेकत्वे बहुवचनम् ॥

(रोहित्)

मज्जति। "मद्गुरादयश्चे" (उ० १।४२) ति मस्जेः कुरच्[846]-प्रत्ययेन 'मद्गुरो' निपातितः ॥

मद्गुरः

शालृ[847] श्लाघायाम्। कर्मणि घञि (पा० ३।३।१९) 'शालः'। "शालो झषे धीवर एव दाश" **इत्यूष्मविवेकात्** तालव्यादिः। "कैवर्त इव बद्धराजीवोत्पलसालो वसन्तकाल" इति **वासवदत्ता**श्लेषात् दन्त्यादिश्च। कैवर्तपक्षे सालो मत्स्यभेदः। वसन्तपक्षे सालं पुष्पम्।[848] **रभसे*** च दन्तादौ कथितः ॥

शालः
(सालः)

राजी रेखास्य प्रशस्तास्तीति वप्रकरणे "अन्यत्रापि दृश्यत" (पा० ५।२।१०९) इति वः। 'राजीवः'। **"राइखड"** इति ख्यातः ॥[849]

राजीवः

शक्नोति वेगेन गन्तुं शक्तो भवतीति। शक्लृ शक्तौ। "हृषेरुलजि" (उ० १।९८) ति बाहुलकादुलच्। 'शकुलः'। तालव्यादिः ॥

शकुलः

ताम्यति। तमु काङ्क्षायाम्। "क्रमितमिशतिस्तम्भामत इच्च" (उ० ४।१२१) इति इन्, उपधायाश्चेत्वम्। 'तिमि'र्महाकायो मत्स्यः कश्चित् सामुद्रः। तथाच––"अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तर"[850] इति ॥

तिमिः

तिमिं गिरति। गॄ निगरणे। मूलविभुजेति (वा० ३।२।५) कः। "अचि विभाषे" (पा० ८।२।२१) ति लत्वम्। "गिलेऽगिलस्य मुम् वक्तव्य" (वा० ६।३।७०)

* "रोहित् लता। ऋश्यस्य मृगस्य मृगी रोहिदित्युच्यते। तथाच महिम्नःस्तवे "गतं रोहिद्भूतां रिरमयिषुमृश्यस्य वपुषा" (श्लो° २२) इति।"—उज्ज्वल°। "ऋश्यस्य रोहित्, पुरुषस्य योषित्"––इति भाष्यम्––भट्टोजि°। "रोहिन्मृग्यां लताभेदे" —मेदिनी। "रोहिन्मत्स्यजातिः"––सर्वा°। "रोहित् वीरुत्प्रकारः, सूर्यः, अग्निश्च"––दशपादी।
846 उरच्—भट्टोजि°, उज्ज्वल°।
847 शाड़ृ श्लाघायाम्—धातुपाठ, भानु°, सर्वा°।
848 शालो वृक्षभेदः—B.
* "पुंसि भूरुहमात्रेऽपि सालो वरणसर्जयोः" इति रभसः—भानु°।
849 राइखत—A.
850 ···विस्तृत—B.

तिमिङ्गिलः

इति मुमागमः। 'तिमिङ्गिलः' सामुद्रमत्स्यः। आदिशब्देन 'तिमिङ्गिलगिल-राजमत्स्य-नन्दीबलादयः'(क)। सामुद्राः अन्येऽपि 'आडि-ईल्विश[851]-भक्कुटादयोऽपि' ग्राह्याः ॥ **मत्स्य-विशेषाणां पृथक् पृथक्** ॥

यादांसि

यान्ति वेगेन। यातेरसुन् (उ० ४।१८८)। बाहुलकाद् दुगागमः। 'यादांसि'।

जलजन्तवः

जलानां जन्तव इति षष्ठीसमासः॥ **द्वे जलजन्तूनाम्** ॥२४७॥

शिशुमारः

तदिति। तेषां जलजन्तूनां भेदा उच्यन्ते। शिशून् मारयति। "कर्मण्यण्" (पा० ३।२।१)। 'शिशुमारः'। महोच्छ्वासः "शोष" इति ख्यातः। अतस्तालव्यादिः ॥[852]

उद्रः

उन्दी क्लेदने। उन्दतीति। "स्फायितञ्ची" ति (उ० २।१३) रक्। 'उद्रो' जलमार्जारः॥

शङ्कवः

शङ्कतेऽस्मादिति "खरु-शंकु-पीयु-नीलंगु-लिगु" रिति (उ० १।३७) शङ्केः कुप्रत्ययेन 'शंकु' निपातितः। तालव्यादिः। **शांकोच**[853] इति ख्यातः॥

मकरः

प्राणिग्रासाय मुखं किरतीति पृषोदरादित्वात् (पा० ६।३।१०९) 'मकर' इति तु **स्वामी**।[854] "मस्करमस्करिणा" (पा० ६।१।१५४) वित्यादि सूत्रे तु **वृत्तौ** "मकरशब्दोऽव्युत्पन्नप्रातिपदिक" इत्युक्तम्। आदिना 'ग्राहकुम्भीरादयः' ॥ **जलजन्तुविशेषाणां पृथक् पृथक्** ॥

कुलीरः

कुलतीति। कुल संस्त्याने। "गम्भीरादयश्चे"[855] ति ईरन्। 'कुलीरः' ॥

कर्कटकः

कर्क इति सौत्रो धातुः। ततः "शकादिभ्योऽटन्" (उ० ४।८१)। 'कर्कटः'। ततः स्वार्थे कः (पा० ५।३।७५)। 'कर्कटकः' ॥ **द्वे काँकड इति ख्यातस्य** ॥

(क) नन्दीवर्तादयः—भानु°

851 ईरिश—A.

852 Omitted in B., शुशु इति ख्यातः—RNC.

853 शाँकोच—B.

854 Not found in the printed text.

855 Not found in उणादि। उज्ज्वल° derives it by "कृञ उच्च" (४।३३)

कूर्मः

कुं महीं मिमीत इति 'कूर्मः'। पृषोदरादिः (पा० ६।३।१०९)। "ऊर्मिः स्त्रीपुंसयोर्वीच्यां प्रकाशे वेगभङ्गयो" रिति **रभसः**। कौ भुवि ऊर्मिर्वेगोऽस्त्यस्य। अर्श आद्यचि (पा० ५।२।१२७) वा 'कूर्मः' ॥

कमठः

"कमेरठः" (उ० १।१०२)। 'कमठः' ॥

कच्छपः (पञ्चगुप्तः)

कच्छाभ्यां पिबतीति 'कच्छपः'। "सुपि स्थ" (पा० ३।२।४) इति योगविभागात् कः। "पञ्चगुप्तो"ऽप्यत्र ॥ **त्रीणि कच्छपस्य** ॥२४८॥

ग्राहः (ग्रहः)

ग्रेति। गृह्णात्येव न त्यजति। "विभाषा ग्रह" (पा० ३।१।१४३) इति "व्यवस्थितविभाषया जलचरे नित्यमेव ण"-प्रत्यये 'ग्राहः'। ज्योतिषि तु "ग्रह" एव ॥

अवहारः

"संभवत्यवहरतिपचती"त्यत्रावहरतिः[856] संहरणार्थो (पा० ५।१।५२) वृत्तौ दर्शितः। अवहरति संहरति गजादि-प्राणिन इति "श्याद्व्यधे" (पा० ३।१।१४१) त्यादिना णः। 'अवहारः'। "अध्यायन्याये" (पा० ३।३।१२२) त्यादौ चकाराद् घञि" इति तु **स्वामी** ॥[857] **द्वे "तन्तुनागस्य" इति स्वाम्यादयः। "जलहस्तिन" इति तु कोक्कटादयः।**

नक्रः

न क्रामत्यतिदूरं स्थलम्। डप्रकरणे "अन्यत्रापि दृश्यत" (पा० ३।२।१०१) इति डः। "नभ्राण्नपादि"ति (पा० ६।३।७५) नञः प्रकृतिभावः। 'नक्रः' ॥

कुम्भीरः

केन जलेनोभ्यते पूर्यते आप्यायते कुम्भी मत्स्यादिः। शकन्ध्वादिः (वा० १।१।६४)। तां लाति इति "आत" (पा० ३।२।३) इति कः। रलयोरैक्यात् 'कुम्भीरः'। कुम्भिनो जलहस्तिनोऽपि ईरयति आकर्षयति। अणि (पा० ३।२।१) वा ॥ **द्वे कुम्भीरस्य** ॥

महीलता

अथेति। मह्या लतेव कृशदीर्घत्वात् 'महीलता' ॥

गण्डूपदः

गण्ड्वो ग्रन्थयः पदान्यस्य इति 'गण्डूपदः' ॥

856 संभवत्यवहरतिपठतीत्यवहरतेः—B.

857 Not found in the printed ed. of क्षीर°।

किञ्चुलुकः

किञ्चिच्चलतीति ण्वुलि (पा० ३।१।१३३) पृषोदरादिः (पा० ६।३।१०९)। 'किञ्चुलुकः'। ककारद्वयवान्। चुलुम्पः प्रायोगिको धातुः*। किञ्चिच्चुलुम्पति(क) ।। **त्रीणि कॅचुग्रा[858] इति ख्यातस्य।**

निहाका

निवातं[959]जहाति स्थलभागम्। हातेः "कन्" इत्यनुवृत्तौ "नौ ह्रस्चे"ति (उ० ३।४४) कन्।[860] बहुलवचनात् आकारह्रस्वत्वाभावे 'निहाका' ।।

गोधिका

गुध्यति वेष्टयति। गुध परिवेष्टने। कर्तरि पचाद्यच् (पा० ३।१।१३४), टाप्। गोधा। ततः स्वार्थे के (पा० ५।३।८७) ह्रस्वादौ कृते "प्रत्ययस्थादि"ति (पा० ७।३।४४) इत्वञ्च। 'गोधिका' ।। "त्रयो गौधेर" इत्यादि **क्षीरस्वामिना**त्रैव विवृत्य क्वचित् पुस्तके "सिंहादिवर्गे एषां पाठ" इत्युक्तम्।[861] अन्येषां त्वत्र तत्पाठोऽसम्मतः। पुस्तकेषु च प्रायेण नास्तीत्युपेक्षितमत्र तद्विवरणम् ।। **द्वे जलगोधा-वन्य-गोधयोरिति**(ख) **स्थलचरजलचरभेदात् पृथग्जाती ।।२४९।।**

रक्तपा

रेति। रक्तं पिबतीति। "आत" (पा० ३।२।३) इति कः। 'रक्तपा'। "पिबतेः सुराशीध्वो" (वा० ३।२।८) रिति नियमान्न टक् ।।

जलौका

"ओक उचः के" (पा० ७।३।६४) इति निपातनात् 'ओकः'। अजन्तः। जलम् ओकः स्थानमस्या इति टाप् (पा० ४।१।४)। 'जलौका' ।।

जलौकसः (जलौकः)

जलम् ओको गृहमस्या इति 'जलौकस' इति शब्दशक्तिस्वाभाव्यादेकत्वेऽपि बहुत्वम्। नित्यबहुवचनान्ता सा

---

* cf. "कास्यनेकाच इति वक्तव्यं चुलुम्पाद्यर्थम्" (वा० ३।१।३५)।

(क) Some portions of the text seem to be missing here. भानु° derives it with ड (वा० ३।२।१०१), टिलोप (पा० ६।४।१४३) and कन् (पा० ५।३।७५)

858 किञ्चुग्रा—B.

859 नितान्तं—B.

860 नौ हः—भट्टोजि°; उज्ज्वल°।

861 Printed ed. of क्षीर does not retain this.

(ख) जलगोधान्यगोधयो—B.

एव। "सान्ता एवैता" इत्यन्ये ।। "जलौरगी जलौका तु जलौका च जलौकसी"ति **संसारावर्ते** तु बहुत्वं न दृश्यते। "जलौकापि जलोका स्याज्जलूका जलजन्तुका" इति **तारपालः**। "जलौकसेनेव रक्ताकृष्टिनिपुणेन वेश्याजनेन" इति **वासवदत्तायाम्।** जलं च तदोकश्चेति जलौकः। ततोऽर्श आद्यचि (पा० ५।२।१२७) एकवचनमदन्तत्वं चोपपाद्यम् ।। **त्रीणि जोँक इति ख्यातस्य ।।**

मुक्तास्फोटः

मुक्ता स्फुटन्त्यत्र। स्फुट विकसने। "हलश्चे"ति (पा० ३।३।१२१) घञ्। 'मुक्तास्फोटः' ।।

शुक्तिः

शुच्यति मुक्तां प्रसूते। शुच्य अभिषवे। "क्तिच्क्तौ चे" (पा० ३।३।१७४) क्तिच्। वलि यलोपः (पा० ६।१।६६)। 'शुक्ति'स्तालव्यादिः ।। **द्वे मुक्तोत्पादकशुक्तेः ।।**

शङ्खः

शमयत्यलक्ष्मीमिति "शमेः ख" (उ० १।१०४) इति खः। 'शङ्खः'। "ऋतेरीयङि" (पा० ३।१।२९) ति ज्ञापकाद् धातुप्रत्ययानामायन्नाद्यादेशाभावो बहुलवचनाद्वा ।।

कम्बुः

कम्बते गच्छति। "जम्वादयश्च" (उ० ४।१०२) इति निपातनात् 'कम्बुः'। "शङ्खकम्बू अस्त्रियौ" पुं-नपुंसके इत्यर्थः। जलजन्तवोऽप्यत्रैव ।। **द्वे शङ्खस्य ।।२५०।।** ।।

क्षुद्रशङ्खाः

क्षुद्रेति। क्षुद्राश्च ते शङ्खाश्चेति 'क्षुद्रशङ्खाः' ।।

शङ्खनखाः

शङ्खस्य नखा इव 'शङ्खनखाः' ।। **द्वे शङ्खनखाख्यस्य क्षुद्रशङ्खस्य ।।**[862]

शम्बूकाः (शम्बुकः) (शम्बुः)

शाम्यन्ति न घ्नन्ति। शमे "रुलूकादयश्चे"ति (उ० ४।४१) ऊकः वुगागमश्च[863]। 'शम्बूकाः'। "शम्बूकपिण्याकमधूकफेना" इत्य**मरमालायां** पुंलिङ्गः। "शम्बूका न नपुंसके" इति **मेदिनेर्**द्विलिङ्गता। अतएव **"शम्बूकाभिः** सह परिचयान्नीयते* पामरीभि"रिति **कालिदास**प्रयोगः। ह्रस्वमध्यः कवर्ण-

---

862 स्वल्पशङ्खस्य—B., भानु° reads शङ्कनकाः and derives it from शकि शंकायाम्, युच् (पा० ३।२।१४९) and कन् (पा० ५।३।७५)।

863 भट्टोजि derives it by the rule "शमेर्बुक् च" (उ० ४९०) with the suffix ऊक।

* त्यज्यते—RNC.

हीनोऽपि। "शम्बूकः शम्बुकश्चैव पूर्वः कान्तस्तु सर्वदा। ककारेण विना शेषो दृश्यते ग्रन्थविस्तरे" इति **उत्पलिनी** ।।(क)

जलशुक्तयः जलशुक्तय इव 'जलशुक्तयः'।। **द्वे शम्बूकस्य ।।**

भेक इति। विभेति सर्पात्। ञि भी भये। "इण्भीकापाशल्यतिमर्चिभ्यः कन्" (उ० ३।४३) इति कनि
भेकः 'भेकः'।।

मण्डयति अल्पजलाशयम्। "शलिमण्डिभ्यामूकण्"
मण्डूकः (उ० ४।४२) इत्यूकण्। 'मण्डूकः'।।

वर्षासु भवति। "भुवः संज्ञान्तरयो" (पा० ३।२।१७९)
वर्षाभूः रिति क्विप्। 'वर्षाभूः'।।

शालूरः **शलतीति**। शल गतौ। "खर्जिपिञ्जादिभ्य ऊरोलचौ"
(सालूरः) (उ० ४।९०) इत्यूरः। "बाहुलकाद् वृद्धिरपी"ति **स्वामी**। "अन्येषामपि दृश्यत" (पा० ६।३।१३७) इति दीर्घः–– इति तु **सर्वधरः**। 'शालूर' स्तालव्यादिः। "परिसरकृकलासस्वेदसालूरसर्पा" इति **ऊष्मभेदात्** दन्त्यादिरपीति **पञ्जिका-सर्वधरौ ।।**

प्लवते। प्लुङ गतौ। अच् (पा० ३।१।१३४)।
प्लवः 'प्लवः'।।

दर्दुरः दॄ विदारणे। "मुकुरदर्दुरा" (उ० १।४१)(ख) विति 'दर्दुरो' निपातितः। 'व्यङ्गाऽजिह्वकानन्दकाद्या'श्चात्रैव ।। **षट् वेङ्ग**[864] **इति ख्यातस्य** ।।२५१।।

शिलति[865] गत्या भूमिमुञ्छति(ग)। शिल उञ्छे। "इगुपधे"ति (पा० ३।१।१३५) के "जातेरस्त्री" (पा० ४।१।६३) त्यादिना पुंयोगे (पा० ४।१।४८) वा ङीषि
शिली 'शिली'। तालव्यादिः। उत्तरत्राप्याभ्यामेव ङीष् ।।

(क) RNC. ascribes the verse to हड्डचन्द्र। He reads––शम्बूकः शम्बुको ज्ञेयः. . . ।
864 वेङ्क––B.
865 B. adds उञ्छति।
(ख) Also मकुरदर्दुरौ। दशपादी has मुकुर but उज्ज्वल° does not approve it. The suffix is उरच्।
(ग) "भूमिं मुञ्चति"––A.B.

'गण्डूपद' उक्तः (वारि॰ २४९)।। **"द्वे किञ्चुलुक-** **गण्डूपदी**
भार्याया" इति सर्वधरस्वाम्यादयः। "द्वे क्षुद्रकिञ्चुलुकजाते" रित्यन्ये ।।

भेकीति। 'वर्षाभ्वी' त्यसाधुः। स्त्रीप्रत्ययलक्षणा- **भेकी**
भावात्। स्त्रियामपि 'वर्षाभू' रित्येवं भवति। **अमर-** **वर्षाभूः**
मालायां भागुरौ च वर्षाभ्वीत्येवं दृश्यते। तन्मूलं चिन्त्यम्। **(वर्षाभ्वी)**
स्वामी तु "भुवश्चे"ति (पा० ४।१।४७) छान्दससूत्रेण **[असाधुः]**
ङीष्"––इत्याह। तदयुक्तम्। "वोतो गुणवचनाद्" (पा० ४।१।४४) इत्यत "उत" इत्यनुवृत्तेः*। तथाच तत्र **वृत्तिः**–– "विभ्वी प्रभ्वी। इह कस्मान्न भवति––स्वयम्भूरिति? "उत" इति तपरकरणमनुवर्तते।[866] ह्रस्वादेवेयं पञ्चमी "भुव" इति। अन्ये तु मितद्र्वादि-(वा० ३।२।१८०) डु प्रत्ययान्ताद् वर्षाभुशब्दात् ङीषि प्रयोगमिच्छन्ति। तत्तु अनभिधानमेव[867] ।। **द्वे मण्डूक्याः ।। "क्षुद्रमण्डूकस्य" इत्यपरे ।।**

'कमठः' उक्तः (वारि॰ २४८)। गौरादिः (पा०
४।१।४१)। 'कमठी'।। **कमठी**

दुलतीति। दुल उत्क्षेपणे। "आधृषाद्वे" (गण०) ति **दुलिः**
चुरादिणिचोऽभावे "इगुपधादि"ति (उ० ४।११९) किः। **(दुडिः)**
साहचर्यात् स्त्रीत्वम्। "दुडि"रित्यपि **पञ्जिका**। "कृदिका- **(दुली)**
रादि" ति (ग० ४।१।४५) ङीषि "दुली" इत्यपि–– **स्वामी ।। द्वे कच्छप्याः ।।**

मद्गुरस्येति। आकारसाम्याद् योग्यतया वा 'मद्-
गुरस्य प्रिया' स्त्री 'शृङ्गी' इत्युच्यते। शृणातीति। शॄ **शृङ्गी**

* RNC. quotes––"वर्षाभ्वीत्यसाधुः· · ·"उत" इत्यनुवृत्तेः but he adds 'ह्रस्वोकारान्तादेव' after "उतः"।
866 उप्रकरणमनुवर्तते––B. for the वृत्ति see काशिका (४।१।४७)
867 अन्ये तु· · · · ·अनभिधानमेव––omitted in B., cf. "अन्ये तु गौरादित्वात् (पा० ४।१।४१) ङीषमिच्छन्ति"––भानु°।

हिंसायाम्। "शृणातेर्ह्रस्वश्च"[868] (उ० १।१२५) इति गन्, ह्रस्वत्वं, कित्त्वं नुडागमश्चेति 'शृङ्गः'। गौरादित्वाद् (पा० ४।१।४१) ङीषि शृङ्गी मद्गुरीपर्यायः। "शृङ्गीति प्रदर्शनार्थं मद्गुरस्य प्रिया इत्युक्तम्"––इति **कलिङ्गः**। "योग्यतया मद्गुरस्य प्रिया इत्युक्तम्" इति **पञ्जिका**। अन्ये त्वाहुः––"ननु मद्गुरो भिन्नजातिः, शृङ्गी भिन्नजातिस्तत् कथं तत्प्रियात्वमस्याः? सादृश्यादिति। तन्न। अन्यत्राप्येवंकल्पनापत्तेः। उच्यते––मद्गुरसी अप्रिया शृङ्गी इति नामत्रयमेव शृङ्ग्या इति"। एतच्च असम्यक्। ईदृक्प्रयोगादर्शनात्। सादृश्याच्च "गडकः शकुलार्भक" इति प्रयोगदर्शनात्, "भार्या भेकस्य वर्षाभ्वी शृङ्गी स्यान् मद्गुरस्य तु। शिली गण्डुपदस्यापि दुलिः[869] स्यात् कमठस्य तु" ––**इत्यमरमालादर्शनाच्च॥ एकं शृङ्गीति ख्यातायाः॥**

दुर्नामा (दुर्नामन्) (दुर्नाम्नी)

दुर्निन्दितं नाम अस्याः "दुर्नामा"। "डाबुभाभ्यामन्यतरस्या" (पा० ४।१।१३) मिति डापि आकारान्ता। "अन उपधालोपिनोऽन्यतरस्या" (पा० ४।१।२८) मिति ङीब्निषेधपक्षे नान्ता। ङीप्-पक्षे "दुर्नाम्नी" इत्येवं रूपत्रयम्। ङीप्-पक्षे "पूर्वपदात् संज्ञायाम्" (पा० ८।४।३) इति णत्वे प्राप्ते क्षुभ्नादित्वात् (पा० ८।४।३९) प्रतिषेधः॥

दीर्घकोषिका (दीर्घकोशिका)

दीर्घः कोषो यस्याः। "जातेरस्त्री"ति (पा० ४।१।६३) ङीष्। तदन्तात् स्वार्थे (पा० ५।३।७५) कः। "केऽणः" (पा० ७।४।१३) इति ह्रस्वत्वम्। 'दीर्घकोषिका'। मूर्धन्यषा, तालव्यशा च। तथाच **ऊष्मविवेकः**––"तालव्या मूर्धन्याश्चैते शटी च परिवेशः। विष्वक्सेनो भ्रेशः प्रतिष्कशः कोशविशदौ चे"ति॥[870] **द्वे झिनाञ्गीति ख्यातायाः॥२५२॥**

जलाशयः

जलमाशेते तिष्ठत्यत्र 'जलाशयः'। "पुंसि संज्ञायाम्" (पा० ३।३।११८) इति घः॥

868 मद्गुरस्येति···गौरादित्वाद् ङीषि—omitted in B.
869 डुलिः—B., "कच्छपस्य दुली स्मृता"—RNC., who ascribes the verse to भागुरि। नयनानन्द ascribes the same to रुद्र।
870 भ्रेषः प्रतिष्कषः कोषविषदौ च—B.

जलाधारः

जलमाध्रियतेऽत्र 'जलाधारः'। "अध्यायन्याये" (पा० ३।३।१२२) त्यादिना घञन्तः। ततो बहुवचनं समुदायप्रदर्शनेन॥ **द्वे जलाधारमात्रस्य॥**

"तत्रागाधजलो ह्रद" इति। "तत्रे"ति निर्धारणसप्तम्याः साक्षाद्विषयं प्रदर्शयितुम्॥

ह्रदः

"तत्र" तेषु जलाशयेषु योऽगाधजलः स 'ह्रदः'। ह्रादन्ति अव्यक्तं शब्दं कुर्वन्त्यत्र। ह्राद अव्यक्ते शब्दे। "हलश्चे"ति (पा० ३।३।१२१) घञ्। पृषोदरादित्वाद् ह्रस्वः (पा० ६।३।१०९)॥ **एकमतलस्पर्शजलाशयस्य ह्रद[871] इति ख्यातस्य॥**

आहावः

आहेति। आहूयन्ते पानाय पशवोऽत्र 'आहावः'। "निपानमाहाव" (पा० ३।३।७४) इति ह्वेञोऽप्, संप्रसारणं, वृद्धिश्च निपात्यन्ते॥

निपानम्

नियतं पिबन्त्यस्मिन्। ल्युट् (पा० ३।३।११७)। 'निपानम्'॥ **द्वे कूपसमीपे पश्वादि[872]जलपाननिमित्तं प्रस्तरादिरचितकूपोद्धृतजलाशयस्य॥२५३॥**

अन्धुः

अम्यते गम्यते संभज्यते वा। अम गत्यादौ। "अर्जिदृशिकम्यमिपसिबाधामृजिपशितुक्धुक्दीर्घहकाराश्च (उ० १।२८) इति कुप्रत्ययः। धुगागमः। अनन्ति जीवन्त्यनेन मृगय्वादित्वात् (उ० १।३८) कुः, धश्चान्तादेश इति वा 'अन्धुः'। ह्रस्वादिः।

प्रहिः

प्र ह्रियतेऽस्माज्जलम् इति "प्रे हरतेः कूपे" (उ० ४।१३४) इत्यनेन हृञ इण् डिच्च। डित्वात् टिलोपः। 'प्रहिः'।

कूपः

कौति शब्दे। "कुयुभ्याञ्चे"ति (उ० ३।२७) पः। ऊकारश्चान्तादेशः।* कुत्सिता(क) आपो अत्र। पृषोदरादिर्वा (पा० ६।३।१०९)। 'कूपः'॥

871 दह इति ख्यातस्य—B. 872 अश्वादि—B
* "कुर्वन्ति (कुवन्ति?) तृप्ता मण्डूका अस्मिन्निति कूपमुदकपानम्"—उज्ज्वल°; "कुवन्ति मण्डूका अस्मिन्"—भट्टोजि°, वाचस्पतिः।
(क) "कुत्सिता ईषद्···इति रायभरतौ"—RNC.

उदकं पिबन्त्यस्मिन्नस्माद् वा । ल्युट् (पा० ३।३।११७)। "उदकस्योदः संज्ञायाम्" (पा० ६।३।५७) इति उदादेशः।
उदपानम् 'उदपानम्'। अस्य त्वन्तत्वात् "पुंसि वा" इत्यनेन संबन्धः। पूर्वेषां तु "पुंस्येव" इत्यनेन ।।(क) **चत्वारि कूपस्य** ।।

नेमिः **नेमिरिति**। अस्य कूपस्य नेमिः 'त्रिका' स्यात्। नयन्त्यनेन। "नीञो(ख) मि" (उ० ४।४३) रिति मिप्रत्ययः। 'नेमिः'। साहचर्यात् स्त्रीत्वम्। तथाच **मेदिनिः**— "नेमिना तिनिशे कूपत्रिकाचक्रान्तयोः स्त्रियाम्" इति ।।

त्रिकेति। तिस्रोऽश्रयो(ग)ऽस्या इति त्रिशब्दात् "संख्यायाः संज्ञासङ्घसूत्राध्ययनेषु" (पा० ५।१।५८) इति
त्रिका कन्। टाप् (पा० ४।१।४)। 'त्रिका'।। **द्वे कूपोपरिस्थपट्टप्रान्तस्य** इति **कोक्कटादयः**।[873] "**भूमिष्ठकूपपट्टस्य**" इत्यन्ये। "**कूपसमीपे रज्जुधारणार्थंत्र्यश्र*दारुयन्त्रस्य**" इति तु **स्वामी** ।।

विशेषेण नह्यते कूपमुखमनेन। णह बन्धने। विपूर्वात् "हलश्चे" (पा० ३।३।१२१) त्यधिकरणे घञ्। "उपसर्गस्य घञी" (पा० ६।३।१२२) त्यादिना दीर्घः।
वीनाहः 'वीनाहः'।। **एकं कूपमुखबन्धनपट्टस्य नान्नितांट(घ) इति ख्यातस्य** ।।२५४।।

पुष्करं जलम्। तदस्या अस्तीति "पुष्करादिभ्यो देशे" (पा० ५।२।१३५) इति इनिः। समा चतुरस्रा
पुष्करिणी 'पुष्करिणी'।।

खातम् खायत इदमिति। खनु अवदारणे। कर्मणि क्तः (पा० ३।२।१०२)। "जनसनखनामि" (पा० ६।४।४२) त्यात्वम्। 'खातम्'।। **द्वे पुष्करिण्याः** ।।

अखातम् न खात'मखातम्'।।

(क) 'तु'-स्थाने 'च' उचितः–भानु°।
(ख) उणादि—texts have "नियो मिः"।
* दारुयन्त्रं त्र्यंशं—Oka's ed.
(घ) नान्दीपट्ट—RNC.
873 कोक्कटसर्वधरादयः—B.
(ग) अस्रयः—भानु°।

देवेन खातमखातमपौरुषेयमेव। "अत्र देवपदमकृत्रिमत्वप्रदर्शनार्थम्, स्वतः सिद्धमिति यावत्"—इति **पञ्जिकादयः**। "अखातो देवखातक" इति पुंस्काण्डे **अमरदत्तात्**(क) देवखातकम्
"पुंस्यप्यखात इत्येक" इति तु **स्वामी** ।।[874] **द्वे स्वतःखातजलाशयस्य** ।। (देवखातकः) "**द्वे देवद्वारजलाशयस्य**" इत्यन्ये कोक्कटादयः ।।२५५क।।

पद्माकरस्तडागोऽस्त्री(ख) कासारः सरसी सरः ।।२५५।।
वेशन्तः पल्वलं चाल्पसरो वापी तु दीर्घिका।
खेयन्तु परिखाधारस्त्वम्भसां यत्र धारणम् ।।२५६ ।।
स्यादालवालमावालमावापोऽथ नदी सरित्।
तरङ्गिणी शैवलिनी तटिनी ह्रदिनी* धुनी ।।२५७।।
स्रोतस्वती द्वीपवती स्रवन्ती निम्नगापगा।
गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा ।।२५८।।
भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि।
कालिन्दी सूर्यतनया यमुना शमनस्वसा ।।२५९।।
रेवा तु नर्मदा सोमोद्भवा मेकलकन्यका[875]।
करतोया सदानीरा बाहुदा सैतवाहिनी ।।२६०।।
शतद्रुस्तु शितद्रुः[876] स्याद् विपाशा तु विपाट् स्त्रियाम्।
शोणो हिरण्यवाहुः (१)स्यात् कुल्याल्पा कृत्रिमा
सरित् ।।२६१।।
शरावती वेत्रवती चान्द्रभागा[877] सरस्वती।
कावेरी सरितोऽन्याश्च सम्भेदः सिन्धुसङ्गमः ।।२६२।।
द्वयोः प्रणाली पयसः पदव्यां त्रिषु तूत्तरौ।
देविकायां सरय्वाञ्च भवे दाविक-सारवौ ।।२६३।।

(क) RNC. ascribes it to अरुणदत्त।
(ख) तटाकोऽस्त्री—सर्वा°।
874 Not found in the printed ed. of क्षीर°।
875 Also मेखलकन्यका—old reading.
* ह्लादिनी—क्षीर°
876 शतद्रुस्तु शितद्रुः—सर्वा°। शतद्रुस्तु शुतुद्रिः—क्षीर°, भानु°। शितद्रुस्तु शतद्रुः—Some mss.
(१) हिरण्यवाहः—क्षीर°; . . .बाहुः—भानु°
877 चन्द्रभागा—क्षीर°। चान्द्रभागी—भानु°।

सौगन्धिकन्तु कह्लारं हल्लकं रक्तसन्ध्यकम् ।
स्यादुत्पलं कुवलयमथ नीलाम्बुजन्म च ।।२६४।।
इन्दीवरञ्च नीलेऽस्मिन् सिते कुमुदकैरवे ।
शालूकमेषां कन्दः स्याद् वारिपर्णी तु कुम्भिका ।।२६५।।
जलनीली तु शैवालं शैवलोऽथ(१) कुमुद्वती ।
कुमुदिन्यां नलिन्यान्तु विसिनी(क)-पद्मिनीमुखाः ।।२६६।।
वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् ।
सहस्रपत्रं कमलं शतपत्रं कुशेशयम् ।।२६७।।
पङ्केरुहं तामरसं सारसं सरसीरुहम् ।
विस(ख)-प्रसूनराजीवपुष्कराम्भोरुहाणि च ।।२६८।।
पुण्डरीकं सिताम्भोजमथ रक्तसरोरुहे ।
रक्तोत्पलं कोकनदं नाला नालमथास्त्रियाम् ।।२६९।।
मृणालं विसमब्जादिकदम्बे षण्डमस्त्रियाम् ।
करहाटः शिफाकन्दं* किञ्जल्कः केसरोऽस्त्रियाम् ।।२७०।।
संवर्तिका नवदलं बीजकोषो(ग) वराटकः ।।२७१क ।।

।।०।। इति वारिवर्गः ।।०।।

।।०।। पातालवर्गः समाप्तः ।।०।।

पद्माकरः पद्मानामाकर उत्पत्तिस्थानं 'पद्माकरः'। "क्वचित् पद्मशून्येऽपि योग्यतया" इति सुभूतिः।

तडयते आहन्यतेऽसाविति। तड आघाते। तडयते। "तडागादयश्च"[878] इत्यनेनाकप्रत्यये कस्य गत्वे च निपातनात्

(१) शेवालं शेवलोऽथ—क्षीर° (क) विसिनी—भानु° (ख) बिस—भानु°

* शिफाकन्दः—others. (ग) वीजकोषो—भानु°; बीजकोशो—क्षीर°, रघुनाथ।

878 तडागादयश्च cannot be traced in the printed उणादि। सर्वा° derives it by the rule "पिनाकादयश्च" (उ० ४।१५)। नारायण (दशपादी ३।३४) informs us : "तड आघात इत्यस्मात् तडाकोऽत्र (कस्त्वत्र ?) वृत्तिकृत्। तडागं मन्यते भोजस् "तडेरागज्" इतीरयन् ।। टीकासर्वस्वकारस्तु तटाकमपि रक्षितुम्। आके कृते तडेरेव बाहुल्याट् टत्वमिच्छति ।।" cf. "पिनाकादयश्च इत्यनेन आकप्रत्ययः। डकारस्य च टत्वम्"—सर्वा°।

तडागः **(तटाकः)** 'तडागः'। "अस्त्री"त्यनेन संबन्धः। "पिनाकादित्वा" (उ० ४।१५) दाकप्रत्यये "तटाक" इति केचिद्"––इति सर्वानन्दः। तटमकति तटाक इत्यन्ये ।। **द्वे सपद्मागाधजलाशयस्य ।।**

कासारः कासति वाताहततरङ्गत्वेन शब्दायते। कासृ शब्दे। "तुषारादयश्चे" (उ० ३।१३९) त्यारन्। कं जलमासरत्यत्रेति वा 'कासारः'। "बाहुलकादधिकरणे घञ्" इति तु भट्टः[879] ।।

सरः सरन्त्यत्र जलानि। सर्तेरसून्। (उ० ४।१८८)। 'सरः' ।।२५५।।

सरसी तदेव महत् गौरादिङीषि (पा० ४।१।४१) 'सरसी'। "सरो जलं तद्योगादर्श आद्यचि (पा० ५।२।१२७) गौरादित्वात् ङीष्" (पा० ४।१।४१)––इति तु पञ्जिका ।। **"त्रीणि कृत्रिमपद्माकरस्ये"ति** स्वाम्यादयः। **"पञ्चैव सरोमात्रस्ये"ति** तु पञ्जिकाकोक्कटादयः ।।

वेशन्तः विशन्त्यत्र भेकमहिषादय इति। विश प्रवेशने। "जॄविशिभ्यां झच्" (उ० ३।१२६)। "झोऽन्त" (पा० ७।१।३) इत्यन्तादेशः। 'वेशन्तः'। वर्षासु अगाधजलः ग्रीष्मेऽल्प-[880]जलः शुष्यत्येव वा 'वेशन्तः' ।।

पल्वलम् पलति गच्छति। पल गतौ। "सानसिवर्णसिपर्णसितण्डुलाङ्कुशचषालेल्वलपल्वलधिष्ण्यशल्याः" (उ० ४।१०७) इति वलच्*। 'पल्वलम्'। "वेशन्तः पल्वलोऽस्त्री" ति वाचस्पतिः ।।

अल्पसरः अल्पं च तत् सरश्चेति 'अल्पसरः' ।। **त्रीण्यल्पसरसः ।।** "सामान्यवाचीत्येके" इति तु कोक्कटादयः ।।

वापी **(वापिः)** उप्यते पद्मादिकमस्यामिति। वपते "वसिवपियजिराजिव्रजी" (उ० ४।१२४) त्यादिना इञ्, वृद्धिः। "कृदिकारा"दिति (ग० ४।१।४५) ङीष्। 'वापी'। "वापि"रपि। अतएव "वाप्यां वापिरपि स्मृता" इति द्विरूपकोषः ।।

879 This भट्ट is certainly a different person from क्षीर°।

880 जानुमात्रजलः—B. * वल—सर्वा°।

दीर्घिका दीर्घेव 'दीर्घिका'। अधिकायतता चतुरस्रा। "संज्ञायां कन्" (पा० ५।३।७५)॥ **द्वे दीर्घिकायाः॥**

खेयमिति। खन्यत इति "ई च खन" (पा० ३।१।१११) **खेयम्** इति यत्। 'खेयम्"॥

परितः सर्वतः खन्यत इति "अन्येभ्योऽपी" (पा० **परिखा** ३।२।१०१) डः। 'परिखा'॥ **द्वे राजधान्यादिवेष्टन्याः "खातुआ" इति ख्यातायाः॥**

आधारः क्षेत्रादिसेकार्थं सेतुना वहमानं जलं यत्र निरूध्य स्थाप्यते सः। आध्रियते जलादिकमस्मिन्निति "अध्यायन्याये"(क) (पा० ३।३।१२२) त्यादिना आङ्पूर्वाद् धृञो घञि निपातनाद् 'आधारः'॥ **एकं "बान्ध" इति ख्यातस्य ॥२५६॥**

आलूयते तरूसेकार्थं खन्यत इदम्। लूञ् छेदने। आङ्-पूर्वात् "स्थाचतिमृजेरालज्वालजालीयचः"(१) (उ० १।११५) **आलवालम्** इति बाहुलकादन्यतोऽप्यालच्। "आलवालम्।" आ समन्ताज्जललवमालाति। मूलविभुजादित्वात् कः" (वा० ३।२।५) इति तु स्वामी। "आलिं सेतुं वलते धत्ते। कर्मण्यणि (पा० ३।२।१) पृषोदरादि" (पा० ६।३।१०९) रिति पञ्जिका। दीर्घादिरेवायम्। "शाखा दिशो जलधिमण्डलमालवाल*"मिति पूर्वकविप्रयोगः। "अलवालरोधिषु पयःसु बिभ्रतः सपलाशराशिमिव मूलसन्ततिम्" इति माघे[881] ह्रस्वादिश्च। "अपशब्द एवाय"मित्येके॥

आ वलते बहिर्निर्गमादम्भोऽत्र[882]। वलवल्ल संवरणे। आङ्पूर्वात् "हलश्चे" (पा० ३।३।१२१) ति घञ्। **आवालम्** 'आवालम्'॥

(क) भट्टोजि adds "अवहाराधारावायानामुपसंख्यानम्" to the rule while काशिका reads the rule as "अध्यायन्यायोद्यावसंहाराधारावायाश्च।"

(१) . . .वालञालीयचः—उज्ज्वल°

881 माघ 13/57 reads—

"विपुलालवालभृतवारिदर्पणप्रतिमागतैरभिविरेजुरात्मभिः।
यदुपान्तिकेषु दधतो महीरुहः सपलाशराशिमिव मूलसंहतिम्॥"

(मल्लिनाथ's version)

* शाखादिदेशे जलाधिमण्डलमालवालम्—A.

882 आ वलते वर्हिर्निर्गमादम्भोऽत्र—क्षीर°।

"आङ्-पूर्वो वपिर्न्यासार्थं" इति कलिङ्गः। आवपन्त्यत्र इति "हलश्चे" ति (पा० ३।३।१२१) घञि आवापः'। द्विज-प्रपा-चारकौ चात्रैव॥ **आवापः** **त्रीणि वृक्षसेचनार्थं तरुमूलकृतस्वल्पजलाधारस्य "चार" इति ख्यातस्य॥**

अर्थेति। स्रोतोयोगान्नदतीति। णद अव्यक्तशब्दे। पचादिषु नदडिति पाठात् टित्त्वात् ङीपि (पा० ४।१।१५) 'नदी'॥ **नदी**

सरतीति। सृ गतौ। सरतेरितिः(क)। 'सरित्'॥ **सरित्**

तरङ्गयोगात् 'तरङ्गिणी'। "अत इनिठना" (पा० ५।२।११५)"विति इनिः। एवं शैवलिन्यादित्रयम्। "ह्लादिनीत्यपि" (इति) स्वामी॥ **तरङ्गिणी, शैवलिनी, तटिनी, ह्रदिनी (ह्लादिनी)**

धुनोति वेतसादीनि। धूञ कम्पने। ह्रस्वान्तो दीर्घान्तोऽपि। बाहुलकान्नुग् (पा० ६।३।१०९)। गौरादित्वात् (पा० ४।१।४१) ङीष्। 'धुनी' ॥२५७॥ **धुनी**

स्रोतोयोगान्मतुपि 'स्रोतस्वती'। 'स्रोतोवहा" च। "स्रोतोवहा सागरगामिनीव" इति रघु-(६।५२) प्रयोगात्। विनि-(पा० ५।२।१२१) प्रत्यये तु "स्रोतस्विनी" इत्यपि॥ **स्रोतस्वती (स्रोतोवहा) (स्रोतस्विनी)**

एवं 'द्वीपवती'॥ **द्वीपवती**

स्रवतीति। स्रु गतौ। "तॄभूवहिवसिभासिसाधिगडिमण्डिजिनन्दिभ्यश्च" (उ० ३।१२८) इति बाहुलकात् झच्। 'स्रवन्ती' दन्त्यादिः॥ **स्रवन्ती**

निम्नं गच्छतीति "अन्येभ्योऽपि" (पा० ३।२।१०१) इति डः। टाप् (पा० ४।१।४)। 'निम्नगा'॥ **निम्नगा**

अपां समूह आपम्। तेन गच्छतीति पूर्ववड् (पा० ३।२।१०१) डः। आपं जलसमूहः। तद्योगाद् अर्शआद्यचि (पा० ५।२।१२७) आपः समुद्रः। तं गच्छतीति वा 'आपगा'। दीर्घादिः। 'शिखरिणामिव सागरमापगा" इति रघुः (९।१७)। अपगच्छतीति 'अन्येभ्योऽपी"ति (पा० ३।२।१०१) डः। **आपगा (अपगा)**

(क) सरतेरित्यति—A. इति is the suffix by the rule "हृसृरुहियुषिभ्य इतिः" (उ० १।९९)।

'अपगा' ह्रस्वादिरपि––सोमनन्दी। "आपः सन्त्यत्रेति भूम्नि अर्श आद्यचि (पा० ५।२।१२७) अपः समुद्रः। तं गच्छतीति डे ह्रस्वादिरपि"––पञ्जिका। अतएव "विपुलपुलिना वेतस्वस्वत्योऽपगाः कति शीलिता"[883] इति योगेश्वरः। तथाच "विद्यादगारमागारमपगामापगामपी" ति द्विरूपकोषः। एवं तनोदा[884] निर्झरिणी रोधवक्रा सागरगामिनी सरस्वती वाहिन्यूर्मिलादयोऽप्यत्रैव ॥ **द्वादश नद्याः ॥**

गङ्गा **गङ्गेति**। गच्छतीति। "गन् गम्यद्यो" (उ० १।१२२) रिति गन्। 'गङ्गा'। "ब्रह्मलोकाद् गां गता इति "अन्येभ्योऽपी" ति (पा० ३।२।१०१) डे पृषोदरादि" (पा० ६।३।१०६) रिति पञ्जिका ॥

विष्णुपदी विष्णुपदार्घसम्भूतत्वात्* विष्णुपदात् प्रभवतीति 'विष्णुपदी'। प्रभवतीत्यर्थे अणि (पा० ४।३।५३) संज्ञासंपूर्वकत्वाद्वृद्ध्यभावः। "कुम्भपदीषु चे" (पा० ५।४।१३६) ति वा साधुः ॥

जह्नुतनया (जाह्नवी) जह्नुना राजर्षिणा यज्ञवाटं प्लावयन्तीयं पीता पश्चादुज्झिता सुतात्वेन च प्रतिपन्नेति 'जह्नुतनया'। 'जाह्नवी' च ॥

सुरनिम्नगा **'सुरनिम्नगा'** इति। क्षुभ्नादित्वात् णत्वाभावः (पा० ८।४।३६)। 'वाप्रकरणे गिरिनद्यादीनामुपसंख्यानम्'। (वा० ८।४।१०) इति वा णत्वम्––इति तु सर्वधरः (क) **॥२५८॥**

भगीरथेनेमं लोकमवतारिता। "शेष" (पा० ४।२।६२) इत्यणि, "तस्येदम"र्थे (पा० ४।३।१२०) वाणि ङीपि (पा० **भागीरथी** ४।१।१५) 'भागीरथी' ॥

त्रिपथगा त्रीण् पथो गच्छतीति पूर्ववड् (पा० ३।२।१०१) डः। 'त्रिपथगा' ॥

तथाच भारते––

"क्षितौ तारयते मर्त्यान् नागांस्तारयतेऽप्यधः।
दिवि तारयते देवांस्तेन त्रिपथगा स्मृता ॥"

883 सेविताः—सर्वा°।

* विष्णुपदार्घोत्था—क्षीर°

884 वनोदा—B.

(क) Also सर्वा°।

त्रिभिः स्रोतोभिर्ब्रह्मलोकात् प्रभवतीति 'त्रिस्रोताः'॥ **त्रिस्रोताः**

शान्तनोर्महिषी भूत्वा भीष्मं सूतवती। "सत्सूद्विषे" ति (पा० ३।२।६१) क्विप्। 'भीष्मसूः'॥ **भीष्मसूः** एवं गाङ्गिनी-हैमवत्युग्रशेखरा-धर्मद्रवी-सिद्धसिद्धादयोऽप्यत्रैव। **अष्टौ गङ्गायाः ॥**

केति। कलिन्दस्यापत्यं 'कालिन्दी'। कालियं नागं दयते रक्षतीति वा। पृषोदरादिः (पा० ६।३।१०६)। कलिन्दपर्वतात् प्रभतीति वा 'कालिन्दी'––इति सर्वधरः। **कालिन्दी**

सूर्यस्य तनया दुहिता 'सूर्यतनया'॥ **सूर्यतनया**

यच्छति सद्गतिमिति यमेः "अजियमिशीङ्भ्यश्च" (उ० ३।६१) इत्युनन्। टाप् (पा० ४।१।४)। 'यमुना'। **यमुना** अन्तःस्थादिः ॥

शमनस्य यमस्य स्वसा भगिनी। ऋदन्ता। 'तापी'त्यादिकमप्यत्र* ॥ **शमनस्वसा** **चत्वारि यमुनायाः ॥२५६॥**

रेवेति। रेवृ प्लवगतौ। पचाद्यजन्ताट् (पा० ३।१।१३४) टाप् (पा० ४।१।४)। 'रेवा'॥ **रेवा** "रेव्यते असौ इति कर्मणि "गुरोश्च हल" (पा० ३।३।१०३) इत्यकारान्ताट्टाप्"––इति तु सर्वधरः ॥

नर्मक्रीड़ां नर्माख्यं[885] सुखं वा ददातीति[886] 'नर्मदा' ॥ **नर्मदा**

सोमवंशोद्भवत्वादुपचारात् सोमेन पुरुरवसाऽवतारितत्वात् (वा) 'सोमोद्भवा' ॥ **सोमोद्भवा**

मेकलनाम्नः ऋषेः कन्यका। मेकलो विन्ध्यः। तत्प्रभवत्वाद्वा 'मेकलकन्यका'। **मेकलकन्यका (मेखलकन्यका)** मेकलः कमध्यः खमध्योऽपि। तथाच महाकविप्रयोगः––"यन्मेखला भवति मेखलशैलपुत्री"––इति पञ्जिकासर्वधरादयः ॥ **चत्वारि नर्मदायाः ॥**

करेति। गौरीविवाहसमये शङ्करकरगलितसम्प्रदानतोयप्रभवत्वात् करस्य तोयं करतोयं। तदत्रास्ति। अचि (पा० ५।२।१२७) 'करतोया' ॥ **करतोया**

* तापी तु यमुना यमीति कोषः—इति भरतः—RNC.

885 स्वर्गाख्यं—B.

886 दयतीति—B.

सदानीरा

अरजस्वलत्वात् सदा नीरं यस्याः सा 'सदानीरा'॥ तथाच स्मृतिः––

"प्रथमं(क) कर्कटे देवी त्र्यहं गङ्गा रजस्वला।
सर्वा(ख)रक्तवहा नद्यः करतोयाम्बुवाहिनी॥" इति॥

द्वे करतोयाख्यनद्याः॥

बाहुदा

लिखितनाम्नः ऋषेश्छिन्नस्य बाहोर्दानाद् बाहुदानाद् 'बाहुदा'॥

सैतवाहिनी (आर्जुनी)

सितैव सैती। सैती चासौ वाहिनी नदी चेति 'सैतवाहिनी' इति सर्वधरः। "सकतं वहतीत्यावश्यके णिनिः (पा० ३।३।१७०)। पृषोदरादि" (पा० ६।३।१०९) रिति तु स्वामी। "सितवाहाः श्वेताश्वाः। तद्योगात् सितवाही श्वेतवाहनः कार्तवीर्यः। तेनावतारितत्वात् तस्येयमिति (पा० ४।३।१२०) अणि सैतवाहिनी"––इति पञ्जिका। 'आर्जुन्य'-प्यत्रैव॥ **द्वे बाहुदाख्यनद्याः**[887] ॥२६०॥

पुत्रशोकसन्तप्तो[888] वसिष्ठः कण्ठे शिलां बद्ध्वा नद्यामस्यां प्रविष्टोऽत इयं भीत्या शतधा द्रुतेति। द्रु गतौ। "हरिमितयोर्द्रुवः शते च" (उ० १।३५, ३६) इत्युप्रत्ययः[889]।

शतद्रुः

स च डित्। 'शतद्रुः'॥

(शुतद्रुः)

शतद्रुरेव पृषोदरादित्वाद् (पा० ६।३।१०९) आदिवर्णविकारे "शुतद्रु" रिति स्वामी॥

शितद्रुः

"शितं तीक्ष्णं द्रुता शितद्रु" रिति कौमुदी। 'विपाशासाहचर्यात् अनयोः स्त्रीत्व"मिति स्वामी[890]॥ **द्वे शतद्रुनाम्न्या नद्याः॥**

(क) यथासौ—सर्वा°। आदौ कर्कटके—RNC.

(ख) अन्या—सर्वा°।

887 बाहुदानाख्य—B.

888 पुत्रशोकेन—B.

889 In तत्त्व° we have two सूत्र's—"हरिमितयोर्द्रुवः" (उ० ३५), and "शते च" (उ० ३६)। The suffix there is कु। दशपादी (१।११९) omits "शते च"।

890 "शु पूजितमाशु वा तुदति 'शुतुद्रिः'। एतदबुध्यमानाः 'शितद्रुः सितद्रुर्वा' इत्याहुः। "इमं मे गङ्गे यमुने सरस्वति शुतुद्रि" (ऋक्° १०।७५।५) इति हि श्रुतिः।—क्षीर°। विपाशासाहचर्यात् etc. is not found in क्षीर's text.

पुत्रशोकादेव पाशं बद्ध्वा प्रविष्टं वसिष्ठं पाशच्छेदाद् विपाशितवती विमुक्तपाशं कृतवतीति "सत्यापपाश" (पा० ३।१।२५) इत्यादिना पाशान् मोचयतीति* णिच्। ततः पचाद्यच् (पा० ३।१।१३४)। टाप् (पा० ४।१।४)। 'विपाशा'॥

विपाशा

विपाट्

'विपाट्' इति पूर्ववण्णिजन्तात् "अन्योभ्योऽपि दृश्यते" (पा० ३।२।१७८) इति क्विप्॥ **द्वे विपाशानद्याः॥**

शोणः

शोण इति। शोणृ वर्णगत्योः। पचाद्यच् (पा० ३।१।१३४)। 'शोणः' तालव्यादिः॥

हिरण्यवाहुः (हिरण्यवाहः)

हिरण्यं वहतीति। "वहिरहितलिपंसिभ्यश्च(क)" इति उन्। हिरण्यवाहुः'(१)। "हिरण्यं वहतीत्यणि हिरण्यवाह" इति माधवी। "हिरण्यं वाहावस्य"(२) इति तु स्वामी॥ **द्वे शोणनदस्य॥**

कुल्या

कुलति। कुल संस्त्याने। "अघ्न्यादयश्च" (उ० ४।१११) इति यक्। 'कुल्या'। कुले प्राणिगणे साधुरिति वा। नदीमात्रेऽपि कुल्या। तथाच––"कुल्या नदी कुल्यमस्थि कुल्या वारिप्रणालिका" इति धरणिः॥ **एकं कृत्रिमस्वल्पनद्याः। "उद्यानादिसेकार्थं स्वल्पजलाशयस्य"** इति स्वामी ॥२६१॥

शरावती

शरवणयोगात् 'शरावती'। मतुपि (पा० ५।२।९४) "शरादीनाञ्च" (पा० ६।३।१२०)" इति दीर्घः। "संज्ञायाम्" (पा० ८।२।११) इति वत्वम्।

वेत्रवती

वेत्रवनयोगाद् 'वेत्रवती'। मतुप्॥

चान्द्रभागा (चान्द्रभागी)

चन्द्रभागो नाम गिरिः। ततः प्रभवतीत्यर्थे अणि (पा० ४।३।५३) ङीपि (पा० ४।१।१५) प्राप्ते "चन्द्रभागान् नद्याम् (गण० ४।१।४५)" इति बाह्वादिषु ङीपो

---

* पाशाद् विमोचने इति—B_2

(क) This rule is not found in the उणादि texts of the Pāṇinian School. उ० १।२८ derives बाहु with the suffix कु added to बाधृ लोडने। उज्ज्वल° also admits बाह and बाहा to mean arms.

(१) मुकुट seems to have हिरण्यवाहु and not हिरण्यबाहु।

(२) This is found in भानु°। क्षीर°'s text reads "हिरण्यं वहति"।

(चन्द्रभागा) (चन्द्रभागी)

विकल्पविधानसामर्थ्यात् (क) पक्षे टाप्। ङीषैव ङीप्कार्यसिद्धेर्ङीप् न भवत्येव रूपस्वरयोरविशेषात्। 'चान्द्रभागा', 'चान्द्रभागी'। शब्दार्णवे चोक्तम्––"तापी तु तपती सैत्या[891] चान्द्रभागी तु चन्द्रिका ।। चान्द्रभागा शारदा तु कश्मीरेषु सरस्वती" इति। संज्ञापूर्वकत्वाद् वृद्ध्यभावे ह्रस्वादिरपि "चन्द्रभागा"शब्दः। केचित्तु "चन्द्रभागा नद्या" मिति टाबन्तमेव पठन्ति। "चन्द्रभागा चान्द्रभागा चान्द्रभागी च सा मता। चन्द्रभागी च सैवोक्ता" इति द्विरूपकोषात् ।।

सरस्वती

'सरस्वती' प्रागुक्ता ।।

कव्यते वर्ण्यते। कवृ वर्णे। णिच् (ख)। "मूलेरादयश्च" (उ० १।६२) इत्येरक्। गौरादित्वात् (पा० ४।१।४१) ङीष्। कस्य जलस्य वेरं शरीरम्। [कवेरम्]। ततस्तस्येदमणि (पा० ४।३।१२०) वा 'कावेरी'। "एताः 'सरितो' नद्यः। 'अन्याश्चे'ति मुरला-कोङ्कणावती-गण्डकी-कौशिकी-चर्मण्वती-सिप्रा-तापनी-तापी-भार्गवी-गोदा-गोदावरी-गौतमी-महेन्द्रतनया-सिन्धु-फल्गु-सरयूप्रभृतयः (ग्राह्याः) ।। **स्वनामप्रसिद्धानां नदीनां पृथक् पृथक् ।।**

कावेरी

सम्भेदः

समिति। नदयोर्नद्योः नदीसमुद्रयोश्च मेलके 'संभेदः'। नदे नद्यां समुद्रे च सिन्धुशब्दप्रवृत्तेः। संभिद्यन्ते मिलन्ति अस्मिन्निति[892]। "हलश्चे" ति (पा० ३।३।१२१) घञ् ।। **एकं नदनदीसमुद्राणां मेलकस्य ।।२६२।।**

नल्यते बध्यतेऽसौ। नल बन्धने। कर्मणि घञ् (पा० ३।३।१९)। प्रपूर्वात् "उपसर्गा" (पा० ८।४।१४) दित्यादिना णत्वम्। गौरादिङीषि (पा० ४।१।४१) 'प्रणाली'। "प्रणालश्च"। "मकरमुखा"प्यत्रैव ।। **"हर्म्यदेवकुलादेः कृत्रिमजलनिःसरणमार्गस्यैकम् ।।**

प्रणाली (प्रणालः)

(क) ङीप् ङीषर्थं न भवतीत्यत्र—B. adds here.

891 शैत्या—B. ∵ शैत्या चन्द्रभागा तु चन्द्रका––सर्वा°।

(ख) णिच्च—A., B. कबृ वर्णे—पा० धा०

892 सम्यक् भेद्यते अस्मिन्—B.

'उत्तरौ' वक्ष्यमाणौ द्वौ शब्दौ 'त्रिषु' लिङ्गेषु स्याताम् ।।

कौ तावित्याह––**देवीति**। देवयतीति ण्वुल् (पा० ३।१।१३३)। 'देविका' नदी। तदुत्पन्नवस्तुनि 'दाविकः'। 'तत्र भव" (पा० ४।३।५३) इत्यणि "देविकाशिंशपा" (पा० ७।३।१) इत्यादिना अचामादेरात्वम् ।।

देविका

दाविकः

सरतीति 'सरयूः'। सर्तेरयूः (उ० ३।२२)। "अयु"रित्येके*। 'सरयूः'। ततो भवार्थेऽण् (पा० ४।३।५३)। आदिवृद्धिः (पा० ७।२।११७)। ओर्गुणः। (पा० ६।४।१४६)। 'दाण्डिनायन" (पा० ६।४।१७४) इत्यादिना यलोपे 'सारवः' निपात्यते। स्त्रियां "दाविकी," "सारवी"। **उक्तार्थद्वये क्रमेणैकम् ।।२६३।।**

सरयूः

सारवः (दाविकी) (सारवी)

सौगन्धिकम् इति। सुगन्ध्येव 'सौगन्धिकम्'। स्वार्थे विनयादिभ्यष्ठक् (पा० ५।४।३४)। "शोभनो गन्धः सुगन्धः स शीलमस्य इति "शीलम्" (पा० ४।४।६१) इति ठक्" इति तु सर्वानन्दः। "शोभनो गन्धः प्रयोजनमस्येति" "प्रयोजनम्" (पा० ५।१।१०९) इति ठक्"––इत्यन्ये ।।

सौगन्धिकम्

कस्य जलस्य हार इव शोभाकरत्वात्। पृषोदरादित्वात् (पा० ६।३।१०९) 'कह्लार'–– इति स्वामी। के जले ह्लादते सुखं तिष्ठतीति नैरुक्ते दकारस्य रेफः। 'कह्लारम्'–– इति तु पञ्जिकादयः ।। **द्वे सौगन्धीति[893] ख्यातस्य पुष्पस्य ।।**

कह्लारम्

ह्लादयतीति पृषोदरादित्वात् (पा० ६।३।१०९) 'हल्लकम्'[894] ।।

हल्लकम्

सन्ध्येव रक्तं 'रक्तसन्ध्यकम्'। इवार्थे कन् (पा० ५।३।९६)। "केऽण" (पा० ७।४।१३) इति ह्रस्वत्वम्।

रक्तसन्ध्यकम्

* उणादि texts read सर्तेरयुः। उज्ज्वल° informs us that गोपालित has सरयूः by adding ऊङ (पा० ४।१।६६)। पारायण, however, has सर्तेरयूः। माधव and नारायण accept पारायण। श्वेतवनवासी follows गोपालित। मुकुट seems to have a text of उणादि different from the texts that we have in print.

893 सोन्धीति ख्यातस्य—B.

894 पृषोदरादित्वे—A., हल्वकम्—B.

"वाहिताग्न्यादिषु" (पा० २।२।३७) पूर्वनिपातः। "रक्तान् सन्धीन् अकति गच्छति व्याप्नोतीति अकअग कुटिलायां गतौ। मूलविभुजादित्वात् (वा० ३।२।५) क"––इति तु पञ्जिका ।। **द्वे रक्तसौगन्धीति ख्यातस्य**[895] **। रक्तवर्णत्रिकालविकासिपुष्पस्य "राताडे साञ्जीति**(क) **ख्यातस्य"** इत्येके। **"सौगन्धिकादिचतुष्कं स्वनामप्रसिद्धं पृथक् पृथक्"**––इति तु पञ्जिका ।।

उत्पलम् — उत्पलति उद्गच्छतीति 'उत्पलम्'। पल गतौ। पचाद्यच्। (पा० ३।१।१३४)।।

कौ पृथिव्यां वलते। वलवल्ल संवरणे। "तनेः कयन्"[896]
कुवलयम् — इति बाहुलकादतोऽपि कयन्। 'कुवलयम्'। "कोर्वलयमिव शोभाकरत्वादि" ति तु स्वामी[897]। "कुवलं तूत्पलं कुवम्। इति त्रिकाण्डशेषः। अत्र उत्पलशब्दस्य पद्मकुमुदादिषु सामान्येन वृत्तिः। अतएव "महोत्पलम्" इति पद्मस्य संज्ञा। अतएव सामान्यवृत्तित्वात् नीलाब्जेऽप्येतयोर्वृत्तिर्दृश्यते। तथाच––"इन्दीवरे मांसशून्ये उत्पलं कुष्ठभूरुहे" इति रभसः। "श्यामं शितिकण्ठनीलं कुवलयमिन्दीवरं च नीलाब्जम्" इति नाममाला च। ननु यद्येवं कथमुत्पलमित्युक्ते नीलोत्पलादिष्वेव बुद्धिर्जायितेः न पद्मादौ?––इति चेत्, उच्यते। यथा सामान्येऽपि धान्यार्थे "धान्य-"मित्युक्ते कलमादिष्वेव बुद्धिर्भवति, न मुद्गादौ एवमिहापि इत्यदोष"––इति स्वामिसर्वधरादयः।* **द्वे (उत्पलस्य)** ।।

नीलाम्बुजन्म — नीलञ्च तदम्बुजन्म चेति 'नीलाम्बुजन्म'। नान्तम् ।।२६४।।

895 रक्तसोन्धीति ख्यातस्य—B.
(क) रातासाञ्जी—B.
896 उणादि texts read "वलिमलितनिभ्यः कयन्" (उ० ४।९९)।
897 Not found in Sharma's ed. of क्षीर°।
* स्वामी omitted in शिवदत्त's ms.

इन्दति परमैश्वर्येन योजयति इन्दिर्लक्ष्मीः।[898] इदि परमैश्वर्ये। "अच इः" (उ० ४।१३८)। "कृदिकारादि" (ग० ४।१।४५) ति ङीष्। इन्दी। तस्या वरमिष्टम् 'इन्दीवरम्'। "इन्द्रियमावृणोतीति पृषोदरादित्वाद् (पा० इन्दीवरम्
६।३।१०९) इन्दीवरम्" इति स्वामी। "कुवलयं स्यादिन्दी- (इन्दीवारम्)
वरमित्यपि(क)" इति व्याडिः। "इन्दीवारं" च। पञ्जिकाकारस्तु "अत्रोक्तचकाराभ्याम् उत्पलकुवलये अप्यत्र"––इत्याह ।। **द्वे नीलोत्पलस्य** ।।

सीति। कौ मोदते 'कुमुदम्'। मूलविभुजेति कः (वा० कुमुदम्
३।२।५) ।।

के जले रौति। पचाद्यच् (पा० ३।१।१३४)। "तत्पुरुषे कृती" (पा० ६।३।१४) त्यलुक्। केरवो हंसः। तस्येदं प्रियमिति 'कैरवम्'। "कैरवं गन्धकान्तं च गर्दभं कैरवम्
कुमुदं कुमुद्"[899] इति माधवः(ख) ।। **द्वे शुक्लोत्पलस्य** ।।

'एषां' सौगन्धिकादीनां कैरवान्तानां 'कन्दो' मूलं 'शालूकम्'। शल्यते संव्रियते। शलति चलति स्वस्थानाद्वा। शल चलनसंवरणयोः। "शलिमण्डिभ्यामूकण्" (उ० ४।४२)। वृद्धिश्च (पा० ७।२।११६)। 'शालूकम्'। तालव्यादि। शालूकम्
एकं (सौगन्धिकादेः कन्दस्य) ।।

वारीणि पर्णान्यस्या इति 'वारिपर्णी'। "पाककर्ण" वारिपर्णी
(पा० ४।१।६४) त्यादिना ङीष् ।।

के जले उम्भति पूरयति व्याप्नोति। अण् (पा० ३।२।१)। शकन्ध्वादिः (वा० ६।१।९४)। ङीप् (पा० ४।१।१५)। कुम्भी। ततः स्वार्थे कन् (पा० ५।३।८७)। ह्रस्वः (पा० ७।४।१३)। 'कुम्भिका'।। **द्वे "पह्ला" इति**[900] कुम्भिका
ख्यातायाः ।।२६५।।

898 इन्दी लक्ष्मीः—B.
899 कैरवं चन्द्रकान्तं—A. कुमुदं कुमुदे—भानु°। भानु° omits 'च'।
(क) "इन्दीवारमित्यपि"—भानु°।
(ख) "अतः" कुमुद् "इत्यपीति रायः"—RNC.
900 पह्लासीति—A.

जलेति। नील वर्णे। अण् (पा० ३।२।१) ङीपि
जलनीली (पा० ४।१।१५) 'जलनीली'। नीलत्वाज्जलं नीलयति। अणि (पा० ३।२।१) ङीपि (पा० ४।१।१५) वा ॥

शैवालम् जले शेते तिष्ठतीति "शीङो धुक्लक्वलञ्वालनः"
(शैवलम्) (उ० ४।३८) इति वलञादिभिः 'शैवलं', 'शेवलं' 'शैवाल'
(शेवलम्) मिति रूपत्रयम्। "सकलशे कलशेवलमालिके"[901] ति
(शीवलम्) कप्फिनाभ्युदयात्[902] "शेवल" मपि। "शेवलश्चैव शैवालः
शैवलः शैवलो जलनीलिका"[903] इति वाचस्पतिः। "शीवलम्" इति भीमसेनः॥ **त्रीणि "सेहाली"ति ख्यातस्य॥**

कुमुदान्यत्र देशे सन्तीति "कुमुदनडवेतसेभ्यो ड्मतुप्" (पा० ४।२।८७)। "टे" (पा० ६।४।१४३) रित्यकार-लोपे "झय" (पा० ८।२।१०) इति वत्वम्। "उगितश्चे"
कुमुद्वती (पा० ४।१।६) ति ङीप्। 'कुमुद्वती'॥

कुमुदिनी 'कुमुदिनी' ति मत्वर्थे "पुष्करादिभ्यो देशे" (पा० ५।२।१३५) इतीनिः॥ **"द्वे कुमुदयुक्तसरोवरादे"**रिति सर्वधरकोक्कटौ[904]। **"कुमुदलताया"** इति तु पञ्जिकादयः।

नलिनी अलति बध्नाति सौरभम्। पुलिनवदिनन्*। 'नलिनम्'। नलं नालात्रास्तीति "फलबर्हाभ्यामिनच्" (वा० ५।२।१२२-काशिका) इति चकारादतोऽपि इनच् इति नलिनम्"––इति तु पञ्जिका। "नलिनमत्रास्तीति अर्श आद्यचि (पा० ५।२।१२७) गौरादिङीषि (पा० ४।१।४१) नलिनी" ––इति कलिङ्गः। "पुष्करादिषु (पा० ५।२।१३५) नड-शब्दस्य पाठात् डलयोरेकत्रस्मरणात् लत्वे नलिनी" ति

901 शेवलमालकेति—सर्वा°।
902 कल्कियमकाभ्युदयात्—B., कथिताभ्युदयात्––शिवदत्तः।
903 शेपलश्चैव शैपालः—B.
904 कोक्कटादौ––A.

* मुकुट has not given his own derivation of पुलिन (वारि° २३७)। उज्ज्वल° and others derive पुलिन by the rule "तलिपुलिभ्याञ्च" (उ० २।५३) with इनन् while they have नलिन with इनच् by the rule "बहुलमन्यत्रापि" (उ० २।४६)।

सोमनन्दी। वयं तु "नली मनःशिलायान्तु नलिनेऽपि नलं मतम्" इति विश्वप्रकाशात्[905] पद्मवचनात् नलशब्दात् "पुष्करादित्वा"दिनौ, "समूहार्थे खलादिभ्य"(क) (वा० ४।२।५१) इनौ वा 'नलिनी' त्याचक्ष्महे॥

विसं पद्ममूलाङ्कुर[906]स्तद्योगाद् 'विसिनी'। नलिनी- **विसिनी**
वदिनिः॥

एवं 'पद्मिनी' त्यपि॥ **पद्मिनी**

"अथ" शब्दोऽत्राद्यर्थे। तेन 'मृणालिनी'-'पुटकिनी'-त्यादेरपि ग्रहणम्। कुमुदिनी-पद्मिनीत्यादिकं कुमुदसमूहे पद्मसमूहे च वर्तते। तथाच––"सुरगज इव बिभ्रत् पद्मिनीं दन्तलग्नाम्" (कुमार, ३।७६) इत्यादयश्च प्रयोगाः। कुमुदपद्मादिमात्रेऽपि वर्तते। तथाच––"नलिनी पद्मिनी पद्म व्योमसिन्धुसरोवर" इति विश्वः। "पद्मिनी पद्मसंघाते स्त्री-विशेषसरोऽम्बुजे" इति मेदिनिः ॥२६६॥

"वा पुंसी" ति। पद्यते लक्ष्मीरत्रेति। पद गतौ। अर्तिस्तुसुहुसृधृक्षी" (उ० १।१३९) त्यादिना मन्।
'पद्मम्'। "वा पुंसि" पद्ममित्यन्वयः॥ **पद्मम्**

'नलिनं' नलिन्यामुक्तम्॥[907] **नलिनम्**

अरं शीघ्रं लिप्सां विन्दति। गोविन्दवत् श-प्रत्ययः (वा० ३।१।१३८) (ख)। "शे मुचादीनाम्" (पा० ७।१।५९)
नुम्। 'अरविन्दम्'। अरं वातं विन्दतीत्यन्ये॥ **अरविन्दम्**

महच्च तदुत्पलञ्चेति 'महोत्पलम्'॥ **महोत्पलम्**

शतसहस्रपदं बहूपलक्षणम्। सहस्रं पत्राण्यस्य
'सहस्रपत्रम्'॥ **सहस्रपत्रम्**

905 विश्वः––भानु°
906 पद्ममूलाङ्कुरं—B.
(क) समूहमेखलादिभ्य—A.
907 नलिनीत्यत्रोक्तम्—B.

(ख) All the mss. here add "तुदादिभ्यः शः" (पा० ३।१।७७) which appears to be a thoughtless imitation of सर्वा°'s commentary. मुकुट himself has derived गोविन्द by the application of श by the वा° under पा० ३।१।१३८––"गवादिषु विदेः (विन्देः—काशिका) संज्ञायाम्।"

कं जलमलति भूषयति इति। अल भूषणादौ।
कमलम् मूलविभुजादित्वात् (वा० ३।२।५) कः। 'कमलम्'।
काम्यते। कमे"वृंषादिभ्यः" कलच् (उ० १।१०८) इति
वा । कमला लक्ष्मीस्तदाश्रयत्वाद्वा ॥

शतपत्रम् पूर्ववत् 'शतपत्रम्'॥ सहस्रपत्रशतपत्रयोर्भिन्नत्वेऽपि
पद्मत्वादेकत्वम् ॥

"कुशमप्सु च" इति नानार्थे वक्ष्यते। कुशे जले
शेते इति "अधिकरणे शेतेः" (पा० ३।२।१५) इत्यच्।
"शयवासे" (पा० ६।३।१८) त्यादिना सप्तम्यलुक्।
"शेतिरत्र स्थितिवचनः। यथा जलाशय"—इति सर्वधरः।
कुशेशयम् 'कुशेशयम्' ॥२६७॥

पङ्के रोहतीति मूलविभुजादिना (वा० ३।२।५),
इगुपधेत्यादिना (पा० ३।१।१३५) वा कः। "तत्पुरुषे
पङ्केरुहम् कृती" (पा० ६।३।१४) त्यादिना अलुकि 'पङ्केरुहम्'॥

"तामरं घृतमर्णश्च" इति रुद्रकोषः[908]। तत्र सस्ति
तिष्ठतीति। षस स्वप्ने। "अन्येभ्योऽपी" (पा० ३।२।१०१)
तामरसम् ति डः। टिलोपे 'तामरसम्'। "दुर्जन इव सतामरसो
वसन्तः" इति वासवदत्तायां वसन्तवर्णनम् ॥

सरसि एव। भवार्थे अण् (पा० ४।३।५३)
सारसम् 'सारसम्'॥

सरस्यां रोहतीति पूर्ववत् के (पा० ३।१।१३५),
सरसीरुहम् (वा० ३।२।५) 'सरसीरुहम्'। सरःशब्दात् 'तत्पुरुषे कृती"
(सरसिरुहम्) (पा० ६।३।१४) त्यलुकि "सरसिरुह" मित्यपि[909] भवति।
तथाच भारविः (१२।३५)—"अयमच्युतस्य वचनेन
सरसिरुहजन्मन" इति ॥

विसप्रसूनम् विसं मृणालम्। तस्य पुष्पं 'विसप्रसूनम्'॥

राजीवम् केसरराजीयोगात् 'राजीवम्'। वप्रकरणे "अन्येभ्योऽपि-
दृश्यते" (वा० ५।२।१०६) इति वः ॥

908 इति निगमाख्यमभिधानम्—सर्वा°।
909 ह्रस्वेकारोऽपि—C.

'पुष्करम्' प्रागुक्तम्। पुष्करं जलमस्याश्रयत्वेनास्ति। पुष्करम्
अर्श आद्यचि (पा० ५।२।१२७) 'पुष्करम्'॥

सरसीरुहवद् 'अम्भोरुहम्'॥ **षोडश पद्मसामान्यस्य ॥** अम्भोरुहम्
२६८॥

पुण्डेति। पुण्डयति मण्डयति भूषयति जलमिति।
मडि भूषायां पुडि च। "पर्फरीकादयश्च" (उ० ४।२०)
इत्यरीकन्[910]। ('पुण्डरीकम्')॥ पुण्डरीकम्

सितं शुक्लं च तदम्भोजं चेति 'सिताम्भोजम्'॥ सिताम्भोजम्
द्वे शुक्लपद्मस्य ॥

अर्थेति। रक्तं च तत् सरोरुहं चेति 'रक्तसरोरुहम्'॥ रक्तसरोरुहम्
एवं 'रक्तोत्पलम्'। उत्पलञ्च पद्ममेव ॥ रक्तोत्पलम्

कोकांश्चक्रवाकान्नादयतीति नदेरन्तर्भावितण्यर्थात्
पचाद्यच् (पा० ३।१।१३४)। 'कोकनदम्'। ण्यन्तात् कोकनदम्
पृषोदरादित्वात् (पा० ६।३।१०९) ह्रस्वत्वं वा॥ **त्रीणि
रक्तपद्मस्य रक्तोत्पलस्य च ॥**

नेति। नलति बध्नाति। नल बन्धने। "ज्वलिती"
(पा० ३।१।१४०) त्यादिना णः। पक्षे टाप् (पा०
४।१।४)। 'नाला'॥ एवं 'नालम्'। "नाली" त्यपि। नाला
"नाली न ना* पद्मदण्डे नालीशाक-कलम्बके" इति मेदिनी॥ नालम्
उपमानादन्यत्रापि ॥ **द्वे उत्पलादिदण्डिकायाः** ॥२६९॥ (नाली)

अर्थेति। मृण्यते हिंस्यते भक्षणार्थम्। मृण हिंसायाम्।
"तमिविशिविडिमृणी (उ० १।११७) त्यादिना कालन्।
'मृणालम्'। "अस्त्रियाम्" इति "मृणालम्" इति संबन्धः। मृणालम्
"मृणाली" ति स्वल्पा मृणालजातिर्गौरादिः (पा० ४।१।४१) (मृणाली)
—इति सर्वधरः। तथाच—"सान्द्रं चन्दनमङ्गले(१) वलयिता
पाणौ मृणालीलता" इति राजशेखरः॥

विस्यति(क) प्रेरयति उत्कण्ठयति ग्रहणार्थम्। विस

910 But this rule gives ईकन् and not अरीकन्। भानु° blindly follows राय°
* नालं न ना—भानु°; . . . नाला—शिवदत्त।
(१) चन्दनमङ्गे ?
(क) विसति—A, B.

प्रेरणे। इगुपधत्वात् (पा० ३।१।१३५) कः। 'विसम्''। दन्त्यान्तम्। तथाच––"हंसपङ्क्तिरिव विसंवादिनी" इति वासवदत्ता। "निर्दिष्टं दन्त्यान्तं विसिनीकन्दाभिधायि

विसम् विसम्" इति ऊष्मविवेकः। "मृणाले तु विशं विसम्" इति

(विशम्) द्विरूपकोषात् कदाचित् तालव्यान्तमपि ।। **द्वे मृणालस्य** ।।

षण्डम् **अब्जेति**। "अब्जादीनां कदम्बे" समूहे "षण्डमस्त्रियाम्" इत्यन्वयः। आदिना कुमुदादीनाञ्च। सनोति ददाति मुदम्। षणु दाने। "ञमन्ताड् डः" (उ० १।११३)। बाहुलकात् न "धात्वादेः षः स" (पा० ६।१।६४) इति

(शण्डम्) सत्वम्। तथाच––"षण्डः स्मृतो बलीवर्दे षण्डं तु कानने भवेद्" इति मूर्धन्यादावजयः। "शडि रुजायाम्, सङ्घाते च इत्यतो घञि (पा० ३।३।१८) शण्ड इति तालव्यादि"रिति रक्षितः। अतस्तालव्यशम्, मूर्धन्यषं च। 'षण्डम्'। तथाच "तालव्यो मूर्धन्योऽब्जादिकदम्बे(क) षण्डशब्दोऽयं मूर्धन्य एव वृषभे पूर्वाचार्यैर्विनिर्दिष्ट" इत्यूष्मविवेकः। समूहमात्रेऽपि। "मकुरमुकुरौ दर्पणे षण्डः समूहे दारदोऽम्बुधा" विति सारस्वतकोषात् ।। **एकं (पद्मादिसमूहस्य)** ।।

करहाटः **करेति**। करान् हस्तान् हाटयति दीपयतीति। हट दीप्तौ। ण्यन्तात् "कर्मण्यण्" (पा० ३।२।१)। 'करहाटः'। कं जलं रहति त्यजति करहं पद्मम्। ततो हटति बहिर्गच्छति 'करहाट' इति वा ।।

शिफा "सिहड" इति ख्यातो मूलतरुप्ररोहः। तत्-

शिफाकन्दम् सहितः कन्दो मूलं 'शिकाकन्दम्'––इति सर्वधरादयः। "शिफेति च कन्दमिति च पृथङ् नामनी" इति स्वामी। "कन्दोऽस्त्री सूरणे सस्यमूले जलधरे पुमान्" इति मेदिनिः। स्वामि-कौमुदी-पञ्जिकादौ तु "शिफाकन्दम्" इति क्लीवलिङ्गः पाठः। स एव युक्तः। "शालूकमेषां कन्दः स्यात्" इत्युक्तम्

(क) . . . म्वदण्डे—A. B.

(वारि॰ २६५)। इह च "कन्दम्" इति क्लीवोक्तेर्मिलित्वा कन्दमस्त्रीति प्रतिपादनात् ।। **द्वे पद्मादिमूलस्य** ।।

किञ्जेति। किञ्चिज्जलति(क) अपवारयति। जल

किञ्जल्कः अपवारणे। 'किञ्जल्कः' इति पृषोदरादिः (पा० ६।३।१०९) ।।

के जले सरतीति। सृ गतौ। पचाद्यचि (पा०

केसरः ३।१।१३४) "हलदन्ता" (पा० ६।३।९) दित्यलुक्।

(केशरः) 'केसरो' दन्त्यमध्यः। "सवितृ-किसलय-केसर-सभा" इति सभेदात्। "आन्दोलकुसुमकेशररेणुमुषी"ति* वासवदत्तायां तालव्यमध्योऽपि दृश्यते। तत्र के जले शीर्यत इति व्युत्पाद्यम् ।। **द्वे किञ्जल्कस्य ।।२७०।।**

सम्यग् वर्तते इति ण्वुल् (पा० ३।१।१३३)।

संवर्तिका संवर्तिका[911]। "संवर्तयति वेष्टयतीति" तु भट्टः।[912]

(संवर्तिः) 'संवर्ति''रपि। "संवर्तिर्नवपत्रिका" इति वोपालितात् ।।

नवदलम् नवं च तद् दलञ्चेति 'नवदलम्'।। **द्वे पद्मादीनां नवपत्रस्य ।।**

बीजकोषः (१) बीजस्य कोषः पात्रमाधारो 'बीजकोषः'। "कोषोऽस्त्री कुट्मले पात्रे" इति मेदिनिः ।।

वराटकः व्रियते दलैः।(ख) वृञ् आवरणे। "अन्येभ्योऽपि दृश्यत" इति आटच्।[913] ततः स्वार्थे कन् (पा० ५।३।७५)।

(क) ज्वलयतीति रायभरतौ—RNC.

* "आन्दोलितकुसुमकेशररेणुमुषि मारुते"––RNC.

911 सर्व्वर्तिका—A. Omitted in B.

912 This is from क्षीर°

(ख) व्रियत इति दलैः—A.

(१) बीजकोषः—भानु°।

913 We are not sure if मुकुट intends to apply अन्येभ्योऽपि दृश्यते (वा० ५।२।१०९) as a case of बाहुलक in connection with "आलजाटचौ बहुभाषिणि" (पा० ५।२।१२५) which in its turn is tagged to "वाचो ग्मिनिः" (पा० ५।२।१२४), or he refers to the उणादि rule "अन्येभ्योऽपि दृश्यन्ते" (उ० ४।१०५) which may be connected with अटच्। In case of the उणादि rule, however, पृषोदरादि (पा० ६।३।१०९) should be applied to account for the दीर्घ।

वरं दलानां वृतिमटति प्राप्नोति। संज्ञायां क्वुनि (उ० २।३२) वा 'वराटकः'। **द्वे पद्मबीजस्य "वरड" इति ख्यातस्य ।।२७१क।।**

।।०।। वारिवर्ग-विवरणम् ।।०।।

।।०।। पातालवर्ग-विवरणम् ।।०।।

उक्तं स्वर्व्योम-दिक्-काल-धी-शब्दादि सनाटचकम्।
पाताल-भोगि-नरकं वारि चैषां च सङ्गतम् ।।१।।
इत्यमरसिंहकृतौ नामलिङ्गानुशासने।
स्वरादिकाण्डः प्रथमः साङ्ग एव समर्थितः ।।२।।*

।।०।। इति श्रीमदमरसिंहविरचिते नामलिङ्गानुशासने प्रथमः काण्डः ।।०।।

उक्तवर्गान् संग्रहश्लोकेनोपसंहरति––**उक्तमित्यादि**–– ––इह काण्डे स्वर्-व्योम-दिक्-काल-धी-शब्दादि नाटचसहितं पाताल-भोगि-नरकं वारि च उक्तम्। "आदि"-शब्देन रूपरसादीनां ग्रहणम्। 'एषां' स्वरादीनां 'सङ्गतं' संबद्धं च उक्तम्। तद् यथा––**स्वःसङ्गतं** देवासुरादि। प्रसक्तानुप्रसक्ततया तत्सङ्गतं तदस्त्रवाहनादि। **व्योमसङ्गतं** विद्युन्नक्षत्रादि। तदनुप्रसक्तं करणादि। **दिक्-सङ्गतं** दिग्गजादि। **कालसङ्गतम्** उपरागादि। **धीसङ्गतं** विचारसंकल्पादि। **शब्दसङ्गतम्** उदात्तकलमन्द्रादि। तत्सङ्गतं यशोनिन्दादि। **नाटचसङ्गतं** भ्रकुंसनर्तकादि। **पातालसङ्गतं** शुषिरशेषवासुक्यादि। **भोगिसङ्गतं** विषफणादि। **नरकसङ्गतं** प्रेतवैतरण्यादि। **वारिसङ्गतं** मत्स्यकच्छपकमलादि। अत्रानुक्तमपि प्रसक्तानुप्रसक्ततया स्वयमूह्यम्।। 'वर्गः' प्रकरणम्।।

* Some mss. omit this verse.

'स्वरादी'-ति। आदिशब्देन पातालस्य ग्रहणम्।[914] पातालस्यापि स्वर्गतुल्यत्वात्। अतएव तस्य स्वर्गानन्तरं कथनम्। **'काण्डः'** प्रस्तारः **।।१-२।।**

।।०।। इति महिन्तापनीय-कविचक्रवर्तिराजपण्डितसार्वभौम-कविपण्डितचूड़ामणिमहाचार्यश्रीरायमुकुटमणिश्रीमद्बृहस्पति-कृतायां[915] पदचन्द्रिकाख्यायां टीकायां

(स्वरादिकाण्डो नाम)

प्रथमः काण्डः

।।०।। समाप्तः ।।०।।

।।०।। श्रीशब्दपूर्वं जयशब्दपूर्वं जयद्वयानन्तरितं तथैव।
त्रिसप्तकृत्वो रघुनाथनाम जप्तुर्निहन्ति
द्विजकोटिहत्याम्[916] ।।०।।

प्रथमः काण्डः

914 In his fn. (p. 109 ed. NSP, भानु°) शिवदत्त has rightly remarked:—"आदिशब्देन पातालस्य ग्रहणम् इति मुकुटः। तत्रायं भावः—अस्मिन् काण्डे द्वावेव मुख्यवर्गौ—स्वर्गः पातालश्च। तत्र नाट्यवर्गपर्यन्तं स्वर्गसाधारणपदार्थानां निरूपणात् स्वर्गवर्गत्वम्। तदुत्तरं पातालसङ्गतार्थनिरूपणात् पातालत्वम्। अतएव अग्निपुराणे प्रथमकाण्डे एतानेव पदार्थानुक्त्वा उपसंहृतम्—"स्वर्गपातालवर्गाद्या उक्ताः" इति। "तत्र आद्यशब्देन अवान्तरवर्गग्रहणम्"—इत्यपि मुकुटे व्यक्तम्"।

915 सर्वभौमकवि. . .महाचार्य. . .श्रीमद्बृहस्पति—Omitted in A. बृहस्पतिमिश्रकृतायां?

916 Omitted in B. This is obviously supplemented by the scribe.

AUTHORS AND WORKS CITED

BY RĀYAMUKUṬA

(References are to Pages)

INDEX OF WORDS WITH A PENTAGLOT VOCABULARY

(Words incorporated by the commentator are marked with asterisk*)

Sanskrit	Gender etc.	Page	Bengali	English	French	German	Hindi
अकूपार	पु०	२७२	সমুদ্র	Sea, Ocean	l' océan, la mer	die See, der Ozean	समुद्र
*अकूवार	पु०	२७२	সমুদ্র	Sea, Ocean	l' océan, la mer	die See, der Ozean	समुद्र
अक्षान्ति	स्त्री०	२३८	পরাভ্যুদয়ে অসহিষ্ণুতা	Envy	l' envie	Missgunst	ईर्ष्या
अखात	क्ली०	३०४	স্বতঃখাত জলাশয়	A natural Pond	la pièce d'eau naturel	ein natürlicher Tümpel	नहीं खोदे हुए तलाव
अगस्त्य	पु०	११४	নক্ষত্রবিশেষ, মুনিবিশেষ	a star, the Sage Agastya	le sage Agastya, l'astre	der stern, Name eines vedischen Ṛṣi	नक्षत्रके भेद, अगस्तचमुनि
अगाध	त्रि०	२८८	অতিগভীর, অতলস্পর্শ	Very deep	Très profond	unergründlich	अथाह
अग्नि	पु०	७२	বহ্নি	fire	le feu	Feuer	आग
अग्निकण	पु०	७७	বহ্নিকণা	a Spark	l'étincelle du feu	Funke	आगका टुकड़ा
अग्निभू	पु०	५४	দেবসেনাপতি	the divine generalissimo	le generalissime des dieux	Heerführer der Götter	देवसेनापति
अग्न्युत्पात	पु०	१४५	উল্কাদি বৈকৃত অগ্নি	A meteor	le météore	eine feurige Lufterscheinung	धूम्रकेतु
अघ	क्ली०	१६०	পাপ	Sin	le péché	die Sünde	पाप
अङ्क	पु०	११०	চিহ্ন, কলঙ্ক	a spot, a mark	la tache, la macule	der Flecken	चिह्न, कलङ्क

Sanskrit	Gender etc.	Page	Bengali	English	French	German	Hindi
अङ्क्य	पु०	२१६	মৃদঙ্গবিশেষ	a kind of drum	sorte de tambourin	eine Art Tamburins	मृदङ्गके भेद
अङ्गना	स्त्री०	९८	সার্বভৌমনামক দিগ্গজের পত্নী	the wife of the elephant Sārvabhauma	l'épouse de l'éléphant Sārvabhauma	ein Welt-elefantsweibchen	सार्वभौम दिग्गजकी हस्तिनी
*अङ्गविक्षेप	पु०	२२६	নৃত্যে অঙ্গ-ক্রিয়াবিশেষ	gesture	le geste	das Gebärdenspiel	लचकाना
अङ्गहार	पु०	२२६	নৃত্যে অঙ্গ-ক্রিয়াবিশেষ	gesture	le geste	das Gebärdenspiel	लचकाना
अङ्गारक	पु०	१२३	মঙ্গলগ্রহ	Mars	le Mars	der Planet Mars	मङ्गलग्रह
अङ्गिरस्	पु०	१२२	বৃহস্পতি	The planet Jupiter	la planète Jupiter	der planet Jupiter	बृहस्पति
अङ्गिरस	पु०	१२१	বৃহস্পতি	The planet Jupiter	la planète Jupiter	der Planet Jupiter	बृहस्पति
अङ्गीकार	पु०	१७५	প্রতিজ্ঞা	promise, agreement	la promesse, l' harmonie	das Versprechen, die Verständigung	प्रतिज्ञा
अच्छ	त्रि०	२८८	নির্মল, স্বচ্ছ	clear, transparent	clair, transparent	Klar, hell	निर्मल
अच्युत	पु०	३२	বিষ্ণু	Viṣṇu	le dieu Viṣṇu	Beiname Viṣṇus	विष्णु
अच्युताग्रज	पु०	३७	বলরাম	Kṛṣṇa's brother	le frère de Kṛṣṇa	Beiname Balabhadras	बलराम
*अजकव	क्ली०	४६	শিবের ধনু	Śiva's bow	l'arc de Çiva	Śivas Bogen	शिवके धनुष

Sanskrit	Gender etc.	Page	Bengali	English	French	German	Hindi
अजगव	क्ली०	४६	শিবের ধনু	Śiva's bow	l'arc de Çiva	Śivas Bogen	शिवके धनुष
अजगर	पु०	२५६	বৃহদাকার সর্পবিশেষ, অজগর (সাপ)	a Boa, a large serpent	le Boa	die Riesenschlange	अजगर सर्प
अजस्र	क्ली०	८६	নিরন্তর	continually	continuellement	fortwährend, ununterbrochen	नित्य
अज्जुका	स्त्री०	२२५	গণিকা (নাট্যোক্তি)	a courtesan	la courtisane	die Bulherin (in Drama)	वेश्या (नाटकमें)
अज्ञान	क्ली०	१७७	অবিদ্যা, জ্ঞানহীনতা	(spiritual) ignorance	l' ignorance (de l'esprit)	Unwissenheit	अज्ञान
अञ्जन	पु०	६७	পশ্চিম দিগ্‌গজ	The elephant of the West	l'éléphant des ouest	der Weltelefant	पश्चिम दिशाके हस्ती
अञ्जनावती	स्त्री०	६८	সুপ্রতীক দিগ্‌গজের পত্নী	The wife of the elephant Supratīka	l'épouse de l'éléphant Supratīka	ein Welt-elefantsweibchen	सुप्रतीकदिग्-गजकी हस्तिनी
अण्डज	पु०	२६२	মাছ	fish	le poisson	der Fisch	मछली
अतलस्पर्श	क्ली०	२८६	অতিগভীর	very deep	très profond	unergründlich	अथाह
अतिमात्र	क्ली०	८७	অতিশয়	excessive	excessif	übermässig	अतिशय
अतिवाद	पु०	२०५	অপ্রিয় বচন	opprobrious or unfriendy speech	le laïus infamant	beleidigende Reden	कठोर भाषण
अतिवेल	त्रि०	८७	অতিশয়	excessive	excessif	übermässig	अतिशय
अतिशय	पु०	८६	অতিমাত্র	excessive	excessif	übermässig	अतिशय

Sanskrit	Gender etc.	Page	Bengali	English	French	German	Hindi
*अत्तिका	स्त्री०	२२७	জ্যেষ্ঠা ভগিনী (নাট্যোক্তি)	an eldest sister	la soeur aînée	eine ältere Schwester	जेठी बहन
अत्यर्थ	क्ली०	८७	অতিশয়	excessive	excessif	übermässig	अतिशय
अदितिनन्दन	पु०	१५	দেব	deity	la divinité	die Kinder der Aditi	देवता
अदृष्टि	स्त्री०	२५१	ক্রুর দৃষ্টি	a look of displeasure	le regard de déplaisír	ein Blick des Misfallens	क्रूरदृष्टि
अद्भुत	पु०	२३०	বিস্ময়ভাবজ রসবিশেষ	the sentiment of surprise	le sentiment d'étonnement, la merveille	das Wunder	अद्भुत रस
	त्रि०	२३२	বিস্ময়কর	surprising, wonderful	étonnant	erstaunlich	ताज्जब, चकित करनेवाला
अद्वयवादिन्	पु०	२५	বুদ্ধদেব	Buddha	Bouddha	Beiname Buddhas	बुद्ध
अध:	अव्य०	२५४	পাতাল	the infernal region	l'enfer	die Unterwelt	पाताल
अधोक्षज	पु०	२५	বিষ্ণু	Viṣṇu	le dieu Viṣṇu	Beiname Viṣṇus	विष्णु
अधोभुवन	क्ली०	२५४	পাতাল	the infernal region	l'enfer	die Unterwelt	पाताल
अधोलोक	पु०	२५४	পাতাল	the infernal region	l'enfer	die Unterwelt	पाताल
अध्यवसाय	पु०	२४२	অতিশয়িত উৎসাহ	perseverance	la perseverance	Ausdauer	उत्साह

Sanskrit	Gender etc.	Page	Bengali	English	French	German	Hindi
अध्याहार	पु०	१७३	বিতর্ক	Reasoning	le raisonnement	die Folgerung, das Schliessen	विचार
अनक्षर	क्ली०	२१०	দুর্বাক্য	not fit for utterance	l' expression impropre	nicht anzureden	अकथनयोग्य
अनङ्ग	पु०	३६	কামদেব	Cupid	Cupidon	Beiname des Liebesgottes	कामदेव
अनच्छ	त्रि०	२८८	আবিল, ঘোলা	turbid (water)	trouble	trüb	मैले (जल)
अनन्त	क्ली०	६४	আকাশ	the sky	le ciel	Himmel	आकाश
	पु०	२५८	নাগরাজ	The king of the mythological serpents	le roi des serpents mythologiques	der König der mythischer Schlange	नागराज
अनन्यज	पु०	४०	কামদেব	Cupid	Cupidon	Beiname des Liebesgottes	कामदेव
अनर्थक	क्ली०	२१०	সমুদায়ার্থ-শূন্য বাক্য	unmeaning	absurde	ungereimt	अर्थहीन वचन
अनल	पु०	७४	অগ্নি	fire	le feu	Feuer	आग
अनवधानता	स्त्री०	२४४	প্রমাদ, ভুল	inadvertence, mistake	l' inadvertance, l' erreur	die Unachtsamkeit	असावधानता, प्रमाद
अनवरत	क्ली०	८६	সতত	continually	continuellement	unaufhörlich	नित्य
अनादर	पु०	२३५	পরিভব	disrespect, disfavour	la défaveur, la négligence	Verachtung, Nichtachtung	अनादर, अवमानना
अनारत	क्ली०	८६	অবিরত	continually	continuellement	unaufhörlich	नित्य

Sanskrit	Gender etc.	Page	Bengali	English	French	German	Hindi
अनिरुद्ध	पु०	४०	প্রদ্যুম্নপুত্র	son of Pradyumna	le fils de Pradyumna	Sohn des Pradyumna	प्रद्युम्नके पुत्र
अनिल	पु०	१८	দেবগণবিশেষ	a set of divinities	un groupe des dieux	Windgötter	विशेष प्रकारके देवगण
		८२	বায়ু	wind	le vent	Wind	पवन
अनिश	क्ली०	८६	সতত	continually	continuellement	unaufhörlich	नित्य
अनुकम्पा	स्त्री०	२३२	করুণরস, দয়া	Pathos, tenderness	le sentiment de pathétique, le tendresse	das Pathos, die Zartheit	करुणा रस, करुणा
अनुक्रोश	पु०	२३२	করুণরস, দয়া	Pathos, tenderness	le sentiment de pathétique, le tendresse	das Pathos, die Zartheit	करुणा रस, करुणा
*अनुतर	पु०	२८५	পারাণির কড়ি	the fare for the ferry	le frais de transport en bac	Färgeld	उतराई
अनुताप	पु०	२३६	পশ্চাত্তাপ	repentance	le repentir	die Reue	पछताना
अनुपमा	स्त्री०	९८	কুমুদদিগ্‌গজের পত্নী	The wife of the elephant Kumuda	l'épouse de l'éléphant Kumuda	ein Weltelefants-weibchen	कुमुद दिग्गजकी हस्तिनी
अनुभाव	पु०	२३५	ভাবব্যঞ্জক রোমাঞ্চাদি	indication of feelings	l'indication de passion	das Zeichen der Passion	भावप्रकाशक
अनुमति	स्त्री०	१४३	প্রতিপদ্‌যোগবশতঃ এক কলাহীন চন্দ্রযুক্ত পূর্ণিমা	the Moon a little gibbous	lune légèrement gibbeuse	der Mond zwischen Vollmond und Halbmond	कलाहीन चन्द्रमा

Sanskrit	Gender etc.	Page	Bengali	English	French	German	Hindi
अनुयोग	पु०	२०३	প্রশ্ন	a question	la question	die Frage	प्रश्न
अनुलाप	पु०	२०६	মুহুর্ভাষণ	Tautology	la tautologie	die Tautologie	बारम्बार भाषण
अनूरु	पु०	१२६	সূর্যসারথি	the dawn, the charioteer of the Sun	l' aurore, le char-pilote de soleil	das Morgengrauen, Sonnengotts Wagenführer	सूर्यके सारथि
*अनृत	क्ली०	२१०	মিথ্যাবাক্য	false	Faux	Falsch	झूठ
अनेहस्	पु०	१३८	সময়	Time	le temps	Zeit (überhaupt)	समय
अन्तक	पु०	७६	মৃত্যুদেবতা	the god of death	le dieu de la mort	Beiname des Yama	यमराज
अन्तराल	क्ली०	६६	মধ্যাবকাশ	included space	l'intervalle	innerlich	बीचभाग
*अन्तरिक्ष	क्ली०	६४	আকাশ	the sky	le ciel	Himmel	आकाश
अन्तरीक्ष	क्ली०	६४	আকাশ	the sky	le ciel	Himmel	आकाश
अन्तरीप	क्ली०	२८१	জলমধ্যবর্তী স্থলভাগ	an island	l' île	die Insel	बेट, द्वीप
अन्तर्धा	स्त्री०	१०६	অন্তর্ধান, অদৃশ্য হওয়া,	disappearance	disparition	die Verbergung	झपना
अन्तर्धि	पु०	१०६	অন্তর্ধান	disappearance	disparition	die Verbergung	झपना
अन्तिका	स्त्री०	२२७	জ্যেষ্ঠা ভগিনী (নাট্যোক্তি)	an eldest sister	la soeur aînée	eine ältere Schwester	जेठी बहन
अन्धकरिपु	पु०	४८	শিব	god Śiva	le dieu Çiva	Beiname des Śiva	शिवजी
अन्धकार	पु०	२५६	আঁধার	darkness	l' obscurité	Finsternis	अन्धकार
अन्धतमस	क्ली०	२५७	গাঢ় অন্ধকার	great darkness	l' obscurité profonde	dichte Finsternis	अत्यन्त अन्धकार

Sanskrit	Gender etc.	Page	Bengali	English	French	German	Hindi
*अन्धातमस	क्ली०	२५७	গাঢ় অন্ধকার	great darkness	l' obscurité profonde	dichte Finsternis	अत्यन्त अन्धकार
अन्धु	पु०	३०३	কূপ, কূয়া	a well	le puits	Brunnen	कुंआ
अप्	स्त्री०, बहु०	२७३	জল	water	l'eau	Wasser	जल, पानी
अप्पति	पु०	८१	জলদেবতা	the regent of water	le dieu de l'eau	der Wassergott	वरुणदेव
अप्पित्त	क्ली०	७६	অগ্নি	fire	le feu	Feuer	आग
अप्सरस्	स्त्री०	२१	দেবযোনিবিশেষ	nymph	la nymphe	Nymphe	अप्सरा, परी
	स्त्री०, बहु०	६६	স্বর্গের বরনারী	celestial nymph	la courtesane de paradis	eine Buhldirne des Himmels	स्वर्गकी वेश्या, परी
अपकारगिर	स्त्री०	२०५	ভর্ৎসনা	reproach	le reproche	Vorwurf	ललकारना
*अपगा	स्त्री०	३०६	নদী	river	le fleuve	der Fluss	नदी
अपत्रप	स्त्री०	२३७	(গুরুজন সন্নিধান-জনিত) লজ্জা	Bashfulness	la timidité	Verlegenheit	दुसरेसे लजाना
अपदिश	क्ली० अव्य०	६८	অগ্ন্যাদিকোণ, বিদিক্	Intermediate points	les points cardinaux intermédiaire	in einer Zwischengegend (der Windrose	अग्नि आदि कोण
अपदेश	पु०	२४७	ছল, স্বরূপাচ্ছাদন	Pretext, disguise	le disguisement, prétexte	der Vorwand, die Verstellung	बहाना करना
अपभ्रंश	पु०	१६१	অসংস্কৃত বচন	ungrammatical language	le language contraire à la grammaire	abweichende Sprache	अपभ्रष्ट शब्द

Sanskrit	Gender etc.	Page	Bengali	English	French	German	Hindi
अपर (पक्ष)	पु०	१४८	কৃষ্ণপক্ষ	the dark fortnight	quinze jours obscurs	der spätere vierzehn Tage	कृष्णपक्ष
अपराह्ण	पु०	१३८	দিবসের অন্তভাগ	afternoon	après midi	der nach Mittag	मध्याह्नोत्तर काल
अपर्णा	स्त्री०	५२	দুর্গা	goddess Durgā	la déesse Durgā	Beiname Durgās	दुर्गादेवी
अपलाप	पु०	२०७	অস্বীকারসূচক উক্তি	denial	le refus	die Verneinung	मुकर जाना
अपवर्ग	पु०	१७७	মুক্তি	beatitude, salvation	la béatitude, bonheur éternel	die ewige Seligkeit	मोक्ष
अपवाद	पु०	२०५	নিন্দা	censure, blame	la censure, le mépris	Vorwurf, Tadel	निन्दा
अपवारण	क्ली०	१०६	অন্তর্ধান	disappearance	disparition	die Verbergung	झपना
अपशब्द	पु०	१६२	অসংস্কৃত বচন	ungrammatical language	le language contraire à la grammaire	abweichende Sprache	अपभ्रष्ट शब्द
अपाची	स्त्री०	९६	দক্ষিণ দিক	south	le sud	Süden	दक्षिण दिशा
अपान	पु०	८४	দেহস্থ বায়ুবিশেষ	an air within the body	le vent de corps	Ausatmen	शरीरमें रहनेवाले पवनोंका भेद
अपांपति	पु०	८१	জলদেবতা	the regent of water	le régent d'eau	Wassergott	वरुण
	पु०	२७३	সমুদ্র	sea, ocean	le océan, la mer	die See, der Ozean	समुद्र
अपांपित्त	क्ली०	७६	অগ্নি	fire	le feu	Feuer	आग
अपिधान	क्ली०	१०६	অন্তর্ধান	disappearance	disparition	die Verbergung	झपना

Sanskrit	Gender etc.	Page	Bengali	English	French	German	Hindi
अबद्ध	क्ली०	२०९	সমুদায়ার্থশূন্য বাক্য	unmeaning	absurde	ungereimt	अर्थहीन वचन
अब्ज	पु०	१०७	চন্দ্র	the Moon	la lune	der Mond	चन्द्रमा
अब्जयोनि	पु०	२७	বিধাতা	the creator	le dieu Brahman	Beiname des Brahman	विधाता
अब्द	पु०	१५५	বৎসর	a year	l'année	das Jahr	वर्ष
अब्धि	पु०	२७१	সমুদ্র	sea, ocean	le océan, la mer	die See, der Ozean	समुद्र
*अब्भ्र	क्ली०	९३	আকাশ	sky	le ciel	Himmel	आकाश
	क्ली०	१००	মেঘ	cloud	le nuage	die Wolke	बादल, मेघ
अब्रह्मण्य	क्ली०	२२६	বিপদ্‌জ্ঞাপক ধ্বনি (নাট্যোক্তি)	cry for help	l'appel au secours	ein Notruf	अवध्य वचन
अभिधान	क्ली०	२००	নাম	name, appellation	le nom, l' appellation	Name, Benennung	नाम
अभिध्या	स्त्री०	२३७	পরস্ববিষয়ক স্পৃহা	coveting another's property	regard de convoitise dans biens d'autres	das Begehren nach fremdem Gute	परधन लेनेकी इच्छा
अभिनय	पु०	२२९	নাট্যভাবাদির ব্যঞ্জনা	indication of passion (theatrical action)	l'indication de la passion	der Anzeiger	भाव बताना
अभिमान	पु०	२३५	গর্ব	Pride	l' orgueil	der Stolz	अहंकार
अभिलाष	पु०	२४०	ইচ্ছা	desire	le désir	Wunsch	इच्छा

Sanskrit	Gender etc.	Page	Bengali	English	French	German	Hindi
अभिशाप	पु०	२०३	মিথ্যাদূষণ	a false accusation	faux accusation	die unrichtige Anklage	झूठे दोष लगाना
अभ्यन्तर	क्ली०	६६	মধ্যাবকাশ	included space	l'intervalle	innerlich	बीचभाग
अभ्याख्यान	क्ली०	२०३	মিথ্যা বিবাদ	a groundless demand	l' exigence malfondée	das grundlos Verlangen	झूठे दोष लगाना
अभ्युपगम	पु०	१७५	অঙ্গীকার	promise, agreement	la promesse, l' harmonie	das Versprechen, die verständigung	प्रतिज्ञा
अभ्र	क्ली०	६३	আকাশ	the sky	le ciel	Himmel	आकाश
	क्ली०	६६	মেঘ	cloud	le nuage	die Wolke	मेघ, बादल
अभ्रमातङ्ग	पु०	६२	ইন্দ্রের হস্তী	Indra's elephant	l'éléphant d'Indra	Indras Elefant	देवराजके हाथी
अभ्रमु	स्त्री०	६८	ঐরাবত দিগ্গজের পত্নী	The wife of the elephant Airāvata	l'épouse de l'éléphant Airāvata	ein Weltelefants-weibchen	ऐरावत दिग्गजकी हस्तिनी
अभ्रमुवल्लभ	पु०	६३	ইন্দ্রের হস্তী	Indra's elephant	l'éléphant d'Indra	Indras Elefant	देवराजके हाथी
अभ्रि	स्त्री०	२८७	নৌকার মলা-পসারণের জন্য কাঠের কোদাল	a scraper	la pelle	(hölzerne) Spatel	नौका साफ करनेके कुदाली
अभ्रिय	त्रि०	१०१	মেঘোদ্ভূত, মেঘসম্পর্কীয়	belonging to clouds	à nuage	Donnergewölk	मेघोत्पन्न वस्तु

Sanskrit	Gender etc.	Page	Bengali	English	French	German	Hindi
*अभ्री	स्त्री०	२८७	নৌকার মলাপসারণের জন্য কাঠের কোদাল	a scraper	la pelle	(hölzerne) Spatel	नौका साफ करनेके कुदाली
अमर	पु०	१३	দেব	deity	la divinité	Götter	देवता
अमरावती	स्त्री०	६१	ইন্দ্রনগরী	Indra's city	la cité d'Indra	Indras Stadt	इन्द्रके नगरी
अमर्त्य	पु०	१६	দেব	deity	la divinité	Götter	देवता
अमर्ष	पु०	२३६	ক্রোধ	Wrath	la fureur	der Zorn	क्रोध, गुस्सा
अमानस्य	क्ली०	२७०	দুঃখ, প্রসববেদনা	Pain, labour Pain	la peine (d'accouchement), la peine	der Geburtsschmerzen, die Pein	पीड़ा, प्रसवकी पीड़ा
अमावस्या	स्त्री०	१४४	কৃষ্ণপক্ষের শেষ তিথি	the day of the New Moon	le jour de lune nouveau	Neumondsnacht	अमावस्या
अमावास्या	स्त्री०	१४३	কৃষ্ণপক্ষের শেষ তিথি	the day of the New Moon	le jour de lune nouveau	Neumondsnacht	अमावस्या
अमृत	क्ली०	६५	সুধা	Nectar	l'ambroisie	Nektar	अमृत
	क्ली०	१७७	মোক্ষ	beatitude, salvation	la béatitude, bonheur éternel	die ewige Seligkeit	मोक्ष
	क्ली०	२७५	জল	water	l'eau	Wasser	जल, पानी
अमृतान्धस्	पु०	१६	দেব	deity	la divinité	Götter	देवता
अम्बर	क्ली०	६३	আকাশ	the sky	le ciel	Himmel	आकाश
अम्बा	स्त्री०	२२६	মাতা (নাট্যোক্তি)	mother	la mère	die Mutter	माता
अम्बिका	स्त्री०	५३	দুর্গা	goddess Durgā	la déesse Durgā	die göttin Durgā	दुर्गादेवी

Sanskrit	Gender etc.	Page	Bengali	English	French	German	Hindi
अम्बु	क्ली०	२७६	জল	water	l'eau	Wasser	जल, पानी
अम्बुभृत्	पु०	१००	মেঘ	cloud	le nuage	die Wolke	मेघ, बादल
अम्ल	पु०	१८०	টক আস্বাদ	sour	sur	sauer	अम्ल, खट्टा
	त्रि०	१८०	টক	sour	sur, acide	sauer	अम्ल, खट्टा
अम्भस्	क्ली०	२७६	জল	water	l'eau	Wasser	जल, पानी
अम्भोरुह	क्ली०	३२१	পদ্ম	lotus	le lotus	der Lotos	पद्म
अम्मय	क्ली०	२७७	ফেনপ্রভৃতি জলবিকার	watery, pertaining to water	aqueux	Wässerig	जलविकार
